1918.

THE

OWKHAMBÂ SANSKṚIT SERIES;

A

LLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 244.

बृहदारण्यकवार्त्तिकसार

श्रीमद्विद्यारण्यस्वामिविरचितः ।

महेश्वरतीर्थकृतया लघुसङ्ग्रहाख्यया

टीकया समलङ्कृतः ।

पर्वतीयश्रीमन्नित्यानन्दपण्डितप्रदर्शितरीत्या

वझे इत्युपनामकेन भाऊशास्त्रिणा

संशोधितः ।

BRIHADARANYAKAVARTIKASARA

BY VIDYARANYA SWAMI,

WITH A COMMENTARY CALLED LAGHUSANGRAHA BY

MAHESHWAR TIRTH.

EDITED BY

BHAU SASTRI VAJHE.

FASCICULUS VI-६

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.

AGENTS:-

OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO; BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press.

BENARES.

Price Rupee one.

वाव तत्कुलमाचक्षते यस्मिन्कुले भवति य एवं वेद य उ हैवंविदा स्पर्द्धते ऽनुशुष्य हैवान्ततो म्रियत इत्यध्यात्मम् ॥ २१ ॥

अथाधिदैवतं ज्वलिष्याम्येवाहमित्यग्निर्दध्रे तप्स्याम्यहमित्यादित्यो भास्याम्यहमिति चन्द्रमा एवमन्या देवता यथादैवतꣳ स यथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुः, म्लोचन्ति ह्यन्या देवता न वायुः, सैषाऽनस्तमिता देवता यद्वायुः ॥ २२ ॥

अथैष श्लोको भवति–यतश्चोदेति सूर्योऽस्तं यत्र

महि । एवं निश्चित्य तथैवाभवन्, तस्मादेते वागादय एतेन प्राणनाम्ना प्राणा इत्याभिधीयन्ते । य एवं सर्वकरणानां प्राणात्मतां प्राणशब्दाभिधेयत्वं च वेत्ति तेन ह वाव तेनैव विदुषा तत्कुलमाचक्षते यस्मिन्कुले विद्वान्जातस्तद्विद्वन्नाम्नैव प्रथितं भवति । य इह यस्तु एवंविदा स्पर्द्धते सोऽस्मिन्नेव शरीरे शोषं गत्वाऽन्ते म्रियते । तथा च प्राणविदा सह स्पर्द्धा न कार्येति भावः । इत्यध्यात्ममित्युक्तोपसंहारः ॥ २१ ॥ अथाध्यात्मदर्शननिर्णयानन्तरमधिदैवतं देवेषु कस्य देवताविशेषस्य व्रतधारणे श्रेय इति विचार्यत इत्यर्थः । तदर्थं पूर्ववदाख्यायिकामाह *ज्वलिष्यामीत्यादिना । *एवमेतासामिति । एतासां मध्ये वायुः स्वेन वायुव्रतेनाभग्नव्रतोऽभूदिति शेषः । उक्तमेव व्यनक्ति *म्लोचन्तीति । स्वकर्मभ्य उपरमन्ते ऽग्न्यादिदेवताः न वायुः, कुतः ? सैषा ऽनस्तमिता देवता यद्वायुर्यो वायुः ॥२२॥ अथास्मिन्नर्थ एष श्लोको मन्त्रो भवति । यतश्चेत्यादिप्रश्नः तस्योत्तरमाह *प्राणाद्वा एष उदेति । यथा पुरुषस्य स्वापसमये वागादयः प्राणे विली-

च गच्छन्तीति प्राणाद्वा एष उदेति प्राणेऽस्तमेति तं देवाश्चक्रिरे धर्मं स एवाद्य स उ श्व इति यद्वा एते ऽमुर्ह्यध्रियन्त तदेवाप्यद्य कुर्वन्ति तस्मादेकमेव व्रतं चरेत् प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवादिति यद्युचरेत्समापिपयिषेत्तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति ॥ २३ ॥

यन्ते प्रबोधसमये च पुनर्जायन्ते तथा भानुरपि वायावेवोदयास्तमयौ प्राप्नोति, सूर्य इत्यग्न्यादीनामुपलक्षणम् । तथाच श्रुतिः यदा सूर्योऽस्तमेति वायुमेवाप्येतीत्यादि । तथाचाध्यात्ममधिदैवतं च प्राणवाय्वोर्व्रतं धार्यमिति भावः । मन्त्रस्य पूर्वार्द्धं व्याख्याय तं देवा इत्याद्युत्तरार्द्धं व्याचष्टे श्रुतिः *यद्वा इति । यत्प्राणादिव्रतमस्ति तदेते वागादयः अमुर्हि अमुष्मिन्नपि काले अध्रियन्त व्रतमद्यापि कुर्वन्ति । अयमर्थः तं प्राणवायुव्रतलक्षणं धर्मं देवा वागादयोऽग्न्यादयश्चक्रिरेऽद्यापि स धर्मः क्रियते श्वो भविष्यत्कालेऽपि करिष्यते नहि वागादयोऽग्न्यादयो वा परिस्पन्दरहिताः स्थातुमर्हन्ति ते, तेन प्राणादिव्रतं तैः सदाऽनुवर्त्यत इति । यस्मादेवं तस्मादन्योऽप्येकमेव व्रतं चरेत्तदेवाह *प्राण्यादपान्याच्च प्राणनापानव्यापारं कुर्यात्, अग्न्यादयो वागादयश्च मदात्मका अहं प्राणवाय्वात्मा सर्वपरिस्पन्दकृदिति ध्यायेदित्यर्थः । नेच्छब्दः परिभवे । यद्यस्माद्व्रतादहं प्रच्युतः स्यां तदा पाप्मा मृत्युः श्रमरूपी मामाप्नुवदाप्नुयादिति सन्त्रस्तो भूत्वा प्राणव्रतमामरणमनुतिष्ठेदिति भावः । यदि कदाचिदिदं व्रतमुच्चरेत्प्रारभेत तर्हि समापयितुमिच्छेत्तेन उ इति छेदः तेनामरणं व्रतधारणेन उ एव एतस्या एव प्राणदेवतायाः ॥ २३ ॥ एतत्सर्वं

इत्युपनिषदि तृतीयाध्यायस्य पञ्चमब्राह्मणं समाप्तम् ॥

वार्त्ति०॥ वागादयः श्रमग्रस्ता न प्राणस्तेन तेऽखिलाः॥
प्राणरूपमनुप्राप्य प्राणनाम्ना प्रकीर्तिताः ॥ ६७ ॥
इन्द्रियेषु परिस्पन्दः प्राणांशोऽर्थगृहीतयः ॥
इन्द्रियार्थस्ततः प्राणः सर्वरूपः प्रशस्यते ॥ ६८ ॥
प्राणोऽध्यात्मं यथा तद्वद्वायुः श्रेष्ठोऽधिदैवतम् ॥
प्राणवायुस्वरूपोऽहं प्राणिमीत्येव चिन्तयेत् ॥ ६९ ॥
आमृत्यनन्यव्यापारश्चिन्तयन्प्राणदेवताम् ॥
याति सायुज्यसालोक्यं ध्यानोत्कर्षानुसारतः॥७०॥
पूर्वोक्ताया विराट्प्राप्तेरनुवादोऽयमिष्यते ॥
उपासनान्तरं चेदं भवेत्पृथगुपक्रमात् ॥ ७१ ॥
इत्यनात्मविदां भावी संसारः सर्व ईरितः ॥
पञ्चमे ब्राह्मणे तेन हेयोऽसौ तत्त्वविद्यया ॥ ७२ ॥

इति वार्त्तिकसारे प्रथमाध्यायस्य पञ्चमं सप्तान्न-
ब्राह्मणं समाप्तम् ॥

सङ्ग्रहेण वर्णयन्वादिष्यामीत्याद्याख्यायिकायाः तात्पर्यमाह *वागादय इति ॥६७॥ इन्द्रियाणां प्राणात्मत्वप्राप्तौ लिङ्गमाह *इन्द्रियेष्विति । अर्थगृहीतिरर्थप्रकाशकत्वम् । इन्द्रियाणां प्राणात्मकत्वे फलितमाह *ततः प्राण इत्यादिना ॥ ६८ ॥ ॥ ६९ ॥ ७० ॥ प्राणोपास्तेरुक्तानुवादकत्वे अस्वरसं दर्शयन् पक्षान्तरमाह *उपासनेति ॥७१॥ एतद्ब्राह्मणतात्पर्यमुपसंहरति *इत्यनात्मविदामिति ॥ ७२ ॥

इति वार्त्तिकसारटीकायां प्रथमाध्यायस्य पञ्चमं सप्ता-
न्नब्राह्मणं समाप्तम् ॥

अविद्यासूत्रमारभ्यसार्द्धब्राह्मणवर्णितम् ॥
विद्यासूत्रात्पुरोक्तं च जगत्सङ्क्षिप्य वर्ण्यते ॥ १ ॥
अल्पत्वे सति तत्त्यागं सम्भावयति धीर्नृणाम् ॥
षष्ठेऽस्मिन्ब्राह्मणे तेन जगत्सङ्क्षिपति श्रुतिः ॥ २ ॥
श्रुतिः ॥ त्रयं वा इदं नाम रूपं कर्म ॥
वार्त्ति० ॥ ब्रह्मादिस्थावरान्तं यज्जगत्तत्त्रयमेव हि ॥
नाम रूपं कर्म चेति नास्ति वस्त्वन्तरं क्वचित् ॥ ३ ॥
श्रुतिः ॥ तेषां नाम्नां वागित्येतदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वैर्नामभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्त्ति ॥ १ ॥
वार्त्ति० ॥ नामानि नामसामान्ये सर्वाण्यन्तर्भवन्ति हि ॥
उद्भूतिस्थितिनाशेषु न विशेषाः पृथक्स्थिताः ॥ ४ ॥
सामान्याच्चेत्पृथग्भूता लुप्येरन्नेव ते सदा ॥
ततो नामविशेषाणां तत्सामान्येन सङ्ग्रहः ॥ ५ ॥
रूपकर्मविशेषाणां सङ्ग्रहं योजयेत्तथा ॥

ननु कृतसम्प्रात्तिकस्य प्राणविदो ब्रह्मविद्यायां मुख्याधिकारिणः संन्यासानन्तरमुपास्तिविधानं किमर्थमिति चेत्, उच्यते। नात्र मुमुक्षोरुपासनं विधीयते किन्तु ब्रह्मलोककामस्य कुटीचकादेस्तस्य च देवो भूत्वेत्यादिवचनादामरणमुपासनं विना तदसिद्धेस्तं प्रति तद्विधानमुपपन्नमित्युत्तरब्राह्मणतात्पर्यमाह *अविद्येति *सार्द्धेति। चतुर्थशेषेण पञ्चमब्राह्मणेन चेत्यर्थः ॥ १ ॥ सङ्क्षिप्य पुनर्जगतो वर्णनस्य प्रयोजनमाह *अल्पत्व इति ॥ २ ॥ अक्षरार्थमाह *ब्रह्मेति ॥ ३ ॥ त्रयं वा इदमिति।

श्रुतिः—अथ रूपाणां चक्षुरित्येतदेषामुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषां सामैतद्धि सर्वै रूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्त्ति॥२॥
अथ कर्मणामात्मेत्येतदेषामुक्थमतो हि सर्वाणि

इदं व्याकृताव्याकृतात्मकं विश्वं नाम रूपं कर्मेति त्रितयमेवेत्यर्थः। तेषां नाम्नामित्यादेरर्थमाह *नामानीत्यादिना ॥४॥५॥ श्रुतौ वागित्येतदित्यनेन नामसामान्यमुच्यते। तेषां नाम्नां सामान्यविशेषात्मकानां मध्ये एतत् नामसामान्यमेषां नामविशेषाणामुक्थमुपादानमिति योजना। तत्र हेतुः *अतो हीति। नामसामान्याद्धि सर्वाणि विशेषनामानि चैत्रो मैत्र इत्यादीन्युत्तिष्ठन्त्युत्पद्यन्ते। तथाच कार्याणामुपादानाव्यतिरेकान्नामविशेषाणां नामसामान्येऽन्तर्भाव इति भावः। तत्रैव हेत्वन्तरमाह *एतदिति। एतन्नामसामान्यमेषां नामविशेषाणां साम सामान्यं कल्पनाधिष्ठानमिति यावत्। तथाच नामविशेषाणां तत्सामान्ये कल्पितत्वेन तन्मात्रतेत्यर्थः। तत्रैव हेत्वन्तरमाह *एतदेषां ब्रह्मेति। एतन्नामसामान्यमेषां नामविशेषाणां ब्रह्म आत्मा स्वरूपमिति यावत्। तन्नामसामान्यं हि यस्माद्विशेषनामानि विभर्त्ति स्वरूपवन्ति करोति। सामान्यापृथक्कृतस्य विशेषस्य स्वरूपान्तराभावादिति भावः। एवं कार्यकारणत्वोपपत्तेः सामान्यविशेषवत्त्वोपपत्तेरात्मप्रदानोपपत्तेश्च नामविशेषाणां नामसामान्यमात्रता सिद्धा; एवमुत्तरयोरपि सर्वं योज्यम् ॥१॥ अथ नामव्याकरणानन्तरं रूपाणां रूपविशेषाणां प्रकाश्यविशेषाणामिति यावत्। चक्षुःशब्देनापि प्रकाश्यसामान्यं लक्ष्यते। एषां रूपाणामेतच्चक्षुरुक्थमित्यन्वयः॥२॥ अथ कर्मणा-

कर्माण्युत्तिष्ठन्त्येतदेषां सामैतद्धि सर्वैः कर्मभिः समम् एतदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि बिभर्ति ॥

वा० शब्दस्पर्शादयः सर्वे रूपात्मानो निरूपणात् ॥६॥
नामादित्रितयस्यापि स्यात्सङ्घातेन सङ्ग्रहः ॥
त्रिदण्डविष्टम्भ इव वपुष्येकीभवेत्त्रयम् ॥ ७ ॥

श्रुतिः–तदेतत्त्रय ँ सदेकमयमात्माऽऽत्मो वा एकः सन्नेतत्त्रयं तदेतदमृत ँ सत्येन च्छन्नं प्राणो वा अमृतं नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः ॥ ३ ॥

इत्युपनिषदि तृतीयाध्याये षष्ठं ब्राह्मणं समाप्तम् ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

मित्यत्राप्यात्मशब्देन शरीरवाचिना लक्षितं क्रियासामान्यं तद्विशेषाणां कारणमित्यर्थः। एतत्सर्वमाभिप्रेत्योक्तन्यायमन्यत्र। *रूपकमिति। रूपशब्दः प्रकाश्यमात्रपर इत्याभिसन्धायाह *शब्दस्पर्शादय इति ॥ ६ ॥ अत्र व्यन्नात्मप्रक्रियोक्तं सर्वमनुसन्धेयम्। तदेतत्त्रयमित्याद्यवतारयति *नामादीति । सङ्ग्रहोक्तस्यापि नामादित्रयस्य पुनः सङ्ग्रह उच्यत इत्यर्थः। एवं वाक्यमवतार्य तदर्थमाह *त्रिदण्डेति ॥ ७ ॥

तदेतत्त्रितयं संहतं सदेकं भवतीति श्रुत्यक्षरार्थः। केनात्मना एकत्वमिति तत्राह श्रुतिः *अयमात्मेति । अयं पिण्डः कार्यकरणसङ्घातो नामादित्रयविकारः तदात्मक इत्यर्थः । नामादित्रयस्य देहमात्रत्वे कथं व्यवहारासाङ्कर्यमित्याशङ्क्याह श्रुतिः *आत्मो वा एकः सन्नेतत्त्रयमिति । आत्मा उ वै इति पदच्छेदः। आत्मा देहः एकः सन् देहत्वेनाकारेण एकोऽप्येतत्त्रयं नामादित्रयात्मको-

वार्त्ति० अध्यात्मं देह उद्दिष्टोऽधिदैवं तु विराडिति ॥
वपुष्यन्तःस्थितः प्राणश्छन्नोऽध्यात्माधिदैवयोः ॥८॥
नित्यः प्राणो लिङ्गरूप आसंसारविमोक्षणात् ॥
सोऽनित्यपिण्डस्याधारो गृहस्तम्भवदान्तरः ॥ ९ ॥
सोऽयं देहादिसङ्घातो नामादित्रयसङ्ग्रहः ॥
सङ्घाते दृश्यते नामरूपकर्मत्रयं जनैः ॥ १० ॥
एतद्दृष्टान्ततः केचिद्भेदाभेदौ परात्मनि ॥
आहुः, तत्तु न युक्तं स्यात्परस्परविरोधतः ॥ ११ ॥

ऽपि भवतीति न व्यवहारसाङ्कर्यमित्यर्थः । तदेतदमृतमित्यादेरर्थं वक्तुमध्यात्माधिदैवशब्दयोरर्थमाह *अध्यात्ममिति । तदेतदित्यादिवाक्यतात्पर्यमाह *वपुषीति ॥ ८ ॥ श्रुतौ सत्येन च्छन्नममृतमित्यस्य व्याख्या प्राणो वा अमृतमिति ॥३॥ तत्र प्राणशब्दार्थं वदन् तस्यामृतत्वे हेतुमाह *नित्यः प्राण इति ॥९॥ नामरूपे इत्यादेरयं भावः—पञ्चीकृतपञ्चमहाभूततत्कार्यात्मकं सर्वं वैराजशरीरं सत्यं, सच्च त्यच्चेति व्युत्पत्तेः । तच्च वैराजशरीरम् अपञ्चीकृतपञ्चमहाभूततत्कार्यात्मककरणभूतसप्तदशलिङ्गस्य सूत्राख्यस्याच्छादकं तत् खल्वनात्माऽपि स्थूलदेहच्छन्नत्वाद् दुर्ज्ञानं, तेनापि च्छन्नं प्रत्यग्वस्तु सुतरामिति तज्ज्ञानेऽवहितैर्भाव्यमिति ।

प्रकृतमुपसंहरति *सोऽयमिति । देहस्य त्रयात्मत्वं न केवलं वाक्यीयं, प्रत्यक्षमपीत्याह *सङ्घात इति ॥ १० ॥ केचित्तु—ब्रह्म जगतो भिन्नाभिन्नं वस्तुत्वात् तथा देहो देहत्वेनाभिन्नोऽपि नामादिना भिन्न इति वदन्ति, तन्मतमनूद्य वैषम्येन दूषयति *एतादित्यादिना ॥११॥ ब्राह्मणार्थमुपसंहरति *तदि-

दृश्यस्य मायिकत्वेन न विरोधोऽस्ति कश्चन ॥
तदेवं ब्राह्मणे षष्ठे जगत्सङ्ग्रह ईरितः ॥ १२ ॥
ब्रह्मण्यध्यारोप एवं तृतीयेऽध्याय ईरितः ॥
मुमुक्षुभिर्निवर्त्योऽयं तत्त्वगोचरविद्यया ॥ १३ ॥
द्वेसहस्रे तथा सप्त शतान्यथ तु षोडश ॥
सङ्ख्याताः सङ्ख्यया श्लोकास्तृतीयाध्यायसङ्ग्रहे॥१४॥

इति वार्तिकसारे प्रथमाध्यायस्य षष्ठं ब्राह्मणं समाप्तम्॥
प्रथमोऽध्यायः समाप्तः ॥ १ ॥

ति ॥१२॥ अध्यायतात्पर्यं निगमयति *ब्रह्मणीति ॥१३॥१४॥

इति वार्त्तिकसारव्याख्याने प्रथमाध्यायस्य षष्ठं ब्राह्मणं समाप्तम्।
प्रथमोऽध्यायः समाप्तः ॥ १ ॥

द्वितीयोऽध्यायः ।

योऽध्यारोपस्तृतीयोक्तश्चतुर्थेऽसावपोद्यते ॥
विद्यासूत्रस्य तात्पर्यमथ वाऽत्र निरूप्यते ॥ १ ॥
सन्ति षड् ब्राह्मणान्यत्र प्रथमं ब्राह्मणत्रयम् ॥
अपवादप्रधानं सद्ब्रह्मतत्त्वनिरूपकम् ॥ २ ॥
चतुर्थे त्वात्मसूत्रस्य साक्षात्तात्पर्यविस्तृतिः ॥
फलानुसारी सर्वात्म्यविस्तारः पञ्चमे स्मृतः ॥ ३ ॥
विद्यावंशस्य विस्तारो जपार्थं षष्ठ ईरितः ॥
जपाद् गुरूननुस्मृत्य विद्यां प्राप्नोति सुस्थिराम् ॥४॥
अपवादप्रधानं यद्ब्राह्मणत्रयमीरितम् ॥
तत्राद्येनात्मता तावत्प्राणादीनामपोद्यते ॥ ५ ॥
अतः प्राणात्मवाद्यत्र बालाकिः पूर्वपक्ष्यभूत् ॥
ब्रह्मात्मतत्त्वविद्राजा सिद्धान्ती प्रतिवक्ति तम् ॥६॥

॥ श्रीगणेशाय नमः ॥

साष्टाङ्गनत्यैव वरानभीष्टानष्टाङ्गसाध्यान्स्वपदं च दास्ये ॥
इतीव सन्दर्शितबोधमुद्रो दयासमुद्रोऽवतु रामभद्रः ॥ १ ॥

चतुर्थाध्यायप्रतिपाद्यमर्थं सङ्गृह्णाति *योऽध्यारोप इति ॥ १ ॥ ब्राह्मणानामपि सङ्ख्याकथनपूर्वकं क्रमेण तात्पर्यमाह *सन्तीत्यादिना ॥२॥३॥४॥५॥ आद्यब्राह्मणेन प्राणादेरात्मत्वं निरस्यते इत्यत्र लिङ्गमाह *अतः प्राणेति ॥ ६ ॥ आख्यायिका-

सुखावबुद्धये यद्वा श्रद्धाचारादिसिद्धये ॥
आख्यायिका, सुखाद्बोध उक्तिप्रत्युक्तितो भवेत्॥७॥
अपृष्टोऽपि ब्रह्म तेऽहं ब्रवाणीति यदुक्तवान् ॥
गार्ग्यस्तेनाजातशत्रोः श्रद्धालुत्वं प्रतीयते ॥ ८ ॥
श्रद्धालुरधिकारी यो जिज्ञासुर्विनयान्वितः ॥
अपृष्टेनापि वक्तव्या तस्मै विद्येति शास्त्रतः ॥ ९ ॥
विप्रोपसत्तिं यद्राजा निषिषेध ततोऽधमः ॥
उत्तमश्चैवमाचार इति विज्ञापितं भवेत् ॥ १० ॥
प्रश्नोत्तरे स्वयं राजा यदुवाच ततो गुरुः ॥
अबुद्धमपि सच्छिष्यं नोपेक्षेतेति गम्यते ॥ ११ ॥
श्रुतिः—दृप्तबालाकिर्हानूचानो गार्ग्य आस स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति स होवाचा-

---

रूपेण प्रवृत्तायाः श्रुतेस्तात्पर्यमाह *सुखेति । तस्याः सुखावबोधहेतुत्वं श्रद्धाहेतुत्वं च क्रमेणोपपादयति *सुखादित्यादिना ॥७॥८॥९॥ आचारविशेषप्रदर्शनार्थत्वं दर्शयति *विप्रेति । उप त्वा यानीति बालाकिकृतमुपगमनं निषिध्य राज्ञा केवलमुपदेशात्—उत्तमादधमेन प्रणिपातोपसदनद्वारा विद्या ग्राह्या, अधमादुत्तमेन तद्व्यतिरेकेण श्रद्धादिमात्रेण सा लभ्येति ज्ञापनार्थं चायमारम्भः॥१०॥तूष्णीम्भूतं गार्ग्यं प्रति राज्ञा एव प्रश्नप्रतिवचनोक्तेरर्थान्तरमपि प्रतीयत इत्याह *प्रश्नेति ॥ ११ ॥

श्रुतौ *दृप्तेति। दृप्तो गर्वितः। असम्यग्ब्रह्मवित्त्वात्। बलाकाया अपत्यं बालाकिः, दृप्तश्चासौ बालाकिश्चेति तथा । अनूचानो वाग्मी । गार्ग्यो गोत्रतः । आस बभूव । स कदाचिदजातशत्रुनामानं काशिराजमधिगम्य ब्रह्म तुभ्यं ब्रवाणीत्यु-

जातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति ॥ १ ॥

स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन् संवदिष्ठा अतिष्ठाः सर्वेषां भूतानां मूर्द्धा राजेति वा

वाच स एवमुक्तो राजा एतस्यां वाचि निमित्ते गवां सहस्रं ददे इत्युवाच । ब्रह्म ते ब्रवाणीति वाङ्मात्रं निमित्तीकृत्य गोसहस्रप्रदाने राज्ञोऽभिप्रायं श्रुतिरेवाह *जनक इति। जनको दाता, जनकः श्रोता वक्तेति च ब्रह्मशुश्रूषवो विवक्षवः प्रतिजिघृक्षवश्च जना धावन्ति तत्सर्वमयं मय्यपि सम्भावितवानिति प्रागुक्तवागेव सहस्रदाने निमित्तम् ॥ १ ॥ एवं राजानं शुश्रूषुं स गार्ग्य उवाच—य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति । अयमर्थः—आदित्ये चक्षुषि च एकोऽभिमानी स चक्षुर्द्वारा हृदि प्रविष्टोऽस्मिन्देहे कर्त्ता भोक्ता चेति व्यवस्थितः। एतमादित्यं चक्षुर्बुद्धिनिष्ठं च पुरुषमेकीकृत्याहं ब्रह्मेत्युपासे त्वमप्येवमुपास्वेत्येवमुक्तो राजा मा मेति हस्तेन निवारयन्प्रत्युवाच । एतस्मिन्ब्रह्मणि मा संवदिष्ठाः संवादं माकार्षीः। मयाऽप्येतज्ज्ञातमन्यदेव वाच्यमिति भावः । ब्रह्ममात्रं त्वं जानीषे न तद्विशेषणोपासनफलानीति च न मन्तव्यम् । एतदपि मया ज्ञायत एवेत्याह । अतीत्य सर्वाणि भूतानि तिष्ठतीत्यतिष्ठाः, सर्वेषां भूतानां मूर्द्धा शिरः, राजा दीप्तिगुणोपेतत्वात् एतैर्विशेषणैर्विशिष्टमादित्याख्यं ब्रह्माहमेवेत्येतं पुरुषमुपास इति । एवं त्रिभिर्गुणैर्विशिष्टं ब्रह्म जानामीत्युक्त्वा तदुपासकस्य फलमपि दर्शयति *स य एतमित्या-

अहमेतमुपास इति स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्द्धा राजा भवति ॥ २ ॥

स होवाच गार्ग्यो य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा बृहन्पाण्डरवासाः सोमो राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते ॥ ३ ॥

स होवाच गार्ग्यो य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनीहास्य प्रजा भवति ॥ ४ ॥

दिना । यथागुणोपासनमेव फलं, तं यथायथोपासते तदेव भवतीति श्रुतेः ॥२॥ संवाददोषेणादित्यब्रह्मणि प्रत्याख्याते ब्रह्मान्तरमाह गार्ग्यः । य एवासौ चन्द्रे मनसि बुद्धौ च एकः पुरुषः, शेषं पुर्ववत् । बृहद् भानुमण्डलाद् द्विगुणं चन्द्रमण्डलमिति प्रसिद्धेः । पाण्डुरं शुक्लं वासो यस्य सः चन्द्राभिमानी प्राणः, आपो वासः प्राणस्येति श्रुतेः । सोमशब्देन सोमलताऽपि गृह्यते, चन्द्रलता मनोबुद्धिनिष्ठं च पुरुषमेकीकृत्याहमुपासे, य एवमुपास्ते तस्याहरहः सोमो ऽभिषुतः प्रकृतौ, प्रसूतश्च विकृतौ । यथोक्तोपासकस्य प्रकृतिविकृत्यात्मकयागानुष्ठानसामर्थ्यं लीलालभ्यमित्यर्थः ॥३॥ विद्युति त्वाचि हृदये चैका देवता तस्यास्तेजस्वीति विशेषणं, तत्फलं तेजस्वी ह भवति, अस्य प्रजा च तेजस्विनी भवति ॥ ४ ॥ आकाशे हृद्याकाशे चैका देवता ।

स होवाच गार्ग्यो य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः पूर्णमप्रवर्तीति वा अहमेतमुपास इति स य एतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नास्यास्माल्लोकात्प्रजोद्वर्तेत ॥ ५ ॥

स होवाच गार्ग्यो य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ॥ ६ ॥

स होवाच गार्ग्यो य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा विषासहिरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते विषासहिर्ह भवति विषासहिर्हास्य प्रजा भवति ॥ ७ ॥

पूर्णमप्रवर्तीति विशेषणद्वयम् । अप्रवर्त्तित्वमक्रियत्वम् । पूर्णत्वविशेषणफलं *पूर्यत इत्यादि । अक्रियत्वविशेषणफलं *नेत्यादि । प्रजासन्तानविच्छित्तिर्नेत्यर्थः ॥ ५ ॥ वायौ प्राणे हृदि चैका । इन्द्रः परमेश्वरः वैकुण्ठो अप्रसह्यः न परैर्जितपूर्वा सेना मरुतां गणत्वप्रसिद्धेः सेनात्वम् । जिष्णुर्जयनशीलो, अपराजिष्णुः न परैर्जितस्वभावः, अन्यतस्त्यानां सपत्नानां जयनशीलो भवतीति विशेषणत्रयस्य क्रमेण फलत्रयमिति ध्येयम् ॥ ६ ॥ अग्नौ वाचि हृदि चैका । विषासहिः परेषां मर्षयिता ॥ ७ ॥ अप्सु रेतसि हृदये चैका । प्रतिरूपोऽनुरूपः, श्रुतिस्मृत्यप्रतिकूल इत्यर्थः । प्रतिरूपं श्रुतिस्मृतिशास-

स होवाच गार्ग्यो य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति स य एतमेवमुपास्ते प्रतिरूपꣳ हैवैनमुपगच्छति नाप्रतिरूपमथो प्रतिरूपोऽस्माज्जायते ॥ ८ ॥

स होवाच गार्ग्यो य एवायमादर्शे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा रोचिष्णुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते रोचिष्णुर्ह भवति रोचिष्णुर्हास्य प्रजा भवत्यथो यैः सन्निगच्छति सर्वाꣳस्तानतिरोचते ॥ ९ ॥

स होवाच गार्ग्यो य एवायं यन्तं पश्चाच्छब्दोऽनूदेत्येतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा असुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वꣳ हैवास्मिँल्लोक आयुरेति नैनं पुरा कालात्प्राणो जहाति ॥ १० ॥

नानुरूपमेवैनमुपगच्छति न विपरीतम् । अस्माद् उपासितुस्तथाविध एव जायते॥८॥आदर्शे हार्दे सत्त्वशुद्धिस्वाभाव्ये चैका । रोचिष्णुर्दीप्तिस्वभावः ॥ ९ ॥ यन्तं गच्छन्तं य एवायं शब्दः पृष्ठतोऽनूदेति, अध्यात्मं च जीवनहेतुः प्राणस्तमेकीकृत्याह *एतमेवाहमित्यादिना। तस्य गुणः असुः प्राणो जीवनहेतुरिति। तस्य फलं सर्वमायुरस्मिल्लोके एतीति। तस्यैव व्याख्यानम्—एनं रोगादिभिः पीड्यमानमपि प्रारब्धकालात्प्राक् प्राणो न जहातीति॥१०॥दिक्षु कर्णयोः हृदि चैका देवताऽवियुक्तस्वभावावश्विनौ। गुणस्तु द्वितीयवत्त्वम् अनपगत्वमन्योन्यमावियुक्तत्वं, दि-

स होवाच गार्ग्यो य एवायं दिक्षु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स य एतमेवमुपास्ते द्वितीयवान्ह भवति नास्माद्गणश्छिद्यते ॥ ११ ॥

स होवाच गार्ग्यो य एवायं छायामयः पुरुषः एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा मृत्युरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वꣳ हैवास्मिँल्लोक आयुरेति नैनं पुरा कालान्मृत्युरागच्छति ॥ १२ ॥

स होवाच गार्ग्यो य एवायमात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा आत्मन्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते आत्मन्वी ह भवत्यात्मन्विनी हास्य प्रजा भवति स तूष्णीमास गार्ग्यः ॥ १३ ॥

शामाश्विनोश्चैवंधर्मत्वात्। गणाविच्छेदः साधुभृत्ययुक्तत्वम्॥११॥ छायायां बाह्यतमसि अध्यात्मं चावरणात्मकाज्ञाने हृदि चैका। मृत्योरनागमने रोगाद्यभावः शब्दब्रह्मोपासकादस्य विशेषः ॥१२॥ व्यष्ट्युपास्तिमुक्त्वा समष्ट्युपास्तिमाह—प्रजापतौ बुद्धौ हृदि चैका देवता। आत्मन्वीति विशेषणम्। फलं तु आत्मन्वी आत्मवान्वश्यात्मा भवतीति यावत्। अस्य प्रजा च तादृशी भवति स्वयं परिज्ञातत्वेन। एवं क्रमेण प्रत्याख्यातेषु ब्रह्मसु गार्ग्यः क्षीणब्रह्मविज्ञानस्तूष्णीमवाक्शिरा आस ॥१३॥ तथाभूतं गार्ग्यमालक्ष्य राजोवाच *एतावन्नू३ इति। विचारार्थे·

स होवाचाजातशत्रुरेतावन्नू३इत्येतावद्धीति ॥

वार्त्ति० अध्यात्ममधिदैवं च ब्रह्म स्यात्प्राणदेवता ॥
समष्टिव्यष्टिरूपाऽसाविति गार्ग्यस्य निश्चयः ॥१२॥
रव्याद्या व्यष्टयः प्रोक्ताः समष्टिस्तु विराड् भवेत् ॥
न मुख्यब्रह्मतैतेषामिति राज्ञो विनिर्णयः ॥ १३ ॥
अज्ञाते जगदज्ञातं ज्ञाते ज्ञातं तु यत्र तत् ॥
तदेव ब्रह्म पूर्णत्वान्न रव्याद्या अकृत्स्नतः ॥ १४ ॥
अव्यावृत्ताननुगते स्वतःसिद्धात्मवस्तुनि ॥
मुख्यार्थो ब्रह्मशब्दोऽतो वेदितव्यं तदेव हि ॥ १५ ॥
प्रतीचि साक्षाद्विज्ञाते ज्ञेयं सर्वं समाप्यते ॥
निःशेषतस्तमोध्वस्तेः पुमर्थश्च समाप्यते ॥ १६ ॥
ब्रह्म विद्धि तदेव त्वं नत्विदं यदुपासते ॥
इति श्रुतिरुपास्यस्य मुख्यब्रह्मत्ववारिका ॥ १७ ॥

प्लुतिः । किमेतावद् ब्रह्म विज्ञातम् आहोस्विदधिकमप्यस्ति ? इति । गार्ग्य आह *एतावद्धीति । अजातशत्रुः 'एतावता विदितेन न ब्रह्म विदितं भवति'इत्याह ।

एत्सर्वमभिप्रेत्य एवमुक्तवतोर्गार्ग्यराज्ञोराशयं स्फुटयति *अध्यात्ममित्यादिना ॥ १२ ॥ १३ ॥ गार्ग्योक्तिब्रह्मणाममुख्यत्वं राज्ञा निश्चीयते चेत्, किं तर्हि तदभिप्रेतं ब्रह्म ? तदाह *अज्ञात इति ॥ १४ ॥ पूर्णमेव ब्रह्मेत्यत्र निमित्तमाह *अव्यावृत्तेति । एवंविधब्रह्मणो मुख्यत्वे फलितमाह *अतो वेदितव्यमिति॥१५॥ब्रह्मणि ज्ञाते कथं जगद् ज्ञातं भवति, न ह्यन्यस्मिन् ज्ञातेऽन्यज्ञानमुपलभामहे इत्याशङ्क्य तद्वाक्यतात्पर्यमाह *प्रतीचीति । उक्तेऽर्थे हेतुमाह *निःशेषेति ॥१६॥

तस्मादुपासको गार्ग्यो न मुख्यं ब्रह्मवेत्त्यतः ॥
अन्वयव्यतिरेकाभ्यां बोधयामास तं नृपः ॥ १८ ॥

श्रुतिः–नैतावता विदितं भवतीति स होवाच गार्ग्य उप त्वा यानीति ॥ १४ ॥

स होवाचाजातशत्रुः प्रतिलोमं चैतद्यद्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञपयिष्यामीति तं पाणावादायोत्तस्थौ तौ ह पुरुषꣳ सुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयाञ्चक्रे बृहन् पाण्डरवासः सोम राजन्निति स नोत्तस्थौ तं पाणिनाऽऽपेषं बोधयाञ्चकार स होत्तस्थौ ॥ १५ ॥

गार्ग्योक्तब्रह्मणाममुख्यत्वे श्रुतिमपि संवादयति *ब्रह्मेति ॥१७॥ उक्तमर्थमुपसंहरति *तस्मादिति ।

श्रुतौ–नैतावता विदितं भवतीति वदता राज्ञा 'अधिकं ब्रह्म ज्ञातव्यमस्ति' इति दर्शितं भवति । तच्चानुपसन्नाय न वक्तव्यमित्याचारविधिज्ञो गार्ग्यः स्वयमेवाह *उप त्वा यानि, त्वामुपगच्छामीत्यर्थः॥ १४॥ प्रतिलोमं विपरीतं यद् ब्राह्मणः क्षत्रियमुपगच्छेच्छिष्यवृत्त्या 'ब्रह्म मे वक्ष्यति' इत्येतद् आचारविधिशास्त्रविरुद्धम्। शास्त्रे क्वचिद्विप्रस्यापि राज्ञोपगमनविधानम्-आपदि योगक्षेमार्थमिति द्रष्टव्यम्। तस्मात्तिष्ठ त्वमाचार्य एव सन्, विज्ञापयिष्याम्येव त्वामहम्। ततः सलज्जं गार्ग्यमालक्ष्य तस्य विश्रम्भजननाय तं हस्ते गृहीत्वा उत्थितवन्तौ विप्रराजौ, क्वचिद्राज्ञः गृहप्रदेशे सुप्तं पुरुषमागतौ, तं च पुरुषं राजा बृहन्नित्यादिनामभिर्बोधितवान् । एवं बोधितोऽपि सुप्तो नोत्तस्थौ । तमप्रबुद्ध्यमानं पाणिना आपिष्य बोधितवान् । तेन स चोत्थितवान् । एतत्सर्वमभिप्रेत्याह *अन्वयेति । बो-

वार्त्ति०–स्याद्विज्ञानमयो भोक्ता न प्राण इति जागरे ॥
विवेको दुःशको यस्मादत्र द्वावपि सुस्थितौ ॥ १९ ॥
यो विज्ञानमयः सुप्तावसावुपरतिं गतः ॥
वर्तते पूर्ववत्प्राणो विवेकः सुशकस्तदा ॥ २० ॥
तस्मात्सुषुप्तं पुरुषमामन्त्र्य प्राणनामभिः ॥
अप्रबोधादभोक्तृत्वं प्राणस्यास्पष्टयन्नृपः ॥ २१ ॥
यदि भोक्ता भवेत्प्राणो जाग्रद्वच्छब्दमागतम् ॥
अश्रोष्यन्नाश्रृणोत्तस्मान्न स्याद्भोक्तोपलादिवत्॥२२॥
न विज्ञानमयोऽप्येतदश्रृणोदिति चेत्तथा ॥
अस्त्वश्रवणमेतस्य प्राणमात्रानहङ्कृतेः ॥ २३ ॥
न बुध्यते देवदत्त आहूतोऽङ्गुलिनामभिः ॥
तावन्मात्रानहम्मानादेवं प्राणस्य नामभिः ॥ २४ ॥

धनार्थं प्रयुक्तनामाश्रवणाद् आपेषणाच्चोत्थानाद्गार्ग्यस्य भोक्तृत्वेनाभिमतप्राणव्यतिरिक्तो विज्ञानमयो भोक्तेति बोधितवानित्यर्थः ॥ १८ ॥ उक्तप्रबोधनार्थं सुप्तपुरुषगमने निमित्तमाह *स्यादिति त्रिभिः । अत्र जाग्रदवस्थायाम् ॥ १९ ॥ २० ॥ अस्पष्टयत् स्पष्टीकृतवान् ॥ २१ ॥ *यदीति । विमतो न भोक्ता स्वनामश्रवणासमर्थत्वात् पाषाणवदित्यर्थः ॥ २२ ॥ अत्र जीवे व्यभिचारं शङ्कते *न विज्ञानेति । काश्येष्टात्मनः सर्वकार्यकरणाभिमानित्वादङ्गुलीस्थानीयप्राणनाम्नां स्वनामत्वमेवासिद्धमिति परिहरति *अस्त्वित्यादिना । यथा हस्तः पादोऽङ्गुलिरित्यादिनामोक्तेर्देवदत्तो नोत्तिष्ठति, सर्वदेहाभिमानित्वेन तन्मात्रानभिमानित्वात्, तद्वज्जीवोऽपीत्यर्थः ॥ २३ ॥ २४ ॥ सुप्तौ यथा जीवेन स्वनामान्यपि न गृह्यन्ते एवं प्राणस्यापि संहृत-

स्वनामान्यपि नो जीवः सुप्तो वेत्तीति चेत्तदा ॥
जीवो नामात्र चिन्मात्रः सोपाधिर्वेति गम्यताम्॥२५॥
बोधाबोधौ चितेर्नस्तः कूटस्थज्ञप्तिमात्रतः ॥
उपाधिलोपात्सोपाधिर्न वेत्तीति तु युज्यते ॥ २६ ॥
श्रोत्रादीनामुपाधीनां सुप्तावुपरतत्वतः ॥
यथा जीवो न वेत्त्येवं प्राणोऽपीत्यसदुच्यते ॥ २७ ॥
नेन्द्रियाणां भवेत्स्वापो यदि प्राणप्रधानता ॥
नामात्या शेरते यस्माद्राज्ञि स्वामिनि जाग्रति॥२८॥
स्वापः प्राणस्य नाशङ्क्यो यतः स्वप्नसुषुप्तयोः ॥
कुर्वाणस्तुमुलं शब्दं प्राण आस्ते प्रबोधवत् ॥ २९ ॥
तस्माद्भोक्तृतैवास्य स्वनामाप्रतिबोधने ॥
हेतुर्वाच्यस्तथा प्राणदेवताया अभोक्तृता ॥ ३० ॥
देवताप्रतिषेधार्थं बोध्यते चन्द्रनामभिः ॥

करणत्वात्स्वनामाग्रहो, नाभोक्तृत्वादिति मत्वा शङ्कते *स्वनामानीति । विषमो दृष्टान्तः इति वक्तुं जीवशब्दार्थं पृच्छति *जीव इति ॥ २५ ॥ द्वितीये स्वनामाश्रवणमुपपद्यत इत्याह *उपाधीति ॥ २६ ॥ उपाधिलोपादित्युक्तं व्यनक्ति *श्रोत्रेति । संहतकरणत्वादेव जीववत्प्राणस्यापि स्वनामाग्रहणमिति पराभिमतशङ्कां धुनीते *यथेति ॥ २७ ॥ प्राणस्य भोक्तृत्वे करणोपसंहारासम्भवं दृष्टान्तेन स्फोरयति *नेति ॥ २८ ॥ अस्तु तर्हि प्राणस्याप्युपरतत्वात्सुप्तौ स्वनामाग्रहणमिति चेत्, न । अनुभवविरोधादित्याह *स्वाप इति ॥२९॥ प्राणो यथाऽभोक्ता एवं प्राणाधिष्ठात्री चन्द्रदेवताऽपि नास्मिन्देहे भोक्त्रीत्याह *तथा प्राणेति॥३०॥देवताया अभोक्तृत्वासिद्ध्यर्थ-

तदबोधादभोक्तृत्वं देवतायाः सुनिश्चितम् ॥ ३१ ॥
प्राणस्याभोक्तृतां गार्ग्यो व्यबुध्येत ततो नृपः ॥
विज्ञानमयबोधाय चक्रे यत्नमुपायतः ॥ ३२ ॥
आपिष्यापिष्य बहुशः सुप्तं राजा व्यबोधयत् ॥
आपेषणोत्थसङ्क्षोभात्ततोऽसौ प्रत्यबुध्यत ॥ ३३ ॥
आपेषाल्लीनबुध्यादिसमुत्पत्तौ परात्मनः ॥
घटाकाशवदुत्पत्तिर्या प्रबोधोऽयमिष्यते ॥ ३४ ॥
अत आपेषणाद्योऽसावुत्थितः करणैः सह ॥
राजेव सचिवैः सार्द्धं स भोक्तेत्यवसीयताम् ॥३५ ॥
क्रोधहर्षभयोद्वेगज्ञानधर्मैर्विशेषयन् ॥
शरीरं यः समुत्तस्थौ स भोक्तेत्यवसीयताम् ॥३६॥
मृतकल्पमिमं देहं स्वाचिताऽऽवेशयन्निव ॥

मेव बृहन्नित्यादिचन्द्रनामभिः सम्बोधनं कृतमित्याह *देवतेति । नच-तर्हि प्राणस्य प्राणनामभिरसम्बोधनादेवानुत्थानं नाभोक्तृत्वादिति शङ्क्यम् । प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रमा इत्यत्र चन्द्रप्राणयोरैक्योक्तेस्तन्नाम्न एव तन्नामत्वादिति भावः ॥ ३१ ॥ तं पाणिनाऽऽपेषमित्यादेस्तात्पर्यमाह *प्राणस्येत्यादिना ॥ ३२ ॥ स होत्तस्थावित्यस्यार्थमाह *आपेषणेति ॥ ३३ ॥ ननूत्थानं नामात्मनः सुप्तेरुद्बोधः, तस्य स्वरूपत्वेनानुत्पत्तेः किं पाणिपेषणेन ? इयत आह *आपेषादिति । स्वापेऽज्ञाते प्रतीचि लीनस्य बुद्ध्यादेर्जाग्रद्धेतुकर्मादिना परस्मादुत्पत्तौ 'प्रबोधो जातः' इति केवलं व्यवह्रीयते, घटोत्पत्तौ तदाकाशोत्पत्तिवदित्यर्थः॥३४॥तस्मात्पुरुषस्यैव भोक्तृत्वं सिद्धमित्याह *अत इति त्रिभिः ॥३५॥३६॥

ज्वलन्निव समुत्तस्थौ यः स भोक्तेति गम्यताम्॥३७॥
देह एवास्तु भोक्तेति न वक्तव्यं जडत्वतः॥
स्पर्शपेषणवैषम्यादप्यभोक्तृ भवेद्वपुः॥ ३८॥
ईषत्स्पर्शादबुद्धोऽपि पेषणेन विबुध्यते॥
एतच्च देहादन्यस्य युक्तं सम्बन्धभेदतः॥ ३९॥
देहादन्यस्य देहेऽस्मिन्सम्बन्धः कर्मभिः कृतः॥
अभिमानात्मकः सोऽपि कर्मभेदादनेकधा॥ ४०॥
तीव्राभिमानवेलायामीषत्स्पर्शेन बुध्यते॥
अन्यचित्तत्ववेलायां दृढस्पर्शमपेक्षते॥ ४१॥
स्वप्नान्पश्यन्प्रबोधाय पाणिपेषमपेक्षते॥
सुषुप्तः पेषणाभ्यासाद्बुध्यते ह्युचितं हि तत्॥ ४२॥
देहस्य भोक्तृतायां तु कस्य कुत्राभिमानिता॥
ततो बोधस्य वैषम्यं किंकृतं स्पर्शपेषयोः॥ ४३॥
करणानामभोक्तृत्वं प्रत्येकं स्मृत्यसम्भवात्॥
चक्षुर्दृष्टं नहि स्मर्तुमन्येषां शक्तिरिष्यते॥ ४४॥
सङ्घातस्य परार्थत्वादभोक्तृत्वं गृहादिवत्॥

॥ ३७ ॥ प्राणस्याभोक्तृत्वेऽपि पुरुषस्य भोक्तृत्वं न-सिद्ध्यति, देहादेरपि तत्सम्भवादिति शङ्कित्वा परिहरति *देह इति ॥३८॥ स्पर्शपेषणवैषम्यादित्युक्तं व्यनक्ति *ईषदिति ॥ ३९ ॥ सम्बन्धभेदत इत्युक्तं व्याचष्टे *देहादिति ॥४०॥ कर्मभेदात्तत्कृतसम्बन्धभेदोऽस्तीत्येतदनुभवेन प्रकटयति *तीव्रेत्यादिना। *ईषत्स्पर्शेनेति। ईषद्वेदनाजनकमित्यर्थः। स्पर्शतारतम्ये नजायमानबोधस्य देहाभिमानतारतम्यप्रयुक्तत्वसिद्धौ तदतिरिक्तस्यैव भोक्तृत्वमुचितमित्यर्थः॥४१॥४२॥४३॥४४॥ करणानां

स्याद्विज्ञानमयो भोक्ता प्रोक्तदोषविवर्जनात् ॥ ४५ ॥
सुखदुःखानुसन्धानं भोगश्चिति स उच्यते ॥
न जडेष्विति निर्णीतमन्वयव्यतिरेकतः ॥ ४६ ॥
नान्वयो व्यतिरेको वा यद्यप्यद्वैतवस्तुनि ॥
पुंव्युत्पत्तिरथाप्याभ्यां भवति व्यावहारिकी ॥ ४७ ॥
अध्यस्तयाऽपि व्युत्पत्त्या कृत्स्नभ्रान्तिर्निवर्त्तते ॥
स्वप्नताडनदाहादिभीत्या स्वप्ननिवर्तनात् ॥ ४८ ॥
अतोऽन्वयेन विज्ञानमयो भोक्ताऽत्र वर्ण्यते ॥
चिदन्वयो हि भोग्येषु निखिलेष्वनुभूयते ॥ ४९ ॥

प्रत्येकं भोक्तृत्वमिति मतं निरस्य मिलितानां तन्निराकरोति *सङ्घातस्येति। करणानि स्वातिरिक्तभोक्तृभोगसाधनानि संहतत्वाद् गृहादिवदित्यर्थः ॥ ४५ ॥ भोगस्वरूपपर्यालोचनयाऽपि न जडस्य भोक्तृतेत्याह *सुखेति। दुःखादिधिय एव भोग्यत्वात्तस्य च चेतनधर्मत्वेन प्रतीतेश्चित एव भोक्तृत्वं युक्तमित्यर्थः। विज्ञानमयस्यैव भोक्तृत्वमुपसंहरति। *इति निर्णीतमिति ॥ ४६ ॥ अद्वैतवादे प्रत्यग्व्यतिरिक्तवस्तुन एवाभावात् कथमन्वयव्यतिरेकयोर्निर्णायकत्वमिति शङ्कते *नेति। कल्पितभेदमादायान्वयादिप्रवृत्तावपि नाद्वैतक्षतिरिति परिहरति *पुंव्युत्पत्तिरिति। आभ्याम्—अन्वयव्यतिरेकाभ्याम्। यद्यपि व्युत्पत्तिशब्दितज्ञानं वाक्यजन्यं तथाऽप्यनयोरपि प्रतिबन्धनिवर्तकत्वेन तत्रोपयोग इति भावः ॥ ४७ ॥ कथमज्ञानादिनिवर्तकत्वमिति शङ्कित्वा दृष्टान्तेन प्रत्याचष्टे *अध्यस्तयेति ॥ ४८ ॥ कीदृशान्वयव्यतिरेकौ ? तत्राह *चिदिति ॥ ४९ ॥ ननु सर्वानुस्यूतप्रत्यक्चैतन्यस्याविकारित्वात्कथं विज्ञानमयत्वं ? तत्राह

भोग्यानां व्यभिचारेऽपि भोक्ता त्वव्यभिचारवान् ॥
विज्ञानमयता तस्य विज्ञानप्रचुरत्वतः ॥ ५० ॥
विज्ञानमन्तःकरणं तस्मिन्नात्मोपलभ्यते ॥
राहुश्चन्द्रे यथा तद्वद्विज्ञानमयता ततः ॥ ५१ ॥
स्वाभासवदविद्योत्थबुद्ध्यादिव्याप्तिविभ्रमात् ॥
तदात्मत्वाभिमानी सन्नहमित्युपलभ्यते ॥ ५२ ॥
यद्वोपलब्धिमात्रोऽपि विज्ञानाध्यस्तकर्तृताम् ॥
प्राप्योपलब्धा स्यात् तेन विज्ञानमय उच्यते ॥ ५३ ॥
स्फटिको रक्ततां प्राप्य जपाकुसुमकल्पिताम् ॥
पद्मरागायते तद्वदुपलब्धृत्वमात्मनः ॥ ५४ ॥
यद्वोपलभ्यो देहादेर्विज्ञानेन विवेचितः ॥
स्याद्विज्ञानमयस्तेन पुरुषः परिपूरणात् ॥ ५५ ॥
अशेषान्कल्पितानेष विज्ञानादीननात्मनः ॥

---

*विज्ञानेति । तथाच मयटो न विकारार्थतेति भावः ॥ ५० ॥ विज्ञानप्रचुरत्वमुपपादयति *विज्ञानमिति ॥ ५१ ॥ नन्वेवमपि कथमपरिच्छिन्नस्याहमिति परिच्छिन्नत्वधीस्तत्राह *स्वाभासेति । प्रत्यगाभासवती या ऽविद्या तदुत्थबुद्ध्यादिसम्बन्धकृतपरिच्छेदविभ्रमादित्यर्थः। *तदात्मत्वेति । बुद्ध्यादितादात्म्यापन्न इत्यर्थः ॥ ५२ ॥ मयटः प्रायार्थत्वे हेत्वन्तरमाह *यद्वोपलब्धीति ॥ ५३ ॥ शुद्धस्याप्यात्मनोऽन्यसंसर्गादन्यथाप्रतीतिं दृष्टान्तेनोपपादयति *स्फटिक इति ॥ ५४ ॥ देहेन्द्रियादिभ्यो विज्ञानशब्दितबुद्ध्या पृथक्कृतः सन्नात्मा यस्मात्प्रकाशते तेन वा तस्य विज्ञानमयतेत्याह *यद्वेति । विज्ञानमयः पुरुष इत्यत्र पुरुषशब्दार्थमाह *पुरुष इति ॥ ५५ ॥ एतदेव व्याचष्टे

आत्मा पूरयति प्रत्यक् सर्पादीन् रशना यथा ॥५६॥
श्रुतिः—स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य
एष विज्ञानमयः पुरुषः क्वैष तदाऽभूत्कुत एतदागा-
दिति तदु ह न मेने गार्ग्यः ॥ १६ ॥
वा०—यो विज्ञानमयस्तस्य द्वैतधीः स्वप्नजाग्रतोः ॥
अस्ति, सुप्तौ तु सा नास्ति स्वभावोऽस्यात्र को भवेत्५७
तस्य स्वभावं निर्णेतुं सुप्तौ क्वाभूदयं पुनः ॥
कुत आगादिमं देहमित्येतदिह चिन्त्यते ॥ ५८ ॥
विहायैतच्छरीरं किं सुप्तौ देशान्तरं गतः ॥
विनष्टो वाऽथवा ऽत्रास्ते विशेषज्ञानवर्जितः ॥ ५९ ॥
देहप्राणाविह त्यक्त्वा गच्छेन्निःसाधनः कथम् ॥
नाशे बोधः पुनर्न स्यात्, न स्थितौ ज्ञानवर्जनम् ॥६०॥

---

*अशेषानिति ॥ ५६ ॥

इयमत्र श्रुत्यक्षरयोजना—यत्र पाणिपेषात्पूर्वकाले य एष विज्ञानमय एतत्स्वप्नं यथा भवति तथा सुप्तोऽभूत् तदैष पुरुषः क्व कस्मिन्नधिकरणेऽभूत्, कुतश्चापादानादेष आत्मा एतदागमनमागादिति राज्ञा पृष्टो गार्ग्यस्तदुभयं न ज्ञातवान् ॥१६॥

क्वैषेत्यादिप्रश्नवाक्यस्य प्रकृतत्वं दर्शयितुमात्मतत्त्वे संशयं तद्बीजं चाह *यो विज्ञानेति ॥ ५७ ॥ जाग्रदादौ कर्तृत्वादिप्रतीतेरात्मनः संसारित्वं स्वभावः उत सुप्तौ तदप्रतीतेरसंसारितेति विशेषानवधारणात्संशये प्रश्नपूर्वकं निर्णेतुं प्रश्नवाक्यं प्रवृत्तमित्याह *तस्येति ॥ ५८ ॥ तात्पर्यमुक्त्वा क्वैष इत्यत्र सूचितान् विकल्पानाह *विहायेति ॥ ५९ ॥ आद्यं प्रत्याह *देहेति । द्वितीयं निराह *नाश इति । तृतीयं नि-

ज्ञस्वभावोऽत्र तिष्ठेच्चेदभिमन्येत विग्रहम् ॥
औपाधिकोऽभिमानश्चेदुपाधेः क्व गतिस्तदा ॥ ६१ ॥
उच्यते कर्मभिर्जीवः सुखदुःखोपभुक्तये ॥
जाग्रत्स्वप्नाववाप्नोति क्षीणकर्मा सुषुप्सति ॥ ६२ ॥
अक्रियस्याप्यवस्थासु सञ्चारो बुद्ध्युपाधितः ॥
घटोपाधिवशाद्यद्वदाकाशस्य गमागमौ ॥ ६३ ॥
बुद्धेश्चाज्ञानकार्यायाः स्थानं हृदयमिष्यते ॥
तत्रेन्द्रियाणि सर्वाणि बुद्धितन्त्राणि सर्वदा ॥ ६४ ॥
गोलकेष्वेषु धीस्तानि नाडिभिः कर्मणो वशात् ॥
प्रसारयत्यधिष्ठाय मत्स्यजालकवद्बहिः ॥ ६५ ॥
बुद्धावक्षेषु चात्मायं चिद्रूपः प्रतिबिम्बति ॥
तादृग्बुद्धीन्द्रियोपाधिर्जागर्त्यात्मेति गम्यते ॥ ६६ ॥

रस्यति *नेति ॥ ६० ॥ सुप्तौ ज्ञानात्मजीवावस्थाने विशेषधीरपि स्यादित्युक्तं विशदयति *ज्ञस्वभाव इति । *क्व गतिरिति । आमोक्षमुपाधेरविनाशादिति भावः ॥ ६१ ॥ उक्तशङ्कापरिहारत्वेनोत्तरश्रुतिं व्याख्यास्यन् जीवस्यावस्थात्रयनिमित्तमाह *उच्यत इति ॥ ६२ ॥ ६३ ॥ एवमुपाधिवशाज्जीवावस्थात्रयसञ्चारमुपपाद्य तत्र जागरितस्य तावल्लक्षणमाह *बुद्धेरित्यादिना । सुप्तिकाले इन्द्रियैः साकं बुद्धिरज्ञाने लीना तिष्ठति, पुनश्च जाग्रद्भोगप्रदकर्मोद्बोधे सतीन्द्रियैः सह हृदये उद्भवति, सा च धीः स्वपरतन्त्राण्यक्षाणि तत्तद्गोलकेषु नाडीद्वारा प्रसारयति, तेषु प्रतिबिम्बितस्यात्मन इन्द्रियैरर्थोपलब्धिर्जागरितमित्यर्थः ॥६४॥६५॥६६॥ सुषुप्तिस्वरूपमाह *कर्मक्षय इति । स्वाश्रयाननु–स्वोपाधिलयानन्तरमित्यर्थः ॥६७॥

कर्मक्षये बुद्धिरक्षैः सहाज्ञाने विलीयते ॥
चैतन्यप्रतिबिम्बाश्च लीयन्ते स्वाश्रयाननु ॥ ६७ ॥
श्रुतिः—स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते ॥
वा०—तदेन्द्रियाणां विज्ञानं धीविज्ञानेन संयुतम् ॥
विज्ञानमय आदत्त इति श्रुत्योपवर्ण्यते ॥ ६८ ॥
धीविज्ञानोपसंहारे विज्ञानमयताक्षतौ ॥
निर्विकारात्मचैतन्यं केवलं परिशिष्यते ॥ ६९ ॥
एतदेव विवक्षित्वा प्रतिपादयति श्रुतिः ॥
एषोऽन्तर्हृदयाकाशस्तस्मिञ्छेत इतीदृशी ॥ ७० ॥
बुद्धिर्हृदयशब्देन हृन्निष्ठत्वाद्विवक्ष्यते ॥
आसमन्तात्काशतेऽयमित्याकाशोऽत्र चिद्वपुः ॥७१॥
बुद्धेरन्तः प्रतीचोऽन्यो नार्थः सम्भाव्यते यतः ॥
तस्मादाकाशशब्देन प्रत्यगात्मेह गृह्यते ॥ ७२ ॥
प्राणादीनां यतो जन्म वक्ष्यते प्रत्यगात्मनः ॥
तस्माच्चाकाशशब्देन ब्रह्मैवात्राभिधीयते ॥ ७३ ॥
अधिष्ठानत्वमन्तस्त्वमपरिच्छिन्नवस्तुनः ॥

एवमुपोद्घातत्वेनावस्थाद्वयस्वरूपमुक्त्वा शङ्कोत्तरत्वेनैषां प्राणानामित्यादिश्रुतिं व्याख्याति *तदेति ॥ ६८ ॥ य एषोऽन्तरित्यादेस्तात्पर्यमाह *धीविज्ञानेत्यादिना॥६९॥७०॥तत्र हृदयाकाशशब्दयोरर्थमाह *बुद्धिरिति ॥ ७१ ॥ आकाशपदस्य मुख्यार्थं विहाय चिन्मात्रपरत्वे हेतुमाह *बुद्धेरिति द्वाभ्याम् ॥ ७२ ॥ ७३ ॥ उक्तमेव पुनः सङ्क्षिप्याह *अधिष्ठानत्व-

अन्तर्बहिर्विकारोऽयं न मुख्य उपपद्यते ॥ ७४ ॥
पराक्प्रमेयभूमिभ्यो मनसि व्युत्थिते सति ॥
अनन्यबोधप्रात्यक्षाद्य एष इति भण्यते ॥ ७५ ॥
स्वतोऽवगमरूपेऽस्मिन् कूटस्थे निर्द्वयात्मनि ॥
कार्त्स्न्येनावस्थितिर्भोक्तुः शेत इत्यभिधीयते ॥७६॥
घटभङ्गे यथाऽऽकाशो महाकाशान्न भिद्यते ॥
विज्ञानलोपे विज्ञानमयस्यैवं परात्मता ॥ ७७ ॥
देहाद्यध्यक्षतां हित्वा सुप्तौ स्वात्मनि वर्त्तते ॥
इत्येतत्साध्यते श्रुत्या समाख्यायाश्च युक्तितः ॥७८॥
स्वप्नस्य स्वपितीत्येषा समाख्या सर्वसम्मता ॥
निरुक्तिमाहुश्छन्दोगाः स्वमपीत इतीदृशीम् ॥७९॥
अतः समाख्यया सुप्तौ स्वाभाविक्यात्मना स्थितिः ॥

मिति । य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत इति सर्वान्तरत्वं जीवाधिष्ठानत्वं चोक्तम् । अस्मादात्मनः सर्वे प्राणाः सर्वे लोका इत्यादावन्तर्बहिःकार्यहेतुत्वं वक्ष्यति । एतत्रयमाकाशपदस्य मुख्यार्थपरिग्रहे न घटत इत्यर्थः ॥ ७४ ॥ विदुषां स्वप्रकाशत्वेन स्फुरणाद् य एष इति प्रत्यक्षवाचिपदद्वयप्रयोग इत्याह *परागिति ॥ ७५ ॥ शयनशब्दार्थमाह *स्वत इति ॥ ७६ ॥ ७७ ॥ जीवस्य परैक्यप्राप्तौ सुप्तावेव मुक्तिः स्यादित्याशङ्क्य देहद्वयाभिमानराहित्यमात्रमत्राभेदशब्देन विवक्षितमित्याह *देहादीति । उक्तार्थसाधनपरत्वेन तानि यदेत्यादिश्रुतिं व्याचष्टे *इत्येतदिति ॥ ७८ ॥ समाख्यामाह *स्वप्नस्येति ॥ ७९ ॥ तद्गृहीत एवेत्यादेस्तात्पर्यमाह *युक्ति-

युक्तिश्चोपाधिसंहारः संसारित्वनिवृत्तये ॥ ८० ॥
वागाद्युपाधिसम्बन्धात्संसारित्वमिवेक्ष्यते ॥
ते तूपसंहृताः सर्वे ततोऽसंसारिताऽऽत्मनः ॥ ८१ ॥

श्रुतिः—तानि यदा गृह्णात्यथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति, गृहीता वाग्गृहीतं श्रोत्रं गृहीतं मनः ॥ १७ ॥

वा०—सुप्तौ क्वाभूदिति प्रश्नो यः स एवं विचिन्तितः ॥
तेनासंसारितैतस्य स्वभाव इति निश्चितम् ॥ ८२ ॥
सुप्तः प्रबुद्ध इत्येव स्वप्नं पश्यति चेति यः ॥
विकल्प एष भूतानामविद्यारात्रिशायिनाम् ॥ ८३ ॥
चित्तसम्मोहमात्रेऽस्मिँल्लोकोऽयं परिखिद्यते ॥
दिङ्मोहाकुलविज्ञानो नष्टमार्ग इवाध्वगः ॥ ८४ ॥
इति प्रपञ्चमिथ्यात्वं विस्पष्टयितुमञ्जसा ॥
महाराजादयः श्रुत्या लोकाः स्वाप्ना उदाहृताः॥८५॥

श्चेति ॥ ८० ॥ ८१ ॥

अक्षरार्थस्तु—तानि वागादिविज्ञानानि यदा गृह्णाति अथ तदा—पुरुष इति षष्ठ्यर्थे प्रथमा, तस्य स्वपितीत्येतन्नाम प्रसिद्धं भवति, तद् तदा स्वापकाले गृहीत एव प्राणो भवति। प्राण इति घ्राणेन्द्रियं, वागादिप्रकरणात्। अन्वयव्यतिरेकाभ्यां वागाद्युपाधिकमात्मनः संसारित्वमिति युक्तितोऽप्यात्मनोऽसंसारित्वमिति भावः ॥ १७ ॥

प्रकृतमुपसंहरति *सुप्ताविति ॥ ८२ ॥ अवस्थात्रयस्यापि मृषात्वसाधनपरा स यत्रेत्यादिश्रुतिरित्याह *सुप्त इत्यादिना ॥ ८३ ॥ ८४ ॥ ८५ ॥ देहातिरिक्तात्मसाधनेनै-

पाणिपेषप्रबोधेन देहादीनामनात्मता ॥
यद्यप्युक्ता, तथाऽप्यात्मविशुद्धिस्तावता नहि ॥८६॥
सिद्धा देहादितादात्म्यमात्रस्यैव मृषात्मता ॥
नतु देहस्य मिथ्यात्वं, तेन सङ्गोऽस्य शङ्क्यते ॥८७॥
स्पष्टं देहात्मनोर्भेदमभ्युपेत्यापि तार्किकाः ॥
रागादिसङ्गमिच्छन्ति तन्निवृत्त्यै प्रयत्यते ॥ ८८ ॥
असङ्गत्वस्वभावोऽस्य सुप्तौ यद्यपि वर्णितः ॥
तथाऽपि स्वप्नमालम्ब्य सोऽसिद्ध इति शङ्क्यते ॥८९ ॥
सर्वेन्द्रियवियोगेऽपि सुखिदुःखित्वमात्मनः ॥
स्वप्ने दृष्टमतः सङ्ग आत्मनस्तात्त्विको भवेत् ॥९०॥
मैवं मृषात्वात्स्वप्नस्य मनोमात्रविजृम्भणात् ॥
बाह्येन्द्रियविलोपेऽपि न मनो लुप्यते तदा ॥ ९१ ॥
महाराजादयः स्वस्य स्वप्नानुभवगोचराः ॥
न वास्तवा इति ज्ञेयाः शयानेभ्यः पृथक्त्वतः ॥९२॥

व देहतादात्म्यस्य मिथ्यात्वसिद्ध्याऽऽत्मनो ऽसङ्गत्वसिद्धेः प्रपञ्चमृषात्वसाधनं वृथेति शङ्कित्वा परिहरति *पाणिपेषेत्यादिना ॥ ८६ ॥ ८७ ॥ ८८ ॥ देहातिरिक्तात्मवादिभिरङ्गीकृतकर्तृत्वादिसङ्गस्याप्यात्मनः सुप्तावसंसारित्ववर्णनेनैव निरस्तत्वात्किं प्रपञ्चमृषात्वसाधनेनेति शङ्कते *असङ्गत्वेति स्वप्नावस्थायामात्मनः संसारित्वोपलम्भात्तस्य च मृषात्वासाधने उक्तमप्यसंसारित्वं न सिद्ध्यतीत्याह *तथाऽपीत्यादिना ॥ ८९ ॥ ९० ॥ स्वप्नस्य सत्यत्वसम्भावनयाऽऽत्मनो ऽसंसारित्वाभावचोद्यं पूर्ववादिमुखेनोपपाद्य तत्र समाधिमाह *मैवमिति ॥ ९१ ॥ विमता राजत्वादयो न सत्याः अयोग्यदेशवृत्तित्वाद्रज्जुसर्पवदिति-

गृहे शयाना ये दृष्टास्ते तु स्वप्ने वनं गताः ॥
जाग्रद्दृष्टं मृषा स्वप्ने स्वप्नस्थं जागरे मृषा ॥ ९३ ॥
अन्योऽन्यव्यभिचारित्वात्स्वप्नजाग्रदवस्थयोः ॥
मिथ्यात्वमित्यसावर्थः स्वप्नश्रुत्या विवक्षितः ॥ ९४॥
स्वप्ने देहाद्बहिर्गत्वा तत्तद्वस्त्ववलोकनात् ॥
व्यभिचारो नेति चेत्, न, निस्तनोर्गत्यसम्भवात्॥९५॥
अन्तः कुतः पर्वताद्या इति चेत्, अत एव हि ॥
आदायाशेषजगतो वासनाः स्वप्नमीक्षते ॥ ९६ ॥
वासनासु च वस्तुत्वधीरविद्याविजृम्भिता ॥
इत्यात्मनो विशुद्धत्वं स्वप्ने श्रुत्योपवर्णितम् ॥ ९७ ॥
श्रुतिः—स यत्रैतत्स्वप्न्यया चरति ते हास्य लोकास्त-

प्रयोगमभिप्रेत्याह *महाराजादय इति ॥९२॥ शयानेभ्यः पृथक्त्वत इत्येतद्विवृणोति *गृह इति । गृहे शयानानां राजादीनां बहिर्निष्ठतया प्रतीतेरित्यर्थः । स्वप्नदृष्टानां जाग्रद्दृष्टादर्थान्तरत्वेन मिथ्यात्वे, जाग्रद्दृष्टानामपि स्वप्नदृष्टादन्यत्वेन मृषात्वं स्यादित्याशङ्क्य तदपि श्रुत्यभिप्रेतत्वादिष्टमेवेत्याह *जाग्रदित्यादिना ॥ ९३ ॥ ९४ ॥ देहाद्बहिरेव स्वप्नदृष्टयङ्गीकारादयोग्यदेशवृत्तित्वमसिद्धमिति शङ्कित्वा परिहरति *स्वप्न इत्यादिना ॥ ९५ ॥ ९६ ॥ ९७ ॥

अक्षरार्थस्तु—सः प्रकृत आत्मा यस्मिन्काले स्वप्नवृत्त्या वर्तते तदा ऽस्य ते लोकाः कर्मफलानि । के ते । तत्र उतापि उच्चं देवत्वादि अवचं तिर्यक्त्वादि च निगच्छति । अस्य महाराजत्वादयो लोका मृषैव, इवशब्दप्रयोगात् । यथा महाराजो जनपदे भवान् राजोपकरणभूतान् भृत्यादीन् गृहीत्वा आत्मीयदेशे

दुतेव महाराजो भवत्युतेव महाब्राह्मण उत वोच्चावचं निगच्छति, स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्त्तेतैवमेवैष एतत्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्त्तते ॥ १८ ॥

अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वाऽतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते॥१९॥

व्यतिरेकं विशुद्धिश्च जागरस्वप्नयोः श्रुतिः ॥
प्रदर्श्याप्यद्वयानन्दरूपं सुप्तौ ब्रवीत्यसौ ॥ ९८ ॥
यद्यपि द्वैतमिथ्यात्वात्सिध्यत्यद्वयताऽऽत्मनः ॥
भात्येवाथाऽपि तद्द्वैतं स्वप्नजाग्रदवस्थयोः ॥ ९९ ॥
द्वैतभावप्रतीत्याऽपि हीनं सुप्तावदर्शयत् ॥
पूर्वं यद्यप्यथाऽप्यत्र विस्पष्टीक्रियते पुनः ॥ १०० ॥

स्वेच्छया परिवर्तते । एवमेवैष जीवः एतद् ग्रहणं यथा भवति तथा इन्द्रियाणि गृहीत्वा जागरितस्थानेभ्य उपसंहृत्य स्वशरीर एव वर्तते न बहिरिति ॥ १८ ॥

वृत्तानुवादपूर्वकमुत्तरकण्डिकातात्पर्यमाह *व्यतिरेकमिति ॥ ९८ ॥ द्वैतमिथ्यात्वसाधनेनात्मनः सुप्तौ निष्प्रपञ्चत्वकथनेन च सिद्धस्यैवाद्वयस्य पुनः सम्भावितशङ्कानिराकरणेन स्पष्टीकरणान्न पौनरुक्त्यमित्याह *यद्यपीत्यादिना ॥ ९९ ॥ १०० ॥ *दृश्यमिति । द्रष्टृताया वास्तवत्वे तस्या वास्तवदृश्यसापेक्षत्वात्कथं दृश्यस्य मृषात्वमिति शङ्का अ-

दृश्यं मिथ्याऽस्तु तद्द्रष्टुर्द्रष्टृता वास्तवी ततः ॥
दृश्यं साऽपेक्षतेऽप्येषा शङ्काऽत्र विनिवार्यते॥१०१॥
न किञ्चन यदा वेद तदा सुप्त इतीरणात् ॥
आत्मनो ज्ञानकर्तृत्वं सुप्तौ नास्तीति गम्यते॥१०२॥
साभासबुद्धिर्ज्ञानस्य कर्त्री तत्सन्निधानतः ॥
स्फटिके पद्मरागत्वमिव स्याज्ज्ञातृताऽऽत्मनि ॥१०३
परप्रयुक्तं ज्ञातृत्वं परलोपे विलुप्यते ॥
अतो ऽसंसारिता सुप्तावात्मनः स्वानुभूतितः॥१०४॥
न यथा श्रोत्रविज्ञानं रूपेणैति समागमम् ॥
संसारेण तथैवात्मा कौटस्थ्यान्नेति सङ्गतिम् ॥१०५॥
निःसङ्गस्य ससङ्गेन कूटस्थस्य विनाशिना ॥
आत्मनोऽनात्मना योगो वास्तवो नोपपद्यते॥१०६॥
सुप्तौ केन क्रमेणायमुपाधिः प्रविलीयते ॥
तत्क्रमस्यावबोधाय हृदयादि विविच्यते ॥ १०७ ॥
आनाभितस्तथा कण्ठाद्धृदयं मध्यतः स्थितम् ॥
सनालपद्मकोशाभं पश्चाच्छिद्रमधोमुखम् ॥ १०८ ॥

थ यदेत्यादिश्रुत्या निवार्यत इत्यर्थः ॥ १०१ ॥ यदा न कस्यचन वेदेत्यस्यार्थं वदन्नुक्तशङ्कानिराकरणप्रकारमाह *नेति ॥१०२॥कथं तर्हि जाग्रदादावात्मनः कर्तृत्वादिप्रतीतिः ? तत्राह *साभासेत्यादिना ॥ १०३ ॥ १०४ ॥ आत्मनः कामाद्यसम्बन्धं दृष्टान्तेन स्पष्टयति *न यथेति ॥ १०५ ॥ १०६ ॥ हिता नाम नाड्य इत्यादेराकाङ्क्षापूर्वकं तात्पर्यमाह *सुप्ताविति ॥१०७॥ तत्र हृदयस्य स्थानमाह *आनाभित इति ॥ १०८ ॥ हितसंज्ञकानां द्वासप्ततिसहस्रसङ्ख्याकानां नाडीनां स्वरूपमाह

कदम्बकुसुमोद्भूतकेसरा इव सर्वतः ॥
प्रसृता हृदयान्नाड्यो बह्वन्नरसपूरिताः ॥ १०९ ॥
निर्गत्य हृदयाद् बुद्धिस्तासु स्वप्नं प्रपश्यति ॥
ताभिर्देहाद् बहिर्गत्वा जाग्रतीत्यभिधीयते ॥११०॥
पुनः प्रत्यवसृप्यैषा पुरीतद्वेष्टिते हृदि ॥
प्रविश्य लीयते देहं व्याप्य सामान्यवृत्तितः॥१११॥
बुद्धेरव्याकृतावस्था वृत्तिः सामान्यशब्दिता ॥
व्याप्तो देहस्तया सुप्तौ तैलेनेव तिलोऽखिलः ॥११२॥
व्याकृतोपाधिविलये द्वैतभानं निवर्त्तते ॥
स्फुटीभवत्यद्वयत्वं तदानीं प्रत्यगात्मनः ॥ ११३ ॥
सर्वसंसारदुःखानामत्यन्तोपरमात्तदा ॥
आनन्दस्य परा निष्ठा दृष्टान्तैः सोपमीयते ॥ ११४ ॥
इन्द्रियस्याप्ररूढत्वात्स्वेष्टप्राप्तेर्विवेकतः ॥
नीरागाणां बालराजब्राह्मणानां क्रमात्सुखम् ॥११५॥
दुःखं रागद्वेषजन्यं तदभावे सुखं स्वतः ॥
इति व्याप्तिगृहीत्यर्थं बहुदृष्टान्तवर्णनम् ॥ ११६ ॥

---

*कदम्बेति ॥ १०९ ॥ ताभिः प्रत्यवसृप्येत्यादेरर्थमाह *निर्गत्येत्यादिना *पुरीतद्वेष्टित इति । पुरीतच्छब्देन हृदयवेष्टनवाचकेन तद्वेष्टितं हृदयं लक्ष्यत इत्यर्थः ॥ ११० ॥ १११ ॥ सुप्तौ का वा बुद्धेः सामान्यवृत्तिस्तत्राह *बुद्धेरिति । बुद्धेरात्यन्तिकनाशाभावेऽपि सुप्तौ सूक्ष्मत्वान्न विशेषधीरिति न पूर्वोक्तशङ्कावकाश इति ध्येयम् ॥ ११२॥ ११३ ॥ एवं द्वैतप्रतीत्याभावात्सुप्तावात्मनोऽद्वयत्वमुपपाद्य स यथा कुमार इत्यादेरर्थमाह *सर्वेति ॥ ११४ ॥ दृष्टान्तभूतकुमारादीनां सुखित्वे हेतुमाह *इन्द्रियस्येति ॥ ११५ ॥ ११६ ॥

यावद्यावत्प्ररूढत्वं रागादेर्जायते हृदि ॥
तावत्तावत्प्ररूढत्वं दुःखस्याप्यभिजायते ॥ ११७ ॥
यावद्यावत्तनुत्वं स्याद्रागादेः प्रत्यगात्मनि ॥
तावत्तावत्तनुत्वं स्याद् दुःखस्यापि सुखात्मनि॥११८॥
अशेषदुःखहेतूनां विलोपात्सुप्त आत्मनि ॥
दुःखहीने परा निष्ठाऽऽनन्दस्येत्युपपद्यते ॥ ११९ ॥
आनन्दस्यात्मरूपत्वाद्विषयीक्रियते न सः ॥
स्वप्रकाशचिदात्मत्वात्स्वयमेव विभात्यसौ ॥१२०॥
अद्वयानन्दरूपत्वमित्थं सुप्तौ प्रदर्शितम् ॥
एतावता स्वभावोऽस्य निर्णीतः प्रत्यगात्मनः॥१२१॥

श्रुतिः—स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति । तस्योपनिषत्सत्यस्य सत्यमिति, प्राणा वै सत्यं तेषामेष सत्यम् ॥ २० ॥

इत्युपनिषदि चतुर्थाध्याये प्रथमं ब्राह्मणं समाप्तम् ।

अतिघ्नीमतिशयेन दुःखहन्त्रीमानन्दस्यावस्थां प्राप्य एतच्छयनं यथा भवति तथा शेत इति श्रुत्यक्षरार्थः ॥ १९ ॥

सुप्तावात्मन आनन्दरूपत्वमुपपत्त्याऽपि साधयति *याबदिति त्रिभिः ॥ ११७ ॥ ११८ ॥ ११९ ॥ आनन्दस्य स्वसत्तायां प्रकाशमानत्वनियमात्सुप्तौ सर्वप्रकाशोपरमान्न स्वरूपस्यानन्दतेत्याशङ्क्य आत्मसुखस्य नित्यप्रकाशाभिन्नत्वेन प्रकाशमानत्वान्मैवमित्याह *आनन्दस्येति ॥ १२० ॥ प्रकृतमुपसंहरति *अद्वयेति ॥ १२१ ॥ स यथोर्णनाभिरित्यादिश्रु-

वा०—क्वाभूदेष इति प्रश्नं निर्णीय कुत आगतः ॥
इति प्रश्नं विनिर्णेतुमूर्णनाभ्यादिका श्रुतिः ॥१२२॥
यत्राभूत्तत एवैष आगच्छेदिति यद्यपि ॥
ज्ञायतेऽर्थात्तथाऽप्यत्र तदुक्तिरुपयुज्यते ॥ १२३ ॥
अवध्यवधिमद्भेद आधाराधेययोर्भिदा ॥
यथा लोके तथा नात्रेत्यसावर्थो विवक्षितः ॥१२४॥
एतदर्थानुकूलौ द्वौ प्रश्नौ तेनोत्तरं पृथक् ॥
उक्तं, तस्योत्तरस्यैष तात्पर्यार्थ उदीर्यते ॥ १२५ ॥
नान्यत्राभूदयं सुप्तौ नान्यस्मादुत्थितः पुनः ॥
सुप्त्युत्थानभ्रमः पूर्णे बुद्ध्युपाधिविजृम्भितः॥१२६॥
अथवा दर्शितं सुप्तावसङ्गत्वं चिदात्मनः ॥
जगद्धेतुतयोत्थाने ब्रह्मता तस्य वर्ण्यते १२७ ॥
अवास्तवत्वाज्जगतो नाद्वयत्वं विहन्यते ॥

तैस्तात्पर्यं वृत्तानुवादपूर्वकं सङ्गृह्णाति *क्वाभूदिति ॥ १२२ ॥ १२३ ॥ अर्थसिद्धस्यापि पुनरुक्तेरुपयोगं दर्शयति *अवधीति- ॥ १२४ ॥ लोकसिद्धन्यायेनात्मन्यप्याधाराधेयभेदशङ्का भवतीत्यत्र प्रश्नवाक्यमनुकूलयति *एतदर्थेति । लोके यस्य य आधारः स तस्मादाधाराद्भिन्नः, यो यत आगच्छति स च तस्मादवधेरन्यो दृष्टः, एवमयमात्माऽपि स्वस्मादन्यस्मात्कुत आगात् स्वाभ्यस्मिन्कुत्राभूदिति प्रश्नद्वयप्रवृत्तिरित्यर्थः । एवं प्रश्नतात्पर्यमुक्त्वा तदुत्तरत्वेन प्रवृत्तश्रुतितात्पर्यं प्रतिज्ञापूर्वकं विशदयति *तेनोत्तरमित्यादिना ॥ १२५॥१२६॥ अवस्थात्रयविलक्षणत्वेन प्रतिपादितशुद्धत्वंपदार्थस्य जगत्कारणत्वोपलक्षितब्रह्माभेदबोधपरा वोक्तश्रुतिरित्याह *अथवेति । उत्थाने जागरे ॥१२७॥

दृश्यमज्ञानजत्वेन न वस्तु स्वप्नदृश्यवत् ॥ १२८ ॥
नासतो जन्मना योगः सतः सत्त्वान्न चेष्यते ॥
कूटस्थे विक्रिया नास्ति तस्मादज्ञानतो जनिः॥१२९॥
वास्तवीं जनिमाहुर्ये तैर्वाच्यं सृष्टिकारणम् ॥
प्रधानं परमाण्वादिः प्रवर्तकमपेक्षते ॥ १३० ॥
तत्प्रवर्तक ईशश्चेत्सोऽपि केन प्रवर्तितः ॥
लीनत्वात्कामकर्म्मादि न प्रवर्तयितुं क्षमम् ॥ १३१ ॥
शक्तिर्नियामिका चेत्सा केनान्येन नियम्यते ॥
आविचारितरम्याऽतः सृष्टिरात्मनि कल्पिता॥१३२॥

जीवस्याद्वितीयब्रह्मणाऽभेदसिद्ध्यर्थं साधितं प्रपञ्चमिथ्यात्वं स्मारयति *अवास्तवत्वादिति ।।१२८।। किञ्च द्वैतस्यासतः सतो वा जन्म? नाद्यः,इत्याह *नासत इति। न द्वितीय इत्याह *सत इति। जन्यस्वरूपालोचनया जन्मायोगमुक्त्वा जनकस्वरूपालोचनयाऽपि तदयोगमाह *कूटस्थ इति । भासमानजनेस्तर्हि का गतिस्तत्राह *तस्मादिति ॥ १२९ ॥ उक्तार्थदार्ढ्याय मतान्तरमनूद्य दूषयति *वास्तवीमिति ॥ १३० ॥ अस्तु परमाण्वादिरन्येन प्रवर्त्तितो जगत्सृष्टिहेतुरिति चेत्, किं प्रधानादिप्रवर्तक ईशस्तच्छक्तिरेव वा ? तत्राद्यमनुवदति *तदिति । किमीशोऽपि निरपेक्ष एव प्रवर्त्तकः कर्मादिसापेक्षो वा ? नाद्यः, सृष्टिसान्तत्यप्रसङ्गादिति मत्वाऽऽह *सोऽपीति । द्वितीयं प्रत्याह *लीनत्वादिति । प्रवर्त्तयितुमिति—प्रवर्तकस्येशस्य सहकारिभवितुम् ॥१३१॥ आद्यद्वितीयमनुवदति *शक्तिरिति । तस्याः जडत्वेन स्वतो न प्रवर्त्तकतेत्याह *सेति । अतः परिशेषान्मायामयी सृष्टिरित्याह *अविचारितेति ॥ १३२ ॥ सृष्टिरवास्तवी चेत्किमर्थं क-

तथाऽप्यैकात्म्यबोधाय श्रुत्या सृष्टिरुदीर्यते ॥
बुद्ध्यारोहाय मन्दानां सृष्टौ दृष्टान्त उच्यते ॥१३३॥
अचेतनो यथा तन्तुरूर्णनाभेः सचेतनात् ॥
जातश्चिदात्मनस्तद्वत्प्राणलोकाद्यचेतनम् ॥ १३४ ॥
विस्फुलिङ्गा यथा वाऽग्नेर्जायन्तेऽग्निस्वभावकाः ॥
तथा सुप्तात्मनो जीवा विज्ञानमयनामकाः ॥ १३५ ॥
प्राणाद्युत्पत्तिभिर्जीवाः उत्पन्ना इति विभ्रमः ॥
आकाशोत्पत्तिविभ्रान्तिर्यथा कुम्भादिजन्मभिः१३६॥
प्राणाद्युत्पत्तिरप्यत्र भ्रान्तैवेति मतं यदि ॥
तथाऽप्यस्ति विशेषोऽत्र तयोःप्राणादिजीवयोः॥१३७॥
स्वरूपतो जन्मतश्च प्राणादिर्भ्रान्तिकल्पितः ॥
जीवस्य कल्पितं जन्म स्वरूपं तु न कल्पितम् ॥१३८॥

ध्यते तत्राह *तथाऽपीति । सृष्टेरवास्तवत्वे स यथोर्णनाभि-रित्यादिदृष्टान्तकथनं किमर्थं ? तत्राह *बुद्धीति ॥१३३॥ एवं स यथेत्यादेस्तात्पर्यमुक्त्वाऽक्षराणि व्याचष्टे *अचेतन इति । यथा प्रसिद्धो लूताकीटः तन्तून् सृष्ट्वा तेनोद्गच्छेत्, न च तन्तुसर्गे गमिक्रियायां वा तस्य स्वभिन्नसाधनान्तरमस्ति । तथा साधनान्तरशून्यस्य चेतनस्यात्मनोऽप्यचेतनप्रपञ्चोत्पादकत्वमविरुद्धमिति भावः ॥ १३४ ॥ केवलचेतनाच्चेतनोत्पत्तिः कथमिति शङ्कानिरासनपरां स यथाऽग्नेरित्यादिश्रुतिं व्याकरोति *विस्फुलिङ्गा इति । *सुप्तात्मन इति । अज्ञानोपहितब्रह्मण इत्यर्थः । माध्यन्दिनशाखायां सर्व एवात्मान इति पाठोऽस्ति, तदभिप्रायेण जीवोत्पत्तिरित्थं व्याख्यातेति ध्येयम् ॥ १३५ ॥ जीवस्यापि जनिमत्त्वेऽकृताभ्यागमादिप्रसङ्ग इत्याशङ्क्य तज्जनेर्भ्रममात्रकल्पितत्वान्मैवमित्याह *प्राणादीति॥१३६॥१३७॥१३८॥

उद्भूतिस्थितिनाशाः स्युर्जगतोऽस्य प्रतिक्षणम् ॥
अविद्यामात्रहेतुत्वान्नामीषां विद्यते क्रमः ॥ १३९ ॥
यस्मादविद्ययैवात्मा प्राणक्षेत्रज्ञरूपभाक् ॥
स्वतोऽतः स परं ब्रह्म तस्योपनिषदुच्यते ॥ १४० ॥
यद् गुह्यं ब्रह्मणो नाम बोधायोपासनाय वा ॥
तत्स्यादुपनिषच्छब्दवाच्यं तच्चात्र बुद्धये ॥ १४१ ॥
सत्यस्य सत्यमित्येतन्नाम ब्रह्मावबोधकम् ॥
प्राणा आपाततः सत्याः सत्यं ब्रह्मैव वस्तुतः ॥१४२॥
असत्यो देह उदित एकजन्मन्युपक्षयात् ॥
सत्याः प्राणा लिङ्गरूपा आमोक्षमनुपक्षयात् ॥१४३॥
मोक्षेऽप्यक्षीण आत्मा तु सत्यात्सत्य उदाहृतः ॥
सत्यस्य सत्यं प्रोवाच ब्रह्म बालाकये नृपः ॥ १४४ ॥
एतद्ब्राह्मणतात्पर्यविचारस्य प्रसङ्गतः ॥
कृत्स्नशास्त्रस्य तात्पर्यमिहेदानीं निरूप्यते ॥ १४५ ॥

जगज्जन्मादीनां नियतक्रमवत्त्वात्कथमवस्तुत्वमित्याशङ्क्य दृष्टनष्टस्वभावानां तेषां क्रम एवासिद्ध इत्याह *उद्भूतीति ॥१३९ ॥ आत्मनोऽद्वितीयत्वमुक्तमुपसंहरति *यस्मादिति । तस्योपनिषदित्यादेरर्थमाह *तस्येति । श्रुत्यपेक्षितं पूरयति *उच्यत इति ॥ १४० ॥ तत्रोपनिषत्पदार्थमाह *तदिति । प्रकृते बोधार्थमेव ब्रह्मणो गुह्यनामकथनमित्याह *अत्र बुद्धये इति । ॥ १४१ ॥ किन्तद्रहस्यं नाम ? तदाह *सत्यस्येति ।

उक्तमर्थं स्वयमेव श्रुतिर्व्याचष्टे *प्राणा वा इति ।

प्राणानां कल्पितत्वोक्तेः कथं सत्यत्वमित्याशङ्क्य श्रुतितात्पर्यं स्पष्टयति *प्राणा इत्यादिना ॥ १४२ ॥ ॥ १४३ ॥ १४४ ॥ १४५ ॥ कृत्स्नशास्त्रतात्पर्यनिर्णयार्थं

संसार्येव किमात्मा स्यादुतासंसार्यपीश्वरः ॥
स चेशो भिद्यते जीवादथवा नहि भिद्यते ॥ १४६ ॥
नानारसप्रभेदेऽपि ब्रह्मैकरसमेव वा ॥
सति चैकरसेऽन्योक्तविरोधो ऽत्रास्ति वा नवा॥१४७॥
संसार्येवास्ति नेशोऽन्यो यस्मादत्र श्रुतिः स्वयम् ॥
सुप्तात्संसारिणो जीवात्प्राणाद्युत्पत्तिमब्रवीत्॥१४८॥
मैत्रेयीब्राह्मणेऽप्येवं भार्यादिप्रीतिसूचितम् ॥
संसारिणमुपक्रम्य द्रष्टव्यः स इतीर्यते ॥ १४९ ॥
नचासौ मुक्त्यवस्थायामसंसारी भविष्यति ॥
स्वभावस्यान्यथाभावो यस्मान्न क्वापि दृश्यते॥१५०॥
साङ्ख्यादयस्तथेशस्य ह्यभावं बहुयुक्तिभिः ॥

विचारप्रयोजकसंशयबीजभूता वादिविप्रतिपत्तीर्दर्शयति *संसारीत्यादिना ॥ १४६॥१४७॥ प्रथमं पूर्वपक्षमाह *संसार्येवास्तीति। अस्मिन्ब्राह्मणे एवमेवास्मादित्यादावागन्तुकज्ञानवतः स्वापावस्थात्प्राणादिसकलजगदुत्पत्तिः श्रूयते अतो नास्ति जीवाद्ब्रह्मान्यदित्यर्थः ॥ १४८ ॥ तत्रैव ब्राह्मणान्तरं संवादयति *मैत्रेयीति। संसारविलक्षणस्य वेद्यस्य सत्त्वे भार्यादिभोगसाधनोपलक्षितस्य भोक्तुर्द्रष्टव्यत्वोपदेशो न स्यादिति भावः ॥ १४९ ॥ संसार्येव जीवो मुक्त्यवस्थायां परो भवत्यतो ब्रह्मभावी जीवदर्शनमपि ब्रह्मदर्शनमेवेति न द्रष्टव्यत्वाद्युपदेशविरोध इति शङ्कित्वा परिहरति *न चेति। *स्वभावस्येति। अन्यथा वह्निरपि कदाचिच्छीतः स्यादिति भावः ॥ १५० ॥ तत्र वादिसम्मतिमप्याह *साङ्ख्यादय इति। ईश्वरस्य देहित्वेऽस्मदादितुल्यत्वाद्, देहाभावे मुक्तवज्ज-

आपादयन्ति यत्नेन तेभ्योऽन्यः कोऽधिको धिया॥१५१॥
एवं प्राप्ते वदामोऽत्र बहुश्रुत्युपजीवनात् ॥
असंसारी परोऽस्तीशो यस्य सर्वमिदं वशे ॥ १५२ ॥
यः सर्वज्ञः सर्वविच्च योऽशनायादिवर्जितः ॥
यः पृथिव्यामिति तथा नेति नेतीति चागमः ॥१५३॥
ब्रह्म ब्रवाणीत्युक्तत्वादत्रापि ब्रह्मणः श्रुतिः ॥
प्राणाद्युत्पत्तिमाचष्टे नतु संसारिजीवतः ॥ १५४ ॥
सता सोम्येत्यादिशास्त्रात्सुप्तौ ब्रह्मावशेषतः ॥
जगत्स्रष्टिर्युज्यतेऽसौ सृष्टिप्राप्यात्पुराऽऽत्मनः॥१५५॥
द्रष्टव्यश्च परात्मैव सर्वमात्मेति वर्णनात् ॥

गत्कर्तृत्वायोगाज्जीवानामेवादृष्टद्वारा तत्कर्तृत्वसम्भवेन तस्याकिञ्चित्करत्वादित्यादियुक्तिं सूचयति *वह्निति ॥१५१॥ आद्यं पक्षमाह *एवमिति ॥ १५२ ॥ ईश्वरविषयश्रुतिमाह *य इति ॥ १५३ ॥ यदुक्तम्—एवमेवास्मादात्मनः इति जीवादेव जगदुत्पत्तिः श्रूयते इति तद्दूषयति *ब्रह्मेति । ब्रह्म ते ब्रवाणीत्युपक्रमे श्रूतस्य य एषोऽतर्हृदय आकाश इति च प्रकृतस्याकाशशब्दवाच्यस्य परस्य एतस्मादिति सर्वनाम्ना परामर्शः, न जीवस्य प्रकरणविरोधादिति भावः ॥ १५४ ॥ किञ्चैतस्मादात्मन इत्यन्यत्रैतच्छब्देन सन्निहितसौषुप्तात्मपरामर्शोऽपि तदा देहद्वयाभिमानशून्यस्य स्वरूपमात्रावशिष्टत्वादज्ञातब्रह्माभेदविवक्षयाऽपि जगद्धेतुत्वोक्तिर्युज्यत इति न तावता सर्वश्रुतिसिद्धेश्वरापलाप इत्याह *सतेति । *सृष्टिप्राप्यात्पुरेति । अन्तःकरणाद्युपाधिसृष्ट्या विश्वतैजसत्वप्राप्तेः पूर्वमित्यर्थः ॥१५५॥ यदुक्तं वाक्यशेषे भोक्तारमुपक्रम्य तस्यैव द्रष्टव्यत्वोप-

अभेदाभिप्रायतोऽत्र भवेत्संसार्युपक्रमः ॥ १५६ ॥
जगत्सृष्ट्यादिसामर्थ्यं नेशादन्यस्य तेन ते ॥
साङ्ख्यादयो बुद्धिहीना बुद्धिमन्तश्च तार्किकाः॥१५७॥
जीवेशभेदमाहुस्ते तस्माज्जीवो महेश्वरम् ॥
आराधयेदहं ब्रह्मेत्येवं मत्वा पतत्यसौ ॥ १५८ ॥
नैतदेवं ब्रह्मणोऽत्र मन्त्रब्राह्मणमानतः ॥
प्रवेशः श्रूयते तस्मान्नास्ति जीवेशयोर्भिदा ॥ १५९ ॥
तत्सृष्ट्वाऽनुप्राविशत्तत्पुरः पुरुष आविशत् ॥
इत्यादीन्यत्र वाक्यानि सन्ति ब्राह्मणमन्त्रयोः॥१६०॥
जीवो ब्रह्मविकारोऽतो ब्रह्म नानारसं ततः ॥

देशान्नातिरिक्तेश्वरसिद्धिरिति, तदप्यन्यथयति *द्रष्टव्य इति ॥ १५६ ॥ युक्तितोऽपि जीवस्य न जगद्धेतुत्वमित्याह *जगदिति । द्वितीयपूर्वपक्षमुत्थापयति *बुद्धिमन्त इति ॥ १५७ ॥ तटस्थेश्वरसाधनफलमाह *तस्मादिति । निकृष्टो जीवः उत्कृष्टमीशं स्वामीदासभावेन पूजयेन्न तु 'अहं ब्रह्म'इति भावयेदित्यर्थः। विपक्षे दोषमाह *अहं ब्रह्मेति । यथाऽमात्यः स्वात्मानं राजानं भावयन्प्रत्यवैति तथेशमात्मानं पश्यन्जीवः प्रत्यवेयादिति भावः ॥ १५८ ॥ तटस्थेश्वरवादिमतमपि निराकरोति *नैतदिति ॥ १५९ ॥ परस्यैव प्रवेशवादिमन्त्रब्राह्मणवादानुदाहरति *तदिति ॥ १६० ॥ सत्यं पर एव स्वसृष्टेषु प्रविष्टः, किन्तु जीवरूपेणाविकारापन्नः सन्, न तु साक्षादिति तृतीयपूर्वपक्षमाह *जीव इति । तस्य ब्रह्मविकारत्वे फलितमाह *अत इति । अयं भावः—ब्रह्मणः साक्षात्प्रवेशे प्रविष्टः संसारी न वा ? आद्ये तदभिन्नब्रह्मणोऽपि संसारिता स्यात् । द्विती-

बन्धमोक्षव्यवस्थेति केचित्, तत्तु न युज्यते ॥१६१॥
घटकेशदधीनीव विकारो भवतीति यः ॥
युतसिद्धः पृथिव्यंशो मृत्पिण्डो घटतां व्रजेत्॥१६२॥
केशस्त्वयुतसिद्धांशः पलितत्वं समश्नुते ॥
क्षीरं सर्वं दधि भवेद्भवेद् ब्रह्म न तु त्रिधा ॥ १६३॥
कूटस्थत्वान्निरंशत्वाद् ब्रह्मणो नास्ति विक्रिया ॥
दिव्यो ह्यमूर्त्त इत्यादिश्रुतिवाक्यसहस्रतः ॥ १६४ ॥
विस्फुलिङ्गश्रुतेर्जीवो ब्रह्मांशः संसरेद्यदि ॥
तर्ह्यंशस्फुटनाद् ब्रह्म संयुज्येत व्रणेन तत् ॥ १६५ ॥
अकायमव्रणं चेति श्रुतिर्व्रणनिषेधिनी ॥

ये उपदेशानर्थक्यं, तथा च समुद्रतरङ्गन्यायेन जीवस्य ब्रह्मणो भिन्नाभिन्नत्वे तत्र भेदांशेन संसारित्वमभेदांशेनैक्यश्रुत्युपपत्तिरिति ब्रह्मणो नानारसत्वे न कोऽपि दोष इति ॥ १६१ ॥ जीवस्य ब्रह्मविकारित्वायोगं दर्शयितुं विकल्पयति *घटेत्यादिना । यथा नानाऽवयवसमुदायभूतायाः पृथिव्याः पृथक्कृतस्तदेकदेशो मृत्पिण्डो घटाकारेण परिणमते, एवं परमात्मचैतन्यैकदेशं ततः पृथग्भूतं सज्जीवाकारेण परिणमते उत शरीरस्थस्यैव केशादेः श्वैत्याद्यापत्तिवद्ब्रह्मैकदेशस्य जीवतापत्तिः, अथवा क्षीरवत्पूर्वरूपपरित्यागेन ब्रह्म जीवतामापद्यत इति विकल्पार्थः ॥ १६२ ॥ पक्षत्रयमप्यनुपपन्नमिति दूषयति *भवेदिति । एतेन समुद्रतरङ्गादिन्यायोऽपि निरस्तो वेदितव्यः ॥ १६३ ॥ निरंशत्वहेतोरासिद्धिमाशङ्क्य परिहरति *कूटस्थ इति ॥ १६४ ॥ ब्रह्मणः सांशत्वेऽपि श्रुतिरस्तीति शङ्कते *विस्फुलिङ्गेति ॥ १६५ ॥ अस्तु

स्वप्नसंसारवत्तस्माज्जीवसंसार इष्यताम् ॥ १६६ ॥
विस्फुलिङ्गाद्युपन्यासः क्षेत्रज्ञपरमात्मनोः ॥
ऐकात्म्यप्रतिपत्त्यर्थो न जीवं भेत्तुमर्हति ॥ १६७ ॥
मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा ॥
उपायः सोऽवतारायेत्याहुरागमवेदिनः ॥ १६८ ॥
विस्फुलिङ्गो यथोत्पत्तेः पूर्वमग्न्यात्मकस्तथा ॥
क्षेत्रज्ञः सृष्टितः पूर्वं परमात्मैव नापरः ॥ १६९ ॥
भ्रान्त्या क्षेत्रज्ञता भाति बोधादेषा निवर्तते ॥
इत्यत्र राजपुत्रस्य व्याधता स्यान्निदर्शनम् ॥ १७० ॥
राजपुत्रो रोगवशादुन्मत्तः सन्वनं गतः ॥
चिरं व्याधगृहे स्थित्वा व्याधोऽस्मीत्यभिमन्यते ॥१७१॥
उन्मादशान्तावप्येष न तां सस्मार राजताम् ॥
अभिज्ञः कश्चिदागत्य स्मारयामास राजताम् ॥१७२॥
ततो राज्येऽभिषिक्तः सन् व्याधतां नैव मन्यते ॥
ब्रह्मण्येवं योजनीयौ बन्धमोक्षौ प्रकल्पितौ ॥ १७३ ॥

ब्रह्मणो व्रणयोगोऽपि तत्राह *अकायमिति । कथं तर्हि ब्रह्मण एकरसत्वे तदभिन्नजीवे संसारप्रतीतिस्तत्राह *स्वप्नेति ॥ १६६ ॥ का तर्हि विस्फुलिङ्गदृष्टान्तश्रुतेर्गतिरित्याशङ्क्याका-यमव्रणमित्यादिबहुश्रुतिविरोधादन्यपरा सेत्याह *विस्फुलिङ्गे-ति॥१६७॥उक्तेऽर्थे गौडपादाचार्यसम्मतिमाह *मृदिति॥१६८॥ उक्तश्रुतेस्तात्पर्यान्तरमाह *विस्फुलिङ्गो यथेति॥१६९॥ ननु जी-वसंसारो भ्रमकल्पित इत्यनुपपन्नं तत्र श्रुत्यनुग्राहकदृष्टान्ताभावा-दिति, नेत्याह *भ्रान्त्येत्यादिना ॥१७०॥१७१॥१७२॥ दृष्टा-न्तोक्तमर्थं दार्ष्टान्तिके योजयति *ब्रह्मणीत्यादिना॥१७३॥ देहं

ब्रह्मैवाविद्यया देहं प्राप्य रागादिदोषतः ॥
सदसत्कर्मजन्मादिबन्धमात्मन्यमन्यत ॥ १७४ ॥
नित्यकर्मविपाकेन रागाद्यपगमे सति ॥
गुरुशास्त्रोपदेशेन ब्रह्मत्वं स्वस्य बुध्यते ॥ १७५ ॥
जीवन्मुक्तिं ततः प्राप्य स्वस्य बन्धं न मन्यते ॥
इत्थं बन्धस्य मिथ्यात्वाद् ब्रह्मैकरसमेव हि ॥१७६॥
अपूर्वानपराद्युक्तेः प्रज्ञानघनशब्दतः ॥
भेददृष्ट्यपवादाच्च ब्रह्मैकरसमिष्यताम् ॥ १७७ ॥
केचिदेकरसे तत्त्वे विरोधं मानमेययोः ॥
बहुधा चोदयन्त्यत्र पण्डितम्मन्यतां गताः ॥ १७८ ॥
सर्वाद्वैतं बोधयेच्चेदधीतोपनिषत्तदा ॥
स्वप्रामाण्यं कर्मकाण्डप्रामाण्यमपि हन्त्यसौ ॥१७९॥
गुरुशास्त्राद्यभावेन स्वप्रामाण्यमसम्भवि ॥
निषेधविध्यभावेन कर्मकाण्डेऽप्यमानता ॥ १८० ॥
मेयं चाद्वैतवस्त्वत्र सर्वमानैर्विरुध्यते ॥
भिन्ना रूपादिविषया मीन्यते चक्षुरादिभिः ॥१८१॥

प्राप्येति—अविद्यादौ प्रतिबिम्बभावं प्राप्येत्यर्थः ॥१७४॥१७५॥ ब्रह्मणो एकरसत्वमुपसंहरति *इत्थमिति ॥ १७६ ॥ एवं न्यायासिद्धेऽर्थे श्रुतिमप्याह *अपूर्वेति ॥ १७७ ॥ असकृत्परिहृतमपि चतुर्थं पूर्वपक्षमपि प्रकारान्तरेण परिहर्तुमुत्थापयति *केचिदित्यादिना ॥ १७८ ॥ १७९ ॥ उपनिषदामद्वैतवस्तुबोधयतां काण्डद्वयप्रामाण्यविघातकत्वमेवाह *गुर्विति ॥ १८० ॥ किंचाध्यक्षादिविरोधान्नाद्वैतं शास्त्रमेयमित्याह *मेयमिति । तत्र नानापदार्थबोधित्वं प्रत्यक्षादीनां क्रमेणाह

नानाऽऽत्मानोऽनुमीयन्ते सुखदुःखव्यवस्थया ॥
आगमेनापि गम्यास्ते ग्रामकामादिभेदतः ॥ १८२ ॥
प्रत्यक्षेणानुमानेन शास्त्रेणापि विरुद्धताम् ॥
एवमुद्भावयन्त्येते ब्रह्मैकत्वप्रदूषकाः ॥ १८३ ॥
नैष दोषो ऽप्रमाणत्वं कदोपनिषदो वद ॥
बोधात्प्रागथवा पश्चान्न प्राक्तद्धेत्वसम्भवात् ॥ १८४ ॥
गुरुशास्त्रादयः सन्ति बोधात्पूर्वमबाधिताः ॥
अबोधसंशयभ्रान्तिशङ्का नास्त्यप्रमा कुतः ॥ १८५ ॥
बोधादूर्ध्वं च नैष्फल्यादमात्वं किं भवेच्छ्रुतेः ॥
मानान्तरविरोधाद्वा मेयस्यासम्भवादुत ॥ १८६ ॥
संसारानर्थहानाख्ये वेदान्तज्ञानजे फले ॥
प्रत्यक्षेणानुभूते ऽत्र नैष्फल्यं कथमुच्यते ॥ १८७ ॥
किमेकविषयत्वेन किंवा विषयभेदतः ॥

---

*भिन्ना इत्यादिना ॥ १८१ ॥ १८२ ॥ पूर्वपक्षमुपसंहरति *प्रत्यक्षेणेति ॥ १८३ ॥ तत्रोपनिषदप्रामाण्यं तावत्परिहरति *नैष इति । आद्यं प्रत्याह *नेति ॥ १८४ ॥ अप्रामाण्यहेत्वभावमुपपादयति *गुर्विति । उपनिषदां यावद्व्यवहारमबाधितत्वाङ्गीकारादबोधकत्वादिशङ्कैव नास्ति कुतोऽप्रामाण्यमित्यर्थः ॥ १८५ ॥ द्वितीयपक्षमनुवदति *बोधादिति । तदानीं श्रुतेरप्रमात्वे निमित्तं पृच्छति *नैष्फल्यादिति । *मानान्तरेति । कर्मकाण्डविरोधादित्यर्थः ॥ १८६ ॥ आद्यं प्रत्याह *संसारेति ॥ १८७ ॥ द्वितीयं दूषयितुं विकल्पयति *किमेकेति । कृत्स्नवेदस्यैकार्थ्येनैकवाक्यत्वे विरोधशङ्कैव नास्ती-

विरोधः शङ्क्यते, तत्र नैकार्थ्येऽस्ति विरुद्धता ॥१८८॥
विभिन्नविषयत्वे तु नितरामविरुद्धता ॥
नैवासम्भवशङ्काऽस्ति सर्वार्थेष्ववभासनात् ॥१८९॥
प्रमाणमप्रमाणं च प्रमाभासस्तथैव च ॥
कुर्वन्त्येव प्रमां यत्र तदसम्भावना कुतः ॥ १९० ॥
इष्टः प्रबुध्य ऐकात्म्ये गुरुशास्त्राद्यसम्भवः ॥
मानस्य चरितार्थत्वात् स्वप्रामाण्यं न हन्त्यतः॥१९१॥
कर्मकाण्डस्य मात्वं च हन्यादुपनिषत्कथम् ॥
काण्डयोरेकवाक्यत्वमथवा भिन्नवाक्यता ॥ १९२ ॥
उपायोपेयबोधित्वात्कृत्स्नवेदैकवाक्यता ॥
यदि तर्ह्यविरुद्धत्वात्कुतः प्रामाण्यघातिता ॥ १९३॥
अथात्र भिन्नवाक्यत्वं सिद्धसाध्यार्थभेदतः ॥
तदाऽपि न विरोधोऽस्ति विभिन्नविषयत्वतः॥१९४॥
निषेधति विधत्ते वा नासावुपनिषद् क्रियाम् ॥

त्याह *तत्र नैकार्थ्य इति ॥ १८८ ॥ काण्डद्वयं भिन्नविषयमिति पक्षं दूषयति *विभिन्नेति । तृतीयमपवदति *नेति ॥ १८९ ॥ आत्मनः सर्वार्थेषु मानमेवासम्भवीत्याशङ्क्य तार्तीयं परिहारं स्मारयति *प्रमाणमिति ॥ १९० ॥ एवं हेत्वभावाद्बोधानन्तरमप्युपनिषदां नाप्रामाण्यमित्युक्त्वा गुर्वाद्यसम्भवात्तासां मानविघातकत्वमिति यदुक्तं तत्र गुर्वाद्यभावमङ्गीकृत्य मानविघातकत्वं निरस्यति *इष्ट इति ॥ १९१ ॥ कर्मकाण्डप्रामाण्यविघातकत्वमप्यत एव प्रत्युक्तमित्युक्तमेव प्रपञ्चयति *काण्डयोरित्यादिना॥१९२॥१९३॥१९४॥भिन्नविषय-

प्रत्यक्त्वैकसम्बोधे तद्वाक्योपक्षयो यतः ॥ १९५ ॥
द्वैतेऽस्मिन्बाधिते बोधात्कर्मकाण्डस्य सर्वथा ॥
अपह्रीयेत विषय इति शङ्का न युज्यते ॥ १९६ ॥
न द्वैतसत्यता कर्मकाण्डस्य विषयोऽपि तु ॥
साध्यसाधनसम्बन्धो, न त्वसाविह बाध्यते ॥१९७॥
द्वैतसत्यत्वमिथ्यात्वे अविचार्यैव मानवः ॥
इष्टप्राप्तिमनिष्टस्य निवृत्तिमभिवाञ्छति ॥ १९८ ॥
साध्यसाधनसम्बन्धं तादृशः कामिनोऽर्कवत् ॥
कर्मकाण्डो भासयते कामी तत्र प्रवर्तते ॥ १९९ ॥
अकामतः क्रिया काचिद् दृश्यते नेह कस्यचित् ॥
यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ॥ २०० ॥
न निवर्तयितुं शक्ता पुरुषान्कामिनः श्रुतिः ॥ ।
नापि प्रेरयितुं शक्ता विरक्तान्कर्मसु क्वचित् ॥२०१॥
यथोचितं बोधयन्ती श्रुतिः कामिविरागिणौ ॥
वर्तते कर्मकाण्डस्य मानत्वं हन्यते कुतः ॥ २०२ ॥

त्वेनाविरोधमाह *निषेधतीति ॥ १९५ ॥ तस्याद्वयप्रत्यगात्मोक्त्युपक्षयेऽपि तद्विरोधान्न कर्मवाक्यं स्वार्थे प्रमां कुर्यादित्याशङ्क्य परिहरति *द्वैत इत्यादिना॥१९६॥१९७॥ननु द्वैतगतसत्यत्वांशस्य बाधितत्वे साध्यसाधनसम्बन्धज्ञानमात्रात्कथं मिथ्याभूतयागादौ प्रवृत्तिस्तत्राह *द्वैतेत्यादिना ॥१९८॥१९९॥ काममात्रादेव सर्वस्यापि प्रवृत्तिरित्यत्र मनुवचनमाह *अकामत इति ॥२००॥२०१॥ कस्तर्हि श्रुतेर्व्यापारस्तत्राह *यथोचितमिति बोधयन्ती वर्तत इति सम्बन्धः । वेदान्तस्य प्रामाण्याविघातकत्वमुपसंहरति *कर्मकाण्डस्येति ॥ २०२ ॥ यदुक्तमद्वयब्रह्म-

नाप्यद्वैतविरोधोऽस्ति रूपादिग्राहकेन्द्रियैः ॥
किं भो ! गवादिभेदेन व्योमैकत्वं विरुध्यते ॥२०३॥
मायाकल्पितरूपादीन्प्राभिन्नांश्चक्षुरादयः ॥
गृह्णन्त्वेव किमायातमद्वैते परमार्थतः ॥ २०४ ॥
नानाऽऽत्मानोऽनुमीयन्त इत्येतदपि दुर्घटम् ॥
किमप्रमेये नानात्वमाहोस्विन्मेय आत्मनि ॥ २०५ ॥
अप्रमेयेऽनुमानस्य प्रवृत्तिर्न कथञ्चन ॥
प्रमेयस्य तु नानात्वाद्भेदोऽस्माभिरपीष्यते ॥ २०६ ॥
ग्रामकामादिवाक्योक्तं भेदं चैवं नयेद् बुधः ॥
इष्टो भेदः प्रमेयाणां काम्यन्तःकरणात्मनाम् ॥२०७॥

णः शास्त्रमेयत्वे अध्यक्षादिविरोध इति, तत्र न तावदध्यक्षविरोध इत्याह *नापीति । कथमविरोध इत्याशङ्क्य किं तदेकत्वमध्यक्षविरुद्धं किंवा तदद्वयत्वं ? तत्राद्यं दृष्टान्तेन निराचष्टे *किं भो इति । यथा सर्वभूतस्थमेकमाकाशमित्युक्ते न गवादिभेदग्राहिप्रत्यक्षविरोधो भिन्नविषयत्वात् । तथा सर्वभूतस्थमेकं ब्रह्मेत्युक्तेऽपि न तत्प्रत्यक्षविरोध इत्यर्थः ॥२०३॥ कल्पितस्याधिष्ठानापरिच्छेदकत्वान्न द्वितीयोऽपीत्याह *मायेति॥२०४॥ अनुमानविरोधमुक्तं धुनीते *नानेति । तत्रापि स्वप्रकाशचिदेकरसे नानात्वमनुमीयते उतान्तःकरणविशिष्ट इति विकल्पयति *किमिति ॥२०५॥ आद्यं धर्मिग्राहकमानविरोधेन दूषयति *अप्रमेय इति । द्वितीये त्विष्टापत्तिरित्याह *प्रमेयस्येति॥२०६॥ एवं ग्रामकामादिपदवाच्यानामन्तःकरणविशिष्टानां भेदस्यास्माभिरङ्गीकृतत्वान्न श्रुतिविरोधोऽपीत्याह *ग्रामेति ॥२०७॥

प्रत्यक्षमनुमानं च शास्त्रं च प्रत्युताद्वये ॥
आत्मन्येव प्रसिध्यन्ति सुतरां सुविचारिणाम् ॥२०८॥
आत्मावभासिकाऽहंधीः सा चैकत्रैव जायते ॥
निपुणोऽप्यहमित्येवं नानेकत्राभिमन्यते ॥ २०९ ॥
एकात्मवन्तो देहाः स्युर्विवादो यत्र वर्तते ॥
शरीरत्वाविशेषत्वात्प्रतिवादिशरीरवत् ॥ २१० ॥
वेदान्तेष्वखिलेष्वात्मवस्त्वेकमिति डिण्डिमः ॥
तस्मादेकरसेऽन्योक्तविरोधो नास्ति कश्चन ॥ २११ ॥

इति वार्तिकसारे द्वितीयाध्यायस्य प्रथमं ब्राह्मणं समाप्तम् ॥

एवं प्रत्यक्षादीनां भेदासाधकत्वमुक्त्वाऽभेदसाधकत्वमाह *प्रत्यक्षमिति ॥ २०८ ॥ किं तत्प्रत्यक्षं तदाह *आत्मेति । अन्तःकरणप्रदेशेषु नियमेन सर्वेषामहमहमिति जायमाना धीवृत्तिर्गोत्वादिबुद्धिवत्किञ्चिदनुगतं वस्तु विषयीकरोति । तच्च बुद्धिप्रकाशकात्मस्वरूपमेवेत्यर्थः ॥ २०९ ॥ अनुमानमाह *एकात्मेति ॥ २१० ॥ श्रुतेरैकात्म्यबोधकत्वमतिप्रसिद्धमित्याह *वेदान्तेष्विति ॥ २११ ॥

इति वार्त्तिकसारटीकायां द्वितीयाध्यायस्य प्रथमं ब्राह्मणं समाप्तम् ॥

—:o:—

पूर्वस्मिन् ब्राह्मणे प्राणादन्य आत्मेति विस्तृतम् ॥
सङ्गृहीतं च तात्पर्यं सत्यसत्येति नामतः ॥ १ ॥
वस्तुसङ्ग्रहवाक्यत्वात्सूत्रप्रायमिति श्रुतिः ॥
सत्यशब्दद्वयस्यार्थौ प्राणात्मानाववोचत ॥ २ ॥
आविष्क्रियेते तावर्थौ क्रमेण ब्राह्मणद्वये ॥
भवत्येतावता स्पष्टं गार्ग्यराजमतद्वयम् ॥ ३ ॥
तत्र प्राण उपाधिः स्यादात्मोत्क्रान्तिप्रवेशयोः ॥
अत आत्मत्वविभ्रान्तिर्बालाकेरभवत्पुरा ॥ ४ ॥
आत्मोपाधितयैवास्य प्राणस्य स्यादुपास्यता ॥
स प्राणस्तदुपाधिश्च ब्राह्मणेऽस्मिन्विविच्यते ॥ ५ ॥

श्रुतिः—यो ह वै शिशुꣳ साधानꣳ सप्रत्याधानꣳ सस्थूणꣳ सदामं वेद सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि अयं वाव शिशुर्योऽयं मध्यमः प्राणस्तस्येदमेवाधानमिदꣳ प्रत्याधानं प्राणः स्थूणाऽन्नं दाम ॥ १ ॥

वा०—शिशुवद्विषयासङ्गरहितः प्राण इष्यते ॥

वृत्तवर्त्तिष्यमाणयोः सङ्गतिं वक्तुं वृत्तमनुवदति *पूर्वस्मिन्निति द्वाभ्याम् ॥ तस्योपनिषत्सत्यस्य सत्यमित्युक्त्वा प्राणा वा इत्यादिना श्रुत्यैव सत्यशब्दद्वयस्य सङ्ग्रहेणार्थो वर्णित इत्यर्थः ॥ १ ॥ २ ॥ एवं वृत्तमनूद्य सङ्गतिमाह *आविष्क्रियेते इति । उक्तार्थप्रपञ्चनफलमाह *भवतीति ॥ ३ ॥ ४ ॥ गार्ग्यस्य प्राण आत्मत्वभ्रमे युक्तिमुक्त्वा द्वितीयब्राह्मणप्रतिपाद्यमर्थं सङ्गृह्णाति *आत्मेति ॥ ५ ॥ एवं तात्पर्यमुक्त्वा यो ह वै शिशुमित्यत्र शिशुशब्दार्थमाह *शिशुवदिति । विषयासङ्गराहितत्वात् प्राणः शिशुशब्देनोच्यते इत्यर्थः । हेतो-

वागादीनामिव यतो विषयोऽस्य न दृश्यते ॥ ६ ॥
शरीरमस्याधानं स्याद्देहमापादमस्तकम् ॥
सामान्यवृत्त्या संव्याप्य चेष्टयत्यनिशं यतः ॥ ७ ॥
प्रत्याधानं शिरो ज्ञेयं प्रतिच्छिद्रं व्यवस्थितः ॥
प्रसारयति नेत्रादीन्प्राणो मूर्द्धनि विशेषतः ॥ ८ ॥
प्राणस्य बन्धनस्तम्भः शारीरं बलमिष्यते ॥
दौर्बल्ये सति देहस्य प्राणोत्क्रान्तिर्हि दृश्यते ॥ ९ ॥
बन्धनायास्य दामान्नं वत्सबन्धनरज्जुवत् ॥
अन्ने त्रेधा विभिन्नेऽस्मिन्भागाभ्यां बध्यते द्वयम्॥१०॥
स्थूलभागः पुरीषं स्यान्मध्यमो देहपोषकः ॥
प्राणं तर्पयते सूक्ष्म इति बद्धं वपुर्द्वयम् ॥ ११ ॥
एवं विवेचितं प्राणं य उपास्ते रुणद्धि सः ॥
भ्रातृव्यान्द्विषतः सप्त मूर्द्धनि छिद्रव्यवस्थितान् ॥१२॥

रसिद्धिमाशङ्क्याह *वागादीनामिति ॥ ६ ॥ साधानमित्यत्राधानपदमधिष्ठानपरमित्याह *शरीरमिति । तत्र हेतुः *देहमिति ॥ ७ ॥ प्रत्याधानशब्दस्य शिरोवाचकत्वं वदन् तत्र हेतुमाह *प्रतीति ॥ ८ ॥ स्थूणाशब्दार्थमाह *प्राणस्येति । बलस्य प्राणबन्धनस्तम्भत्वे हेतुः *दौर्बल्य इति ॥ ९ ॥ दामशब्दार्थमाह *बन्धनायेति ॥ प्राणदामत्वमन्नस्योपपादयितुं देहद्वयमप्यन्नात्मकरज्ज्वा बध्यत इत्याह *अन्न इति ॥ १० ॥ उक्तमेव व्यनक्ति *स्थूलेति ॥ ११ ॥ वेदेत्यस्यार्थं वदन् सप्त ह द्विषत इत्यादेरर्थमाह *एवमिति । के ते सप्त द्विषन्तस्तानाह *मूर्द्धनीति ॥१२॥ शिरश्छिद्रव्यवस्थितचक्षुरादिसप्तेन्द्रियाणां शत्रुत्वं कथमिति तत्राह *भ्रातृव्या इति

भ्रातृव्याः स्युः सहोत्पत्तेः शब्दाद्यासङ्गवृत्तयः ॥
द्विषन्ति च मुमुक्षुं ताः प्रत्यगूदृष्ट्यपहारतः ॥ १३ ॥
सेवन्ते ऽक्षि स्थितं प्राणं सप्त रुद्रादिदेवताः ॥
अक्षीणा इत्युपास्ते यः सोऽन्नाक्षयमुपाश्नुते ॥ १४ ॥

श्रुतिः—तमेताः सप्ताक्षितय उपतिष्ठन्ते तद्या इमा अक्षन् लोहिन्यो राजयस्ताभिरेनꣳ रुद्रोऽन्वायत्तो ऽथ या अक्षन्नापस्ताभिः पर्जन्यो या कनीनिका तयाऽऽदित्यो यत्कृष्णं तेनाग्निर्यच्छुक्लं तेनेन्द्रो ऽधरयैनं वर्त्तन्या पृथिव्यन्वायत्ता द्यौरुत्तरया नास्यान्नं क्षीयते य एवं वेद ॥ २ ॥

शब्दाद्यासङ्गवृत्तिहेतुश्रोत्रादीनां सहजत्वेऽपि द्वेषित्वं कथं तत्राह *द्विषन्ति चेति ॥ १३ ॥ तमेताः सप्तेत्यादेस्तात्पर्यमाह *सेवन्त इति ॥ १४ ॥

अक्षरार्थस्तु—यो ह वा इत्यादिरुणद्धीत्यन्तेन सफलामुपास्तिमुक्त्वा फलश्रवणेनाभिमुखीभूताय शिशुत्वादिपदार्थानाह श्रुतिः *अयं वावेत्यादिना । प्राणस्थूणेत्यत्र प्राणशब्दो बलवचनः । उक्तार्थमन्यत् ॥ १ ॥

*तमेता इति । तं प्राणम् एता वक्ष्यमाणाः सप्तसङ्ख्याका अक्षितय उपतिष्ठन्ते । कास्ता अक्षितय इति, उच्यते । तत् तत्र या इमाः प्रसिद्धा अक्षन् अक्षिणि लोहिन्यो लोहिता राजयो रेखास्ताभिर्द्वारभूताभिरेनं मध्यमप्राणं रुद्रोऽन्वायत्तः अनुगतः । अथ रुद्रस्य प्राणवृत्त्यनुगतेरनन्तरं या अक्षिणि आपः धूमादिसंयोगे व्यज्यमानास्ताभिः पर्जन्यो देवतात्माऽनुगत उपतिष्ठते इत्यर्थः । कनीनिका दृक्शक्तिः अधरया वर्तन्या पक्ष्मणेत्यर्थः ॥ २ ॥

तदेष श्लोको भवति—अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपम्। तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति। अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपमिति, प्राणा वै यशो विश्वरूपं प्राणानेतदाह तस्यासत ऋषयः सप्त तीर इति, प्राणा वा ऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वाग्घ्यष्टमी ब्रह्मणा संवित्ते ॥ ३ ॥

तत् तत्र एतस्मिन्नर्थे एष श्लोको भवति *अर्वाग्बिल इत्यादि। इमं मन्त्रमनूद्य श्रुतिरेव व्याकरोति *अर्वागित्यादिना। अस्य शिरसः चमसाकारत्वं कथमित्याशङ्क्याह श्रुतिः *एष हीति। एष शिरप्रदेशोऽर्वाग्बिलो भवति। मुखस्य बिलरूपत्वाच्छिरसो बुध्नाकारत्वादूर्ध्वबुध्नश्च भवति। तस्मिन्नित्यादि पूर्ववन्मन्त्रानुवादः। यथा सोमश्चमसे। एवं तस्मिंश्छिरसि विश्वरूपं नानारूपं यशो निहितं स्थितम्। किं पुनस्तद्यशस्तदाह—प्राणाः श्रोत्रादयः वायवश्च सप्तधा तेषु प्रसृतास्तान् यश इत्याह मन्त्र इत्यर्थः। तस्य शिरस्तीरे समीपे प्राणाः परिस्पन्दात्मकास्त एव ऋषय इति प्राणा वा ऋषय इत्येतदाह मन्त्रः इत्यर्थः। *वागष्टमीति। ब्रह्मणा शब्दराशिना संविदाना संसृष्टा शब्दराशिमुच्चारयन्ती वागष्टमीति यावत्। वाचः सप्तमीत्वेनोक्तत्वात्कथमष्टमीत्वमिति तत्राह *वाग्घ्यष्टमी ब्रह्मणा संवित्तेति। अत्तृत्वेन वाचः सप्तमीत्वेऽपि वक्तृत्वेनाष्टमीत्वमविरुद्धमिति भावः ॥ ३ ॥

इमावेव गोतमभरद्वाजावयमेव गोतमोऽयं भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यते ऽत्तिर्ह वै नामैतद्यदत्रिरिति सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवं वेद ॥ ४ ॥

इत्युपनिषदि चतुर्थाध्याये
द्वितीयं ब्राह्मणं समाप्तम् ॥ २ ॥

वा०–कर्णादिसप्तछिद्रेषु गौतमाद्यृषिनामकाः ॥
स्थिताः प्राणा इति ध्यायेद्वाचं च ब्रह्मवादिनीम् ॥ १५॥
हिरण्यगर्भरूपेण सर्वभुक् स्यादुपासकः ॥

प्राणा वा ऋषय इत्यत्र मुखबिलस्थितेषु प्राणेषु ऋषिदृष्टिः कार्येत्युक्तम् । के ते ऋषयस्तानाह *इमावेवेति । इमौ कर्णौ दक्षिणकर्णो गौतमः, उत्तरश्च भरद्वाजः । अक्षिणि उपदिशन्नुवाच *इमावेव विश्वामित्रजमदग्नी इति । नासिके उपदिशन्नुवाच *इमावेव वसिष्ठकश्यपाविति । अयमेवेति दक्षिणोत्तरनिर्देशः पूर्ववत् । वागेवात्रिः सप्तमः, वाचश्चात्रित्वम् अदनक्रियायोगादित्यभिप्रेत्य हेतुं साधयति *वाचा हीति । अतोऽत्तृत्वादत्तिरिति ह वै प्रसिद्धं नामैतत्तदात्तिरेव सदत्रिरित्युच्यते परोक्षेण ।

एतत्सर्वमभिप्रेत्याह *कर्णादीति । *ब्रह्मवादिनीमिति । शब्दराशिं वदन्तीमित्यर्थः ॥ १९ ॥

एवं प्राणोपासकस्य फलमाह श्रुतिः *सर्वस्येत्यादिना॥४॥

इति गार्ग्यमतं ब्रह्म ब्राह्मणेऽस्मिन्प्रपञ्चितम् ॥ १६ ॥

इति वार्तिकसारे द्वितीयाध्यायस्य
द्वितीयं ब्राह्मणं समाप्तम् ॥ २ ॥

गार्ग्योक्तं ब्रह्म विस्तृत्य तन्निरासाय साम्प्रतम् ॥
तृतीयब्राह्मणे प्राह राज्ञोक्तं ब्रह्म विस्तृतम् ॥ १ ॥
प्रथमब्राह्मणे राजा ब्रह्म यद्यप्यशेषतः ॥
उवाचाथापि सत्यस्य सत्यता नहि विस्तृता ॥ २ ॥
सत्यसत्यस्वविस्तारमुखेन प्रतिपाद्यते ॥
निष्प्रपञ्चब्रह्मतत्त्वं तृतीयब्राह्मणे स्फुटम् ॥ ३ ॥

श्रुतिः ॥ द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यच्च ॥ १ ॥

वा०–द्वे एव ब्रह्मणो रूपे प्रपञ्चत्वमुपागते ॥
मूर्त्तामूर्त्तात्मके याभ्यामरूपं ब्रह्म रूप्यते ॥ ४ ॥

तदुपपादयति *हिरण्येति। ब्राह्मणार्थमुपसंहरति *इतीति॥१६॥

इति वार्तिकसारटीकायां द्वितीयाध्यायस्य
द्वितीयं ब्राह्मणं समाप्तम् ॥ २ ॥

वृत्तमनूद्योत्तरग्रन्थस्य पूर्वेण सङ्गतिमाह *गार्ग्येति ॥ १ ॥ एवं समुदायतात्पर्यमुक्त्वा निष्प्रपञ्चस्वरूपनिरूपणार्थं प्रतियोगिभूतप्रपञ्चसङ्ग्रहपरां द्वे वावेत्यादिश्रुतिं व्याचष्टे *द्वे एवेति। तयोः कथं ब्रह्मरूपत्वं तत्राह *याभ्यामिति। निर्विशेषमपि ब्रह्म अज्ञानावस्थायां याभ्यां निरूप्यते सविशेषमिव व्यवह्रियते इत्यर्थः॥४॥ द्वे ब्रह्मणो रूपे इत्यत्र स्थूलसूक्ष्मप्रपञ्चस्तद्वासना च रूपद्वयशब्देन विवक्षितमित्यर्थान्तरमाह *मूर्तेति। तस्यैवार्थान्तरमाह *सवासनमिति। जडमजडं च रूपद्वयशब्देन विवक्षित-

मूर्त्तामूर्त्तप्रपञ्चश्च वासना चेति वा द्वयम् ॥
सवासनामिदं रूपमनिदं चेति वा द्वयम् ॥ ५ ॥
सन्निवेशो नेत्रदृश्यो यस्य तन्मूर्त्तमुच्यते ॥
क्षित्यम्ब्वग्नित्रयं मूर्त्तममूर्त्तं त्वितरद् द्वयम् ॥ ६ ॥
मूर्त्तामूर्त्तस्वभावत्वमशेषजगतीक्षितुम् ॥
आविष्कृतस्तत्स्वभावो मर्त्यत्वादिविशेषणैः ॥ ७ ॥
मूर्त्तं स्थूलवपुर्मर्त्यं सूक्ष्मात्क्षिप्रं विनाशतः ॥
अमूर्त्तं सूक्ष्ममभृतमामोक्षमविनाशतः ॥ ८ ॥
पाञ्चभौतिकता तुल्या यद्यपि स्थूलसूक्ष्मयोः ॥

मिति भावः ॥ ५ ॥ तत्र मूर्त्तस्य लक्षणमाह *सन्निवेश इति । यस्यावयवविन्यासश्चाक्षुषस्तन्मूर्त्तमित्यर्थः । लक्षणमुक्त्वा लक्ष्यं निर्दिशति *क्षित्यम्ब्विति ॥ यस्य सन्निवेशोऽचाक्षुषस्तदमूर्त्तमिति मत्वा लक्ष्यं निर्दिशति *इतरद् द्वयमिति । वायुश्चान्तरिक्षं चेत्यर्थः ॥ ६ ॥ मर्त्यं चेत्यादिविशेषणकथनप्रयोजनमाह *मूर्त्तेति । मूर्त्तामूर्त्तयोर्मर्त्यामृतत्वादिस्वभावानभिधत्ते तदेतन्मूर्त्तमित्याद्युत्तरवाक्येन । मूर्त्तामूर्त्तशब्दयोः पञ्चभूतमात्रवाचित्वोक्त्या भौतिकप्रपञ्चो न सङ्गृहीतः स्यादतस्तत्सङ्ग्रहार्थं तत्स्वभावः कथ्यत इत्यर्थः ॥ ७ ॥ तात्पर्यमुक्त्वा मूर्त्तामूर्त्तशरीरयोर्मर्त्यत्वामृतत्वे उपपादयति *मूर्त्तमिति । चाक्षुषत्वादिलक्षणयोगादाधिदैविकमध्यात्मिकं च स्थूलसूक्ष्मशरीरद्वयं मूर्त्तामूर्त्तशब्दितं भवति । तयोश्चापेक्षिके मर्त्यत्वामृतत्वे उपपद्यते इति भावः ॥ ८ ॥ चाक्षुषत्वादिलक्षणयोगाच्छरीरद्वयस्य मूर्त्तामूर्त्तत्वकथनमनुपपन्नं तयोः पञ्चभूतकार्ययोः पञ्चात्मत्वाविशेषेण चाक्षुषत्वादिव्यवस्थाया एवायोगादित्या-

तथाऽप्यत्र विशेषोऽस्ति प्रधानगुणभावतः ॥ ९ ॥
स्थूलस्य मूर्त्तप्राधान्याच्चक्षुषा तद्विलोक्यते ॥
अमूर्त्तस्य प्रधानत्वात्सूक्ष्मं नैव विलोक्यते ॥ १० ॥
पाञ्चभौतिकयोः स्थूलसूक्ष्मयोर्मर्त्यताऽमृते ॥
यथा तद्वत्परिच्छेदव्यापित्वे च विशेषणैः ॥ ११ ॥
सादिति त्यादितिप्रोक्ते प्रत्यक्षत्वपरोक्षते ॥
मूर्त्तामूर्त्ते च तादृक्त्वाद्रूपे द्वे सत्यनामनी ॥ १२ ॥
अध्यात्ममधिदैवं च यथा सत्यं व्यवस्थितम् ॥

शङ्कां परिहरति *पाञ्चभौतिकतेत्यादिना ॥ ९ ॥ १० ॥ स्थितं यच्चेति पदद्वयस्यार्थं वदन् तयोरपि पूर्ववन्मूर्त्तामूर्त्तात्मकशरीरद्वयविशेषणतामाह *पाञ्चभौतिकयोरिति । स्थितशब्देन परिच्छिन्नत्वं यच्छब्देन व्यापित्वं चोच्यत इत्यर्थः । यद्यध्यात्मिकसूक्ष्मदेहस्य न विभुत्वं तथापि कारणीभूतहिरण्यगर्भलिङ्गस्य विभुत्वात्कार्यकारणयोरभेदविवक्षया अस्यापि व्यापित्वमुक्तमिति बोद्धव्यम् ॥ ११ ॥ सच्च सच्चेति पदद्वयं व्याचष्टे *सादिति । चाक्षुषसन्निवेशवत्त्वं मूर्त्तत्वं, गुणक्रियासाधारणपरोक्षत्वं सत्त्वमिति न पौनरुक्त्यमिति ध्येयम् । उक्तविशेषणविशिष्टत्वात्स्थूलसूक्ष्मप्रपञ्चयोरपि सत्यच्छब्दवाच्यतामाह *मूर्त्तेति ॥ १२ ॥ अत एव देहद्वयमपि सत्यच्छब्दार्थमित्याह *अध्यात्ममिति । तत्तत्स्थूलशरीरावच्छिन्नाधिदैविकलिङ्गव्यतिरेकेणाध्यात्मिकलिङ्गमेव नास्तीति केचित्, तन्मतं प्रत्याह *प्रसिद्धमिति । स्थूलपदं दृष्टान्तार्थम् । लोकान्तरगत्यनुपपत्त्या "अणवश्च" इत्यादिन्यायाच्च स्थूलदे-

प्रसिद्धमुभयस्यापि स्थूलसूक्ष्मवपुर्द्वयम् ॥ १३ ॥

श्रुतिः—तदेतन्मूर्त्तं यदन्यद्वायोश्चान्तरिक्षाच्चैतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति सतो ह्येष रसः ॥ २ ॥

अथामूर्त्तं वायुश्चान्तरिक्षं चैतदमृतमेतद्यदेतत्त्यं तस्यैतस्यामूर्त्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्त्यस्य ह्येष रस

ह्वदाध्यात्मिकसूक्ष्मदेहोऽपि पृथक्प्रसिद्ध इत्यर्थः ॥ १३ ॥

अक्षरार्थस्तु—सङ्ग्रहेणोक्तमर्थं श्रुतिरेव विभजते *तदेतदिति । तत् तयोर्मध्ये एतन्मूर्त्तं प्रथमं विभज्यत इत्यर्थः । तदेव विभजते । *यदन्यदिति । क्षित्यादित्रयं मूर्त्तमित्यर्थः । तदेव विशिनष्टि *एतन्मर्त्यमित्यादिना । रसत्वेन वक्ष्यमाणमण्डलस्य चतुर्विशेषणकभूतत्रयकार्यत्वं न त्वेकैककार्यतेति द्योतयितुमुक्तमेव पुनरनुवदति *तस्यैतस्येत्यादिना ॥ य एष इति । योऽयं मण्डलात्मा सविता तपत्येष चतुष्टयविशेषणकभूतत्रयस्य रसः सार इत्यर्थः ॥ मण्डलस्य भूतत्रयसारत्वे हेतुः *सतो ह्येष रस इति । इमं च हेतुमुत्तरत्रोपपादयिष्यति । मूर्त्तादीनामुपलक्षणम्॥२॥अथामूर्तमिति । मूर्त्तनिरूपणानन्तरममूर्त्तं निरूप्यत इत्यर्थः । य एषः एतस्मिन्निति । योऽयमादित्यमण्डले पुरुषः करणात्मा हिरण्यगर्भः स एष भूतद्वयस्यामूर्त्तादिचतुर्विशेषणविशिष्टस्य रसः । हिण्यगर्भलिङ्गस्य भूतद्वयसारत्वे हेतुः *त्यस्य ह्येष रस इति । त्यस्येत्यमूर्तादीनामुपलक्षणम् ।

इत्यधिदैवतम् ॥ ३ ॥

अथाध्यात्ममिदमेव मूर्त्तं यदन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाश एतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्त्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः सतो ह्येष रसः ॥ ४ ॥

वा०— स्थूलसारतया ज्ञेये चक्षुरादित्यमण्डले ॥
मूर्त्तमर्त्यपरिच्छिन्नप्रत्यक्षत्वविशेषिते ॥ १४ ॥
अमूर्त्तामृतसंव्याप्तपरोक्षत्वैस्तु संयुतम् ॥
उभयत्र स्थितं लिङ्गममूर्त्तरस उच्यते ॥ १५ ॥
हिरण्यगर्भक्षेत्रज्ञममूर्त्तरसमूचिरे ॥
केचिन्मेधाकर्ममुख्याद्वियद्वाय्वादिसर्जनात् ॥ १६ ॥

इत्यधिदैवतमित्युक्तोपसंहारः ॥ ३ ॥

अथाधुनाऽध्यात्मं मूर्त्तामूर्त्तयोर्विभाग उच्यत इत्यर्थः। तदेव विभजते *इदमित्यादिना। योऽभ्यन्तराकाशः शरीरस्थश्च प्राणः एतद् द्वयं वर्जयित्वा यदेतच्छरीरारम्भकभूतत्रयमिदमेव मूर्त्तमित्यर्थः। समानमन्यत्पूर्वेण ॥ ४ ॥

एतत्सर्वमभिप्रेत्य एष रस इत्यादिव्याकुर्वन् बुद्धिसौकर्यायोक्तमर्थं सङ्गृह्णाति *स्थूलसारतयेत्यादिना॥१४॥१५॥ स्वमतमुक्त्वा तत्परिशुद्ध्यर्थं परमतं दूषयितुमनुभाषते *हिरण्येति। मण्डलस्थं सूत्रलिङ्गं विहाय सूत्रक्षेत्रज्ञस्यैवामूर्त्तरसत्वं वदतां परेषामाशयमाह *मेधेति। हिरण्यगर्भक्षेत्रज्ञो हि जन्मान्तरकृतज्ञानकर्मद्वारा प्रथमं वियद्वायुं सृजति अतस्तस्य तत्सारत्वं, लिङ्गग्रहणे पुरुषशब्दप्रयोगानुपपत्तिरिति भावः ॥ १६ ॥ एक-

नैवं मूर्त्तरसेनास्य विरूपत्वप्रसङ्गतः ॥
वाक्यप्रयुक्तौ तुल्यायां न युक्तार्थविरूपता ॥ १७ ॥
यद्वन्मूर्त्तरसोऽभीष्टश्चतुर्विधविशेषणः ॥
अचेतनस्तथैवायममूर्त्तरस इष्यताम् ॥ १८ ॥
अचेतनोऽप्यन्नमयो देहः पुरुषशब्दितः ॥
श्रुत्यन्तरे तथा चास्तु लिङ्गं पुरुषशब्दभाक् ॥ १९ ॥
ब्रह्मोपास्तिस्थानतया रव्यक्ष्णोरतिसारता ॥
व्यवहारोपाधितया लिङ्गस्यापि च सारता ॥ २० ॥
सारासारयुते रूपे मूर्त्तामूर्त्ते उदीरिते ॥
अरूपं ब्रह्म रूपाभ्यां व्यवहारे निरूप्यते ॥ २१ ॥
मूर्त्तामूर्त्तव्यवस्थेयं यथाश्रुत्युपवर्णिता ॥

रूपेण प्रवृत्तवाक्यद्वयस्यार्थवैरूप्यमयुक्तमिति दूषयति *नैवमिति ॥ १७ ॥ अर्थवैरूप्यमेवाह *यद्वदिति । यथा भूतत्रयस्य रसो मूर्त्तमेव मण्डलं भूतत्रयसमानजातीयं दृष्टम् एवममूर्त्तयोरपि भूतयोस्तत्समानजातीयेनैवामूर्त्तरसेन भवितुं युक्तम्, अमूर्त्तरसस्य चेतनत्वे रसयोर्वैजात्यं स्यादित्यर्थः ॥ १८ ॥ परमते दोषमुक्त्वा स्वमते तदुक्तदोषं धुनीते *अचेतन इति॥१९॥ सतो ह्येष रस इत्यादिश्रुत्या मण्डलादीनां चतुर्णां सारत्वं हिशब्देन सूचितमुपपादयति *ब्रह्मोपास्तीति । उपाधिः कारणं सर्वव्यवहारस्यापि लिङ्गाधीनत्वादित्यर्थः ॥ २० ॥ उपसंहरति *सारेति । उक्तरूपद्वयस्य न वस्तुतो ब्रह्मधर्मत्वमित्युक्तं स्मारयति *अरूपमिति ॥ २१ ॥ *मूर्त्तामूर्त्तव्यवस्थेति । अयं भावः—ब्रह्मणोऽद्वयस्य तत्त्वं निश्चेतुं किल प्रतियोगिद्वैतस्वरूपं मूर्त्तामूर्त्तरूपेण श्रुत्या सङ्गृह्यते । तच्चाधिदैवाध्यात्मयो-

अथ युक्त्यनुसारेण साऽन्यथाऽप्युपवर्ण्यते ॥ २२ ॥
अमूर्त्तताऽतिसूक्ष्मेऽत्र समाप्ता मूलकारणे ।
मूर्त्तत्वमप्यतिस्थूले कार्ये ह्यन्ते समाप्यते ॥ २३ ॥
मध्यकारणकार्याणां मूर्त्तताऽमूर्त्तते इमे ॥
आपेक्षिक्यौ यथायोग्यमुदाहरणमिष्यताम् ॥ २४ ॥
अविद्यामात्रगं ब्रह्म कारणं बुद्ध्युपाधिगम् ॥
ज्ञातृतद्वृत्त्युपाधिस्थं ज्ञायमानं घटादिकम् ॥ २५ ॥
एवं च सत्युपाधीनां ह्रासे ह्रसति मूर्त्तता ॥
उपाधिवृद्धौ मूर्त्तत्वं वर्द्धेतेत्युदितं भवेत् ॥ २६ ॥
मूर्त्तामूर्त्ते ब्रह्मरूपे इति पक्षो निरूपितः ॥
प्रपञ्चतद्वासने द्वे रूपे इत्येष वर्ण्यते ॥ २७ ॥
प्रपञ्चो नाम पूर्वोक्तमूर्त्तामूर्त्तद्वयं भवेत् ॥

रुक्तविभागमात्रेण न सङ्गृहीतं भवति मूलकारणस्यासङ्गृहीतत्वात् । तदत्र श्रौतं विभागमुल्लङ्घ्य भर्तृप्रपञ्चोक्तयुक्त्या मूर्त्तामूर्त्तविभागः कल्प्यते इति ॥ २२ ॥ तामेव कल्पनां दर्शयति *अमूर्त्तेत्यादिना । अव्याकृते ऽमूर्त्तत्वं मुख्यम्, अमूर्त्तलक्षणस्य तत्र पूर्णत्वात् । घटादिषु च मुख्यं मूर्त्तत्वम् । आन्तरालिकेषु मूर्त्तामूर्त्तत्वमापेक्षिकत्वाद्गौणमित्यर्थः ॥२३॥२४॥ उदाहरति *अविद्येत्यादिना । मायोपहितब्रह्मण्यमूर्त्तत्वं मुख्यं,प्रमातुः बुद्धिवृत्तिविषयघटादौ मूर्त्तत्वं पर्यवसितम् । प्रमातुरव्याकृतापेक्षया मूर्त्तत्वं घटाद्यपेक्षया ऽमूर्त्तत्वम् । इत्येवं सर्वत्र मूर्त्तामूर्त्तविभागः कल्प्यत इत्यर्थः॥२५॥२६॥ उपसंहरति *मूर्त्तेति ॥ २७ ॥ तस्य हैतस्येत्यादिवाक्यस्यासाङ्गत्यं परिहर्त्तुं द्वे वाव ब्रह्मणो रूपे इत्यस्य वाक्यस्यो-

तद्वासना विचित्राः स्युरनन्ता लिङ्गमाश्रिताः॥२८॥
अनेकवासनाचित्रं तल्लिङ्गं पटभित्तिवत् ॥
मायेन्द्रजालसदृशं व्यामोहास्पदमात्मनः ॥ २९ ॥
एतावन्मात्र आत्मेति तत्र भ्रान्ता निरागमाः ॥
बौद्धकाणादसाङ्ख्याद्यास्तर्कमात्रोपजीविनः ॥३०॥
एकैकां वासनां तत्र प्रतिक्षणविनश्वरीम् ॥
आहुः क्षणिकमात्मानं बौद्धा विज्ञानवादिनः ॥३१॥
आत्मनो द्रव्यभूतस्य गुणा बुद्ध्यादयो नव ॥
वासनात्वेन वेदोक्ता इति वैशेषिकादयः ॥ ३२ ॥

त्तरमुक्तमनूद्य व्याचष्टे *प्रपञ्चेत्यादिना । मूर्त्तामूर्त्तवासनानां वस्तुतो जीवधर्मत्वं निरस्यति *लिङ्गमाश्रिता इति । अन्तःकरणस्यैव मूर्त्तादिसर्वविषयसम्बन्धात्तन्निमित्तरागादिवासनाः सर्वा अन्तःकरणाश्रिता एवेति वक्तव्यम् । एवं च योऽयं दक्षिणेऽक्षन्पुरुष इति पूर्ववाक्ये पुरुषशब्दितलिङ्गस्य प्रकृतत्वाल्लिङ्गप्रधानमन्तः करणमेव तस्य हैतस्य पुरुषस्य रूपमित्यत्रापि पुरुषशब्देन परामृश्यत इति भावः । वक्ष्यमाणानेकोदाहरणवैयर्थ्यं परिहर्त्तुं विचित्रा आनन्ताश्चेत्युक्तम् ॥ २८॥ अन्तःकरणस्यैव रागादिवासनाश्चेत्कथं पुरुषस्तन्मयो दृश्यते ? इत्याशङ्क्याह *अनेकेति ॥ २९ ॥ आत्मनो भ्रान्तेरास्पदं लिङ्गमित्येतद्व्यक्तीकुर्वन्वादिनां भ्रममाह *एतावदिति॥३०॥ तत्र तावद्विज्ञानवादिभ्रमनिदानमाह *एकैकामिति ॥ वासनां तद्धेतुभूतां बुद्धिवृत्तिमिति यावत् ॥ ३१ ॥ तार्किकाणामपि बौद्धादिवद्भ्रान्तिमाह *आत्मन इति । बुध्यादिधर्मिणमन्तःकरणमेवात्मेति भ्रमित्वा आत्मगुणा एव वासनात्वेन "यथा माहारजनम्" इत्यादिश्रुत्योच्यत इति वदन्तीत्यर्थः ॥ ३२ ॥

त्रिगुणं यत्प्रधानं तत्पुरुषार्थेन हेतुना ॥
प्रवर्तते वासनात्वक्लृप्तिस्तत्रेति कापिलाः ॥३३॥
अप्यौपनिषदम्मन्याः प्रक्रियां कल्पयन्त्यमुम् ॥
वस्तूनां राशयः प्रोक्ता उत्तमाधममध्यमाः ॥ ३४ ॥
उत्तमः परमात्मा स्यान्मूर्तामूर्तात्मकोऽधमः ॥
जीवात्मा मध्यमः साकं वासनाज्ञानकर्मभिः ॥३५॥
कृष्णशक्तिरविद्याख्या परमात्मन उत्थिता ॥
विकृत्य परमात्मांशं जीवभावं नयत्यमुम् ॥ ३६ ॥
यथोषरात्मको दोषो भूमेर्जातो विकृत्य तम् ॥
भूम्यंशमास्ते तद्वत्स्यादविद्येयं परात्मनः ॥ ३७ ॥
अनात्मधर्म एवेयमविद्या भ्रान्तिलक्षणा ॥

साङ्ख्यानां भ्रान्तिमाह *त्रिगुणमिति ॥ नान्तःकरणमेवात्मा किं त्वन्यः स्वप्रकाशस्तस्य भोगापवर्गानुगुण्येन हेतुना यत्प्रधानमस्ति तदात्मनैव स्थितमन्तःकरणं तत्सर्वधर्मकं प्रवर्तते, तदेव श्रुत्या वासनात्वेनोच्यते इति वदन्तीत्यर्थः ॥३३॥ भर्तृप्रपञ्चप्रक्रियामाह *अपीत्यादिना ॥ ३४ ॥ ३५ ॥ तेषामेव प्रक्रियान्तरमाह *कृष्णेति ॥ भगवतः शक्तिरविद्या नैसर्गिक्यपि तस्मादेव व्यक्ता सती तदेकदेशं विकृत्य तत्र स्थित्वा तमंशं जीवभावं नयतीत्यर्थः ॥ ३६ ॥ परस्मादविद्योत्थिता चेत् तमेवाश्रयेन्न जीवं, कारणमतिक्रम्य कार्यस्यान्यत्रावृत्तेरिति शङ्कां परिहरन्नाह *यथेति । इयं च प्रक्रिया साङ्ख्यमतेऽप्यविरुद्धेत्याह *यथेति द्वभ्याम् ॥ यथा भूम्या उत्थितोऽप्यूषरो भूम्येकदेशस्यैव धर्मः न भूधर्मः, एवमविद्या न परस्य धर्म इति विद्याविद्ययोरनात्मधर्मत्वोक्त्या साङ्ख्यमतमनुसृतं

अंशोऽस्मिन्साङ्ख्यसिद्धान्तमनुवर्त्तामहे ततः ॥३८॥
वासनाकामकर्माणि लिङ्गस्थान्येव तान्यपि ॥
लिङ्गादात्मानमायान्ति गन्धः पुष्पपुटं यथा ॥३९॥
गन्धः पुष्पगुणः पुष्पात्पुटमाश्रित्य तिष्ठति ॥
कुसुमापगमेऽप्येवं लिङ्गस्था वासनाऽऽत्मनि ॥ ४० ॥
निर्गुणोऽपि परैकांशो बाह्यादभ्यागतेन ह ॥
कर्मणा सगुणस्तेन कर्त्ता भोक्ता भवत्ययम् ॥ ४१ ॥
वैशेषिकमतं चैवमंशादनुसृतं भवेत् ॥
अपाञ्चभौतिकं रूपं चैवमेतत्सवासनम् ॥ ४२ ॥
इत्यौपनिषदम्मन्यैरुक्तं भर्तृप्रपञ्चकैः ॥
लिङ्गस्य वासनारूप एवं मुह्यन्ति वादिनः ॥ ४३ ॥
अश्रौतत्वादुपेक्ष्याः स्युः प्रक्रिया वादिकल्पिताः ॥

भवतीत्यर्थः ॥ ३७ ॥ ३८ ॥ तार्किकमतानुसारेणार्थं तैर्विरचितं प्रक्रियान्तरमाह *वासनेति । आत्मानमपीत्यन्वयः॥३९॥ दृष्टान्तं स्पष्टयति *गन्ध इति ॥ ४० ॥ आत्मन्यगुणे कथं वासना स्यादित्याशङ्क्याविद्यया विकृतस्य परमात्मैकदेशस्य लिङ्गतादात्म्यात्कामाश्रयत्वमाविरुद्धमित्याह *निर्गुण इति॥४१॥ उक्तप्रक्रियासिद्धं मध्यमराशिं निरूपयति *अपाञ्चभौतिकमिति । एवम् उक्तया रीत्याऽविद्याकृतं वक्ष्यमाणवासनायुक्तं भूतभौतिकभिन्नं जीवस्वरूपं मध्यमराशिरिति शेषः ॥ ४२ ॥ लिङ्गस्थवासनासु वादिनां विविधभ्रान्तिमुक्तामुपसंहरति *लिङ्गस्येति ॥ ४३ ॥ बौद्धादिप्रक्रियाणामनिराकार्यत्वमाह *अश्रौतत्वादिति । भर्तृप्रपञ्चमतं दूषयति *राशीत्यादिना । तत्त्वमस्यादिश्रुत्या जीवस्याविकृतब्रह्मात्मत्वात् 'कामः सङ्कल्पः'

राशित्रयस्य गमकं वचो नोपलभामहे ॥ ४४ ॥
जीवो न ब्रह्मणोऽन्योऽस्ति कामसङ्कल्पपूर्विकाः ॥
वासनाश्च मनोधर्मा मध्यमो राशिरत्र कः ॥ ४५ ॥

श्रु०—अथामूर्तं प्राणश्च यश्चायमन्तरात्मन्नाकाश एतदमृतमेतद्यदेतत्त्यं तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो योऽयं दक्षिणेऽक्षन्पुरुषस्त्यस्य ह्येष रसः ॥ ५ ॥

तस्य हैतस्य पुरुषस्य रूपम् ॥

वा० एतस्य पुरुषस्येति श्रुतेश्चेतनधर्मता ॥
न वासनानामाशङ्क्या लिङ्गस्य पुरुषत्वतः ॥ ४६ ॥
हृदये ह्येव रूपाणि, कामा येऽस्य हृदि श्रिताः ॥
इत्यादिभिर्वासनानां श्रूयते लिङ्गधर्मता ॥ ४७ ॥
न पुष्पगन्धवल्लिङ्गवासना जीवमाश्रयेत् ॥
असङ्गो हीति जीवस्य सर्वसम्बन्धवारणात् ॥ ४८ ॥

इत्यादिश्रुत्या वासनानां मनोधर्मत्वात्तदुक्तमध्यमराशौ मानं नास्तीत्यर्थः ॥४४॥४५॥ मानाभावोऽसिद्ध इति शङ्कते *एतस्येति। तस्य हैतस्य पुरुषस्येत्यादिश्रुत्या वासनानां पुरुषनिष्ठत्वाभिधानात्पुरुषशब्दस्य च चेतनवाचित्वादियमेव श्रुतिर्मध्यमराशौ मानमित्यर्थः। स वा एष पुरुषोऽन्नरसमय इत्यादौ शरीरेऽपि पुरुषशब्दप्रयोगस्य दर्शितत्वान्नानया श्रुत्या वासनानां चेतनधर्मत्वसिद्धिरिति दूषयति *नेति ॥ ४६ ॥ वासनानां मनोधर्मत्वे वाक्यान्तरमाह *हृदय इति ॥४७॥ यदुक्तं पुष्पपुटिकान्यायेन मनोधर्मा अपि जीवमाश्रयन्तीति, तत्र तेषां किं जीवेन वास्तवः सम्बन्धः काल्पनिको वा? आद्यं दृष्टान्तवै-

अविद्यया ससङ्गत्वे त्वविद्या न त्वदीरिता ॥
परात्मनस्तदुत्थाने मुक्तावप्युदियादसौ ॥ ४९ ॥
अविद्या चेदनिर्वाच्या तया लिङ्गस्थवासनाः ॥
आरोप्यन्तां यथाकाममलिङ्गेऽपि चिदात्मनि ॥५०॥
वासना भूरिरूपास्ता लिङ्गस्था लिङ्गसाक्षिणः ॥
कुर्वन्ति बहुरूपत्वं मणेरास्तरणं यथा ॥ ५१ ॥
भौतिकं बहुरूपत्वं भूतवासनया कृतम् ॥
पुष्पवासनया जन्यो गन्धः पौष्पो यथा पुटे ॥ ५२ ॥

षम्येण दूषयति *नेति ॥ ४८ ॥ द्वितीयमनुवदति *अविद्ययेति । सापि किं वास्तवी उत कल्पिता । नाद्यः । अनिर्मोक्षमसङ्गादित्याह *अविद्या नेति ॥ ४९ ॥ द्वितीयस्त्वस्मदिष्ट एवेत्याह *अविद्या चेदिति ॥ ५० ॥ उक्तमेव सदृष्टान्तमुपपादयति *वासना इति ॥ यथा आस्तरणं चित्रकम्बलादिकं स्वसम्बन्धिस्फटिकादि विचित्ररूपमिव करोति । एवं लिङ्गस्थवासना अपि लिङ्गेन सह साक्षिण्यध्यस्ताः साक्षिणं सवासनमिव कुर्वंतीाति अस्मिन्पक्षे न विरोध इत्यर्थः ॥ ५१ ॥ यदुक्तं अपाश्चभौतिकं रूपमित्यत्र मध्यमराशित्वेनाभिमतं वासनासहितं जीवरूपं भौतिकाविलक्षणमिति तत्र वासनानां भौतिकत्वं साधयितुं वासनागतनानात्वस्य भौतिकत्वं साधयति *भौतिकमिति । यथा पुष्पवासनया पुष्पैकदेशकेतकीबकुलादिचूर्णचिरसम्बन्धाज्जातो नानागन्धः पुष्पजन्यः, एवं पञ्चभूतकार्यलिङ्गदेहेनानादिसम्बन्धाज्जातात्मनानात्वमपि भूतजन्यमिमित्यर्थः ॥ ५२ ॥ एवं लिङ्गद्वारा भूतप्रयुक्तस्यापि स्वगत-

आत्मनानात्वमप्येतद्यदा स्याद्भौतिकं तदा ॥
भूतलेशस्वरूपाणां वासनानां तु का कथा ॥ ५३ ॥
भूलभौतिकवस्तूनां यदा संयुज्यते मनः ॥
तदेवाधीयते चित्ते तल्लेशात्मकवासनाः ॥ ५४ ॥
हिङ्गुगन्धो यथा लग्नः करण्डं न विमुञ्चति ॥
एवं जगद्वासनाश्च न मुञ्चन्ति धियं सदा ॥ ५५ ॥
कदाचित्काचिदुद्बोध्या कर्मणा भोगसिद्धये ॥
*भोगकालेऽनलाश्चान्याः सुप्तास्तिष्ठन्ति मानसे॥५६॥
अनन्तकल्पोपचयादनन्ता एव वासनाः ॥
उदाहरणमात्रं तु दृष्टान्तैरिह वर्ण्यते ॥ ५७ ॥
श्रुतिः—यथा माहारजनं वासो यथा पाण्ड्वाविकं

नानात्वस्य भौतिकत्वे साक्षाद् भूतजन्यानां वासनानां तत् कैमुतिकन्यायसिद्धमित्याह *आत्मनेति ॥ ५३ ॥ वासनानां साक्षाद् भूतजन्यत्वमेवाह *भूतेति । सम्बन्धसामान्ये षष्ठी ॥ ५४ ॥ वासनानामन्यप्रयुक्तत्वेऽपि यावद्द्रव्यभावित्वमविरुद्धमिति सदृष्टान्तमाह *हिङ्गुगन्ध इति ॥ ५५ ॥ उत्पन्नाः वासनाः बुद्धिं न मुञ्चन्ति चेत्तर्हि सर्ववासनाकार्याणि युगपदेव स्युरिति नेत्याह *कदाचिदिति । यथा शिशूनामन्नादिवासना विद्यमानाऽपि तद्भोगप्रापककालस्यानागतत्वान्नाभिव्यज्यते । एवं काचित्कदाचित्कर्मणा व्यज्यत इत्यर्थः ॥ ५६॥ ननु परिमितदृष्टान्तोक्त्या वासनानां परिमितत्वमपि नेत्याह *अनन्तेति । किमर्थं तर्हि परिमितदृष्टान्तोपादानमित्याशङ्क्योपलक्षणत्वेनेत्याह *उदाहरणेति ॥५७॥ एवं तस्य हेत्या-

---

* भोगकालानलाश्चान्या इति पाठः । अनलाः असमर्थाः इत्यर्थः ।

यथेन्द्रगोपो यथाऽग्न्यर्चिर्यथा पुण्डरीकं यथा सकृद्वि-
द्युत्तꣳ सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेद ॥

वार्ति० हारिद्रं वसनं यद्वत्संसर्गात्पीततां व्रजेत् ॥
तद्वन्नार्यादिसंसर्गाल्लिङ्गं रागादिमद्भवेत् ॥ ५८ ॥
ईषत्पाण्डुश्च परुषः स्यात् स्वतः श्वेतकम्बलः ॥
तथेषच्छ्रद्धया युक्तं स्वतो रागादिभागपि ॥ ५९ ॥
*इन्द्रगोपोऽतिरक्तः स्यात्स्वत एव तथा मनः ॥
विविक्तदेशस्थस्यापि विषयप्रवणं क्वचित् ॥ ६० ॥
अग्नेरार्चिर्यथा भास्वद्दहत्यपि तथा क्वचित् ॥
वेदशास्त्रविदप्यन्यान् बाधेतेर्ष्याद्युपद्रवैः ॥ ६१ ॥
सिताम्भोजं यथा सौम्यं सुगन्धि मृदु च स्वतः ॥
जन्मनैव तथा चित्तं युक्तं शमदमादिभिः ॥ ६२ ॥

दि व्याख्याय यथा माहारजनं वास इत्यादिव्याकुर्वन् दृष्टान्तोक्तमर्थं दार्ष्टान्तिके योजयति *हारिद्रमिति । यथा शुभ्रं वसनं महारजनशब्दितहारिद्रया संसृष्टं सत्तत्संसर्गात्पीतं भवति—तद्वच्चित्तमप्यसत्संसर्गान्मलिनं भवतीत्यर्थः ॥ ५८ ॥ यथा पाण्ड्वाविकमित्यत्र आपाण्डुपदार्थमाह *ईषदिति । अस्यैव व्याख्या *परुष इति । उक्तं ह्यमरसिंहेन—ईषत्पांडुस्तु धूसरः इति। यथा आविकं अविसम्बन्धिकम्बलादि स्वतः शुभ्रमपि परुषं च भवति तद्वच्चित्तमपि कदाचिद्भवतीत्यर्थः॥५९॥ यथेंद्रगोप इत्यस्यार्थमाह *इन्द्रेति ॥६०॥ यथाऽग्न्यर्चिरित्यस्यार्थमाह *अग्नेरिति ॥ ६१ ॥ यथा पुण्डरीकमित्यस्यार्थमाह *सिताम्भोजमिति॥६२॥यथा सकृद्विद्युत्तमिति व्याचष्टे *तीव्रेति। सकृद्विद्युतपद-

* इन्द्रगोपः कीटविशेषः ।

तीव्रविद्युद्यथाऽत्यन्तं घनध्वान्तापनोदकृत् ॥
तथा हिरण्यगर्भस्य सर्वज्ञा वासना भवेत् ॥ ६३ ॥
तामुपासीन आप्नोति श्रियमत्यन्तमूर्जिताम् ॥
रजःसत्त्वतमोयोगात् वासनानां विचित्रता ॥ ६४ ॥
प्रपञ्चवासने ब्रह्मरूपे इत्येवमीरितम् ॥
तथेदमनिदंरूपे इति पक्षोऽधुनोच्यते ॥ ६५ ॥
सवासनं जगत्सर्वं तत्रेदंरूपमीरितम् ॥
सच्च त्यच्चेति सत्यं तत् प्रोच्यते पाञ्चभौतिकम् ॥६६॥

श्रुतिः—अथात आदेशो नेति नेति, न ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेयꣳ सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥ ६ ॥

इत्युपनिषदि चतुर्थाध्याये तृतीयं ब्राह्मणं समाप्तम्॥३॥

स्य व्याख्या *तीव्रविद्युदिति। इयं च वासना हिरण्यगर्भस्यैव भवति नान्यस्येत्याह *तथेति ॥ ६३ ॥ सकृदित्यादिफलोक्तिं व्याकरोति *तामिति । तां वासनाम् । उक्तवासनावैचित्र्ये को हेतुः *रज इति ॥६४॥ द्वितीयं पक्षमुपसंहरति *प्रपञ्चेति। द्वे वाव ब्रह्मणो रूपे इत्यत्रावधारणसामर्थ्याद्द्विरूपशब्देन सोपाधिकं निरुपाधिकं च ब्रह्मस्वरूपमुच्यत इत्युक्तम्, तृतीयपक्षमवतार्य व्याकरोति *तथेति ॥ ६५ ॥ सत्यस्य सत्यमित्यत्र षष्ठ्यन्तनिर्दिष्टसत्यपदाभिधेयप्रपञ्चस्य निष्प्रपञ्चप्रतियोगिनः सङ्ग्रहं वक्तुमुपक्रम्य कथमप्रकृतमिदंरूपमुच्यते इत्याशङ्क्य तस्य सत्यपदवाच्यत्वमुक्तं स्मारयति *सच्चेति ॥ ६६ ॥ एवं वृत्तं सङ्कीर्त्य 'अथात आदेशः' इत्यस्यार्थमाह *सत्यस्येति ।

षष्ठ्यन्तसत्यपदाभिधेयप्रपञ्चनिरूपणानन्तरं प्रथमान्तस-

वा० सत्यस्य सत्यमानिदं वक्तव्यं शिष्यते ततः ॥
आदेशोऽनन्तरं तस्य क्रियते ऽनन्यमानिनः ॥ ६७ ॥
आदेशो नेति नेतीति ब्रह्मतत्त्वावबोधकः ॥
यथाऽयमुपपद्येत तथा सम्यङ् निरूप्यते ॥ ६८ ॥
इतिशब्देन चिद्भास्यमनूद्य प्रतिषिध्यते ॥
नकारेण, द्विरुक्तिस्तु वीप्सा कृत्स्ननिषिद्धये ॥ ६९ ॥
मूर्त्तं वा यदि वा ऽमूर्त्तमज्ञानं वासनाऽथवा ॥
अध्यात्ममधिदैवं वा तत्सर्वं प्रतिषिध्यते ॥ ७० ॥
न चेद्वीप्सा तदा द्वाभ्यां द्वयमेव निषिध्यते ॥
ततश्च ब्रह्मताशङ्का दृश्येऽन्यस्मिन्प्रसज्यते ॥ ७१ ॥

त्यशब्दितानिदंरूपस्य वक्तव्यत्वेनावाशिष्टत्वात्तदुपदेशः क्रियत इति श्रुत्यक्षरार्थः ॥

ब्रह्मणः श्रुत्यैवोपदेष्टव्यत्वे हेतुमाह *अनन्येति ॥ ६७ ॥ ब्रह्म ज्ञापयितुं प्रक्रम्य नेति नेतीति निषेधोऽनुपपन्नः इत्याशङ्क्य निषेधवाक्यस्य ब्रह्मबोधकत्वं प्रतिज्ञापूर्वकमुपपादयति *आदेश इत्यादिना ॥ ६८ ॥ इतिशब्देन दृश्यं सर्वमनूद्य नकारेण निषिध्यते चेत् तर्ह्येकेनैव नञाऽलं किं द्वितीयेनात आह *द्विरुक्तिरिति ॥ ६९ ॥ सर्वप्रपञ्चनिषेधार्थं वीप्सेत्युक्तमेव व्यक्तीकुर्वन्वीप्सया निषिध्यमानप्रपञ्चं सङ्गृह्य दर्शयति *मूर्त्तमिति ॥ ७० ॥ वीप्सापक्षे गुणमुक्त्वा पक्षान्तरे दोषमाह *नेति । अत्र वीप्सा नास्तीति वदता नेति नेतीत्येतद्वाक्यद्वयं वाच्यम्, इत्थंच प्रकृतमूर्तामूर्त्ताज्ञानादिराशिषु मध्ये राशिद्वयमेव वाक्यद्वयेन निषिद्धं स्याद्राश्यन्तरस्य ब्रह्मस्वरूपत्वशङ्कया शुद्धं ब्रह्म न सिद्ध्येदित्यर्थः ॥ ७१ ॥

वीप्सया सर्वदृश्यस्य निषेधे त्ववशिष्यते ॥
अमेयमेकमेवातो यथावद् ब्रह्म बुध्यते ॥ ७२ ॥
न शून्यं शिष्यतेऽस्यापि दृश्यत्वादेव निह्नवात् ॥
भावाभावनिषेधेऽन्यद् ब्रह्मणः शिष्यतेऽत्र किम्॥७३॥
न ब्रह्मणो निषेधः स्यादितिशब्दासमर्पणात् ॥
ब्रह्म चेदितिशब्दार्थः किमन्यदनिदं भवेत् ॥ ७४ ॥
नान्तरेणानिदन्तत्त्वमिदमर्थः प्रसिध्यति ॥
यत्ते स्यादनिदं तत्त्वं तदेव ब्रह्म मे मते ॥ ७५ ॥
निषेधोऽपि ससाक्ष्येव नातः साक्षी निषिध्यते ॥
यन्निषेद्धुमशक्यं तत्साक्षी ब्रह्मेति गम्यताम् ॥७६॥
इतिशब्दनकाराभ्यां वाच्यस्य ब्रह्मता नहि ॥
अतिरिक्तं तु न प्रोक्तं कथं ब्रह्म विबुध्यते ॥ ७७ ॥

वीप्सापक्षेतु न दोष इत्याह *वीप्सयेति । अप्रमेयस्य कस्यचिदवशेषे फलितमाह *अत इति ॥ ७२ ॥ ननु सर्वद्वैतनिषेधे तदभावः शिष्येत, नेत्याह *नेति । वीप्सया सर्वदृश्यनिषेधादभावस्यापि दृश्यत्वाद्ब्रह्मव्यतिरिक्तं नावशिष्यत इत्यर्थः ॥७३॥ नन्वेकेन नञा सर्वदृश्यनिषेधोऽपरेण तु ब्रह्मण इति किं न स्यादत आह *नेति द्वाभ्याम्।इदंशब्दपर्यायस्य इतिशब्दस्य दृश्यस्य दृश्यमात्रानुवादकत्वाद्, दृश्यस्य च द्रष्टारं विनाऽसिद्धेस्तद्द्रष्टृत्वेनाभिमतं वस्तु ब्रह्मेत्यर्थः ॥ ७५ ॥ निषेधसाक्षित्वेनापि ब्रह्मसिद्धिमाह *निषेध इति । निषेधावधित्वेनापि तत्सिद्धिमाह *यदिति ॥ ७६ ॥ एवमपि निषेधवाक्यस्य ब्रह्माबोधकत्वाद् ब्रह्मणः श्रौतत्वं न सिध्येदिति शङ्कते *इतिशब्देति ॥ ७७ ॥ परिहरति *स्वत इति । स-

स्वतः प्रत्यक्परागर्थद्वयेनैषाऽनुरञ्जिता ॥
धीर्निषिद्धा परागर्थात्प्रतीचि लभते स्थितिम् ॥७८॥
कीदृक्तत्प्रत्यगिति चेत्तादृगीदृगितिद्वयम् ॥
यत्र न प्रसरत्येतत्प्रत्यगित्यवधार्यताम् ॥ ७९ ॥
ज्ञानक्रियाभ्यां व्याप्यं तदित्याकाङ्क्षानिवर्त्तनात् ॥
अप्रामित्सित एकस्मिन्धीस्तिष्ठत्यचिकीर्षिते ॥ ८० ॥
दृश्यत्वादितिशब्दार्थौ प्रमित्सितचिकीर्षितौ ॥

र्वस्यापि दृश्यस्य स्वोपादानाचित्संवलितत्वात् बुद्धिवृत्तिरपि स्वभावतश्चिदचिद्विषया भवति, तत्र निषेधवाक्येन सर्वदृश्ये निषिद्धे चिन्मात्रे ब्रह्मणि धीः प्रतिष्ठिता भवतीति परम्परया तस्य श्रौतत्वमिति भावः ॥ ७८ ॥ 'असौ गौरयमश्वः' इतिवद्विशेषेण ब्रह्म न निर्दिष्टं चेत् श्रोतुराकाङ्क्षाशान्तिर्न स्यादिति मत्वा शङ्कते *कीदृगिति ॥ इदं तदिति निर्देष्टुमशक्यं ब्रह्म, इदंशब्दस्य संनिकृष्टवाचित्वात् तच्छब्दस्य परोक्षवाचित्वात् । अतो निर्विशेषापरोक्षत्वेन तत्सिध्यतीति नात्राकाङ्क्षा सम्भवतीति परिहरति *तादृगिति ॥ ७९ ॥ प्रतीचि लभते स्थितिमित्युक्तमेव प्रपञ्चयति *ज्ञानक्रियाभ्यामिति । ज्ञातुं कर्तुं च योग्यत्वात्तज्ज्ञेयं कार्यमिति च येयं दृश्यविषयाऽऽकाङ्क्षा सा ब्रह्मणि सर्वदृश्यनिषेधेनैव निवर्तते, ततश्च ज्ञानक्रिययोरविषये ब्रह्मणि धीः प्रतिष्ठिता भवतीत्यर्थः ॥ ८० ॥ उक्तमेव व्यनक्ति *दृश्यत्वादिति । दर्शनयोग्यत्वादित्यर्थः । कर्तुं योग्यत्वादित्यपि द्रष्टव्यम् । दृष्टुं कर्तुं च योग्यस्य इतिशब्दानूदितसर्वद्वैतस्य ब्रह्मणि निषेधे ज्ञातव्यकर्त्तव्ययोरभा-

तत्त्यागे कृतकृत्यत्वं ज्ञेयकार्यसमाप्तितः ॥ ८१ ॥
आत्मनः स्वप्रकाशत्वाद् बुद्धेस्तत्पक्षपाततः ॥
अन्यापह्नवमात्रे सा पर्यवस्यति शास्त्रगीः ॥ ८२ ॥
सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते ॥
प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते ॥ ८३ ॥
इति प्राह ब्रह्मसिद्धिकारो वेदरहस्यवित् ॥
अतोऽत्रान्यनिषेधेन ब्रह्मबोधः समाप्यते ॥ ८४ ॥
पटे घटो निषिद्धः सन्पटादन्यत्र तिष्ठति ॥
इदं जगत्तथाऽन्यत्र स्यादित्येतदसङ्गतम् ॥ ८५ ॥
रूपिद्रव्यान्निषिद्धं तद्रूपं नान्यत्र तिष्ठति ॥
रूपं घटस्य भिन्नं सन्नहि क्वाप्युपलभ्यते ॥ ८६ ॥

वात्कृतकृत्यो भवतीत्यर्थः ॥ ८१ ॥ अत्रैव हेत्वन्तरमाह *आत्मन इति । तत्रैवोक्तहेतुमपि समुच्चिनोति *बुद्धेरिति । चिदचिद्विषयस्वभावा धीर्दृश्यनिषेधे चैतन्यपक्षे पतति शान्ताकाङ्क्षा सती तत्रैव स्थिरा भवतीत्यर्थः । अतः सर्वं वेदवाक्यं द्वैतनिषेधमात्रपरमित्याह *अन्येति ॥ ८२ ॥ अत्र मण्डनमिश्रसम्मतिमाह *सर्वेति । वाशब्दोऽवधारणार्थः प्रविलय इत्यनेन सम्बध्यते ॥ ८३ ॥ तन्मतस्यादेयत्वं दर्शयति *वेदेति ॥ ८४ ॥ ब्रह्मणि द्वैतनिषेधेऽपि नाद्वयत्वसिद्धिरित्याशङ्कते *पट इति । विषमो दृष्टान्तः, घटपटयोः परस्परमुपादानोपादेयभावाभावादिति मत्वा परिहरति *एतदिति ॥ ८५ ॥ अत्रानुरूपं दृष्टान्तमाह *रूपीति ॥ ८६ ॥ दार्ष्टान्तिकमाह *रूपिण इति । कार्यस्य स्वोपादानादन्यत्र वृत्त्ययोगात्तत्रापि निषेधे सत्यप्रपञ्चो न सिध्यतीति नाद्वैतहानिरिति भा-

रूपिणो ब्रह्मणस्तद्वज्जगद्रूपं निराकृतम् ॥
न ब्रह्मणि तथाऽन्यत्र स्थातुमर्हति कुत्रचित् ॥ ८७ ॥
घटवज्जगतो भङ्गो नास्तीति यदि मन्यसे ॥
माऽस्त्वविद्याकल्पितस्य बोधादेव निवृत्तितः ॥ ८८ ॥
जगतोऽस्तित्वमज्ञानं तन्निवृत्तिश्चिदात्मता ॥
जगतस्तन्निवृत्त्या वा कथं द्वैतं प्रसज्यते ॥ ८९ ॥
अयोग्यत्वाद्यथा नीलं रूपं श्रोत्रेण कश्चन ॥
नाग्रहीन्न च गृह्णाति न ग्रहिष्यति शब्दवत् ॥ ९० ॥
तद्वत्सकारणं द्वैतं प्रत्यक्तत्त्वावलोकनात् ॥
प्रतीचि ब्रह्मतत्त्वेऽस्मिन्नाभूदस्ति भविष्यति ॥ ९१ ॥
तदेवं नेति नेतीति वाक्यादेशात्पुमानयम् ॥
निवृत्तसर्वबाह्यार्थः सम्यङ् निर्वात्यथात्मनि ॥ ९२ ॥
अथवा नेति नेतीति य आदेशः स योज्यताम् ॥

वः ॥ ८७ ॥ यथा मुद्गरादिना घटः चूर्णीक्रियते एवं बोधेन प्रपञ्चनाशादर्शनात्कथमद्वैतसिद्धिरिति शङ्कते *घटवदिति ॥ एवंविधनाशाभावेऽपि रज्जुसर्पतत्त्वोपादानाज्ञानेन सह द्वैतस्याधिष्ठानमात्रतया ज्ञानेन विलयसम्भवान्न द्वैतप्रसक्तिरिति परिहरति *माऽस्त्वित्यादिना ॥ ८८ ॥ ८९ ॥ जगदेकदा निषिद्धमपि पुनः उद्भविष्यति सर्पादौ तथा दृष्टेरित्याशङ्क्य दृष्टान्तेन निराचष्टे *अयोग्यत्वादित्यादिना। सर्पोपादानाज्ञानस्य तदधिष्ठानधियाऽऽत्यन्तिकलयाभावात् तत्र तदुत्पत्तिरविरुद्धेति भावः ॥९०॥९१॥ उक्तमर्थमुपसंहरति *तदिति । आत्मा निर्वाति सुखात्मना तिष्ठतीत्यर्थः ॥९२॥ निषेधवाक्यं निषेधमात्रपरमित्युक्तम् । इदानीं विधिमुखेन तदैक्यबोधकमिति पक्षान्तरमाह

जीवब्रह्मैक्यासिद्ध्यर्थमहं ब्रह्मेति वाक्यवत् ॥ ९३ ॥
अहंशब्दो बुद्धिवाची साक्षिणं लक्षयेद्यदि ॥
निषेधको नकारोऽपि साक्षिणं लक्षयेत्तथा ॥ ९४ ॥
ब्रह्मशब्दो जगद्धेतुवाची चिन्मात्रलक्षकः ॥
इतिशब्दो जगद्वाची तथा चिन्मात्रलक्षकः ॥ ९५ ॥
अखण्डैकरसे तुल्यो वाक्यार्थौ वाक्ययोर्द्वयोः ॥
उक्तार्थस्यैव दार्ढ्यार्थं द्विर्नेतीति वचः श्रुतम् ॥ ९६ ॥
अथवाऽत्रेति शब्दौ द्वौ जीवेशोपाधिवाचिनौ ॥
नकाराभ्यामुपाधी द्वौ निषिध्य ब्रह्म लक्ष्यते ॥९७॥
यथा मात्रादिसत्त्वेयं प्रत्यक्संवित्तिसाक्षिका ॥

---

*अथवेति । नेतीतिपदद्वयं कथमैक्यबोधकं तत्राशक्तत्वादित्याशङ्क्य लक्षणया तद्बोधकत्वं वक्तुं तत्र त्वमर्थलक्षकत्वं दृष्टान्तपुरःसरं कथयति *अहमिति ॥ ९३ ॥ ९४ ॥ इममर्थमुत्तरत्र स्फुटीकरिष्यति । इतिशब्दस्य ब्रह्मलक्षकत्वं दृष्टान्तपूर्वकमाह *ब्रह्मेति । यथाऽहंब्रह्मेतिवाक्यस्थब्रह्मपदस्य जगत्कारणत्ववाचिनस्तदुपलक्षितचिन्मात्रलक्षकत्वम्, एवं मूर्त्तामूर्तादिप्रपञ्चवाचकस्येतिशब्दस्य तद्विशेष्यब्रह्मस्वरूपमात्रलक्षकत्वमित्यर्थः ॥ ९५ ॥ एवं सति तत्त्वमादिवाक्यवत् निषेधवाक्येनाप्यैक्यं सिध्यतीत्याह *अखण्डेति ॥ ९६ ॥ नेति नेतीति वाक्यद्वयस्य वैयर्थ्यपरिहाराय पक्षान्तरमाह *अथवेति । ब्रह्मणोपाधिभूतमज्ञानादिकं, जीवोपाधिभूतमन्तःकरणादि च क्रमेण इतिपदाभ्यामनूद्य तदभाववाचकनकारद्वयेन तत्त्वमादिवाक्यवल्लक्षणयाऽखण्डं ब्रह्म बोध्यत इत्यर्थः ॥ ९७ ॥ नञः शुद्धस्वरूपलक्षकत्वमयुक्तं वाच्यार्थसम्बन्धाभावादित्याशङ्क्य

प्रमात्रादेरभावेऽपि तथाऽतस्तेन लक्ष्यते ॥ ९८ ॥
अतिरोहितसंवित्को दृष्टिमात्रात्मकत्वतः ॥
विनैव वाचकं शब्दं बोध्यो लक्षणयाऽप्यतः ॥ ९९ ॥
अनन्यानुभवेनैव भावाभावात्मभूमिषु ॥
प्रत्यक्कूटस्थमात्मानं पश्यन्नास्ते फलात्मतः ॥ १०० ॥
अतो मात्रादिसम्बन्धो यत्र यत्र निवर्तते ॥

दृष्टान्तपूर्वकं सम्बन्धमाह *यथेति । यथाऽहं ब्रह्मेत्यत्र वाच्यार्थयोः प्रमातृत्वेश्वरत्वविशिष्टयोः शुद्धचिद्भास्यत्वेन ताभ्यां तत्सम्बन्धिचैतन्यं लक्ष्यते, एवं नञ्वाच्यस्योपाध्यभावस्यापि साक्षिभास्यत्वाद्भास्यभासकभावसम्बन्धस्तुल्य इत्यर्थः । एतदेवाभिप्रेत्य नकारोऽपि साक्षिणं लक्षयेदित्युक्तमिति ध्येयम् । सम्बन्धसिद्धौ फलितमाह *अतस्तेनेति ॥ ९८ ॥ आत्मनः प्रमात्रादिभासकत्वमनुपपन्नम्, प्रमात्राद्यपेक्षासिद्धिकत्वादित्याशङ्क्य तस्य स्वप्रकाशकत्वान्नैवमित्याह *अतिरोहितेति। स्वप्रकाशत्वे चिदेकरसत्वं हेतुमाह *दृष्टीति । वाच्यस्यैव लक्ष्यत्वदृष्टेः कथमवाच्यब्रह्मणो नञ्पदलक्ष्यत्वं तत्राह *विनेति । अतःशब्देन दृष्टिमात्रात्मकत्वादित्युक्तहेतुः परामृश्यते । एकरसत्वेन प्रतीचि शब्दप्रवृत्तिनिमित्तजात्यादेरभावात्स लक्षणयैव बोध्यः । नच वाच्यस्यैव लक्ष्यत्वनियमः क्षीरादिमाधुर्येषु व्यभिचारस्योक्तत्वादिति भावः ॥ ९९ ॥ नन्वात्मनो एकरसत्वे भावाभावसाक्षित्वं कथं स्यादीक्षणकर्तुरेव साक्षित्वादत आह *अनन्येति । आत्मा दृश्यं न पश्यति किन्तु स्वस्वरूपमेवेत्युक्तेऽपि दर्शनकर्तृत्वं स्यादिति तत्राह *फलात्मत इति । चिदेकरसरूपेणेत्यर्थः ॥ १०० ॥ तस्य फलात्मत्वे फलितमाह

तत्र तत्रैकलः प्रत्यक् स्वमहिम्नैव सिद्ध्यति ॥१०१॥
एतद्वस्तु स्वतःसिद्धं प्रमात्राद्यनपेक्षतः ॥
सर्वस्यैव ततः सिद्धेः कथं सिद्ध्येत्तदन्यतः ॥ १०२ ॥
तदित्थं नेति नेतीति वाक्यं ब्रह्मात्मबोधकम् ॥
जीवेशोपाधिनिह्नुत्या लक्ष्याखण्डावसानतः ॥१०३॥
अथात आदेश इति प्रतिज्ञायातिसम्भ्रमात् ॥
निषेधो नेति नेतीति न युक्त इति चेच्छृणु ॥ १०४ ॥
अवाङ्मनसगम्यस्य न निषेधमुखं विना ॥
अस्त्यन्यो मुख्य आदेशो निषेधो युज्यते ततः॥१०५॥
इत्येवमनिर्दंरूपं ब्रह्मणः प्रतिपादितम् ॥
निर्नाम्नस्तस्य नामैतत्सत्यसत्यमिति श्रुतम् ॥१०६॥

---

*अत इति । उपाधिसन्निधाने तत्तदुपहितः सन्नुपाधिं पश्यति । निरुपाधिकः सन् स्वयमेव प्रथते। तथा च साक्ष्यसापेक्षस्य साक्षित्वस्यापि कल्पितत्वान्न कौटस्थ्यहानिरिति भावः ॥ १०१ ॥ प्रतीचि स्वप्रकाशत्वं निगमयति *एतदिति । प्रमात्रादेर्जडत्वेन चैतन्यसाधकत्वं न युक्तं चेत्याह *सर्वस्येति ॥ १०२ ॥ निषेधवाक्यार्थमुपसंहरति *तदिति ॥ १०३ ॥ नहीत्याद्यवतारयितुं शङ्कते *अथात इति ॥ अतिसम्भ्रमात् इति तात्पर्येणेति यावत् ॥ १०४ ॥ आदेशवाक्यस्यायुक्ततां प्रत्याह *अवागिति ॥ १०५ ॥

*हि यस्मादिति । नेत्येतस्मान्निषेधरूपान्निर्देशादन्यं निर्देशनं ब्रह्मणः परं न सम्भवति, तस्मादयमेव निर्देशो युक्त इति श्रुत्यक्षरयोजना ॥ ६ ॥

सच्च त्यच्चेति सत्याख्याः प्राणास्ते ब्रह्मणात्मना ॥
आत्मवन्तस्ततो ब्रह्म सत्यसत्यमितीरितम् ॥१०७॥
व्यावहारिकमेवैतन्नामोक्तं न तु वास्तवम् ॥
शब्दप्रवृत्तिहेतूनां साक्षाद्ब्रह्मण्यसम्भवात् ॥१०८॥

इति वार्त्तिकसारे द्वितीयाध्यायस्य तृतीयं ब्राह्मणं समाप्तम् ॥ ३ ॥

उक्तमर्थमनुवदन्नथ नामधेयमित्यादि व्याचष्टे इति॥१०६॥ कथं ब्रह्मणः सत्यसत्यत्वमित्याशङ्क्य प्राणशब्दोपलक्षितप्रपञ्चस्य सत्यत्वोपपादनपूर्वकं ब्रह्मणस्तदुपपादयति *सच्चेति ॥ १०७ ॥ १०८ ॥

इति वार्तिकसारटीकायां द्वितीयाध्यायस्य तृतीयं ब्राह्मणं समाप्तम् ॥

—◇○◇—

अपोदितः समारोप इत्येवं ब्राह्मणत्रये ॥
ओमित्येवेति सूत्रार्थो ब्राह्मणेऽस्मिन्नुदीर्यते ॥ १ ॥
अपोदितं यदि जगद्ब्रह्मणोऽन्यतया स्थितम् ॥
तदा साङ्ख्यमतप्राप्तिरतः सार्वात्म्यमुच्यते ॥ २ ॥
अथवा ब्रह्म वच्मीति प्रक्रम्य ब्रह्मता पुरा ॥
नेति नेत्यनिदंरूपे प्रतीच्येव समापिता ॥ ३ ॥
इह त्वात्मानमारभ्य सृष्टिस्थित्यन्तकारिणि ॥
ब्रह्मणि प्रत्यगात्मत्वं समापयितुमुद्यमः ॥ ४ ॥
वित्तस्य कर्महेतुत्वात्तत्त्यागो ज्ञानसाधनम् ॥
इति दर्शयितुं प्राह श्रुतिराख्यायिकां शुभाम् ॥५॥
एषणात्रयसंन्यासो वित्तत्यागेन लक्ष्यते ॥
ज्ञानस्य हेतुः संन्यास इति शास्त्रेषु डिण्डिमः ॥ ६ ॥
श्रुतिः-मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा

वृत्तमनुवदन्नुत्तरब्राह्मणतात्पर्यमाह *अपोदित इति ॥१॥ ननु दृश्यनिषेधादेव पुमर्थसिद्धेः किं सूत्रार्थप्रतिपादनेन तत्राह *अपोदितमिति ॥ २ ॥ अस्यैव तात्पर्यान्तरं वक्तुं वृत्तं पुनः कीर्त्तयति *अथवेति ॥ ३ ॥ 'तत्त्वमेव त्वमेव तत्' इतिवदुक्तस्यैव जीवेशाभेदस्य व्यतिहारेण दृढीकरणार्थमिदं ब्राह्मणमित्याह *इहेति ॥ ४ ॥ एवं ब्राह्मणतात्पर्यमभिधायाख्यायिकातात्पर्यमाह *वित्तस्येति ॥ ५ ॥ पुत्रेषणात्यागाभावे वित्तत्यागमात्रस्य कथं ज्ञानहेतुत्वमित्याशङ्क्याह *एषणेति। संन्यासस्य ज्ञानाङ्गत्वं "त्यागेनैकेऽमृतत्वमानशुः" 'त्यसजतैव हि तज्ज्ञेयम्' इत्यादिश्रुतिष्वातिप्रसिद्धमित्याह *ज्ञानस्येति ॥ ६ ॥

अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति ॥ १ ॥

सा होवाच मैत्रेयी यन्नु इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति, नेति होवाच याज्ञवल्क्यो, यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशाऽस्ति वित्तेनेति ॥ २ ॥

वार्त्ति० ज्ञानादेवामृतत्वं स्यादविद्याध्वंसमात्रतः ॥

अक्षरार्थस्तु—याज्ञवल्क्यो नाम ऋषिर्मैत्रेयीति स्वभार्यामामंत्रितवान्, संन्यासो भार्याद्यनुज्ञापूर्वक इति दर्शयितुम् । एवं तामाहूय अरे इति सम्बोध्य अहमस्माद्गार्हस्थ्यात्स्थानादुद्यास्यन्वै उत् ऊर्ध्वं पारिव्राज्याख्यमाश्रमान्तरं यास्यन्नेवास्मि तदर्थं हंत इदानीं ते कात्यायन्या द्वितीयभार्यया सहान्तं परिच्छेदं करवाणि, युवयोर्द्रव्येऽस्वतन्त्रत्वाद् 'वृत्तिभिः संविभज्य स्वान् संन्यसेत्' इत्यादिशास्त्रतश्च विभागं कृत्वा गमिष्यामीत्यर्थः ॥ १ ॥ एवमुक्ता मैत्रेयी ह उवाच 'हे भगो भगवन्! यत् यदि नु इति वितर्के कृत्वाचिन्तया पृच्छामीत्यर्थः । इयं सर्वा सागरपरिक्षिप्ता पृथिवी धनेन पूर्णा स्यात्तेन वित्तेन वित्तसाध्येन कर्मणेति यावत् । त्वदीयसंन्यासेनेवामृता किं स्याम्' ? इति पृष्टः प्रत्युवाच याज्ञवल्क्यो 'नैव स्याः अमृता, किं तर्हि? यथैव लोके उपकरणवतां साधनवतां जीवितं सुखोपभोगसम्पन्नं तथैव तद्वदेव तव जीवितं स्यात्' इति ॥ २ ॥ ३ ॥

एतत्सर्वमभिप्रेत्य "अमृतत्वस्य तु नाशास्ति वित्तेन" इत्येतद्विभजते *ज्ञानादेवेत्यादिना । वित्तपदेन तत्साध्यं कर्म

अमृतत्वस्य तु नाशाऽस्ति वित्तसाध्येन कर्मणा ॥७॥
न कर्म कारणं मुक्तेर्नाग्निस्तापस्य भेषजम् ॥
कर्मभ्यो जन्म नियतं जन्म चेन्निर्वृत्तिः कुतः ॥ ८ ॥
श्रुतिः—सा होवाच मैत्रेयी येनाहं नामृता स्यां कि-
महं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥३॥
वा०–द्विविधः कर्मसंन्यासः फलसाधनभेदतः ।
फलाय ज्ञानिनस्त्यागो जिज्ञासो ज्ञानसिद्धये ॥९॥
ज्ञानित्वाद्याज्ञवल्क्योऽयं जीवन्मुक्तिफलेच्छया ॥
चित्तविक्षेपबहुलं गार्हस्थ्यं त्यक्तुमिच्छति ॥ १० ॥
गृहस्थ एव जनको जीवन्मुक्तोऽस्ति यद्यपि ॥
धीस्वास्थ्यातिशयोऽथापि सर्वकर्मत्यजोऽस्ति हि॥११॥

लक्ष्यत इति भावः ॥ ७ ॥ ८ ॥ ननु "सा होवाच"इत्याद्युत्त-रवाक्ये "यद्येव वित्तेनाहममृता न स्यां किं तेन कुर्यां यदेव भगवानमृतत्वसाधनं वेद तदेव मह्यं ब्रूहि"इति सर्वत्यागपूर्वकं मुक्तिहेतुं मैत्रेयी पृच्छति तदनुपपन्नम्, तस्यास्त्यागेऽनाधिकारादित्याशङ्क्य तस्य तात्पर्यं वक्तुं संन्यासं विभजते *द्विविध इति ॥ द्वैविध्यमेवाह *फलेति । स्वरूपसुखाविर्भावलक्षणफलार्थत्वेन प्रत्यक्तत्त्वज्ञानार्थत्वेन च कर्मत्यागो द्विधा भिद्यते इत्यर्थः ॥ ९ ॥ *ज्ञानित्वादिति । वक्ष्यमाणोपदेशादिना तस्य ज्ञानित्वे सिद्धे तत्संन्यासः फलायेति निश्चीयत इत्यर्थः ॥ १० ॥ विनाऽपि संन्यासमुक्तफलदृष्टेर्नास्य तद्धेतुत्वमिति शङ्कते *गृहस्थ इति । चित्तविश्रान्तिकाष्ठाप्राप्तेस्त्यागैकसाध्यत्वान्न विद्वत्संन्यासस्य निष्फलत्वेति परिहरति *धीस्वास्थ्येति ॥ ११ ॥ मैत्रेयीसंन्यासस्य

विज्ञानसाधनत्वेन मैत्रेयी वित्तमत्यजत् ॥
तत्त्यागे धीसमाधानाज्ज्ञाने स्यादधिकारिता ॥१२॥
चतुर्थ आश्रमो नार्या नास्ति चेन्माऽस्त्वथाप्यसौ ॥
ज्ञानाङ्गं सर्वसन्त्यागमर्हत्येवानिषेधकात् ॥ १३ ॥
श्रुतिः—स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती प्रियं भाषस एह्यास्व व्याख्यास्यामि ते, व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ४ ॥

ज्ञानार्थत्वमाह *विज्ञानेति ॥ त्यागस्य दृष्टद्वारा विज्ञानोपकारितामाह *तदिति ॥ १२ ॥ एवमपि संन्यासस्योपवीतादित्यागपूर्वकत्वात्तत्र च स्त्रीणामनधिकरात्मैत्रेय्यास्त्यागप्रतिपादकं वाक्यं कथं घटेतेति शङ्कते *चतुर्थ इति ॥ विविदिषासंन्यासो द्विविधः । दण्डधारणाद्याश्रमरूपः केवलः सर्वकर्मफलत्यागरूपश्चेति । तत्राद्येऽधिकराभावमङ्गीकरोति *माऽस्त्विति । 'अप्रतिषिद्धमनुमतम्'इति न्यायात् । द्वितीये तासामप्यधिकारोऽस्तीत्याह *अथेति ॥ १३ ॥

श्रुत्यर्थस्तु—भार्यापेक्षितं मोक्षोपायं विवक्षुस्तां स्तुवन्नुवाच । बतेत्यनुकम्पायाम् । 'अरे मैत्रयी ! नोऽस्माकं पूर्वं प्रिया सतीदानीमपि प्रियमेव चित्तानुकूलं भाषसेऽत एह्यास्व उपविश व्याख्यास्यामि तवेदममृतत्वसाधनमात्मज्ञानं कथयिष्यामि, व्याचक्षाणस्य व्याख्यानं कुर्वतो मे वाक्यानि अर्थतो ध्यातुमिच्छस्व' ॥ ४ ॥

निदिध्यासनं संन्यासस्यान्वयव्यतिरेकसिद्धं फलमतस्तदत्रानूद्यते न विधीयत इत्याह *निदिध्यासस्वेति । तस्य दृष्टफलत्वं व्यतिरेकमुखेन दृढयति *नदी-

वा० ॥ निदिध्यासस्वेति शब्दात्सर्वत्यागफलं जगौ ॥
न ह्यन्यचिन्तामत्यक्त्वा निदिध्यासितुमर्हति ॥१४॥
निरन्तरं विचारो यः श्रुतार्थस्य गुरोर्मुखात् ॥
तन्निदिध्यासनं प्रोक्तं तच्चैकाग्र्येण लभ्यते ॥ १५ ॥
अनात्मन्यरुचिश्चित्ते रुचिश्चात्मनि चेद्भवेत् ॥
पुण्यपुञ्जेन शुद्धं तच्चित्तमैकाग्र्यमर्हति ॥ १६ ॥
शुध्याऽङ्कुरितमैकाग्र्यं विवेकेनाभिवर्द्धयेत् ॥
प्रियाप्रियविवेको ऽतो मैत्रेय्या उपदिश्यते ॥ १७ ॥

श्रुतिः–स होवाच नवा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवति आत्मनस्तु कामाय जाया प्रिया भवति। नवा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति आत्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवति आत्मनस्तु कामाय ब्रह्म प्रियं भवति । न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवति आत्मनस्तु

ति ॥ १४ ॥ अत्र निदिध्यासनशब्देन विवक्षितमर्थमाह *निरन्तरमिति । तत्र मुख्यं साधनमाह *तच्चेति ॥ १५ ॥ चित्तैकाग्र्ये को हेतुस्तत्राह *अनात्मनीति । पुण्यपुञ्जसाध्या चित्तशुद्धिरैकाग्र्ये हेतुः । एवंविधशुद्ध्युत्पत्तौ लिङ्गं विषयनैराश्यं तीव्रविविदिषा चेत्यर्थः ॥ १६ ॥ एवं प्रासङ्गिकं समाप्य "न वा अरे" इत्यादिश्रुतेस्तात्पर्यमाह *प्रियेति ॥१७॥ न वा अरे इत्यादिश्रुतौ पतिजायादिषु प्रीतिरौपाधिकी आ-

कामाय क्षत्रं प्रियं भवति । न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति आत्मनस्तु कामाय लोकाः प्रिया भवन्ति । न वा अरे देवानां कामाय देवाः प्रिया भवन्ति आत्मनस्तु कामाय देवाः प्रिया भवन्ति । न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्ति आत्मनस्तु कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन सर्वमिदं विदितम् ॥ ५ ॥

वा० ॥ पतिजायादिभोग्येषु भोक्तर्यात्मनि चेक्ष्यते ॥
प्रीतिस्तत्र क्व मुख्येयं क्व चामुख्येति चिन्त्यताम् ॥१८॥
सदा भूयासमेवाहं मा न भूवं कदाचन ॥
इत्यनौपाधिकीप्रीतिः प्राणिनामात्मनीक्ष्यते ॥१९॥
स्वसम्बन्धोपाधिनैव भोग्ये प्रीतिर्नतु स्वतः ॥
अन्यथा वैरिभोग्येऽपि भोग्यत्वात्प्रीतिरापतेत् ॥२०॥

त्मनि तु मुख्येत्युक्तं, तदेवानुभवयुक्तिभ्यां दृढीकर्तुमात्मनि पुत्रादौ च प्रीतिविषयत्वं तावत्सर्वानुभवसिद्धमित्याह *पतीति ॥ ततः किमित्याशङ्क्य, किमुभयत्र प्रीतिर्मुख्या उतैकत्र गौणी, अन्तेऽपि कस्या गौणत्वम्? इति विचार्यत इत्याह *तत्रेति ॥ १८ ॥ तत्रात्मप्रीतेर्मुख्यत्वं साधयति *सदेति ॥ १९ ॥ पुत्रादिप्रीतेरौपाधिकत्वमाह *स्वेति । भोग्यत्वादिप्रयुक्तैव तत्रापि प्रीतिरिति वदन्तं प्रति बाधकमाह *अन्यथेति ॥२०॥

ननु द्वेषो ऽपि वैर्यादावात्मसम्बन्धतो भवेत् ॥
वैरिवैरिण्यपि द्वेषः प्रसज्येतान्यथेति चेत् ॥ २१ ॥
बाढं, तथाऽप्ययं दोषो नात्मनि द्वेषसाधकः ॥
प्रत्युत प्रीतिमेवात्मन्यसौ द्वेषोऽपि साधयेत् ॥२२॥
वैरिदुःखप्रदानेन प्रीतेराच्छादकत्वतः ॥
द्विष्यते तेन स द्वेषः प्रीतेरात्मनि कल्पकः ॥ २३ ॥
एवं विचारतः पुंस आत्मा प्रेयाननात्मनः ॥

आत्मसम्बधिभोग्येष्वेव प्रीतिर्जायते इत्येतावताऽऽत्मनः प्रियरूपत्वेऽतिप्रसङ्गं शङ्कते *नन्विति । स्वसम्बन्धिवैरिष्वेव द्वेषदर्शनादुक्तन्यायेनात्मनो द्वेषविषयत्वमपि स्वाभाविकं वक्तव्यम्, तथाचात्मनो दुःखरूपत्वमपि स्यादित्यर्थः । वैरित्वप्रयुक्त एव द्वेष इति वदन्तं प्रति बाधकमाह *वैरीति ॥ २१ ॥ स्वसम्बधिवैरिष्वेव द्वेष इत्युक्तमङ्गीकरोति *बाढमिति ॥ तर्ह्यात्मनः स्वतो द्वेषविषयत्वं स्यादिति, नेत्याह *तथाऽपीति । अयं भावः–"एषो ऽस्य परमानन्दः"इत्यादिश्रुत्या परप्रेमास्पदत्वलिङ्गेन, "सुखमस्वाप्सम्" इति परामर्शेन चात्मनः सुखरूपत्वे सिद्धे तद्विरुद्धदुःखरूपत्वायोगात् । स्ववैरिद्वेषः आत्मनः स्वाभाविकद्वेषविषयत्वं साधयितुं नालमिति आत्मनः सुखरूपत्वे एव वैरिद्वेषोऽपि लिङ्गमित्याह *प्रत्युतेति ॥ २२ ॥ वैरिद्वेषस्य स्वात्मनः प्रीतिरूपत्वसाधकत्वमाह *वैरीति ॥ २३ ॥ यद्यपि वैर्युत्पादितदुःखस्य स्वतो दुःसहत्वादेव वैरिणि द्वेषो, न तु स्वतःसिद्धात्मप्रीत्याच्छादकत्वेन, नियामकाभावादिति शक्यते वक्तुं, तथाऽप्युक्तरीत्याऽऽत्मनः सुखरूपत्वान्न द्वेषविषयत्वमित्यत्रैव तात्पर्यमुक्तविचारफलमाह *एवमिति । *प्रे-

मूढस्तु तद्विपर्यासात्प्रेयः पुत्रादि मन्यते ॥ २४ ॥
अविचारेण पुत्रादौ या प्रतीतिस्तां विचारतः ॥
आत्मन्येवोपसंहृत्य चित्तैकाग्र्यं विवर्द्धयेत् ॥ २५ ॥
ऐकाग्र्यमचलं कृत्वा निदिध्यासनकारणम् ॥
आत्मा द्रष्टव्य इत्येतत्सूत्रं व्याख्यातुमाददे ॥ २६ ॥
आहात्मशब्दः प्रत्यञ्चं तथा लोकेऽनुभूतितः ॥
अनेनात्रात्मशब्देन प्रमेयं निर्दिदिक्षितम् ॥ २७ ॥
द्रष्टव्य इति निर्दिष्टा प्रमितिर्दर्शिताऽधुना ॥
अज्ञातज्ञापनं तव्यप्रत्ययेनाभिधीयते ॥ २८ ॥
अज्ञात आत्मा वेदान्तजन्यज्ञानेन मीयते ॥

यानिति । प्रेयस्त्वेन प्रतिभातीत्यर्थः । अविवेकिभ्रममनुवदंस्तं विचारेण निवर्तयेदित्याह *मूढ इत्यादिना ॥२४॥२५॥

श्रुतौ पत्युः कामायेत्यादौ कामशब्दः प्रयोजनवचनः । ब्रह्मणः कामायेत्यत्र ब्रह्मशब्दो ब्राह्मणजातिवाची । सर्वस्य कामायेति अत्र सर्वग्रहणमुक्तानुक्तार्थम् ॥ ५ ॥

'आत्मा वा अरे'इत्यादिवाक्यस्य तात्पर्यमाह *ऐकाग्र्यमिति । अनेकजन्मकृतसुकृतैः शुद्धचित्तस्योक्तयुक्त्यनुभवाभ्यामनात्मप्रीतिमुपसंहृत्य आत्मन्येव वक्ष्यमाणविचारसाधनमैकाग्र्यं सम्पादितवतो विद्यासूत्रं विचारितुम् आत्मा वेत्यादिवाक्यं प्रवृत्तमित्यर्थः ॥२६॥ तत्रात्मपदार्थमाह *आहेति । वाच्यार्थमुक्त्वा विवक्षितमाह *अनेनेति ॥२७॥ द्रष्टव्य इत्यत्र प्रकृत्यर्थमाह *द्रष्टव्य इति । 'तथा लोके ऽनुभूतितः'इत्यत्र याऽऽत्मानुभूतिरुक्ता सा द्रष्टव्य इत्यत्र प्रकृत्यंशेनानुदितेत्यर्थमाह *अज्ञात इति ॥ २८ ॥ वाक्यार्थमाह *अज्ञात आत्मेति । अहमिति प्रतीयमान

इत्येवैषोऽत्र वाक्यार्थो नाप्रवृत्तप्रवर्तनम् ॥ २९ ॥
नन्वहम्प्रत्ययेनात्मा वेदान्तश्रवणात्पुरा ॥
विज्ञात इति चेत्, मैवं, सार्वात्म्यानवबोधनात् ॥३०॥
लिङ्गदेहपरिच्छेदरूपग्राहिण्यहम्मतिः ॥
सार्वात्म्यमात्मनस्तत्त्वं तदज्ञातमहंधिया ॥ ३१ ॥
सर्वासूपनिषत्स्वेतत्सार्वात्म्यं प्रतिपाद्यते ॥
कार्यज्ञेयसमाप्तिः स्यात्सार्वात्म्यस्यावबोधतः ॥ ३२ ॥
नाविध्वस्तं तमोऽत्रास्ति नच ज्ञानमनुत्थितम ॥
नानिवृत्तस्तथाऽनर्थो नानवाप्तं सुखं तथा ॥ ३३ ॥
इत्यज्ञातज्ञापनाख्यो विधिरत्रोपवर्णितः ॥
अप्रवृत्तप्रवृत्त्याख्यो विधिर्नात्रोपपद्यते ॥ ३४ ॥
विधेयं वा फलं वाऽस्य न सम्भवति किञ्चन ॥
ब्रह्मतद्धीस्तदभ्यास उपायो वा विधीयताम् ॥ ३५ ॥
न ब्रह्म नित्यसिद्धत्वाद्विधातुं शक्यते क्वचित् ॥

आत्मा सर्वात्मत्वेनाज्ञातत्वाद्वेदान्तप्रमेय इत्यस्य वाक्यस्य विवक्षितार्थ इत्यर्थः ॥ २९ ॥ इममेवार्थमाक्षेपसमाधानाभ्यां स्फुटयति *नन्वित्यादिना ॥ ३० ॥ ३१ ॥ आत्मनः सर्वात्मत्वस्याहंधीगम्यत्वाभावे फलितमाह *सर्वास्विति । सार्वात्म्यज्ञानफलमाह *कार्येति ॥ ३२ ॥ उक्तमेव प्रपञ्चयति *नेति ॥ ३३ ॥ वाक्यार्थमुपसंहरति *इतीति ॥ एकदेशिमतं निरस्यति *अप्रवृत्तेति ॥ ३४ ॥ तत्र हेतुमाह *विधेयमिति । तत्र विधेयासम्भवमुपपादयितुं विकल्पयति *ब्रह्मेति । ब्रह्म वा तत्साक्षात्कारो वा ब्रह्मधीसन्ततिर्वा तदभ्यासो-पायो वा विधेय इत्यर्थः ॥ ३५ ॥ आद्यं प्रत्याह *नेति ।

अभूतभावियागादिर्विधिमर्हति नेतरः ॥ ३६ ॥
नित्यं न भवनं यस्य यस्य वा नित्यभूतता ॥
न तयोर्विधियोग्यत्वं खपुष्पाकाशयोरिव ॥ ३७ ॥
तद्धीर्विधेयेत्यस्मिंश्च पक्षे धीः केतिकथ्यताम् ॥
अन्तःकरणवृत्तिर्वा किंवा तत्फलवेदनम् ॥ ३८ ॥
वृत्तिः प्रत्यक्चिदाकारा किंवा सार्वात्म्यगोचरा ॥
आद्ये विधिरपूर्वो वा नियमो वाऽथवेतरः ॥ ३९ ॥
प्रत्यक्चिदाकारतायाः प्राप्तत्वान्नास्त्यपूर्वता ॥
समाहिता व्युत्थिता वा वृत्तिः सर्वा चिदाकृतिः॥४०॥
न समाहितधीः काश्चित्प्रतीचोऽन्यत्प्रपश्यति ॥
व्युत्थितात्मापि चात्मानं पश्यन्नेवान्यदीक्षते ॥४१॥
एवं च नित्यप्राप्तत्वान्नियमोऽपि न युज्यते ॥

ब्रह्मणो विध्ययोग्यतां वक्तुं तदयोग्यं वस्तु दर्शयति *अभूतेति ॥ ३६ ॥ यागादिविलक्षणं तु न विध्यर्हमिति सदृष्टान्तमाह *नित्यमिति । तथा च ब्रह्मणोऽपि नित्यसिद्धत्वाद्विध्ययोग्यत्वं युक्तमिति भावः ॥ ३७॥ द्वितीयमनूद्य शाखाचङ्क्रमणव्यावृत्त्यर्थमनेकधा विकल्पयति *तद्धीरित्यादिना ॥ ३८ ॥ ३९ ॥ प्रत्यक्तत्त्वगोचरान्तःकरणवृत्तावपूर्वविधिरिति पक्षं निराह *प्रत्यगिति ॥ नित्यप्राप्तत्वमेवाह *समाहितेति ॥ ४० ॥ तत्र समाहितधियस्तावत्प्रत्यक्चिदाकारत्वमविवादमित्युक्त्वा व्युत्थितधियोऽपि तत्साधयति *व्युत्थितेति॥४१॥बुद्धिवृत्तौ नियमविधिरिति पक्षं दूषयति *एवमिति। व्युत्थानदशायां वृत्तेश्चिदाकारत्वस्याप्राप्तत्वात्तत्र नियमविधिर्युक्त इत्याशङ्क्य व्युत्थितात्माऽपि चात्मानं पश्यन्नेवेत्युक्तं

न काचिद् वृत्तिरस्त्यत्र चिदाकारविवर्जिता ॥ ४२ ॥
नानाद्रव्यैर्यथा योगे वियोगे च सदा घटः ॥
वियत्सम्पूर्ण एवास्ते न वियद्वर्जितः क्वचित् ॥ ४३ ॥
बाह्यशब्दादिभिर्योगे वियोगे च तथा धियः ॥
प्रत्यक्चैतन्यसम्पूर्त्तिर्नित्येत्येतत्स्वसाक्षिकम् ॥ ४४ ॥
अनात्मदृष्टिव्यावृत्त्यै परिसङ्ख्येति चेत्, न तत् ॥
न खल्वनात्मविभ्रान्तिं विधिर्वारयितुं प्रभुः ॥ ४५ ॥
प्रमाणजन्यज्ञानेन विना विधिशतैरपि ॥
रज्जुसर्पादिविभ्रान्तिर्नहि क्वापि निवर्तते ॥ ४६ ॥
सार्वात्म्यगोचरा वृत्तिरप्यत्र न विधीयते ॥
यतो पुरुषतन्त्रा सा तस्मादत्र कथं विधिः ॥ ४७ ॥
कर्तृतन्त्रा यदि भवेत्तदा योषाऽग्निबुद्धिवत् ॥
क्रिया स्यात्, क्रियया नैव काप्यविद्या निवर्तते ॥ ४८ ॥
फलसंवेदनं नापि विधातुमिह शक्यते ॥
संवेदनस्य नित्यत्वात्फलत्वं तूपचारतः ॥ ४९ ॥

सदृष्टान्तमुपपादयति *न काचिद् वृत्तिरित्यादिना ॥ ४२ ॥ ॥ ४३ ॥ ४४ ॥ बुद्धिवृत्तौ परिसङ्ख्याविधिरिति पक्षं दूषयति *अनात्मेत्यादिना ॥ ४५ ॥ ४६ ॥ प्रत्यक्चिदाकारबुद्धिवृत्तौ विधित्रयमपि निरस्य सर्वात्मत्वगोचरायां तस्यां विधिरिति पक्षमनूद्य प्रत्याह *सार्वात्म्येति ॥ ४७ ॥ सार्वात्म्यधियोऽपि पुंतन्त्रत्वमाशङ्क्य तथात्वे बाधकमाह *कर्त्रिति ॥ अस्तु तर्हि क्रियैवेति तत्राह *क्रिययेति । रज्जुसर्पस्य घंटाघोषादिना निवृत्त्यदृष्टेरिति भावः ॥ ४८ ॥ वृत्त्याभिव्यक्तं चैतन्यं विधेयमिति पक्षं निरस्यति *फलेति । क-

प्रमाणमप्रमाणं च प्रमाभासश्च सर्वदा ॥
चैतन्याभासितं तच्च चैतन्यं फलमुच्यते ॥ ५० ॥
मानादिव्यभिचारेऽपि संविदव्यभिचारिणी ॥
अतो नित्यतया नैतद्विधेयं फलवेदनम् ॥ ५१ ॥
विधेयोऽभ्यास इति चेन्नाशक्यानुपयोगतः ॥
अविज्ञाते ब्रह्मतत्त्वे तद्बुद्ध्यावर्त्तनं कथम् ॥ ५२ ॥
ज्ञातेऽप्यविषयप्रत्यगनाकारस्य तस्य धीः ॥
नैवावर्तयितुं शक्या देवतामूर्तिबुद्धिवत् ॥ ५३ ॥
अभ्यासस्योपयोगोऽपि किं जीवब्रह्मरूपता ॥
मुक्तौ चेतोऽनुवृत्तिर्वा किंवा ऽविद्यानिवर्तनम्॥५४॥

थं तर्हि नित्यस्य प्रमाणफलत्वं तत्राह *फलत्वमिति ॥ ४९ ॥ तस्य मुख्यत्वार्थं कार्यत्वमेव कल्प्यताम्, इत्याशङ्क्य फलसंवेदनस्य नित्यत्वे युक्तिं वक्तुं तत्र स्वरूपमाह *प्रमाणमिति । प्रमाणादि यच्चैतन्येन स्फुरति तदेव चैतन्यं फलशब्देनोच्यत इत्यर्थः ॥ ५० ॥ तस्य नित्यत्वे युक्तिमाह *मानादीति । मातृमानादीनां तदभावानां च साक्षित्वेन फलचैतन्यस्य नित्यत्वे फलितमाह *अत इति ॥ ५१ ॥ ब्रह्मधीसन्ततिर्विधेयेति पक्षमनूद्य निरस्यति *विधेय इति । अशक्यत्वादनुपयुक्तत्वाच्चेत्यर्थः । कथमशक्तिरिति चेत्, किमज्ञाते ब्रह्मणि सा विधेयोत ज्ञाते ? तत्राद्यं प्रत्याह *अविज्ञात इति ॥ ५२ ॥ अन्त्यं निरस्यति *ज्ञातेऽपीति । विषयत्वमङ्गीकृत्याप्याह *अनाकारस्येति ॥ ५३ ॥ अशक्यत्वमुपपाद्य अनुपयुक्तत्वमुपपादयितुं विकल्पयति *अभ्यासस्येति । *जीवस्य ब्रह्मात्मतेति यावत् ॥ ५४ ॥ आद्यं प्रत्याह

न जीवब्रह्मताऽभ्याससापेक्षा किन्तु सा स्वतः ॥
न घटादेर्घटादित्वं बुद्ध्यभ्यासमपेक्षते ॥ ५५ ॥
भावनोपचितं चेतो न कैवल्येऽनुगच्छति ॥
तस्येहैव समुच्छित्तेस्तद्धेत्वज्ञानहानतः ॥ ५६ ॥
भावनाभावितं चेतो यत्र जन्मान्तरप्रदम् ॥
तत्र चेतोऽनुवृत्तिः स्यात्सा कैवल्ये कथं भवेत् ॥५७॥
ब्रह्मात्मैकत्वविज्ञानमविद्यामात्मनि स्थिताम् ॥
सकृज्जातं न चेद्धन्ति ज्ञानमेव न तद्भवेत् ॥ ५८ ॥
एकाश्रयैकविषयौ ज्ञानमोहौ तथासति ॥
अबाधितं तमोऽत्रास्ते इत्युक्तिर्जडवत्कृता ॥ ५९ ॥
ज्ञानोपायो विधेयश्चेन्नोपायस्याप्रतीतितः ॥

---

*नेति । स्वतःसिद्धस्याभ्यासानपेक्षत्वे दृष्टान्तमाह *न घटादेरिति ॥ ५५ ॥ सगुणेश्वरोपास्त्या तत्तादात्म्यं प्राप्तस्य भोगाय चेतसोऽनुवृत्तिवद्ब्रह्मविदोऽपि विहिताभ्याससहितं चेन्मनो मुक्तावनुवर्ततेति तदनुवृत्तये ज्ञानाभ्यासे विधिरिति द्वितीयं प्रत्याचष्टे *भावनेति । *इहेति ज्ञानसत्तावस्थोक्तिः ॥ ५६ ॥ सगुणं ब्रह्म प्राप्तस्य त्वज्ञानानिवृत्तेर्मनोऽनुवृत्तावरोधान्न तस्य दृष्टान्ततेत्याह *भावनेति ॥ ५७ ॥ तृतीयमपवदति *ब्रह्मेति ॥ ५८ ॥ जन्ममात्रेणाज्ञानानिवर्तकत्वेऽपि कदाचित्तन्निवर्तकत्वाज्ज्ञानस्य ज्ञानत्वमिति तत्राह *एकेति । न हि यस्मिन्देशे प्रकाशस्तत्रैव तमोऽव्यावृत्तं तद्दृष्टचरमित्यर्थः ॥ ५९ ॥ ब्रह्म तद्धीस्तदभ्यासः ज्ञानोपायो वा विधीयत इति यद्विकल्पचतुष्टयमुक्तं तत्र चतुर्थमनूद्य प्रत्याह *ज्ञानेति । अप्रतीतिमेवाह *आत्मेति । अत्र ज्ञानोपायत्वेनाभिमतश्रव-

आत्मा द्रष्टव्य इत्युक्तौ ज्ञानोपायो न भासते॥६०॥
विधेः फलं च नास्त्येव नर्तिक मात्वं पदान्वयः ॥
नैरपेक्ष्यमवच्छेदहानिर्वाऽज्ञानबाधनम् ॥ ६१ ॥
मात्वं मानान्तराप्राप्तवस्तुतत्त्वावबोधतः ॥
सिध्यत्येवोपनिषदां प्रामाण्ये विधिनाऽत्र किम् ॥६२॥
विधेरपीह मानत्वं साध्यसाधनबोधनात् ॥
न विधित्वात्,अन्यथा स्याद्बाधितोऽपि विधिः प्रमा ६३॥
आरण्यतिलसम्बन्धियवाग्वा जुहुयादिति ॥
पूर्वपक्षाविधिं वेदोऽनूद्य बाधितवानमुम् ॥ ६४ ॥

णादिवाचकपदाभावादित्यर्थः ॥ ६० ॥ द्रष्टव्यवाक्यं विधिपरमित्यत्र विधेयाभावमुक्त्वा फलाभावमप्याह *विधेरिति । तमेवोपपादयितुं विकल्पयति *तत्किमिति ॥ ६१ ॥ कर्मकाण्डे सिद्धबोधिवाक्यानां विधिशेषत्वेन प्रामाण्यदृष्टेरुपनिषदामपि सिद्धबोधित्वात्तत्प्रामाण्यार्थं विधिरित्याद्यः पक्षस्तं प्रत्याह *मात्वमिति ॥ ६२ ॥ अज्ञातार्थबोधित्वेनैव विधेरपि प्रामाण्यं वाच्यमित्याह *विधेरिति ॥ ६३ ॥ बाधितमेवोदाहरति *अरण्येति । 'जर्तिलयवाग्वा जुहुयात्' इत्यत्र अजक्षीरेण जुहोतीत्युक्त्वा अजक्षीरस्यैव होमसाधनत्वात् अरण्यतिलसम्बन्धियवाग्वा होमसाधनत्वमविवक्षितमिति न्यायतो(१)निर्णीतम् । विधेरेव प्रमात्वप्रयोजकत्वे तस्यापि स्वार्थे प्रामाण्यं स्यात् इत्यर्थः । *बाधितवानिति । 'अनाहुतयो वा एते जर्तिलाः' इति वाक्येनेत्यर्थः ॥ ६४ ॥

---

(१) आग्निहोत्रे श्रूयते-"जर्तिलयवाग्वा जुहुयात्, गवीधुकयवाग्वा वा, न ग्राम्यान् पशून् हिनस्ति नारण्यान् । अथो

पदान्वयः क्रियामात्रमाकाङ्क्षति विधिं तु न ॥
अस्त्यस्यस्मीत्येवमादि सुलभं तत्क्रियापदम् ॥ ६५ ॥
कर्मवाक्येष्विवैतेषु वेदान्तेष्वनपेक्षता ॥
नान्यत्रापेक्षितुं योग्यं सरित्तीरफलोक्तिवत् ॥ ६६ ॥
फलानि चक्षुर्योग्यानि योग्यं ब्रह्म तु कस्य ते ॥

पदान्वयार्थं विधिरिति द्वितीयकल्पं निराह *पदेति ॥ ६५ ॥ तृत्तीयमनुवदति *कर्मेति । नास्तीत्यत्र सिद्धबोधित्वादिति शेषः । ततः किं ? तत्राह *अन्यत्रेति । तथाच निरपेक्षत्वाय विधिरित्यर्थः ॥ ६६ ॥ वेदान्ताः सापेक्षाः सिद्धबोधित्वात्, नदीतीरफलोक्तिवत्, इत्युक्ते मानान्तरयोग्यार्थत्वमुपाधिरित्याह *फलानीति। उपाधेः साधनव्यापकत्वमाशङ्क्याह *योग्यमिति । किंशब्दसूचितं विकल्पं

खल्वाहुः । अनाहुतिर्वै जर्तिला गवीधुकाश्चेत्यजक्षीरेण जुहोतीति । पयसा अग्निहोत्रं जुहुयात्" इति । जर्तिला आरण्यास्तिलाः । गवीधुका आरण्या गोधूमाः । तयोरुभयोर्विकल्पः श्रौत एव ।

"अनाहुतिः"—इति पूर्वयोः दूषितत्वात् होमाभावः तृतीयः पक्षः । न च–अत्र 'जर्तिलगवीधुकयोरनाहुतिः' इत्यनेन पर्युदासः सम्भवति, आहुतिपदान्वितस्य नञ्पदस्य जर्तिलगवीधुकपदान्वयायोगात् ।

पयोविधिः चतुर्थः पक्षः । एतेषां परस्परविरुद्धानां चतुर्णां गत्यन्तराभावात् षोडशीग्रहणाग्रहणवत् विकल्प इति प्राप्ते—

ब्रूमः—पयोविधिना सह जर्तिलादेरेकवाक्यत्वेनार्थवादत्वं युक्तम् । ग्राम्यारण्यपशुहिंसाराहित्येन प्रशस्तयोरपि जर्तिलगवीधुकयोरग्निहोत्रं प्रत्याहुतित्वं नास्ति, पयसस्तु तदस्ति 'इत्थं महाभागं पयः' इति स्तूयते, तस्मात् अर्थवादः ॥

इति पूर्वकाण्डे दशमाष्टमे अधिकरणमालायामुक्तम् ।

प्रत्यक्षस्यानुमादेर्वा ? नाद्यो, रूपादिवर्जनात् ॥६७॥
नेतीत्यस्थूलमित्यादिवाक्याद्योऽर्थोऽवगम्यते ॥
योगिप्रत्यक्षतो वाऽयं कथं गम्येत तद्वद ॥ ६८ ॥
यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ॥
पुरः सूक्ष्मादिदृष्ट्या स्यान्न रूपे श्रोत्रवृत्तिता ॥६९॥
तस्मादिन्द्रियगम्येषु शिल्पं कुर्वन्तु योगिनः ॥
अतीन्द्रियं ब्रह्मतत्त्वं वाक्यादेव विजानते ॥ ७० ॥
व्याप्तिग्रहादिराहित्यान्नानुमानादियोग्यता ॥
नैरपेक्ष्यमतः सिद्धं वेदान्तानां विधेरिव ॥ ७१ ॥
जीवावच्छेदहानिश्च विधिना नैव सिध्यति ॥
अविद्यया कल्पितस्य विद्ययैव निवर्तनात् ॥ ७२ ॥
अज्ञानबाधनं च स्याज्ज्ञानादेव विधेर्न तु ॥

स्पष्टयति *प्रत्यक्षस्येति ॥ ६७ ॥ 'प्रत्यक्षयोग्यं ब्रह्म' इत्यत्रापि किमस्मदादिप्रत्यक्षस्य योग्यम् उत योगिप्रत्यक्षस्येति विकल्प्याद्यं निराकुर्वन् योगिप्रत्यक्षस्याप्ययोग्यतां दर्शयितुं ब्रह्मणो निर्विशेषत्वमाह *नेतीत्यस्थूलमिति ॥ ६८ ॥ निर्विशेषमपि योगिप्रत्यक्षयोग्यं स्यात्, तत्प्रत्यक्षस्यातिशयादित्याशङ्क्य तस्याप्ययोग्येऽतिशयशून्यत्वमाह *यत्रेति । धर्मब्रह्मादिविषयेऽपि योगिनामिन्द्रियं प्रवर्तते चेत् तेषां रूपेऽपि श्रोत्रेन्द्रियप्रवृत्तिः स्यादित्यतिप्रसङ्गमाह *नेति ॥ ६९ ॥ ७० ॥ निर्धर्मकत्वादेव ब्रह्म नानुमानादियोग्यमपीत्याह *व्याप्तीति । तस्य मानान्तरायोग्यत्वे फलितमाह *नैरपेक्ष्यमिति । अतस्तदर्थमपि न विधिरित्यर्थः ॥ ७१ ॥ चतुर्थं प्रत्याह *जीवेति ॥ ७२ ॥ पञ्चममपवदति *अज्ञानेति ।

द्वैविध्यमप्यविद्यायां न युक्तं परकल्पितम् ॥ ७३ ॥
अविद्यैका ज्ञानहेया विधिहेया तथेतरा ॥
इत्येवं कल्पयन्त्येतत्तच्चाद्वैते कथं भवेत् ॥ ७४ ॥
विषयस्य विभेदेन ज्ञानानां स्याद्यथा भिदा ॥
अज्ञानस्य तथा वाच्या नाद्वैते विषयेऽस्ति सा ॥७५॥
विधेयतत्फलाभावादप्रवृत्तप्रवर्तनम् ॥
दुर्घटं, तेन पूर्वोक्तमज्ञातज्ञापनं भवेत् ॥ ७६ ॥
ननु चिद्राहिता वृत्तिर्नास्तीति प्रतिपादितम् ॥
उत्पन्नैव ततो विद्या किं शास्त्रेणेति चेच्छृणु ॥ ७७ ॥
उत्पन्नमपि विज्ञानं प्रमातृत्वाद्युपग्रहात् ॥
अनुत्पन्नवदाभाति तद्व्युत्पत्तेः पुरा नृणाम् ॥७८॥

ज्ञाननिवर्त्याज्ञानव्यतिरेकेण विधिनिरस्याज्ञानमप्यस्ति अतो विधिरर्थवानिति तत्राह *द्वैविध्यमिति ॥ ७३ ॥ अयुक्तत्वमेवोपपादयितुं परपरिकल्पितप्रक्रियामनुवदति *अविद्येति ॥ ७४ ॥ कथंशब्दसूचितामनुपपत्तिं स्फोरयति *विषयस्येति । अज्ञानस्यानादित्वेन कारणकृतभेदाभावात् घटपटज्ञानवद्विषयकृता भिदा वाच्या सा चाद्वैतविषये नास्तीति द्वैविध्यकल्पनमयुक्तमित्यर्थः ॥ ७५ ॥ द्रष्टव्यवाक्यस्य विधिपरत्वनिरसनमुपसंहरति *विधेयेति । तस्य विधिपरत्वाभावे फलितमाह *तेनेति ॥ ७६ ॥ विधिनिराकरणसमये बुद्धिवृत्तेश्चिदाकारता नित्यप्राप्तेत्युक्तं, तदनुवदन् तत्पक्षे शास्त्रवैयर्थ्यं स्यादिति शङ्कते *नन्विति ॥ ७७ ॥ प्रतीचि सदा सिद्धमपि ज्ञानं विहितश्रवणादिना ज्ञानोत्पत्तेः पूर्वं प्रमातृत्वादियोगात्परिच्छेदाभिमानात्सर्वेषामप्यप्राप्तवद्भाति, अतः श्रवणाद्यनुष्ठेयमिति शास्त्रमर्थवदेवेति परिहरति *उत्पन्नमिति ॥ ७८ ॥ उक्त-

व्युत्पाद्यते पुमाञ्छास्त्रादन्वयव्यतिरेकतः ॥
व्युत्पादनमिदं प्रोक्तमज्ञातज्ञापनं बुधैः ॥ ७९ ॥
अविचारितसिद्ध्येतदज्ञातज्ञापनं त्वयि ॥
नाद्वैते वास्तवं युक्तमितरव्यवहारवत् ॥ ८० ॥
अव्युत्पत्तिर्बन्धहेतुर्व्युत्पत्तिर्बन्धमोचनी ॥
आत्मव्युत्पत्तये तस्माद्विधत्ते श्रवणादिकम् ॥ ८१ ॥
आत्मेत्येवेति सूत्रस्य द्विधा व्याख्या पुरोदिता ॥
आत्मतत्त्वपरत्वेन तद्विचारपरत्वतः ॥ ८२ ॥
आत्मा द्रष्टव्य इत्युक्त्या तत्त्वधीरुपदर्शिता ॥
श्रोतव्य इत्यादिना तु विचार उपदिश्यते ॥ ८३ ॥
श्रुत्यर्थाविष्कृतेर्हेतुः शब्दशक्तिर्विवेककृत् ॥

मेव व्यनक्ति *व्युत्पाद्यत इति । शास्त्रस्य व्युत्पादनार्थत्वे कथमज्ञातज्ञापनार्थत्वमुक्तमित्याशङ्क्य तदेव तदित्याह *व्युत्पादनमिति ॥ ७९ ॥ व्युत्पादनस्यावश्यकत्वे तस्य सत्यत्वं वक्तव्यम्, असत्यस्य बाष्पादेः सम्यग्धीजनकत्वादृष्टेः तथाचाद्वैतहानिरिति तत्राह *अविचारितेति । *इतरेति । स्वप्नव्यवहारवदित्यर्थः । नच सत्यस्यैव प्रमाजनकत्वनियमः, बाष्पादिजन्यधियोऽपि विषयाबाधप्रमात्वाङ्गीरादिति भावः ॥ ८०॥ शास्त्रावैयर्थ्यमुपसंहरति *अव्युत्पत्तिरिति ॥ ८१ ॥ 'श्रोतव्यः' इति वाक्यं व्याचिख्यासुस्तदुपयोगित्वेन विद्यासूत्रार्थमुक्तं स्मारयति *आत्मेति ॥ ८२ ॥ तत्र प्रथमव्याख्यानुसारेण द्रष्टव्यवाक्यं प्रवृत्तं, द्वितीयव्याख्यानुसारेण श्रोतव्यवाक्यप्रवृत्तिरित्याह *आत्मेति ॥ ८३ ॥ एवं पातनिकामुक्त्वा 'श्रोतव्यः' इत्यस्यार्थमाह* श्रुतीति । ऐ-

श्रुतिलिङ्गादिको न्यायः प्रोक्तः श्रोतव्य इत्यतः ॥८४॥
अर्थासम्भावनोच्छेदी तर्को मननमीरितम् ॥
वेदशास्त्राविरोध्यत्र तर्को ग्राह्यो न चेतरः ॥ ८५ ॥
अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते ॥
ध्यानाशङ्कानिवृत्त्यर्थं विज्ञानेनेत्युदीरणात् ॥ ८६ ॥
द्रष्टव्य इति विज्ञानमुद्दिश्य श्रवणं तथा ॥

क्यधीसाधनं शक्तितात्पर्यनिर्णायकैः श्रुत्यादिभिर्ब्रह्मात्मनि वेदान्ततात्पर्यनिरूपणं श्रवणं 'श्रोतव्यः' इत्यनेन विधीयत इत्यर्थः ॥ ८४ ॥ 'मन्तव्यः' इत्यत्र मननशब्दार्थमाह *अर्थासंभावनेति ॥ ८५ ॥ 'निदिध्यासितव्यः' इत्यत्र निदिध्यासनशब्दार्थमाह *अपरायत्तेति । शमदमादिसहिते श्रवणमनने कृत्वा स्थितस्य वाक्यार्थज्ञानान्तरायहीनस्यानायासेन वाक्यीयोत्थबोधो निदिध्यासनशब्देनोच्यते इत्यर्थः ॥ तस्य ध्यानवाचित्वं किं न स्यादित्याशङ्क्य वाक्यशेषविरोधान्नैवमित्याह *ध्यानेति । न चोपक्रमानुरोधेन विज्ञानशब्दः करणव्युत्पत्त्या ध्यानार्थ एव किं न स्यादिति शङ्क्यम्, निर्विशेषवस्तुध्यानस्य निदिध्यासनशब्दवाच्यत्वेनाक्लृप्तत्वात्, अत्र तत्कल्पने 'संदिग्धे तु वाक्यशेषात्' इति न्यायेन ज्ञानवाचित्वकल्पनस्यैवोचितत्वात् । न च विध्यभावे ध्यानस्य ज्ञानसाधनत्वासिद्धिः, समाहितो भूत्वेत्यादिश्रुतेस्तत्सिद्धेर्निदिध्यासितव्य इति च ध्यानसहितश्रवणादिफलभूतवाक्यार्थज्ञानोक्तेरिति भावः ॥८६॥ निदिध्यासनशब्दस्य ज्ञानार्थत्वेन 'द्रष्टव्यः' इत्यनेन पौनरुक्त्यं स्यादित्याशङ्क्य एतदेव ज्ञानं तत्र साधनविधानायानूदितमित्याह *द्रष्टव्यमिति । निदिध्यासनोक्ति-

मननं च विधायाथ विज्ञानमवधिं जगौ ॥ ८७ ॥
श्रवणादिक्रिया तावत्कर्त्तव्येह प्रयत्नतः ॥
यावद्यथोक्तं विज्ञानमाविर्भवति भास्वरम् ॥ ८८ ॥
अनन्यायत्तविज्ञाने श्रवणादेरुपागतः ॥
ज्ञाने नापेक्षते किञ्चित्प्रतीचोऽनुभवात्परम् ॥ ८९ ॥
ऐकात्म्याज्ञानविध्वंसाव्यतिरेकेण नेष्यते ॥
ऐकात्म्यविज्ञानफलं प्राप्तमेव हि तत्त्वतः ॥ ९० ॥
नन्वनात्मा न विज्ञात आत्मदर्शनमात्रतः ॥

फलमाह *अथेति ॥ ८७ ॥ तस्य ध्यानसहितश्रवणाद्यवसानभूमित्वमेव स्फोरयति *श्रवणादीत्यादिना । इहेत्यात्मोक्तिः । प्रयत्नः शमादिसाहित्यम्, तत्राप्यावृत्तिं सूचयति *यावदिति । भास्वरत्वं फलशिरस्कत्वम् । स्वतःसिद्धात्मज्ञाने लब्धे प्रत्यगानन्दलाभादनन्तरं न किञ्चिद्विद्वानपेक्षतेआत्मलाभस्मृतेरित्यर्थः ॥८८॥ ॥८९॥ आत्मधियो मुक्तिफलत्वे मुक्तेः साधनाधीनत्वादनित्यतेत्याशङ्क्याह *ऐकात्म्येति । अज्ञानध्वंसादन्यज्ञानफलानुपगमे हेतुमाह *प्राप्तमिति । ऐकात्म्यं कैवल्यं नित्यप्राप्तमतस्तदावरकाज्ञानस्य ज्ञानान्निरासान्मुक्तेस्तत्कार्यत्वमौपचारिकमित्यर्थः ॥ ९० ॥ 'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳ सर्वं विदितम्' इत्युत्तरवाक्ये श्रवणादिजन्यज्ञानस्य सर्वविषयत्वमुक्तं तद्व्याख्यातुं व्यावर्त्यामाशङ्कामाह *नन्विति । अनात्माज्ञाने फलितमाह *तत इति । विद्यासूत्रे कृत्स्नतायाः विद्याफलत्वमुक्तं विरुध्येत विदुषः सार्वात्म्यज्ञानाभावादित्यर्थः । उत्तरवाक्यतात्पर्यं दर्शयन्फलितमाह *मैत्रमिति । कल्पितस्याधिष्ठानव्यतिरेकेणाभावात्सर्वाधिष्ठाने ब्रह्मणि ज्ञाते

ततोऽकृत्स्नत्वदोषश्चेन्मैवं सर्वस्य वेदनात् ॥ ९१ ॥
आत्मनो दर्शनेनेदं दृष्टं स्यादखिलं जगत् ॥
प्रत्यङ्मात्रैकयाथात्म्यात्कार्यकारणवस्तुनः ॥ ९२ ॥
कार्यात्मा कारणात्मा च द्वावात्मनौ परात्मनः ॥
प्रत्यग्याथात्म्यमोहोत्थौ मोहे नष्टे विनश्यतः ॥९३॥
मोहतत्कार्ययोर्बाधे प्रत्यक् सर्वमितीर्यते ॥
अतः प्रतीचि विज्ञाते सुलभं सर्ववेदनम् ॥ ९४ ॥
तत्रैवं सति यो मूढः समस्तव्यस्तरूपताम् ॥
ज्ञातव्यां मन्यते तत्तु वेद एव निषेधति ॥ ९५ ॥

श्रुतिः—ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद, क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद, लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान्वेद, देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद, भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद, सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानि इदꣳ सर्वं यदयमात्मा ॥ ६ ॥

वार्ति०—यो विप्रजातिश्चैतन्यादन्यद्वस्त्वभिमन्यते ॥
कैवल्यात्तं पराकुर्याद्विप्रजातिः पराङ्मुखम् ॥ ९६ ॥
ब्राह्मणोऽहमिति भ्रान्त्या बृहस्पतिसवादिषु ॥

सर्वं वस्तुनस्तत्त्वं ज्ञातमेवेत्यर्थः ॥ ९१ ॥ ९२ ॥ 'कार्यकारणवस्तुनः' इत्युक्तं विवृणोति *कार्येति । तयोर्मोहजत्वे फलितमाह *मोह इति। वाक्यार्थमुपसंहरति *अत इति॥९३॥९४॥ ब्रह्म तं परादादित्यादिवाक्यमवतारयति *तत्रैवमिति । प्रकृतं ब्रह्म सप्तम्यर्थः ॥ ९५ ॥ अक्षरार्थं योजयति । *य इति ॥९६॥

प्रवृत्तो लभते जन्मेत्येषैवास्य पराक्रिया ॥ ९७ ॥
विप्रत्ववत्क्षत्रलोकदेवभूतादिकं जगत् ॥
स्वस्माद्भेदेन पश्यन्तं क्लेशयेदपराधिनम् ॥ ९८ ॥
यदस्ति तन्न जानाति यन्नेहास्ति तदीक्षते ॥
इत्येवमपराधोऽस्य विद्यते भेददर्शिनः ॥ ९९ ॥
योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ॥
किं तेन न कृतं पापं चौरेणात्मापहारिणा ॥ १०० ॥
अपोदितत्वाज्जात्यादिदर्शनस्येह किं पुनः ॥
द्रष्टव्य इत्यतो वक्ति सर्वाखण्डत्वदर्शनम् ॥१०१॥
प्रत्यक्त्वेन य आभाति प्रत्यग्बुद्धिप्रमाणकः ॥
तावन्मात्रैकयाथात्म्यमुक्तं जात्यादि दृश्यताम्॥१०२॥
एवं श्रोतव्य आत्मा ऽयं समाप्तः श्रवणे विधिः ॥
कथं मन्तव्य इत्यत्र दुन्दुभ्यादिनिदर्शनम् ॥ १०३ ॥

ब्रह्म ब्राह्मणजातिरात्मनोऽन्यत्र आत्मनो भिन्नेति यो वेद तं सा जातिः कैवल्यात्पराङ्मुखं कुर्यादिति श्रुत्यर्थः ॥ ६ ॥

पराकरणप्रकारमाह *ब्राह्मण इति ॥९७॥ क्षत्रं तं परादादित्यादिवाक्यानामनेन समानार्थतामाह । विप्रत्ववदिति ॥९८॥ अपराधं विवृणोति *यदिति । ब्राह्मणत्वादिः सप्तम्यर्थः ॥ ९९ ॥ यदस्तीत्यात्मत्वं यन्नास्तीत्यनात्मत्वं भेददर्शनमेवापराध इत्यत्र व्यासवचनं प्रमाणयति *य इति ॥१००॥ इदं ब्रह्मेत्यादिवाक्यं प्रश्नपूर्वकमादत्ते *अपोदितत्वादिति ॥१०१॥ अवतारितवाक्यार्थमाह । प्रत्यक्त्वेनेति ॥१०२॥ स यथादुन्दुभेरित्यादिवृत्तानुवादपूर्वकमवतारयति *एवमिति ॥ श्रोतव्यः इति यः श्रवणविधिः स उक्तरीत्या समाप्त इत्यर्थः ॥ १०३ ॥

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः। (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि–मीमांसादर्शनम्। महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः। पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः। (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम्। महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम्। १३

(२०) ब्रह्मसूत्रभाष्यम्। श्रीभास्कराचार्यविरचितं सपूर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम्। आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीति प्रसिद्धया समेतम्। (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम्। ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीब्रजनाथभट्टकृता (वेदान्तः) २

(२५) क्रोडपत्रसंग्रहः। अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि २

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम्। श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः। बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः। मणिभद्रकृतटीकया सहितः। हरिभद्रसूरिकृतः। १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका। १३

(३०) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः। सापिण्ड्यदीपकश्च ... ११

(३१) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः। ४

(३३) वेदान्तरत्नमञ्जूषा। श्रीभगवत्पुरुषोत्तमाचार्यकृता। १

(३४) प्रस्थानरत्नाकरः। गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम्। १

(३६) योगदर्शनम्। परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित–योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम्। २

(३७) वेदान्तदर्शनम्। परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृतब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम्। ४

(३८) विश्वप्रकाशः। कोशः। विद्वद्वरश्रीमहेश्वरसूरिविरचितः। २

(३९) श्रीसुबोधिनी। श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भगवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता। श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्योः–प्रकाशः गोस्वामि श्रीश्री पुरुषोत्तमजीमहाराज विरचित ३

(४०) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः। ... ४

(४१) वेदान्तसिद्धान्तसंग्रहः। श्रुतिसिद्धान्तापरनामकः। श्रीब्रह्मचारिवनमालिमिश्रविरचितः। वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद. शर्मकृता अध्यात्मसुधातरङ्गिण्याख्य टीकया सहिता। ३

(४२) स्वानुभवादर्शः। श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः। स्वकृतटीकाविभूषितश्च। १

(४३) याज्ञवल्क्यस्मृतिः। बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता। व्यवहाराध्यायः ११

(४४) गादाधरी। श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता। श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता। ४

(४५) शास्त्रदीपिका। श्रीपार्थसारथिमिश्र प्रणीता। रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्यया सहिता तर्कपादः। ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्रीनागेशभट्टविरचिता। श्रीमद्दुर्बलाचार्य-बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाह्वटीकाद्वयसंवलिता। १०

(४७) व्याकरणसिद्धान्तसुधानिधीः। पर्वतीय विश्वेश्वरसूरिविरचितः। ६

(४८) विरमित्रोदयः। लक्षणप्रकाशः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः। ५

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः। महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकयासमलंकृतः। ६

(५०) विरमित्रोदयः। राजनीतिप्रकाशः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः। ५

(५१) पूर्वमीमांसा अधिकरणकौमुदी। श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यविरचिता परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत १

(५२) प्रसस्तपादभाष्यटीकासंग्रहः। तत्र कणादरहस्यम्। श्रीशंकरमिश्रविरचितम् १

(५३) क्रमदीपिका। श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता। विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवर्णोपेत २

(५४) वीरमित्रोदयः। तीर्थप्रकाशः। महामहोपाध्याय श्रीमित्रमिश्रविरचितः। ४

पत्रादिप्रेषणस्थानम् } हरिदासगुप्तः, चौखम्बा बनारस सिटी

May 1919.

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKṚIT WORKS.

NO. 257.

बृहदारण्यकवार्तिकसार ।

श्रीमद्विद्यारण्यस्वामिविरचितः ।

महेश्वरतीर्थकृतया लघुसङ्ग्रहाख्यया

टीकाया समलङ्कृतः ।

पर्वतीयश्रीमन्नित्यानन्दपण्डितप्रदर्शितरीत्या

वझे इत्युपनामकेन भाऊशास्त्रिणा

संशोधितः ।

BRIHADARANYAKAVARTIKASARA

BY VIDYARANYA SWAMI,

WITH A COMMENTARY CALLED LAGHUSANGRHA BY

MAHESHWAR TIRTH.

EDITED BY

BHAU SHASTRI VAJHE.

FASCICULUS VII—७.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT SERIES OFFICE, BENARES.

AGENTS: OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press, Benares.

1918

Price Rupee one.

॥ श्रीः ॥

—:०:—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—२५७

१ अस्यां चौखम्बा- संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तवको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तवके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः,ब्रह्मदशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्—मुद्राः ७ आनकाः ८

५ अन्यैर्देयं प्रतिस्तवकं ... ... " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति । ... ...

साम्प्रतं मुद्र्यमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्डे २

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १२

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १०

(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) २

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः १

(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविरचिता । तर्कपादः(मीमांसा) २

(७) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः (मीमांसा) २

(८) ब्रह्मसूत्रभाष्यम्- बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानम् । सम्पूर्ण । (वेदान्तः) ६

(९) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा २

(१०) सिद्धित्रयम्—विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्ण(वेदान्तः)१

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सम्पूर्णम् (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १६

श्रुतिः-स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ७ ॥

वा०—स्थितौ जनौ लयेऽप्येतज्जगदात्मातिरेकतः ॥
नास्तीत्येतत्क्रमेणात्र दृष्टान्तैः प्रतिपाद्यते ॥ १०४ ॥
यथा दुन्दुभिशब्दत्वसामान्यादुत्थितात्पृथक् ॥
नादातुं शक्नुयात्कश्चिद्विशेषानसिकोशवत् ॥१०५॥
तद्वदात्मातिरेकेण नात्मीयोऽर्थो मनागपि ॥
यतः समीक्षितुं शक्यस्तेनासौ रज्जुसर्पवत् ॥१०६॥
सामान्यं तद्विशेषाश्च तद्विशेषा इति त्रयः ॥
दुन्दुभिस्तस्य चाघातः शब्दश्चेत्येभिरीरिताः॥१०७॥
सामान्यं दौन्दुभः शब्दो वीरादिरससंयुतः ॥

दुन्दुभ्यादिदृष्टान्ततात्पर्यमाह *स्थिताविति। "स यथा दुन्दुभेः, स यथाऽऽर्द्रैधाग्नेः,स यथा सर्वासामपाम्"इति दृष्टान्तत्रयेणेत्यर्थः॥४॥

श्रुतौ स यथेत्यत्र स इति दृष्टान्तार्थः । आत्मनः सर्वात्मत्वे दृष्टान्त उच्यत इत्यर्थः ॥ दुन्दुभिदृष्टान्तं सदार्ष्टान्तिकं व्याचष्टे *यथेति द्वाभ्याम् । दुन्दुभेर्हन्यमानस्येति पदद्वयेन तज्जशब्दसामान्यं लक्ष्यते, ततो जाताः विशेषाः बाह्याः शब्दास्तान्निष्कृष्यासिमिव कोशाद्ग्रहीतुं सुशिक्षितोऽपि नालम् अतस्ते सामान्ये कल्पिताः, सर्पादिरिव रज्ज्वामित्यर्थः॥१०५॥ ॥ १०६ ॥ स यथेत्यादि ग्रहणायांतं व्याख्याय दुन्दुभ्याघातेत्यादि व्याचष्टे *सामान्यं तदिति। तद्विशेषाः सामान्यं प्रति विशेषाणामवान्तरं सामान्यानामपि विशेषाः॥१०७॥ त्रिविधमपि शब्दमुदाहरति *सामान्यमिति । *वीरादीति । नवरससामा-

विशेषस्तद्विशेषास्तु नीचोच्चादिविभेदिनः ॥१०८॥
नीचादिभेदिनः शब्दा वीरादिरससंयुते ॥
अन्तर्भवन्ति सोऽप्यन्तर्भूतः स्याद्दौन्दुभध्वनौ॥१०९॥

श्रुतिः—स यथा शङ्खस्य ध्मायमानस्य न बाह्या-ञ्छब्दाञ्छक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ८ ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद् ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ ९ ॥

वा०-एवं शङ्खेऽपि वीणायां योजयित्वा ततः पुनः ॥

न्ययुक्तःसङ्ग्रामादिगतो भेर्यादिध्वनिरवान्तरविशेष इत्यर्थः॥१०८॥ तत्रोत्तरोत्तरस्य पूर्वपूर्वस्मिन्नन्तर्भावमाह *नीचेति ॥ १०९ ॥

दुन्दुभिशब्दितशब्दत्वस्य वा घातपदलक्षितावान्तरशब्दसामान्यस्य वा ग्रहणेन विशेषशब्दो गृहीतो भवतीति श्रुतियोजना॥७॥

उक्तरीत्योत्तरवाक्यद्वयमपि योज्यमित्याह *एवमिति । तत्रापि शङ्खस्य ध्मायमानस्येति पदद्वयेन शङ्खशब्दसामान्यं लक्षयित्वा ततो निष्कृष्य तद्विशेषाणां दुर्ग्रहत्वाच्छङ्खशब्दत्वग्रहणेन तदवान्तरसामान्यग्रहणेन वा सर्वशङ्खशब्दविशेषो गृहीतो भवति, एवमुत्तरवाक्यद्वयमपि योज्यमित्यर्थः। स्थितिकाले ब्रह्मव्यतिरेकेण न जगदस्तीत्यस्यैकोदाहरणेन सिद्धेः शङ्खवीणोदाहरणं व्यर्थमित्याशङ्क्य दुन्दुभ्यादिशब्दसामान्यानामपि केवलशब्दत्वापेक्षया विशेषत्वात्तेषामपि सामान्येऽन्तर्भावं वक्तुमुदाहरणत्रयमित्याह *ततः पुनरिति। अन्यत्र शब्द-

शङ्खदुन्दुभिवीणाख्यध्वनीनन्यत्र योजयेत् ॥ ११० ॥
ध्वनित्रयं महाशब्दसामान्येऽन्तर्भवेदिति ॥
विवक्षया शङ्खभेरिवीणास्तिस्र उदीरिताः ॥ १११ ॥
यथा विशेषसामान्यतत्सामान्यपरम्पराः ॥
शब्दे स्थिताः, तथा सर्वमुपलब्धिस्थमीक्ष्यते ॥११२॥
उपलब्धोऽस्ति सन्कुम्भो लम्बोष्ठो देशकालवान् ॥
पूर्वपूर्वातिरेकेण नोत्तरार्थोऽनुभूयते ॥ ११३ ॥
एवं चिदन्वयात्सर्वं चित्यध्यस्तं तथासति ॥
चिदात्मैवास्य सर्वस्य तात्त्विकं रूपमिष्यताम्॥११४॥
स्थितिकाले यथैकात्म्यं शक्यते ज्ञातुमञ्जसा ॥
यथोक्तन्यायतस्तद्वदुत्पत्तावपि शक्यते ॥ ११५ ॥
धूमार्चिर्विस्फुलिङ्गादिविभागजननात्पुरा ॥
अग्निरेव न धूमाद्यास्तथैकात्म्यं जनेः पुरा ॥ ११६ ॥
स्वार्थसाधनयत्नादीननपेक्ष्य यथा ऽसृजत् ॥

त्वसामान्ये ॥ ११० ॥ १११ ॥ दृष्टान्तोक्तमर्थमनूद्य दार्ष्टान्तिके योजयति *यथेति । यथा शब्दत्वसामान्यव्यतिरेकेण तदवान्तरसामान्यं वा तद्विशेषा वा नानुभूयन्ते, एवं सामान्यविशेषात्मकं जगत् महासामान्यस्थानीयब्रह्मव्यतिरेकेण नानुभूयत इत्यर्थः ॥ ११२ ॥ एतदेव स्फुटयति *उपलब्ध इति ॥११३॥ फलितमाह *एवमिति ॥११४॥ स यथाऽऽर्द्रैधाग्नेरित्यादेस्तात्पर्यमाह *स्थितीति। दृष्टान्तत्रयमुक्तन्यायः ॥११५॥ अवतारितवाक्ये दृष्टान्ताक्षराणि व्याकुर्वन्दार्ष्टान्तिके योजयति *धूमार्चिरिति ॥ ११६ ॥ परस्य कारणत्वे फलेन भाव्यं, धीपूर्वकारिणो विफलप्रवृत्त्ययोगात् । न चासहायस्य यत्नादि-

धूमादीन्हुतभुक् तद्वदृगादीत्प्रत्यगीश्वरः ॥ ११७ ॥
नार्थं बुध्वा वेदसृष्टिः कालिदासादिवाक्यवत् ॥
किन्तु श्वास इवायत्नात्स्यादतो ऽपौरुषेयता ॥११८॥
मन्त्राश्चतुर्विधा ज्ञेया ऋग्वेदादिगिरोदिताः ॥

श्रुतिः-स यथा ऽऽर्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनु-

---

शून्यस्य कारणतेति साधनमपि किञ्चिद्वाच्यम्, तथाचाप्तकामत्वहानिरिति केचित्, तान्प्रति एतदेव वाक्यमुत्तरमिति तात्पर्यान्तरमाह *स्वार्थेति । तस्य ताटस्थ्यं व्यावर्तयति *प्रत्यगिति ॥ ११७ ॥ वेदस्येश्वरकृतत्वे कालिदासाद्युक्तिवदनित्यत्वमाशङ्क्य नित्यश्वसितश्रुतिं व्याकुर्वन्परिहरति *नेति ॥ ११८ ॥ ऋग्वेद इत्यादेरर्थमाह *मन्त्रा इति ।

अक्षरार्थस्तु—अत्रापि स इति दृष्टान्तार्थः । उत्पत्तावपि ब्रह्मव्यतिरेकेण जगन्नास्तीत्यत्र दृष्टान्त उच्यत इत्यर्थः । यथा ऽऽर्द्रैधाग्नेरार्द्रैरेधोभिरिद्धोऽग्निरार्द्रैधाग्निस्तस्मादभ्याहितादभितःपुरतो निक्षिप्तात्, इदं च विशेषणमग्नेर्धूमादिहेतुत्वं सर्वानुभवसिद्धमिति प्रदर्शनार्थम् । पृथक् नानाप्रकाराः, धूमशब्दोऽर्चिरादेरुपलक्षणम् । धूमादयो विनिश्चरन्ति, एवमेवारे मैत्रेयि अस्य परमात्मनः प्रकृतस्य महतोऽनवच्छिन्नस्य परमार्थस्य निश्वसितं पुरुषनिःश्वासवदप्रत्नेनैव ततो जातमेतत् । किं तत्? उच्यते यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसश्चतुर्विधं मन्त्रजातमितिहास इति ब्राह्मणमेव उर्वशीपुरूरवसोः संवादादि 'उर्वशी हाप्स-

व्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निश्वसितानि ॥ १० ॥

ब्राह्मणं चेतिहासादिरूपमष्टाविधं भवेत् ॥ ११९ ॥
प्रसिद्धेर्वैतिहसाद्या ऋग्वेदाद्युपबृंहकाः ॥
निखिलाऽपि जगत्सृष्टिः शब्दसृष्ट्योपलक्ष्यते॥१२०॥
प्रज्ञानव्यतिरेकेण यथैव स्थितिसर्गयोः ॥
वस्त्वन्तरं न सम्भाव्यं प्रलयेऽपि तथोच्यते ॥ १२१॥

श्रुतिः—स यथा सर्वासामपा ँ समुद्र एकायनमेव ँ सर्वेषा ँ स्पर्शानां त्वगेकायनमेव ँ सर्वेषां गन्धानां नासिके एकायनमेव ँ सर्वेषां रसानां जिह्वैकायनमेव ँ सर्वेषां रूपाणां चक्षुरेकायनमेव ँ सर्वेषां शब्दानां

राः' इत्यादि। पुराणम् 'असद्वा इदमग्रआसीत्' इत्यादि। विद्या देवजनविद्याद्याः नृत्यगीतादिशास्त्रमिति यावत्। उपनिषदः 'प्रियमित्येतदुपासीत' इत्याद्याः। श्लोकाः ब्राह्मणप्रभवा मन्त्राः 'तदेते श्लोकाः' इत्याद्याः। सूत्राणि वस्तुसङ्ग्रहवाक्यानि 'आत्मेत्येवोपासीत' इत्येवमाद्यानि। अनुव्याख्यानानि वस्तुसङ्ग्रहवाक्यविवरणानि, यथा विद्यासूत्रस्य चतुर्थाध्यायः। व्याख्यानानि मन्त्रविवरणानि ॥ १० ॥

एतत्सर्वमभिप्रेत्याह *ब्राह्मणं चेति। चोऽवधारणे ॥११९॥ इतिहासादिशब्दा भारतादिवाचकाः तत्रैव प्रसिद्धेः, तेषामपि व्यासादिद्वारा ईशजन्यत्वाद्वेदार्थोपबृंहकत्वाच्चेति पक्षान्तरमाह *प्रसिद्धेरिति। नामसृष्ट्याऽनुक्तसर्वसृष्टिरप्युपलक्ष्यत इत्याह—*निखिलेति ॥ १२० ॥ स यथा सर्वासामित्याद्यवतारयति *प्रज्ञानेति ॥ १२१ ॥ तत्र समुदायतात्पर्यं वक्तुम् अ-

श्रोत्रमेकायनमेवꣳसर्वेषां सङ्कल्पानां मन एकायनमेवꣳ सर्वासां विद्यानां हृदयमेकायनमेवꣳ सर्वेषां कर्मणां हस्तावेकायनमेवꣳसर्वेषां मानन्दानामुपस्थमेकायनमेवꣳ सर्वेषां विसर्गाणां पायुरेकायनमेवꣳसर्वेषां मध्वनां पादावेकायनमेवꣳ सर्वेषां वेदानां वागेकायनम्॥११॥

स्वाभाविकात्यान्तिकौ द्वौ प्रलयौ जगतस्तयोः ॥
स्वाभाविकः स्यात् कल्पान्ते बोधादात्यन्तिको मतः १२२
समुद्रखिल्यौ दृष्टान्तौ क्रमात्प्रलययोर्मतौ ॥
लीयतेऽब्धौ जलं यद्वत्तथा ब्रह्मणि तज्जगत् ॥ १२३ ॥
साक्षाद्वाऽथ प्रणाड्या वा जलमब्धौ विलीयते ॥
साक्षाद् गङ्गादिका नद्यस्तत्प्रणाड्या जलान्तरम्॥१२४॥
तथैव कारणं वस्तु साक्षाद्ब्रह्माणि लीयते ॥
कार्यं तु कारणद्वारेत्येतदत्र विवक्षितम् ॥ १२५ ॥
अतश्चरमकार्याणां स्पर्शादीनां स्वकारणे ॥
त्वगादौ विलयस्तद्वत्त्वगादेश्च स्वकारणे ॥ १२६ ॥
त्वग्ग्राह्यं स्पर्शसामान्यं त्वक्शब्देनोपलक्ष्यते ॥

यनशब्दार्थप्रलयस्य द्वैविध्यमाह *स्वाभाविक इति ॥ १२२ ॥
समुद्रखिल्याविति स यथा सर्वासामपां समुद्र एकायनं स- यथा सैंधवखिल्य इति वाक्यद्वयोक्तावित्यर्थः । एवं प्रलय- द्वैविध्यमुक्त्वा वक्तृतात्पर्यमाह *लीयत इति ॥ १२३ ॥ दृष्टान्तमुपपादयति *साक्षाद्वेति ॥ १२४ ॥ दृष्टान्तोक्तप्र- णाडीं ब्रह्मण्यप्याह *तथेत्यादिना । सर्वासामपामब्धौ साक्षाल्ल- यासम्भवेन प्रणाड्याऽपि लयस्य विवक्षितत्वादुत्तरवाक्येषु सा- मान्यद्वारा स्वकारणे लयोऽपि विवक्षित इत्यर्थः ॥१२५॥१२६॥

सामान्यात्तद्विशेषाणां जातत्वात्तत्र तल्लयः ॥१२७॥
काठिनः पार्थिवः स्पर्शः शीतोष्णौ जलवह्निजौ ॥
मृदुर्वाय्योरिति स्पर्शविशेषा इह कीर्तिताः ॥ १२८ ॥
लीयन्ते स्पर्शसामान्ये तद्विशेषा यथा तथा ॥
गन्धादीनां च सामान्ये तद्विशेषलयो भवेत् ॥१२९॥
गन्धरूपरसस्पर्शशब्दसामान्यपञ्चकम् ॥
सङ्कल्प्यते तन्मनसा बुध्या निश्चाय्यते तथा ॥१३०॥
सङ्कल्पानां तु पञ्चानां मनःशब्दाभिधे लयः ॥
भवेत्सङ्कल्पसामान्ये निश्चये योजयेत्तथा ॥ १३१ ॥
सङ्कल्पो निश्चयश्चैतौज्ञानशक्तेः समुद्गतौ ॥
ज्ञानशक्त्याख्यसामान्ये लीयेते तावुभावपि ॥ १३२ ॥

ननु त्वचः स्पर्शहेतुत्वात्कथं स्पर्शानां त्वचि लय स्तत्राह *त्वग्ग्राह्यमिति। त्वक्शब्दस्य स्पर्शत्वलक्षकत्वे उक्तदोषनिवृत्तिमाह *सामान्यादिति ॥ १२७॥ स्पर्शविशेषान्विभजते *कठिण इति॥१२८॥सर्वेषां रसानां जिह्वैकायनमित्यादिवाक्यचतुष्टयस्य जिह्वादिशब्दैः तद्ग्राह्यरसादिसामान्यं लक्षयित्वा तद्विशेषाणां सामान्यद्वारा मूलकारणे लय इति पूर्ववाक्येन समानार्थतामाह *लीयन्त इति । सर्वेषां सङ्कल्पानामित्यादि व्याचष्टे *गन्धेत्यादिना ॥ १२९ ॥ गन्धादिविषयसङ्कल्पविशेषाणां मनःशब्दवाच्ये सङ्कल्पसामान्ये लयमुक्त्वा गन्धादिविषयनिश्चयविशेषाणां हृदयशब्दवाच्ये निश्चयसामान्ये लय इत्याह *निश्चये योजयेदिति ॥ १३० ॥ १३१ ॥ श्रुतौ सङ्कल्पविद्याशब्दितमनोहृदययोरपि हेतुं दर्शयन् तयोरपि स्वकारणे लयमाह *सङ्कल्प इति ॥ १३२ ॥ एवं सर्वेषां कर्मणामित्यत्रैवंश-

ज्ञानशक्तिविकासानां ज्ञानशक्तौ यथा लयः ॥
क्रियाशक्तिविकासानां क्रियाशक्तौ तथा भवेत् ॥१३३॥
आदानत्यागभेदानां कर्मणां हस्तसञ्ज्ञके ॥
आदानत्यागसामान्ये लयोऽन्यत्राप्यसौ नयः॥१३४
विसर्गानन्दगमनभाषणानां लये सति ॥
प्राणे गत्यादिसामान्ये पञ्चकं प्रविलीयते ॥ १३५ ॥
क्रियाशक्त्याख्यसामान्ये लीयते प्राणपञ्चकम् ॥
ज्ञानशक्तिक्रियाशक्त्योर्लयो ब्रह्मणि मायिनि ॥१३६॥
विषयाणां लयः प्रोक्तो नेन्द्रियाणां श्रुताविति ॥

दार्थमाह *ज्ञानेति ॥ १३३ ॥ अवशिष्टपदानि योजयति *आदानेति । आदानं ग्रहणं, त्यागो दानम् । एवं हस्तनिर्वर्त्यकर्मविशेषाणां हस्तपदलक्षितकर्मसामान्ये लय इत्यर्थः । उक्तन्यायमानन्दादिवाक्यचतुष्टयेऽप्यतिदिशति *अन्यत्राप्यसौ नय इति । तत्राप्युपस्थादिनिर्वर्त्यक्रियाविशेषाणां उपस्थादिशब्दलक्षिततत्तत्क्रियासामान्ये लय इत्यर्थः ॥ १३४ ॥ पायूपस्थपादवाक्निर्वर्त्यक्रियाविशेषान्दर्शयन्तेषां तत्तत्क्रियासामान्ये लयानतरं क्रियासामान्यानां प्राणाधीनोत्पत्तिस्थितिकत्वात्स्वहेतौ पञ्चवृत्तिप्राणे लयमाह *विसर्गेति ॥ १३५ ॥ पञ्चवृत्तिप्राणस्यापि स्वकारणे लयमाह *क्रियेति । एवं सङ्कल्पनिश्चयविशेषाणां मनोबुद्ध्योर्लयमुक्त्वा तयोर्ज्ञानशक्तौ लय उक्तः । क्रियासामान्यानां प्राणे लयमुक्त्वा प्राणस्य क्रियाशक्तौ लय उक्तः । इदानीं तयोः शक्त्योर्लयस्थानमाह *ज्ञानेति ॥१३६॥ एवमपि न सर्वजगल्लयसिद्धिः, श्रुतौ चक्षुरादिलयस्यानुक्तत्वादिति शङ्कते *विषयाणामिति । त्वगादीनां स्पर्शादिजातीयत्वात्स्पर्शादिलयोक्त्या त्वगादिलयोऽप्युक्त एवेति श्रुतेरा-

न मन्तव्यं यतोऽक्षाणां ग्राह्यजातीयतेष्यते ॥१३७॥
एकं वाय्वाख्यसामान्यं ग्राह्यग्राहकरूपतः ॥
स्पर्शस्त्वक्चेति भिन्नं स्यादेवं सर्वत्र योज्यताम्॥१३८॥
ग्राहकग्राह्यनियम एकजातित्वसाधकः ॥
ग्राह्यग्राहकयो रूपदीपयोस्तैजसत्वतः ॥ १३९ ॥
सर्वभूतात्मकत्वात्तु सर्वार्थग्रहणं द्वयोः ॥

शय इत्याह *नेति ॥ १३७ ॥ करणानां ग्राह्यजातीयत्वमाह *एकमिति । अयमर्थः—अव्याकृतादुत्पन्नानि सूक्ष्मभूतानि शब्दस्पर्शादिगुणविशिष्टस्थूलभूतात्मना श्रोत्रत्वगात्मना च परिणमितानि श्रोत्रादिकरणानां शब्दादिविषयाणां चैकजातीयत्वमिति । अयमेव सूक्ष्मो वायुः पूर्वोक्तस्पर्शसामान्यशब्देनाप्युच्यते इत्याह *वाय्वाख्यसामान्यमिति । *एवमिति । सूक्ष्माकाशः शब्दसामान्यपदवाच्यः शब्दविशेषविशिष्टस्थूलनभोरूपेण शब्दग्राहकरूपेण च विभक्तास्तिष्ठति । एवं तेजोबन्नान्यपि योज्यानीत्यर्थः ॥ १३८ ॥ शब्दादेः श्रोत्रादेश्चैकजातीयत्वे हेत्वन्तरमाह *ग्राहकेति । अयमत्र प्रयोगः—चक्षुः तैजसं रूपादिपञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वाद्दीपवत् । घ्राणं पार्थिवं रूपादिषु गन्धस्यैवाभिव्यञ्जकत्वात् कुङ्कुमगन्धव्यञ्जकघृतवत् । रसनम् आप्यं रसादिषु रसस्यैवाभिव्यञ्जकत्वाल्लालावत् । त्वक् वायवीयं स्पर्शादिषु स्पर्शस्यैवाभिव्यञ्जकत्वाद्व्यजनवायुवत् । श्रोत्रं नाभसं रूपादिषु शब्दस्यैवाभिव्यञ्जकत्वाद्वेणुविवरवदिति सजातीययोरेव ग्राह्यग्राहकभाव इति नियमः ॥ १३९ ॥ अन्नमयं हीत्यादिश्रुत्याऽन्नमात्रकार्ययोर्मनोबुद्ध्योरपि शब्दादिग्राहित्वदृष्टेरित्याशङ्क्य

मनोबुद्ध्योरिति ज्ञेयमन्यथा तदसम्भवात् ॥ १४० ॥
मनोऽन्नमयमित्येषा श्रुतिः पार्थिवरूपताम् ॥
ब्रूते मनसि नैवान्यभूतात्मत्वं निवारयेत् ॥ १४१ ॥
विषयप्रलयेनाक्षप्रलयस्योदितत्वतः ॥
लयः सर्वस्य जगतो ब्रह्मणीत्यत्र सुस्थितम् ॥१४२॥
एवं मन्तव्य आत्माऽयमार्थासम्भवनुत्तये ॥
दुन्दुभ्याद्युक्तदृष्टान्तन्यायमार्गेण यत्नतः ॥ १४३ ॥
अपरायत्तबोधाख्यनिदिध्यासनासिद्धये ॥
आत्यन्तिकलयं वक्तुं खिल्यदृष्टान्त उच्यते ॥१४४॥

श्रुतिः—स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानु विलीयेत न हास्योद्ग्रहणायेव स्याद्यतो यतस्त्वाददीत लवणमेवैवं वा अरे इदं महद्भूतमनन्तमपारं वि-

---

तयोरपि पञ्चभूतकार्यत्वमाह *सर्वेति । विमते मनोबुद्धी भूतपञ्चकसजातीये तद्ग्राहकत्वात् यद्यद्ग्राहकं तत्तत्सजातीयं यथा रूपग्राहको दीपस्तत्सजातीय इत्यर्थः । अनुभवसिद्धहेत्वनुपपत्ति विपक्षे बाधकत्वेनाह *अन्यथेति ॥ १४० ॥ तर्ह्युक्तश्रुतेः का गतिरित्याशङ्क्य तत्र तन्मात्रकार्यताऽनुक्तेरन्नशब्दोऽनुक्तभूतोपलक्षणमित्याह *मन इति ॥ १४१ ॥ एवं तेजोमयी वागित्यत्र वाक्शब्दोपलक्षितकर्मेन्द्रियपञ्चकस्य तेजःशब्दोपलक्षितपञ्चसूक्ष्मभूतकार्यतोक्तेस्तेषामपि तत्र लय उक्तप्राय इति मत्वा श्रुत्या सर्वलयोऽप्युक्त इत्युपसंहरति *विषयेति ॥ १४२ ॥ उक्तं मननस्वरूपमनुवदंस्तत्फलमाह *एवमिति । यत्नत इत्यावृत्तिं सूचयति ॥ १४३ ॥ स यथेत्याद्यवतारयति *अपरायत्तेति ॥ १४४ ॥ तत्र सैन्धवखि-

ज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १२ ॥

वा० सामुद्रमम्भो लवणक्षेत्रे भानुविपाकतः ॥
लवणोपलतां प्राप्य सैन्धवः खिल्य उच्यते ॥१४५॥
स खिल्य उदधौ क्षिप्तस्तापशान्तौ विलीयते ॥
अशक्यः पुनरुद्धर्त्तुं खिल्यरूपेण पूर्ववत् ॥ १४६ ॥
खिल्योद्धृत्यै नीरमध्यावाददीत यतो यतः ॥
तत्र तत्र रसो लभ्यः खिल्यस्त्वेष न कुत्रचित्॥१४७॥
सामुद्रस्याम्भसस्तापात्खिल्यतैवं परात्मनः ॥
आब्रह्मस्तम्बपर्यन्तं जीवता स्यादविद्यया ॥ १४८ ॥
महद्भूतमनन्तं स्यादपारं चिद्धनं स्वतः ॥
देहेन्द्रियाख्यभूतेभ्यो जीवत्वेन समुत्थितिः ॥१४९॥
महत्वं सर्वगत्वं स्याद् भूतत्वं नित्यसिद्धता ॥
अनन्तापारशब्दाभ्यां व्याप्तिनित्यत्वसाधनम्॥१५०॥
कार्यकारणराहित्यं यदि वेहोपलक्ष्यताम् ॥

ल्यपदयोरर्थमाह *सामुद्रमिति ॥१४५॥ उदके प्रास्त उदकमेवानु विलीयत इत्यस्यार्थमाह *स खिल्य इति । न हास्योद्ग्रहणायेत्यस्यार्थमाह *अशक्य इति ॥ १४६ ॥ यतो यतस्त्वाददीत लवणमेवेत्यस्यार्थमाह *खिल्योद्धृत्या इति ॥ १४७ ॥ एवं वा अरे इत्यादेस्तात्पर्यमाह *सामुद्रस्येत्यादिना ॥ १४८ ॥ १४९ ॥ तात्पर्यमुक्त्वा पदार्थमाह *महत्वमिति ॥ १५० ॥ अनन्तापारशब्दयोर्व्यापकत्वनित्यत्वसाधकत्वमुक्त्वा वस्तुतः कार्यकारणत्वरहितं तत्त्वमाभ्यां पदा-

अनन्तत्वमकार्यत्वमपारत्वमहेतुता ॥ १५१ ॥
विज्ञानघन एवेति जात्यन्तरनिषेधनम् ॥
तदिदं वस्तुनस्तत्त्वं मायिकी या समुत्थितिः ॥१५२॥
अब्धिस्थानीयमैकात्म्यं जलस्थानं तु साक्षिचित् ॥
क्षेत्रस्थानं शरीरादि तापस्थानं तु विभ्रमः ॥१५३ ॥
खिल्यस्थानं चिदाभासयोगात्कर्तृत्वभोक्तृते ॥
द्रष्टा श्रोता द्विजो गौरो धनी गोमान्भवेत्ततः॥१५४॥
प्रत्यगात्मैव सद् ब्रह्म परोक्षमभवत्तदा ॥
ब्रह्मैव सन्नपश्चात्मा संसारित्वमवाप्तवान् ॥१५५ ॥
इत्येवं परवस्त्वेव पञ्चभूताख्यमायया ॥
जीवत्वेन समुत्थाय ततः शास्त्रेण बुध्यते ॥ १५६ ॥

भ्यां लक्ष्यते इत्यर्थान्तरमाह *कार्येति ॥१५१॥ प्रतीचो महत्वादि मोक्षदशायामेवेति शङ्कां वारयति *तदिदमिति । कथं तर्ह्येवंविधस्य सर्वजीवरूपेण समुत्थानं तत्राह *मायिकीति ॥१५२॥ सङ्क्षेपतः कथितं दार्ष्टान्तिकश्रुत्यर्थं प्रपञ्चयति* अब्धीत्यादिना। स यथा प्रदेशविशेषविशिष्टं जलमब्धिशब्दवाच्यं लवणभूमौ सिक्तं सत् आतपेन पिण्डतां गच्छति, एवं सच्चिदानन्दात्मप्रत्यक्चैतन्यं बुध्यादौ प्रतिबिम्बितं सद् भ्रमात्स्वस्मिन्कर्तृत्वादिकमारोपयतीत्यर्थः । एवं कर्तृत्वाद्यारोपेऽनेकानर्थयोगित्वमाह *द्रष्टेत्यादिना । वस्तुतः स्वरूपे परोक्षतामारोप्य स्वयं तद्विलक्षणः संसारी बभूवेत्यर्थः ॥ १५३ ॥ १५४ ॥ १५५॥ एतेभ्यो भूतेभ्यः समुत्थायेत्यत्र ब्रह्मणो जीवतापत्तौ भूतानां हेतुत्वमुक्तमयुक्तं, तेषां सादित्वेनानादिजीवताहेतुत्वायोगादित्याशङ्क्य अत्र भूतशब्देन तदुपादानाज्ञानस्य विवक्षितत्वान्मैवमित्याह *इतीति । तान्येवानु विनश्यतीत्यस्यार्थमाह *तत इति ॥ १५६ ॥ उक्त-

सर्वमात्मेति सम्यग्धीजन्मनैवाखिले भ्रमे ॥
नष्टे नश्यति जीवत्वं जले प्रक्षिप्तखिल्यवत् ॥१५७॥
क्षेत्रज्ञेश्वरभेदेन पुनः संज्ञा न विद्यते ॥
तद्धेतोस्तमसो ध्वंसात्खिल्यानुद्धरणं यथा ॥१५८॥
दृष्टिमात्रात्म्ययाथात्म्यात्कार्यकारणवस्तुनः ॥
नाज्ञातं किञ्चिदप्यस्ति नानपास्तं तथा तमः॥१५९॥
आत्यन्तिको ऽयं प्रलयः पुनर्जन्मविवर्जनात् ॥
स्वाभाविकलये शक्तिशेषादस्ति पुनर्जनिः ॥१६०॥
श्रुतिः—सा होवाच मैत्रेय्यत्रैव मा भगवानमूमुहन्न प्रेत्य सञ्ज्ञाऽस्तीति स होवाच याज्ञवल्क्यो न वा अरे

मेव व्यनक्ति *सर्वमिति ॥ १५७ ॥

तान्यविद्याशब्दितानि भूतानि यदा ब्रह्मधिया नश्यन्ति अनु अनन्तरमेव जीवत्वमपि नश्यतीति श्रुत्यर्थः ॥ १२ ॥

नष्टमपि जीवत्वं पुनरुदेष्यतीति शङ्कां न प्रेत्य संज्ञाऽस्तीति श्रुतिं व्याकुर्वन् दृष्टान्तेन प्रत्याचष्टे *क्षेत्रज्ञेति। प्रेत्य संज्ञा अयमीशो ऽयं जीव इति विशेषसञ्ज्ञा इत्यर्थः ॥१५८॥ अधिष्ठानधिया निवृत्तोऽपि रज्जुसर्पो यथा पुनरुदेति एवं जीवत्वमप्युदेष्यतीत्याशङ्क्याह *दृष्टीति। जीवत्वादिसकलप्रपञ्चस्य मूलाज्ञानकल्पितत्वेन तन्निवृत्त्या निवृत्तेर्न पुनरुद्भवः। दृष्टान्तेऽज्ञानस्यात्यन्तिकनिवृत्त्यभावात्सर्पोत्पत्तिरविरुद्धेतिभावः ॥ १५९ ॥ अज्ञानस्य निरन्वयनाशादेव मुक्तेरात्यन्तिकलयसंज्ञाऽप्युपपन्नेत्याह *आत्यन्तिक इति ॥ १६० ॥

एवं प्रबोधिता मैत्रेय्युवाच अत्रैव ब्रह्मण्येव विरुद्धधर्मवत्त्वमाचक्षाणो भगवान् माममूमुहन्मोहनं कृतवान्। कथं विरोधः?

ऽहं मोहं ब्रवीम्यलं वा अरे इदं विज्ञानाय ॥ १३ ॥
वा० विज्ञानैकघनस्यास्य सञ्ज्ञा नास्तीति यद्वचः ॥
तद्व्याहतिर्न शङ्काऽत्र तयोर्विषयभेदतः ॥ १६१ ॥
विज्ञानैकघनोक्त्याऽस्य कृत्स्नैकात्म्यं पुरोदितम् ॥
सञ्ज्ञा नास्तीति चाविद्याजन्या बुद्धिर्निषिध्यते॥१६२॥
कार्यकारणनाशेऽपि स्वतःसिद्धमनन्यमम् ॥
यद्वस्तु तदलं स्वात्मा संवित्त्यै निरपेक्षतः ॥ १६३ ॥
श्रुतिः—यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति, तदितर इतरं पश्यति, तदितर इतरꣳ शृणोति, तदितर इतरमभिवदति,तदितर इतरं मनुते, तदितर इतरं विजानाति, यत्र वा अस्य सर्वमात्मैवा ऽभूत्तत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कꣳ शृणुयात्तत्केन

इत्युच्यते । पूर्वं विज्ञानघन एवेति प्रतिज्ञाय पुनर्न प्रेत्य सञ्ज्ञाऽस्तीति वदता विरोध उक्तः, अतो मूढाऽस्मीति श्रुत्यर्थः ॥१३॥

उक्तं चोद्यमनूद्य न वाऽरे मोहं ब्रवीमीति परिहारवाक्यतात्पर्यमाह *विज्ञानेति ॥ १६१ ॥ विषयभेदमेव प्रकटयति *विज्ञानैकेति । *अविद्याजन्येति । अयं जीवः अयमीशः इत्येवंरूपा धीर्नास्तीत्यर्थः ॥ १६२ ॥ जीवादिसंज्ञा ध्वस्ता चेत्कथं वस्तुज्ञानं हेत्वभावादित्याशङ्क्य अलमित्यादेस्तात्पर्यमाह *कार्येति । स्वतःसिद्धत्वसिद्ध्यर्थमाह *अनन्यममिति । चैतन्यविषयत्वायोग्यमित्यर्थः ॥ १६३ ॥ यत्र हीत्यादेस्तात्पर्यमाह *ऐकात्म्यमिति । यत्र यस्यामवस्थायामज्ञातमैकात्म्यमस्ति तत्रैव भ्रमात्सद्वितीयमिव भवति,तत्र तस्यामवस्थायामितरो घ्राता घ्रातव्यं घ्राणेन जिघ्रतीति कर्त्रादिभेदधीः

कमभिवदेत्तत्केन कं मन्वीत तत्केन कं विजानीयाद्ये-नेदꣳ सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ॥ १४ ॥

इत्युपनिषदि चतुर्थे चतुर्थं ब्राह्मणं समाप्तम् ॥

वा० ऐकात्म्यं यदविज्ञातं तद्द्वैतमिव विभ्रमात् ॥
स्याद्यत्र तत्र पुंसोऽसौ कर्तृकर्मादिभेदधीः ॥ १६४ ॥
ननु द्वैतमिवेत्येतदुपमानं कथं भवेत् ॥
उपमेयद्वैतवस्तुराहित्यादिति चेच्छृणु ॥ १६५ ॥
रामरावणयोर्युद्धं रामरावणयोरिव ॥
इत्यादावुपमा दृष्टा स्वस्य स्वेन तथेष्यताम् ॥ १६६ ॥
यद्वा लोके चन्द्रभेदः कल्पितत्वेन सम्मतः ॥
जगद्भेदोपमाऽसौ स्यान्मिथ्यात्वं तेन सिध्यति ॥ १६७ ॥
समस्तव्यस्तरूपत्वं यो वक्तीहात्मनः श्रुतेः ॥
तत्पक्षस्य निषेधाय द्वैतमिथ्यात्ववर्णनम् ॥ १६८ ॥
ज्ञातृज्ञानज्ञेयरूपं प्रायः स्वप्ने मृषा यथा ॥
एको व्यवहरत्येवमज्ञो व्यवहरेन्मृषा ॥ १६९ ॥

भवतीत्यर्थः ॥ १६४ ॥ यत्र हि द्वैतमिवेत्यत्रेवशब्दस्योपमार्थत्वमयुक्तमिति शङ्कित्वा परिहरति *नन्वित्यादिना ॥ १६५ ॥ १६६ ॥ नात्रोपमानोपमेयविवक्षा, अनयोर्युद्धमनुपममित्येतस्मिन्नर्थे तात्पर्यादित्याशङ्क्य विधान्तरेणोपमानं समर्थयते *यद्वेति । जगद्भेदस्य जलचन्द्रभेदतुल्यत्वे फलितमाह *मिथ्यात्वमिति ॥ १६७ ॥ यत्र हीत्यादिवाक्यात्पूर्वमेव तत्त्वोपदेशसमाप्तेरस्य वाक्यस्यानुपयोगमाशङ्क्याह *समस्तेति ॥ १६८ ॥ अद्वितीयस्याप्यात्मनः स्वाविद्योत्थभ्रमान्नानात्वव्यवहारः सम्भवतीत्यत्र दृष्टान्तमाह *ज्ञातृज्ञानेति ॥ १६९ ॥ यत्र हीत्यादि-

यस्यामविद्यावस्थायां भेदभ्रान्तिस्तदा पुमान् ॥
घ्रातृघ्राणघ्रेयसंज्ञामाप्नोत्यन्यां तथा त्रिधाम् ॥ १७० ॥
अविद्यायां विनष्टायां घ्रातृघ्राणादिभेदधीः ॥
विनश्यतीत्यभिप्रेत्य संज्ञा नास्तीति वर्णितम् ॥ १७१ ॥
अभिज्ञोऽप्यज्ञवद्वेदं घ्रातृघ्राणादिलक्षणम् ॥
विजानातीति चेन्मैवं विद्यायां तदसम्भवात् ॥ १७२ ॥
यस्यां तु विद्यावस्थायामात्मैवास्य भवेज्जगत् ॥
तदा कः केन कं जिघ्रेदद्वैतपरवस्तुनि ॥ १७३ ॥
षष्ठगोचरवत्सर्वं कार्यकारणवज्जगत् ॥
ध्वस्तात्मान्ध्यस्य विदुषः सम्यग्ज्ञानोदये भवेत् ॥ १७४ ॥
ग्राहकादिविभागोऽत्र नास्ति तद्धेत्वसम्भवात् ॥
चिन्मात्रस्य स्वतःसिद्धेर्विज्ञानघनतेरिता ॥ १७५ ॥
मुक्तस्य व्यवहारस्तु भ्रान्तिवासनया कृतः ॥
भ्रान्तिनाशेऽपि संस्कारानुवृत्तिर्दृश्यते खलु ॥ १७६ ॥

वाक्यार्थमुपसंहरति *यस्यामिति । *पुमानिति । स्वप्नदृष्टवन्मृषा व्यवहरेदित्यनुषङ्गः ॥ १७० ॥ १७१ ॥ १७२ ॥ यत्र वा अस्येत्यादेरर्थमाह *यस्यान्त्विति ॥ १७३ ॥ सर्वस्य जगत आत्ममात्रत्वे तद्वदेव सत्त्वमाशङ्क्य सर्वमात्मैवेत्यादेस्तात्पर्यमुपसंहरति *षष्ठेति । निवृत्तमोहस्य षष्ठेन्द्रियवस्तुतुल्यं जगद्भवतीत्यर्थः ॥ १७४ ॥ ननु बाह्यप्रपञ्चस्यात्ममात्रतया लीनत्वेऽप्यात्मासिद्ध्यर्थं मातृत्वादेरावश्यकत्वात्तस्य विज्ञानघनत्वोक्त्याऽनुपपत्तिरत आह *ग्राहकेति ॥ १७५ ॥ ज्ञानोदयानन्तरं स्वप्रकाशात्ममात्रातिरिक्तवस्त्वस्फुरणे जीवन्मुक्तिशास्त्रविरोधः स्यात् अत आह *मुक्तस्येति ॥ स्वप्नदृष्टे गजादिसंस्कारानुवृत्तेः सर्वानुभवसिद्धत्वं द्योतयति *खल्विति ॥ १७६ ॥ कथं तर्हि न प्रे-

वासनामात्रसंज्ञा तु देहे सति न वार्यते ॥
वस्तुत्वभ्रान्तिसंज्ञैव प्रबुद्धस्यात्र कार्यते ॥ १७७ ॥
ज्ञातृज्ञानज्ञेयरूपा न संज्ञा विद्यते यथा ॥
प्रतीच्यपि तथा संज्ञा प्रबुद्धस्य न विद्यते ॥ १७८ ॥
ज्ञानोत्पत्तौ न संज्ञाऽस्तीत्यास्तां तावदिहात्मनि ॥
अपि सत्यामविद्यायां न संज्ञाऽस्त्यात्मनीदृशी॥१७९॥
ग्राहकादिजगत्सर्वं येन कूटस्थसाक्षिणा ॥
लोकः सर्वं विजानाति जानीयात्केन तं वद ॥१८०॥
बोद्‌धृत्वालोचनेनापि न संज्ञा प्रत्यगात्मनि ॥
न बोद्धा गृह्यतेऽन्येन बोधेन विषयेण वा ॥ १८१ ॥
व्यावहारिकसंज्ञाऽसौ संसारिण्यपि दुर्लभा ॥

स्य संज्ञाऽस्तीति निषेध इत्याशङ्क्य विदुषो द्वैते वस्तुत्वभ्रमो नास्तीत्येवंपरं संज्ञानिषेधवाक्यमित्याह *वासनेति ॥ १७७ ॥ उक्तमेव व्यनक्ति *ज्ञातृज्ञानेति । विदुषो यथा मात्रादिसर्वप्रपञ्चे सत्यत्वाकारधीर्नोदेत्येवं प्रतीचि भेदधीर्न भवतीत्यर्थः ॥ १७८ ॥ येनेत्यादेस्तात्पर्यमाह *ज्ञानेति । ईदृशी ग्राहकादिविभागग्राहिणीत्यर्थः ॥ १७९ ॥ कैमुतिकन्यायपरं वाक्यमित्युक्त्वा तस्मिन्नर्थे तद्योजयति *ग्राहकादीति । अविद्यावस्थायामपि सर्वसाक्षी नान्यापेक्षः किमु विद्यावस्थायामित्यर्थः ॥ १८० ॥ विज्ञातारमित्यादेरर्थमाह *बोद्‌धृत्वेति । विज्ञातृशब्दितप्रमातृस्वरूपे विचार्यमाणेऽपि तद्ग्राहकविशेषधीर्नोपलभ्यते किमु वक्तव्यं तत्साक्षिणि विशेषसञ्ज्ञा नास्तीत्यर्थः। विज्ञातुर्ग्राहकाभावं व्यतिरेकेणाह *नेति॥१८१॥ उक्तमेव विशदयति *व्यावहारिकेति । प्रमातृप्रकाशकसा-

किमु विध्वस्तनिःशेषसंसारानर्थकारणे ॥ १८२ ॥
इत्येवमपरायत्तबोधेनात्यन्तिको लयः ॥
निदिध्यासनरूपोऽत्र फलभूतः प्रकीर्तितः ॥ १८३ ॥

इति वार्तिकसारे द्वितीयाध्यायस्य चतुर्थ-ब्राह्मणं समाप्तम् ॥

पञ्चमब्राह्मणे विद्याफलं सार्वात्म्यलक्षणम् ।
अभिव्यञ्जयितुं वस्तुसर्वात्मत्वं प्रपञ्च्यते ॥ १ ॥
यो जन्मस्थितिनाशाख्यो हेतुः सार्वात्म्य ईरितः ॥
तस्यासिद्धिर्वार्यतेऽत्रेत्येवं भाष्यकृतो जगुः २ ॥
प्रतिज्ञायाथ वैकात्म्यं पूर्वमेवोपपादितम् ॥

क्षीज्ञानव्यावृत्त्यर्थं व्यावहारिकसंज्ञेत्युक्तम्, साक्षिज्ञानस्य निर्विकाररूपत्वान्न विशेषसञ्ज्ञात्वमिति भावः ॥ १८२ ॥ प्रकृतमुपसंहरति *इतीति ॥ १८३ ॥

इति टीकायां द्वितीयाध्यायस्य चतुर्थब्राह्मणं समाप्तम् ।

वृत्तेन सङ्गतिं दर्शयन्मधुब्राह्मणतात्पर्यमाह *पञ्चमेति । चतुर्थब्राह्मणे सर्वात्मत्वप्राप्तिरात्मविद्याफलमित्युक्तं तदेव विद्याविषयवस्तुनः सर्वात्मत्वप्रपञ्चनेनात्र स्पष्टीक्रियत इत्यर्थः ॥ १ ॥ एवं स्वयं सङ्गतिमुक्त्वा आचार्योक्तां सङ्गतिमाह *यो जन्मेति । भाष्यकृत इति वार्तिककृतामप्युपलक्षणम् । इदं सर्वं यदयमात्मेति प्रतिज्ञातात्मसार्वात्म्यसिद्धये दुन्दुभ्यादिदृष्टान्तैरात्मैकस्थित्युत्पत्तिलयत्वाज्जगत इति यो हेतुरुक्तः

निगमायोत्तरो ग्रन्थ इति चाहुरमी पुनः ॥ ३ ॥
फलं निगमनं वास्तु सार्वात्म्यं ब्रह्मणः स्फुटम् ॥
विभाति हेत्वसिद्धिस्तु पुंवाक्य इव नागमे ॥ ४ ॥
तथापि मन्दाः शङ्कन्त आत्मनानात्वदर्शिनः ॥
एकात्मनो जगज्जन्मेत्यादिहेतोरसिद्धताम् ॥ ५ ॥
जगदेकस्य कार्यं स्यादेकमातृजपुत्रवत् ॥
परस्परोपकारित्वादिति हेतुः समर्थ्यते ॥ ६ ॥
निदिध्यासनविध्यर्थं केचिद्ब्राह्मणमूचिरे ॥

तस्यासिद्धिशङ्कानिवारणार्थमेतद् ब्राह्मणमारभ्यत इत्यर्थः । तैरेवोक्तं सङ्गत्यन्तरमाह *प्रतिज्ञायेति । उक्तहेतुनाऽऽत्मनः सर्वात्मत्वे सिद्धे सहेतुप्रतिज्ञाया अत्र निगमनं क्रियते, तस्यापि साधनाङ्गतया वादिभिरिष्टत्वादित्यर्थः ॥ ३ ॥ कस्तर्हि सम्बन्ध आदेय इत्याशङ्क्य श्रुतिप्रतिपाद्यार्थे विमत्यभावात्सर्वे उपपन्ना एवेत्याह *फलमिति । असिद्धिशङ्काऽनेन वार्यत इति पक्षो अनुपपन्नः, वेदोक्तेऽर्थे तच्छङ्काया एवानुदयादिति शङ्कते *हेत्वसिद्धिरिति ॥ ४ ॥ श्रुत्युक्तेऽप्यर्थे मन्दमतीनां 'जगद् अनेकात्मजन्यं विचित्रकार्यत्वात्प्रासादादिवात्' इत्यादि प्रत्यनुमानाभासेनैकात्मजत्वहेयता सम्भाव्यत इति परिहरति *तथाऽपीति ॥ ५ ॥ एवं हेत्वसिद्धिशङ्कामुपपाद्यात्र ब्राह्मणे सर्वस्य मधुत्वोक्त्या सूचितमसिद्धिशङ्कावारकमनुमानमाह *जगदिति ॥ ६ ॥ भर्तृप्रपञ्चस्तु श्रोतव्यादिवाक्येन श्रवणादित्रयं विधाय श्रवणमननस्वरूपं पूर्वव्याख्यातं, निदिध्यासनं व्याख्यातुमिदं ब्राह्मणमित्याह, ताभि-

असत्तदपरायत्तबोधत्वेनास्य वर्णनात् ॥ ७ ॥
श्रुतिः—इयं पृथिवी सर्वेषां भूतानां मध्वस्यै पृथिव्यै-
सर्वाणि भूतानि मधु ॥
परस्परोपकारित्वं पृथिव्याः प्राणिनामपि ॥
यत्तन्मधुत्वं विज्ञेयमुपकारस्तु सर्जने ॥ ८ ॥
जन्तुभिः पृथिवी सृष्टा स्वकर्मफलभुक्तये ॥
पृथिव्याऽप्यात्मभोगार्थं सृष्टाः सर्वेऽपि जन्तवः ॥९॥
पार्थिवानि शरीराणि भुज्यन्ते जन्तुभिस्तथा ॥
पृथिव्याऽपि धरित्रीत्वं भुज्यते जन्तुधारणात् ॥१०॥
श्रुतिः—यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरु-
षो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषो

रस्यति *निदिध्यासनेति ॥ ७ ॥ परोक्तसम्बन्धं निरस्य इयं पृथिवीत्यादौ मधुशब्दार्थमाह *परस्परेति । मधुशब्द उपकारिशब्दपर्याय इत्युक्तं, तत्र सर्वप्राणिनां पृथिव्याश्च को वा परस्परोपकारः ? तत्राह *उपकार इति ॥ ९ ॥ परस्परसृष्टिमाह *जन्तुभिरिति । स्वस्वकर्मफलभोगाय सृष्टिरित्युक्तं. तत्रान्योऽन्यभोगसाधनत्वं दर्शयति *पार्थिवानीति । अत्र पृथिव्यादिशब्दे तत्तदभिमानिन्यो देवताः उच्यन्ते । तथाचाचेतनस्थूलशरीरप्रधाना पृथिवी प्राणिनः प्रति भोग्या, चेतनांशप्रधाना भोक्त्री । एवं प्राणिनोऽपि स्थूलशरीरप्राधान्येन तां प्रति भोग्याः, चेतनप्राधान्येन भोक्तारः । यद्यपि प्राणिनां शरीरं पाञ्चभौतिकं तथाऽपि पार्थिवांशाधिक्यात्पार्थिवानीत्युक्तम् ॥ १० ॥ यश्चायमस्यामित्यादेरर्थमाह *अस्यामिति । तेजोमय इत्यस्य व्याख्या *भास्वानिति । भास्वत्वं चा-

ऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥ १ ॥

वा० अस्यां पृथिव्यां यो भास्वानामोक्षमाविनश्वरः ॥
लिङ्गात्मा मध्वसौ सर्वभूतानां तानि तस्य च ॥ ११ ॥
अध्यात्मं यश्च शारीरो लिङ्गात्मा पार्थिवांशगः ॥
स चापि मधु सर्वेषां सर्वभूतानि तस्य च ॥ १२ ॥
साध्यात्मं साधिदैवं च साधिभूतमिदं जगत् ॥
एकैकस्यात्मनः कृत्स्नं भोग्यत्वेनावतिष्ठते ॥ १३ ॥
सर्वं सर्वस्य कार्यं स्यात्सर्वः सर्वस्य भोजकः ॥
इत्येषा मधुविद्याऽत्र वैषम्यक्लेशहारिणी ॥ १४ ॥
भूतानि भूमिर्द्वे लिङ्गे इत्युक्तं यच्चतुर्विधम् ॥
मध्वऽविद्याकृतं तस्य वस्तुतत्त्वमथोच्यते ॥ १५ ॥
अयमेव स इत्यत्र मधुरूपश्चतुर्विधः ॥

र्थप्रकाशकत्वादिति ध्येयम् । अमृतमय इत्यत्रात्यन्तिकामृतत्वशङ्कां निरस्यति *आमोक्षमिति । पुरुषशब्दस्य क्षेत्रज्ञपरत्वं व्यावर्तयति *लिङ्गात्मेति । यश्चेत्यत्र चशब्दसूचितमर्थमाह *मध्वसाविति ॥ ११ ॥ यश्चायमध्यात्ममित्यादेरर्थमाह *अध्यात्ममिति । पृथिव्याः प्राणिनां च स्थूलशरीरप्राधान्येन परस्परं भोग्यत्ववल्लिङ्गप्राधान्येनापि परस्परं भोग्यतेत्यर्थः ॥ १२ ॥ कथं चकारस्योक्तार्थसूचकत्वमित्याशङ्क्यानुभवमनुसृत्याह *साध्यात्ममिति ॥ १३ ॥ वाक्याभ्यां सिद्धमर्थमुपसंहरति *सर्वमिति । यथा मूलकारणं सर्वात्मकमेवं सर्वं वस्तु सर्वात्मकं सर्वस्य सर्वकारणत्वादतो भेदाभावादात्ममात्रं सर्वमिति मधुपर्यायाणां सर्वेषां तात्पर्यमित्यर्थः ॥ १४ ॥ वृत्तमनूद्यायमेव स इत्याद्यवतारयति *भूतानीति ॥ १५ ॥

प्रपञ्चोऽयमिति प्रोक्तः स इत्यात्मोच्यते परः ॥१६॥
अयमेव स इत्युक्त्या सामानाधिकरण्यतः ॥
प्रत्यङ्मात्रैकयाथात्म्यं प्रपञ्चस्यावबोध्यते ॥ १७ ॥
स इत्यनेन निर्दिष्टमतीतग्रन्थवर्णितः ॥
योऽयमित्यादिभिर्वाक्यैश्चतुर्भिः स्मार्यते परः ॥१८॥
आत्मा द्रष्टव्य इत्युक्तममृतं चेति वर्णितम् ॥

तात्पर्यमुक्त्वाऽक्षराणि व्याचष्टे *अयमिति । अव्यवहितपूर्ववाक्ये प्रकृतत्वात्प्रपञ्चस्यायंशब्देन परामर्शः । अतीतब्राह्मणेषु व्याकृतत्वादात्मनः सशब्देन परामर्श इति भावः ॥ १६ ॥ सामानाधिकरण्यार्थमाह *अयमेवेति ॥१७॥ योऽयमात्मेत्यादेरर्थमाह *स इत्यनेनेति ॥ १८ ॥

इयमत्र अयमित्यादिश्रुतेर्योजना—आत्मा द्रष्टव्य इत्यत्र प्रकृतो योऽयमात्मा स एवाऽयं चतुष्टयमधुभेद इत्यर्थः । *इदममृतमिति । येनाहं नामृता स्यामित्यादिना ऽमृतत्वसाधनं पृष्टवत्यै मैत्रेय्यै तत्साधनत्वेनात्मज्ञानमुपदिशता याज्ञवल्क्येनार्थाय ब्रह्मामृतमित्युक्तं तदेवेदं मधुचतुष्टयमित्यर्थः । इदं ब्रह्मेति । ब्रह्म ते ब्रवाणि व्येव त्वा ज्ञपयिष्यामीत्यध्यायादौ प्रस्तुत्य मूर्तामूर्तब्राह्मणे नेति नेतीति निर्विशेषं यद् ब्रह्मोक्तं तदेवेदं मधुचतुष्टयमित्यर्थः । *इदं सर्वमिति । यत्स्वरूपज्ञानात्सर्वं जगत्पूर्णं ब्रह्माभवदित्युक्तं तृतीये तदेवेदं मधुचतुष्टयमित्यर्थः ॥ १ ॥

एतत्सर्वमभिप्रेत्य वाक्यार्थमाह *आत्मेति द्वाभ्याम् । योऽयं स्थाणुः स पुमानित्यादिवदिदं मधुचतुष्टयं ब्रह्मैवेत्युक्ते तस्य ब्रह्मसत्तातिरिक्तसत्ता नास्तीति वाक्यार्थः पर्यवस्य-

नेति नेत्युदितं ब्रह्म तत्सर्वमभवत्त्विति ॥ १९ ॥
आत्मामृतब्रह्मसर्वशब्दैः प्राक् प्रतिपादितम् ॥
वस्त्वस्य मधुनस्तत्त्वमिति वाक्यार्थ ईरितः ॥ २० ॥
उत्तरेष्वपि वाक्येषु मधुरूपमिदं जगत् ॥
ब्रह्मापि मधुनस्तत्त्वं योजयेदुक्तवर्त्मना ॥ २१ ॥

श्रुतिः—इमा आपः सर्वेषां भूतानां मध्वासामपां सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं रैतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मे दममृतमिदं ब्रह्मेदꣳसर्वम्॥२॥

अयमग्निः सर्वेषां भूतानां मध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चामध्यात्मं वाङ्मयस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥३॥

अयं वायुः सर्वेषां भूतानां मध्वस्य वायोः सर्वाणि भूतानि मधु यश्चायमस्मिन् वायौ तेजोमयो ऽमृतमयः पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥ ४ ॥

अयमादित्यः सर्वेषां भूतानां मध्वस्यादित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयो ऽमृतमयः पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजोमयो-

---

त्तीत्यर्थः ॥ १९ ॥ २० ॥ इयं पृथिवीत्यत्रोक्तमर्थम् इमा आप इत्यादिपर्यायान्तरेष्वतिदिशति *उत्तरेष्विति ॥ २१ ॥

*अध्यात्मं रैतस इति । श्रुतौ रेतस्यपां विशेषतो-

ऽमृतमयः पुरुषो ऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥ ५ ॥

इमा दिशः सर्वेषां भूतानां मध्वसां दिशाꣳ सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳश्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषो ऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ ६ ॥

अयं श्चन्द्रः सर्वेषां भूतानां मध्वस्य चन्द्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिꣳश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानसस्तेजोयमोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥ ७ ॥

इयं विद्युत्सर्वेषांभूतानां मध्वस्यै विद्युतः सर्वाणि भूतानि मधु यश्चायमस्यां विद्युति तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम्॥८॥

ऽवस्थानमुक्तम् । श्रुत्यन्तरमपि आपो रतो भूत्वा शिश्नं प्राविशन्निति ॥ २ ॥ एवं वाङ्मय इत्यादावपि द्रष्टव्यम् । अग्निर्वाग्भूत्वेति श्रुतेः ॥ ३ ॥ *प्राण इति । वायुः प्राणो भूत्वेति श्रुतेः ॥४॥ *चाक्षुष इति । आदित्यश्चक्षुर्भूत्वेत्यादिश्रुतेः ॥५॥ *श्रोत्र इति । दिशः श्रोत्रं भूत्वेति श्रुतेः । तस्य विशेषणं प्रातिश्रुत्क इति । प्रतिश्रुत्कायां प्रतिश्रवणवेलायां विशेषतः सन्निहितो भवतीत्यर्थः ॥ ६ ॥ *मानस इति । चन्द्रमा मनो भूत्वेति श्रुतेः ॥ ७ ॥ *तैजस इति । तेजसि विशेषतः सन्निहितो भवतीति तैजसस्त्वगित्यर्थः ॥ ८ ॥

अयँस्तनयित्नुः सर्वेषां भूतानां मध्वस्य स्तनयित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिन्स्तनयित्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मँशाब्दः सौवरस्तेजोमयो ऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदँ सर्वम् ॥ ९ ॥

अयमाकाशः सर्वेषां भूतानां मध्वस्याकाशस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मँहृद्याकाशस्तेजोमयोऽमृतमयः पुरुषो ऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदँ सर्वम् ॥ १० ॥

अयं धर्मः सर्वेषां भूतानां मध्वस्य धर्मस्य सर्वाणि भूतानि मधु यश्चायमस्मिन् धर्मे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं धार्मस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदँ सर्वम् ॥ ११ ॥

इदँसत्यँसर्वेषां भूतानां मध्वस्य सत्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं सात्यस्तेजोमयो-

---

*शाब्दः सौवर इति । शब्दे भवः शाब्दः । स्वरे भवः सौवरः । स्वरविशिष्टे शब्देऽध्यात्मं स्तनयित्नुसन्निहितो भवति अस्मादेव वचनादिति ध्येयम् ॥ ९ ॥ १० ॥ *अयं धर्म इति । यद्यपि धर्मः परोक्षस्तथापि तत्कार्यपृथिव्यादेरपरोक्षत्वात्कार्यकारणयोरभेदोपचारादयमित्युक्तम् ॥ ११ ॥ अस्मिन्पर्याये यश्चायमस्मिन्धर्मे यश्चायमध्यात्मं धार्म इत्युक्तधर्म-

ऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥ १२ ॥

इदं मानुषꣳसर्वेषां भूतानां मध्वस्य मानुषस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥ १३ ॥

अयमात्मा सर्वेषां भूतानां मध्वस्यात्मनः सर्वाणि भूतानि मधु यश्चामस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥१४॥

स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानाꣳ राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणा सर्व एत आत्मानः समर्पिताः ॥ १५ ॥

वा० साधारण्यविशेषाभ्यां धर्मो भोगप्रदो द्विधा ॥
अधिदैवं तथा ऽध्यात्ममित्यत्रासौ विभज्यते ॥ २२॥
सत्यमानुषयोरेवं विभागं योजयेद् द्विधा ॥

शब्दयोरर्थभेदमाह *साधारण्येति । पृथिव्याद्यारंभको धर्मः साधारणः, शरीरारम्भको विशेष इत्यर्थः ॥ २२ ॥ उक्तन्यायमुत्तरवाक्ययोरतिदिशति *सत्येति ।

यद्यपि तृतीयाध्याये सत्यधर्मयोरभेद उक्तस्तथापि दृष्टादृष्टरूपेण भेदं विवक्षित्वा सत्यस्य पृथङ्निर्देशः । तत्र

पृथिव्याद्या मनुष्यान्ता विराडंशा उदीरिताः ॥२३॥
अयमात्मेति निर्देशो विराजोऽभिमतोंऽशिनः ॥
हिरण्यगर्भस्तत्रत्य उक्तस्तेजोमयोक्तितः ॥ २४ ॥
विराड्ढिरण्यगर्भाख्यः स्थूलसूक्ष्मशरीरगः ॥

जगदारम्भकं शरीरारम्भकं चादृष्टं धर्म इत्युक्तम्। अनुष्ठीयमानेन दृष्टेनाचाररूपेण स एव धर्मः सत्यमित्युच्यते। अत्र यश्चायमस्मिन्सत्ये इत्यत्र साधारणव्यवस्थाकारणमुच्यते। यश्चायमध्यात्मं सात्य इत्यत्रासाधारणार्थव्यवस्थाहेतुः सत्यविशेष उच्यते। इदं सत्यं सर्वेषां भूतानामित्यादौ मिलितं गृह्यते इति भेदः। इदं मानुषमिति मानुषशब्दः सर्वजात्युपलक्षणम्। मानुषजातिविशिष्टानामेव परस्परोपकार्योपकारकभावो दृष्टः। मानुषजातिरपि द्विःप्रकारा निर्देष्टुः स्वशरीरनिष्ठा जातिराध्यात्मिकी, शरीरान्तराश्रिता तु बाह्येति। तत्र यश्चायमस्मिन्निति बाह्यजातिरुच्यते, यश्चायमध्यात्ममित्याध्यात्मिकी,इदं मानुषमित्यत्र जातिसामान्यमिति विवेकः॥१२॥१३॥१४॥१५॥अयमात्मेतिपर्यायस्य तात्पर्यमाह *पृथिव्याद्या इति। इयं पृथिवीत्यारभ्य मानुषपर्यायपर्यन्तेन सन्दर्भेण विराट्शब्दाभिधेयावयविनः पृथिव्यंब्वग्न्याद्यायेंऽशा उक्तास्तदंगिन अयमात्मेत्यादिना निर्देशः क्रियत इत्यर्थः ॥ २३ ॥ यश्चायमस्मिन्नित्यादेरर्थमाह *हिरण्येति। उक्तविराडवयविनं सप्तम्यन्तात्मपदेनानूद्य तेजोमय इत्यादिशब्दैर्हिरण्यगर्भशब्दितो विराजोऽभ्यन्तरो लिङ्गात्मा उक्त इत्यर्थः। तेजोमयोक्तित इति तेजोमयादिशब्दैरित्यर्थः ॥ २४ ॥ यश्चायमात्मेत्यादेरर्थमाह *विराडिति। उपाधिप्राधान्येन विराडादिशब्दवाच्यशरीरद्व-

चिदाभासोऽत्र यश्चायमात्मेत्युक्त्याऽभिधीयते॥२५॥
अपूर्वानपरामध्यप्रत्यग्याथात्म्यवित्तये ॥
स वा इत्यादिको ग्रन्थः सदृष्टान्तोऽभिधीयते ॥२६॥
ननूक्तं मधुनस्तत्त्वमयमेव स इत्यतः ॥
वचनाद्बहुपर्यायैर्भूयोऽप्येतद् दृढीकृतम् ॥ २७ ॥
बाढमेतावता वस्तुसार्वात्म्यं स्यात्प्रपाश्चितम् ॥
तदेवाभिव्यज्यते ऽथ विदुषः फलरूपतः ॥ २८ ॥
स एव मधुतत्त्वाख्य आत्मायं तत्त्वविन्मतः ॥
आधिपत्यं च राजत्वं विदुष्यविदुषोऽधिकम् ॥ २९ ॥
अत्राधिपतिशब्देन स्वातन्त्र्यमभिधीयते ॥

यप्रतिबिम्बितं चैतन्यं जीवसंज्ञितं यश्चायमात्मेत्यत्रात्मशब्देनाभिधीयते। स स्वप्रकाशत्वात्तेजोमयः, नित्यत्वादमृतमयश्चेत्यर्थः ॥ २५ ॥ उत्तरकाण्डिकातात्पर्यमाह *अपूर्वेति ॥ २६ ॥ अत्र पुनरुक्तिं शङ्कते *नन्विति। इयं पृथिवीत्यादिना पृथिव्यादेर्मधुत्वमुक्त्वाऽयमेव स इत्यनेन वाक्येन मध्वात्मकप्रपञ्चस्य प्रत्यक्सत्तातिरेकेण स्वतःसत्ता नास्तीत्यसकृदुक्तम्। अनेनैवादिमध्यावसानशून्यं प्रत्यक्तत्त्वमिति निश्चेतुं शक्यत्वात्किंतत्प्रतिपादकोत्तरग्रन्थेनेत्यर्थः ॥ २७ ॥ ब्रह्मणः सत्त्वं निर्णीतमित्यङ्गीकरोति *बाढमिति ॥ तर्ह्युत्तरग्रन्थवैयर्थ्यं तत्राह *तदिति ॥ ब्रह्मीभूतस्य विदुषः सर्वात्मप्रदर्शनेनाप्युक्त एवार्थो दृढीक्रियत इत्यर्थः॥२८॥ स वा अयमात्मेति पदानामर्थमाह *स एवेति। तत्त्वविदः परमात्ममात्रत्वेऽपि कथं सर्वाधिपत्वं सर्वराजत्वं चेति तत्राह *आधिपत्यमिति। तथा च श्रुतौ भूतानामिति निर्धारणे षष्ठीत्यर्थः ॥ २९ ॥ आधिपत्यादिश-

स्वार्थः प्रत्यक्तदर्थत्वात्सहेतोर्जगदात्मनः ॥ ३० ॥
राजत्वं राजनाद्भास्वदविलुप्तात्मदर्शनात् ॥
ब्रह्मास्मीतिपरिज्ञानध्वस्तध्वान्तत्वकारणात् ॥ ३१ ॥
योऽसावविद्यया देही संसारीवाऽप्यभूत्पुरा ॥
स एव विद्यया ब्रह्मेत्यतोऽस्मिन्जगदर्पितम् ॥ ३२ ॥
चक्रस्यारा यथा सर्वे नाभिनेम्योः समर्पिताः ॥
सजीवा निखिला देहा ब्रह्मविद्यार्पितास्तथा ॥ ३३ ॥
ब्रह्मविखाद्वामदेवः प्रागहं मनुरीदृशम् ॥
सार्वात्म्यं प्रतिपेदे यत्तदेवात्र निरूपितम् ॥ ३४ ॥
सोपाधिर्निरुपाधिश्च द्वेधा ब्रह्मविदुच्यते ॥
सोपाधिकः स्यात्सर्वात्मा निरुपाख्योऽनुपाधिकः॥३५॥
जक्षन्क्रीडन् रतिं प्राप्त इति सोपाधिकस्य तु ॥
सार्वात्म्यात्सर्वभोगाप्तिश्छान्दोग्ये स्पष्टमीरिता ३६॥
अहमन्नं तथाऽन्नादः श्लोककार्यप्यहो अहम् ॥

ब्दार्थं वदन्नाधिक्यमेवोपपादयति *अत्रेत्यादिना ॥ ३० ॥ राजने हेतुः *भास्वदिति ॥ तत्रापि हेतुः *ब्रह्मास्मीति॥३१॥ तद्यथेत्याद्युत्तरवाक्ये विदुषः सर्वाधारत्वमुक्तमुपपादयितुं वृत्तमनुवदति *य इति। विद्यया तस्य ब्रह्मत्वे फलितमाह *अत इति ॥ ३२ ॥ उपपत्तिमुक्त्वाऽक्षराणि व्याचष्टे ।। चक्रस्येति ॥३३॥ उक्तस्य सर्वात्मभावस्य तृतीयेनैकवाक्यत्वं निर्दिशति *ब्रह्मेति ॥ ३४ ॥ सर्वात्मभावे विदुषः सप्रपञ्चत्वं स्यादित्याशङ्क्य विदुषो ब्रह्मीभूतस्य द्वैरूप्यमाह *सोपाधिरिति ।। निरुपाख्यत्वं शब्दप्रत्ययागोचरत्वम् ॥ ३५ ॥ सोपाधिकस्य सर्वात्मत्वे श्रुत्यन्तरं संवादयति *जक्षदि-

इति तत्त्वविदः सामगाने सर्वात्मता श्रुता ॥ ३७ ॥
अत्रापि चक्रदृष्टान्तात्सोपाधिस्तत्त्ववविच्छुनः ॥
अपूर्वानपराद्युत्या श्रोष्यते निरुपाधिकः ॥ ३८ ॥
भर्तृप्रपञ्च आहात्र समस्तव्यस्तसिद्धये ॥
नाभिरात्मा वपुर्नेमिररा इन्द्रियदेवताः ॥ ३९ ॥
प्रत्येकं प्राणिनां ब्रह्मचक्रमव्यक्तमस्ति हि ॥
तद्व्यक्तये निदिध्यासेत्तद्भावाविष्टधीः सदा ॥ ४० ॥

ति॥३६॥तत्रैव तैत्तिरीयकश्रुतिरपि मानमित्याह *अहमिति॥३७। अस्तु सोपाधिकस्य सर्वात्मत्वं प्रस्तुते किमायातं तत्राह *अत्रेति । तथा च सर्वेण कल्पितेन द्वैतेन कल्पितमधिष्ठानभूतं ब्रह्म प्रत्यग्भावेन पश्यन्विद्वान्सर्वोपाधिस्तत्तद्रूपेण स्थितः सर्वो भवतीति विदुषोऽविद्वद्दृष्ट्या कल्पितं सप्रपञ्चत्वं इष्टमेवेति भावः। परमार्थतस्तस्य निष्प्रपञ्चत्वे श्रुतिमाह * अपूर्वेति । उपलक्षणमेतत् । अनन्तरमपारं विज्ञानघन एव यत्र वाऽस्य सर्वमात्मैवाभून्नेति नेत्यस्थूलमनण्वित्यादयो ऽप्युदाहार्याः ॥ ३८ ॥ एकदेशिमतं दूषयितुमनुभाषते *भर्तृप्रपञ्च इति। अत्र तद्यथेत्यादिवाक्ये तस्यान्यथाव्याख्यानफलं सूचयति *समस्तेति । तद्व्याख्यानमेव दर्शयति *नाभिरिति। जीवाभिन्नः परमात्मा नाभिस्थानीयः शरीरं पञ्चभूतात्मकं चक्रनेमिस्थानीयं देवतादिजगदरवदात्मनि भूतेषु चार्पितामिति निदिध्यासेदित्युत्तरेणान्वयः ॥ ३९ ॥ किमर्थं तद्ध्यानं तत्राह *प्रत्येकमिति । ब्रह्मणः सर्वप्राणिहृदयसंनिधानं श्रुतिस्मृतिप्रसिद्धमिति हिशब्दार्थः । एवं निरन्तरं ध्यायतो ब्रह्माभिव्यक्तं भवतीत्यर्थः ॥ ४० ॥ तद-

तप्तलोहवदेकत्वं प्राप्य ध्यानादयं पुमान् ॥
अविद्यातिमिरान्धानां ध्येयत्वमुपगच्छति ॥ ४१ ॥
श्रुत्यक्षरबहिष्टत्वान्न साध्वी चक्रकल्पना ॥
उपास्यं यन्न तद् ब्रह्म तत्त्वमित्येष डिण्डिमः ॥४२॥
समाप्ता ब्रह्मविद्येयं कैवल्यावाप्तयेऽखिला ॥
यथोक्तब्रह्मविद्यायाः स्तुत्यर्थाऽऽख्यायिकोच्यते॥४३॥
दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच द्विविधं मधु ॥

भिव्यक्तौ फलमाह *तप्तेति ॥ ४१ ॥ तदेतद् दूषयति *श्रुतीति । ब्रह्मण उपास्यत्वं नेदं यदिदमुपासते इत्यादि-श्रुतिविरुद्धं चेत्याह *उपास्यमिति ॥ ४२ ॥ तद्यथेत्या-दिवाक्यं विस्तरेणोक्त्वा वृत्तं कीर्तयति *समाप्तेति । किमर्थ-स्तर्ह्युत्तरग्रन्थस्तत्राह *यथोक्तेति । *उच्यत इति । प्रवृत्त्यङ्गत्वे-नेति शेषः । प्रवर्ग्यप्रथमाध्याये हि श्रुत्या आख्यायिकोक्ता । दध्यङ्नाम ऋषिरिमां मधुविद्यामश्विभ्यां प्रार्थितो दास्यामी-त्युक्त्वा पुनस्तावब्रवीदियं विद्याऽश्विनोर्दत्ता चेत्तव शि-रश्छेत्स्यामीतीन्द्रेणोक्तोऽस्मि तद्भयादिमां विद्यां युवयोर्न ब्रवी-मीति । तौ तमूचतुरथैव तव शिरश्छित्वाऽन्यत्र निःक्षिप्या-श्वशिरः सन्धाय श्रोष्यावहे अश्वशिरसा विद्यां ब्रूहीति । त-थैव स विद्यामुवाच, तत इन्द्रस्तच्छिरश्चिच्छेद । अथाश्विनौ ऋषिशिरः पुनः संधत्तं, ततः स्वशिरसा विद्याशेषमवोचदिति । सा आख्यायिकाऽत्र विद्यास्तुत्यर्था ॥ ४३ ॥ इदं वै तन्मध्वि-त्यादेरर्थमाह *दध्यङ्ङिति ॥४४॥ श्रुताविदंशब्देन इयं पृथिवी-त्याद्यव्यवहितोक्तमधु परामृश्यते । तादिति व्यवहतं प्रवर्ग्यप्र-

प्रवर्ग्याङ्गं रविध्यानं ब्रह्मध्यानमिति द्वयम् ॥ ४४ ॥
तं वृत्तान्तमृषिः पश्यन्प्राब्रवीदश्विनौ प्रति ॥
वृत्तान्तमब्रवीदृग्भ्यामृग्भ्यां च ब्रह्मवेदनम् ॥ ४५ ॥
अश्विनौ युवयोरुग्रं लाभाय गुरुमारणम् ॥
आविष्करोमि लोकेऽस्मिन्मेघो वृष्टिर्यथा तथा॥४६॥
दध्यङ्ङाथर्वणोऽश्वस्य शिरसा युवयोर्मधु ॥
यत्प्रोवाच तदप्यत्र जानन्नाविष्करोम्यहम् ॥ ४७ ॥
छित्वा गुरोः शिरोऽन्यत्र निक्षिप्याश्वस्य यच्छिरः॥
तदाहृत्य गुरोः कण्ठे प्रतिष्ठापयतो युवाम् ॥ ४८ ॥

श्रुतिः–इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् ।

तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न

थमाध्यायमधुब्राह्मणोक्तम् । वैशब्दः स्मरणार्थः । तदेतदृषिः पश्यन्नवोचदिति अस्यार्थमाह *तमिति । श्रुतौ तदेतदिति प्रकृतं शिष्याचार्यसम्बद्धं कर्मोच्यते । तदेवात्र वृत्तान्तशब्देनाप्यभिहितम् । ऋषिर्मंत्रद्रष्टा धर्मोत्कर्षवशादनयोर्वृत्तान्तं पश्यंस्तद्वामित्यादिमन्त्रेणावोचदित्यर्थः । कियता मन्त्रेण वृत्तान्तमुक्तवांस्तत्राह *वृत्तान्तमिति । ऋग्भ्यां ऋग्द्वयेनेत्यर्थः ॥४५॥ तद्वानित्यादिमन्त्रपदानि व्याचष्टे *अश्विनाविति ॥ ४६ ॥ तस्यैवोत्तरार्धं व्याचष्टे *दध्यङ्ङिति ॥ ४७ ॥ आथर्वणायेति मन्त्रान्तरं व्याचष्टे *छित्वेत्यादिना ॥ ४८ ॥

इयमत्राक्षरयोजना–तद्वानित्यत्र तत्पदस्य दंस इत्यनेन सम्बन्धः । दंस इति कर्मणो नामधेयम् । हे नरा नराकारा अश्विनौ वां युवयोरुग्रं क्रूरं तद्दंसः गुरुमारणरूपं कर्म

ष्टृष्टिं दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाचेति ॥ १६ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच त-देतदृषिः पश्यन्नवोचत् । आथर्वणायाश्विना दधी-चेऽश्व्यꣳ शिरः प्रत्यैरयतं स वां मधु प्रवोचदृतायन् त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति ॥ १७ ॥

सनये लाभाय विद्यावाप्त्यर्थं रहसि कृतमप्याविष्कृणोमि प्रकटी-करोमि । तन्यतुः पर्जन्यः । नकार उपमार्थः । यथा पर्जन्य-नस्तयित्वादिशब्दैर्वृष्टिं प्रकाशयति तद्वदहं युवयोः क्रूरं कर्मावि-ष्कृणोमीति सम्बन्धः । दध्यङ्नामाथर्वणः ह इति निरर्थको निपातः । यं मध्वात्मज्ञानलक्षणं वामश्वशीर्ष्णा शिरसा प्रयदी-मुवाच ईमिति निरर्थको निपातः । यत्प्रोवाच तदप्याविष्कृणो-मीत्यन्वयः ॥ १६ ॥ इदं वै तन्मध्वित्यादि पूर्ववत् । हे अश्विनौ दधीचे आथर्वणाय, अथर्वणान्तरव्यावृत्त्यर्थं *दधीच इति । अश्व्यं अश्वसम्बन्धि शिरः प्रत्यैरयतं गमितवन्तौ । गुरोः शिर-श्छित्वाऽन्यत्र निक्षिप्य तत्राश्वस्य शिरो युवां स्थापितवन्ता-वित्यर्थः । स चाथर्वणो वां युवाभ्यां तद्वक्ष्यामीति प्रति-ज्ञातं मधु प्रोवाच । किमर्थमेवं जीवितसंदेहमारुह्य प्रावोचादिति तत्राह *ऋतायन् ऋतं सत्यं पालयितुमिच्छन्, जीवितादपि सत्यपरिपालनता गुरुतरेत्यस्य लिङ्गमेतत् । किं तत् मधु प्रो-वाचेति तदुच्यते । त्वाष्ट्रं त्वष्टुरादित्यस्य सम्बन्धि प्रवर्ग्य-कर्माङ्गभूतं ध्यानं यन्मधु हे दस्रौ रोगाणामुपक्षयितारौ। न केवलं त्वाष्ट्रमध्ववोचत्, अपि कक्ष्यं रहस्यं परमात्मसम्बन्धि विज्ञानं यन्मधुब्राह्मणेनोक्तं तच्च वां प्रावोचादित्यनुषङ्गः ॥ १७ ॥

सत्यप्रतिज्ञः स गुरुः सोढ्वाऽप्येतादृशीं व्यथाम् ॥
मधुद्वयमुवाचेति कथितोऽर्थ ऋचोर्द्वयोः ॥ ४९ ॥
नन्वेतयाऽऽख्यायिकया कथं विद्या स्तुता भवेत् ॥
शृण्वायासेन महता लब्धेति श्रूयते त्वसौ ॥ ५० ॥
मधुविद्यामिमामिंद्रो गोपायितुमिदं जगौ ॥
अन्यस्मै चेदिमां ब्रूयाः शिरश्छिंद्यामितीदृशम्॥५१॥
तथाऽश्वीयं शिरश्छित्वा छिन्ने तस्मिन्पुनः स्वकम् ॥
शिरः संस्थाप्य विद्याऽसौ लब्धेत्यायास ईरितः॥५२॥
प्रवर्ग्याध्याययोरेवमृग्भ्यां तात्पर्यमीरितम् ॥
उत्तराध्याययोरेवमृग्भ्यां तात्पर्यमीर्यते ॥ ५३ ॥
ऋचां चतसृणां सुत्या प्रत्येकमवतारणम् ॥
आदरायेति विज्ञेयमर्थाधिक्यं न किञ्चन ॥ ५४ ॥

श्रुतिः—इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् । पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति । स वा अयं सर्वासु पूर्षु पुरिशयो नैनेन किञ्चनानावृत्तं नैनेन किञ्चनासंवृतम् ॥ १८ ॥

मन्त्रद्वयार्थमुपसंहरति *इति कथित इति ॥ ४९ ॥ आख्यायिकायाः ब्रह्मविद्यास्तुत्यर्थत्वं प्रश्नपूर्वकमुपपादयति *नन्वित्यादिना । *ईदृशमिति । एवमतिरहस्यमिति स्वरूपत इति शेषः ॥ ५० ॥ ५१ ॥ स्तुत्यन्तरमाह *तथेति ॥ ५२ ॥ वृत्तानुवादपूर्वकमुत्तरवाक्यमवतारयति *प्रवर्ग्येति ॥ ५३ ॥ उत्तराध्याययोः तृतीयचतुर्थाध्याययोः इदं वै तन्मधु इत्यादिना पुनः पुनः कथनं किमर्थमित्याशङ्क्याह *ऋचामिति ॥ ५४ ॥ पुरश्चक्रे इत्यादिमन्त्रपदानि व्याक-

ईशो मनुष्यपश्वादिदेहांश्चक्रे पुरा ततः ॥
स पक्षी लिङ्गरूपेण भूत्वा तान्प्राविशत् पुनः ॥५५॥
योऽयं पुरुषशब्दोऽस्मिन्मन्त्रे तस्य निरुक्तितः ॥
जीवब्रह्मैक्यतात्पर्यं मन्त्रस्यास्योपवर्ण्यते ॥ ५६ ॥
पुरि शेते यतस्तस्मात्पुरुषो जीव उच्यते ॥
सर्वं पूरयतीत्येवं पुरुषो ब्रह्म भण्यते ॥ ५७ ॥
अनेन ब्रह्मणा किञ्चिद्बहिर्नानावृतं क्वचित् ॥
नास्त्यसंवृतमन्तश्च पूरणात्पुरुषस्ततः ॥ ५८ ॥
श्रुतिः—इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवा-

रोति *ईशेति ॥ ५५ ॥

द्विपदोपलक्षितानि पुरः मनुष्यपक्षिशरीराणि । चतुष्पादुपलक्षितानि पुरः प्रचुरशरीराणि चक्रे । एवं कृत्वा पुरः प्रवेशात्पूर्वं पक्षी लिङ्गरूपेण भूत्वा सूक्ष्मभागवान्भूत्वेति यावत् । पुरः शरीराणि प्राविशदित्यर्थः ॥

स वा अयमित्याद्यवतारयति *योऽयमिति। मन्त्रस्थपुरुषशब्दनिरुक्त्याऽस्य मन्त्रस्यैक्यपरत्वं श्रुत्यैव वर्ण्यत इत्यर्थः॥५६॥ तात्पर्यमुक्त्वा पदानि व्याचष्टे *पुरीति । स वा अयं पुरुषः प्रसिद्धो जीवः सर्वासु पूर्षु शरीरेषु वर्त्तमानः पुरि शेते इति व्युत्पत्त्या पुरि शयः सन्पुरुषो भवतीत्यर्थः। नन्वेतावता जीवस्य पुरुषत्वमुक्तं नतु ब्रह्मत्वं तत्राह *सर्वमिति । सर्वं पूरयतीति व्युत्पत्त्या पुरुषशब्दो ब्रह्मणि वर्तते जीवस्यापि पुरुषत्वे तदैक्यासिद्धिरित्यर्थः ॥ ५७ ॥ नैनेनेत्यादि व्याकुर्वन् ब्रह्मणः पुरुषत्वसाधकं पूर्णत्वमुपपादयति । *अनेनेति ॥ ५८ ॥ उत्तरमन्त्रं व्याचष्टे *रूपं रूपमिति। रूपं रूपं प्र-

च । तदेतदृषिः पश्यन्नवोचत् । रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शतादशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहुनि चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥ १९ ॥

इत्युपनिषदि चतुर्थाध्याये पञ्चमं ब्राह्मणं समाप्तम्॥५॥

रूपं रूपं प्रविष्टः सन्प्रतिबिम्बो भवत्ययम् ॥
तदस्य प्रतिबिम्बत्वं प्रत्यग्याथात्म्यवित्तये ॥ ५९ ॥
चैतन्यात्मादयः शब्दा व्युत्पन्नाः प्रतिबिम्बके ॥
लक्षयन्ति चिदात्मानं तेन याथात्म्यवेदनम् ॥ ६० ॥
मिथ्याभिमानैः साभासबुद्ध्यादिपरिकल्पितैः ॥
द्रष्टा श्रोताऽहमित्यादिबहुरूपो विचेष्टते ॥ ६१ ॥
सन्त्यस्य हरयोऽक्षाख्या हरणाद्विषयान्प्रति ॥

त्युपाधिवाक्यशेषं पूरयति *प्रविष्टः सन्निति। प्रतिबिम्बात्मनाऽनेकधा जलचन्द्रवद्बभूवेत्याह श्रुतिः *प्रति रूप इति । प्रतिरूपशब्दव्याख्या *प्रतिबिम्ब इति । किमर्थं प्रत्युपाधि आत्मनः प्रतिबिम्बभवनमित्याशङ्क्य तदस्येत्यादेरर्थमाह *तदस्येति। प्रतिचक्षाणायेत्यस्य व्याख्या *प्रत्यगिति ॥ ५९ ॥ प्रतिबिम्बस्य प्रत्यग्याथात्म्यधीहेतुत्वमुपपादयति *चैतन्येति ॥ ६० ॥ एकस्यानेकरूपत्वे किं कारणमित्याशङ्क्य इन्द्र इत्यादेरर्थमाह *मिथ्येति । इन्द्रः परमेश्वरो मायाभिर्मिथ्याभावैः पुरुरूपः बहुरूप ईयते चेष्टते इत्यर्थः ॥ ६१ ॥ ईशस्य पुरुषरूपत्वे निमित्तमुक्तं साधयन् युक्ता हीत्यादेरर्थमाह *स-

प्राणिभेदादनंतास्ते तैस्तु संसरतीश्वरः ॥ ६२ ॥
मन्त्रोक्ता हरयोऽध्यस्तास्तत्संख्या च प्रकल्पिता ॥
एतेषां तत्त्वमात्मैवेत्याह ब्राह्मणमादरात् ॥ ६३ ॥
निःशेषमधुकाण्डस्य तदेतादिति वाक्यतः ॥
सारः संक्षिप्यते साक्षात्करविन्यस्तबिल्ववत् ॥६४॥
अज्ञानं संशयज्ञानं मिथ्याज्ञानमिदं जगत् ॥
तदेतदित्यनूद्यात्र तत्त्वं ब्रह्मेति बोध्यते ॥ ६५ ॥
निष्कारणं तन्निष्कार्यं निश्छिद्रं बाह्यवर्जितम् ॥
पारोक्ष्यप्रतिषेधार्थमात्मा ब्रह्मेति भण्यते ॥६६ ॥
सर्वानुभव एवायं यतः सर्वानुभूस्ततः ॥
कार्त्स्न्यात्सर्वो भवेदेष चिन्मात्रत्वात्तथाऽनुभूः॥६७॥
कर्त्तव्यमेतद्विज्ञानमिति वेदानुशासनम् ॥

न्तीति । यस्य प्रतीचो हरिशब्दितानीन्द्रियाणि युक्तानि प्रज्ञानसम्बन्धयुक्तानीत्यर्थः ॥ ६२ ॥ अयं वै हरय इत्यादेरर्थमाह *मन्त्रोक्त इति । हरयस्तत्संख्या यमेवैति तेषामात्ममात्रत्वोक्त्या वस्तुतस्तदभाव उक्त इति भावः । तदेतादित्याद्यवतारयति *एतेषामिति ॥ ६३ ॥ तस्य तात्पर्यमाह *निःशेषेति ॥ ६४ ॥ तदक्षराणि व्याचष्टे *अज्ञानमिति । अज्ञानादिभेदेन त्रिविधं जगद्ब्रह्मेति सामानाधिकरण्याद्यः स्थाणुः स पुमानितिवद्ब्रह्मव्यतिरेकेण वस्तुतो जगन्नास्तीति ब्रह्मण एकरसत्वं द्योतयत इत्यर्थः ॥ ६५ ॥ अपूर्वमित्यादिपदानि क्रमेण व्याचष्टे *निष्कारणमिति । वस्तुतः कारणं न भवतीत्यर्थः ॥६६॥ सर्वानुभूरित्यस्यार्थमाह *सर्व इति । कथं परस्य सर्वत्वमनुभवत्वं च तत्राह *कार्त्स्न्यादिति ॥ ६७ ॥ इत्यनुशासनमित्यस्यार्थमाह *कर्तव्यमिति । ऐक्यज्ञानं श्रवणा-

अस्यातिलङ्घने दोषः संसारानर्थसङ्गतिः ॥ ६८ ॥
कुर्वतस्तु महान्लाभः स्वात्मनः कृतकृत्यता ॥
मधुकाण्डर्षिसर्वस्वमित्थं श्रुत्योपसंहृतम् ॥ ६९ ॥

इति वार्तिकसारे द्वितीयाध्यायस्य
पञ्चमं ब्राह्मणं समाप्तम् ॥

श्रुतिः-अथ वꣳशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥

अग्निवेश्यादाग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्चानिभिम्लात आनभिम्लातादानाभिम्लातो आनभिम्लातादानाभिम्लातो गौतमाद्गौतमः सैतवप्राचिनयोग्याभ्याꣳसैतवप्राचीनयोग्यौ पाराशर्यात्पाराशर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजः पाराशर्यात्पाराशर्यो बैजवापायनाद्बैजवापायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥

घृतकौशिकाद् घृतकौशिकः पाराशर्यायणात्पराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जा-

---

दिद्वारा सम्पाद्यमिति वेदाज्ञातिलङ्घनपालनयोर्गुणदोषौ प्रवृत्त्यङ्गत्वेनाह *अस्येति ॥ ६८ ॥ ६९ ॥

इति वार्तिकसारटीकायां द्वितीयाध्यायस्य
पञ्चमं ब्राह्मणं समाप्तम् ॥

तूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणः स्त्रैवणेः स्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजा-द्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौत-मो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्यात् शाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमार-हारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौ-ण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्स-नपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरो ऽयास्या-दाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभू-तिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्वि-भ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वँसनान्मृत्युप्राध्वंसनः प्र-ध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचि-त्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्व-यम्भु ब्रह्मणे नमः ॥ ३ ॥

इत्युपनिषदि चतुर्थाध्याये षष्ठं ब्राह्मणं समाप्तम् ।

वंशब्राह्मणतात्पर्यमाह *उच्यते इति ॥१॥ ब्रह्मज्ञानस्य पुरु-षबुध्युत्प्रेक्षितत्वशंकानिवृत्त्यर्थं ब्राह्मणमित्यर्थान्तरमाह *पुं-बुद्धिरिति । अत्र प्रथमान्तः शिष्यः पञ्चम्यन्तो गुरुरिति मन्त-व्यम् । कथमुक्तशङ्कानिवृत्तिस्तत्राह *ब्रह्मेति ॥ तथा चापौरु-षेयत्वेन निर्दुष्टवेदस्येश्वरप्रसादात्प्रजापतौ स्वयमेवाविर्भूतत्वा-त्तन्मूलत्वेनाविद्यायोनात्क्तं शङ्कावकाश इत्यर्थः ॥ २ ॥

उच्यते मधुकाण्डार्थविद्यागुरुपरम्परा ॥
स्तुत्यर्थं ब्रह्मविद्यायाः स्तुत्या च स्यात्प्ररोचना ॥१॥
पुंबुद्धिकल्पनाशंकानुत्यर्थमथवोच्यते ॥
ब्रह्म स्वयंभ्विति प्रोक्ता वेदस्यापौरुषेयता ॥ २ ॥
यस्मादपरतंत्रोऽयं वेदात्मा ब्रह्मशब्दितः ॥
मनोवाक्कर्मभिस्तस्माद्भक्त्या तस्मै नमो नमः ॥ ३ ॥
नमोन्तत्वेन लिङ्गेन जप्योऽयं वंश इष्यते ॥
विद्याप्रकरणे पाठाद्विद्याहेतुर्जपो मतः ॥ ४ ॥
शतानि पञ्चश्लोकानां ततो द्वानवतिस्तथा ॥
चतुर्थाध्यायसारस्य तावद्भिः संग्रहः कृतः ॥ ५ ॥
॥ ५९२ ॥

इति वार्तिकसारे द्वितीयाध्याये षष्ठब्राह्मणं समाप्तम् ।

हेतुकथनपूर्वकं त्रिविधं प्रह्वीभावं नमःशब्दार्थं दर्शयन्ब्रह्मणे नम इत्यस्यार्थमाह *यस्मादिति ॥ ३ ॥ ब्राह्मणस्यार्थान्तरमाह *नम इति । किमेतज्जपेन ? तत्राह *विद्याप्रकरणेति ॥ ४ ॥ ५ ॥

यत्पादाब्जस्मृतेर्मूढोऽप्यल्पायासात्कृती भवेत् ॥
स्वानन्दतुष्टस्तं राममानन्दघनमाश्रये ॥ १ ॥

इति वार्तिकसारटीकायां द्वितीयाध्यायस्य षष्ठं ब्राह्मणं समाप्तम् ।
द्वितीयोऽध्यायः समाप्तः ॥

शुभम्भवतु ॐ ॥

वा०-समाप्तो मधुकांडोऽयमुपदेशप्रधानकः ॥
उपपत्तिप्रधानोऽथ याज्ञवल्क्याख्य उच्यते ॥ १ ॥
पदार्थविषया युक्तिर्वाक्यार्थे उपदेशगीः ॥
अतो न पुनरुक्तत्वं काण्डयोः शेषशेषिणोः ॥ २ ॥
काण्डोऽयं याज्ञवल्क्याख्यः स्यादध्यायद्वयात्मकः ॥
जल्पवादकथाभेदादध्यायार्थौ व्यवस्थितौ ॥ ३ ॥
तत्र जल्पकथारूपिण्यध्याये पंचमे नव ॥
ब्राह्मणान्यथ एतेषां क्रमेणेहोपवर्ण्यते ॥ ४ ॥
आद्ये मृत्योरतिक्रांतिर्द्वितीये मृत्युनिर्णयः ॥
तृतीये संसृतिव्याप्तिस्तुर्ये प्रत्यग्विनिर्णयः ॥ ५
पञ्चमे ब्रह्मता तस्य षष्ठे तु ब्रह्मकार्यगीः ॥

वृत्तानुद्रवणपूर्वकं सङ्गतिं दर्शयन्मुनिकांडस्य पौनरुक्त्यं परिहरति *समाप्त इति ॥ मधुकांडे दुन्दुभ्यादिदृष्टांतैरुपपत्तिरप्युक्ता, याज्ञवल्क्यकांडेऽप्ययमात्मा ब्रह्मेत्युपदिश्यते इत्युभयत्र प्रधानपदम् । उपपत्तिप्रधानत्वादेवास्यानन्तर्यत्वमुपपद्यत इत्याह *अथेति । प्रमाणोक्त्यनन्तरभाविनी हि तदनुग्राहकतर्कोक्तिरिति भावः ॥१॥ आगमस्य युक्त्यपेक्षत्वेऽनपेक्षत्वलक्षणप्रामाण्यक्षतिरित्याशङ्क्य तयोर्विषयभेदान्मैवमित्याह *पदार्थेति। उत्तरकाण्डस्य पूर्वकाण्डशेषत्वादपुनरुक्ततेत्युपसंहरति *अत इति । उभयत्रागमयुक्त्योः प्राधान्यमतःशब्दार्थः ॥ २ ॥ सप्तमाष्टमयोरपि मुनिकाण्डत्वसंज्ञाभ्रमं निरस्यति *काण्ड इति । *जल्पेति । जयपराजयप्रधाना विजिगीषुकथा जल्पः । तत्त्वबुभुत्सोस्तत्त्वनिर्णयप्रधाना कथा वादः इति तयोर्भेदः ॥ ३ ॥ पञ्चमाध्यायब्राह्मणसंख्यां दर्शयन्प्रतिज्ञापूर्वकं शिष्यबुद्धिसौक-

सप्तमे कारणावस्था ब्रह्मतत्त्वमथाष्टमे ॥ ६ ॥
नवमे देवविस्तारः संक्षेपद्वारतः पुनः ॥
सगुणं निर्गुणं चोक्तं ब्रह्म सर्वाधिकारिणाम् ॥ ७ ॥
दानं तत्त्वज्ञसंयोगस्तत्संवाद इति त्रयम् ॥
विद्याप्राप्तेरुपायोऽयमित्याख्यानेन सूच्यते ॥ ८ ॥
उद्गीथप्रमुखा येऽर्था मधुकाण्डे पुरोदिताः ॥
तद्विशेषा विचार्यन्ते तस्मात्तैरेकवाक्यता ॥ ९ ॥

श्रु०–जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुस्तस्य

र्याय तदर्थान्संगृह्णाति *तत्रेत्यादिना ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ यथोक्तरीत्या काण्डारम्भेऽपि किमित्याख्यायिका प्रणीयते? तत्राह *दानमिति ॥ ८ ॥ एवमाख्यायिकातात्पर्यमुक्त्वा प्रथमब्राह्मणस्य सङ्गतिमाह *उद्गीथेति । उद्गीथब्राह्मणोक्तवागादिस्वरूपनिर्णयार्थत्वादस्य ब्राह्मणस्यात्रत्यदर्शनस्य तत्रत्योपास्तिशेषत्वात्तैरेकवाक्यत्वमित्यर्थः ॥ ९ ॥

जनको ह इत्यादिश्रुतेरयमर्थः–जनको ह नामा राजा विदेहेषु भवो वैदेहः स च बहुदाक्षिणेनाश्वमेधेन ईजे अयजत । तस्मिन्यज्ञे निमन्त्रिता अभिसमेताः दर्शनकामाश्च कुरुदेशानां पांचालानां च ब्राह्मणाः सङ्गता बभूवुः । तत्र विद्वत्समाजं दृष्ट्वा तस्य विशेषेण ज्ञातुमिच्छा बभूव । जिज्ञासाप्रकारं दर्शयति–तेषां मध्ये कः स्विदनूचानतमः अतिशयेनानुवचनसमर्थ इति । तद्विज्ञानोपायार्थं गवां सहस्रमवरुरोध गोष्ठे ऽवरोधं कारयामास । ता एव गा विशिनष्टि । पलचतुर्थांशः पादः सुवर्णस्य दश दश पादा एकैकस्याः गोरेकैकस्मिन्शृङ्गे पञ्च पञ्च पादा आबद्धा ब-

ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कः स्विदेषां ब्राह्मणानामनूचानतम इति। स ह गवां सहस्रमवरुरोध दश दश पादा एकैकस्याः शृंगयोराबद्धा बभूवुः ॥ १ ॥

तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति। ते ह ब्राह्मणा न दधृषुरथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः सोम्योदज सामश्रवा ३ इति ता होदाचकार ते ह ब्राह्मणाश्चुक्रुधुः कथं नो ब्रह्मिष्ठो ब्रुवीतेति ॥

भूवुः ॥ १॥ एवं गा अवरुध्य तानुवाच, हे भगवन्तः! इत्यामन्त्र्य सर्वे यूयं ब्राह्मणाः वेदाध्ययनसम्पन्नास्तदर्थनिष्ठाश्च वः युष्माकं मध्ये यो ब्रह्मिष्ठः अतिशयेन वेदार्थनिष्ठः स एता गा उदजतादुद्गमयत्विति। एवमुक्तास्ते ब्राह्मणाः ब्रह्मिष्ठत्वमात्मनः प्रतिज्ञातुं न दधृषुर्न प्रगल्भाः संवृताः। अथाप्रगल्भेषु तेषु सत्सु याज्ञवल्क्यः स्वीयं शिष्यमुवाच। हे सोम्य सामश्रवाः! सामविधिं शृणोतीति सामश्रवाः एता गा उदज उद्गमयास्मद्गृहानिति। अत्र सामश्रवेत्यनेन याज्ञवल्क्यश्चतुर्वेदीति गम्यते, यजुर्वेदिनो मुनेः सकाशात्सामविधिश्रवणे ऋक्ष्वध्यारूढं हि साम गीयते अथर्ववेदस्त्रिष्वन्तर्भवतीति। ता गा उदाचकार उद्गमयामासाचार्यगृहं प्रति। ते ह ब्राह्मणाः चुक्रुधुः क्रुद्धवन्तः। तेषामभिप्रायमाह। नोऽस्माकं मध्ये कथमयं ब्रह्मिष्ठोऽस्मीति ब्रवीति, ब्रह्मिष्ठपणस्वीकारात्तथोक्तमिति भावः। अथ क्रोधानन्तरं जनकस्य यजमानस्य होता ऋत्विग् आश्वलोनाम बभूव स एनं याज्ञवल्क्यं राजाश्रयात्धृष्टः पप्रच्छ, हे याज्ञवल्क्य! त्वं नु खलु नो ब्रह्मिष्ठोऽसीति। प्लुतिर्भर्त्स-

अथ ह जनकस्य वैदेहस्य होताऽऽश्वलो बभूव सहैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी ३ इति । स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयं स्म इति तं ह तत एव प्रष्टुं दध्रे होताऽऽश्वलः ॥ २ ॥

याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्युनाऽऽप्तं सर्वं मृत्युनाऽभिपन्नं केन यजमानो मृत्योराप्तिमतिमुच्यत इति ।

वा०–आसुरासंगमृत्युघ्नं प्राणध्यानं पुरोदितम् ॥
मृत्युघ्नमेवं वागादेर्ध्यानं सोऽपृच्छदाश्वलः ॥ १० ॥

नार्था । याज्ञवल्क्य उवाच नमस्कुर्मो वयं ब्रह्मिष्ठाय इदानीं तु गोकामा स्म वयमिति । अनेनानौद्धत्यं ब्रह्मविदो लिङ्गमिति सूचितम् । तत एव ब्रह्मवित्पणस्वीकरणादेव तं ब्रह्मिष्ठप्रतिज्ञं सन्तं प्रष्टुं दध्रे होताऽऽश्वलः ॥ २ ॥ तत्र प्रथमं मुनेराभिमुख्यमापादयितुं संबोधयति *याज्ञवल्क्येति । यदिदं कर्मणः साधनजातं मन्त्रर्त्विगादि सर्वं मृत्युना व्याप्तं, न केवलं व्याप्तमभिपन्नं च मृत्युना वशीकृतं च, तस्य कर्मणः साधनस्य कर्त्ता यजमानः केन साधनेन मृत्योराप्तिं मृत्युगोचरत्वमतिक्रम्य मुच्यते मृत्योरवश्यो भवतीत्यर्थः ।

ननु मुख्यप्राणध्यानं मृत्योरत्ययसाधनमित्युद्गीथब्राह्मण एवोक्तत्वादत्र केनेति प्रश्नानुपपत्तिरित्याशङ्क्य तद्विशेषा विचार्यन्ते इत्युक्तमेव व्यक्तीकुर्वन्नाह *आसुरेति । उद्गीथप्रकरणे प्राणध्यानं मृत्युघ्नमित्युक्तं वागादेः परिच्छेदलक्षणमृत्युघ्नमग्न्याद्यात्मत्वध्यानमुपसर्जनत्वेन तत्र वक्तव्यमपि नोक्तमतस्तदर्थोऽयं प्रश्न इत्यर्थः ॥ १० ॥ सर्वं मृत्युनाऽऽप्तमित्यत्र

अध्यात्ममाधिभूतं च यजमानर्त्विगादिषु ॥
स्वाभाविकः परिच्छेदो मृत्युर्मर्त्यफलार्जनात् ॥ ११ ॥
कालोऽपि मृत्युः कर्त्रादिमारणात्स्यात्स च द्विधा ॥
सौरोऽहो रात्रिरूपेण चांद्रः पक्षादिरूपतः ॥ १२ ॥
जेतुं मृत्युत्रयं ब्रह्मलोकं प्राप्तुं च साधनम् ॥
प्रश्नैश्चतुर्भिः पप्रच्छ देवध्यानं तदुत्तरम् ॥ १३ ॥
यजमानस्य वागादीन्होत्रादींश्चाधिदैविके ॥
अग्न्यादावेकतां ध्यात्वा मुच्यते चातिमुच्यते ॥ १४ ॥
मुक्तिस्त्यक्त्वाऽऽसुरं भावं देवभावस्य चिन्तनम् ॥
ब्रह्मलोकोऽतिमुक्तिः स्यान्न कैवल्यमुपासनात् ॥१५॥
आधिदैविकरूपेण धीरध्यात्माधिभूतयोः ॥
ऊह्या, सर्वत्र तेनोक्ता प्राणविद्याऽभिपूर्यते ॥ १६ ॥

मृत्युशब्दार्थमाह *अध्यात्ममिति ॥ ११ ॥ अर्थक्रमानुरोधेन केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इत्याद्युत्तरप्रश्नत्रयस्यापि तात्पर्यं वक्तुमहोरात्राद्यात्मककालातिक्रमेणोपायप्रश्नोऽनुपपन्नः, कालस्य पूर्वोक्तलक्षणमृत्युत्वाभावादित्याशङ्क्य कालस्यापि मृत्युत्वं साधयति *काल इति । तथापि कालविषयं प्रश्नद्वयं व्यर्थमित्याशङ्क्य कालद्वैविध्यं दर्शयति *स चेति॥१२॥ एवं कालस्य मृत्युत्वं द्वैविध्यं चोक्त्वा केनेत्यादिप्रश्नचतुष्टयस्य तात्पर्यमाह *जेतुमिति । होत्रर्त्विजेत्यादिप्रतिवचनतात्पर्यमाह *देवेति ॥१३॥ ध्यानप्रकारमेवाह *यजमानस्येति । सा मुक्तिः साऽतिमुक्तिरित्येतद्व्याचष्टे *मुच्यत इति ॥१४॥ तदेव स्पष्टयति *मुक्तिरिति । अतिमुक्तिशब्दस्य मोक्षवाचित्वं किं न स्यात्तत्राह *नेति ॥ १५ ॥ उक्तन्यायमुत्तरवाक्येष्वतिदिशति*अधिदैविकेति । फलितमाह *तेनेति । उद्गीथब्राह्मण इति शेषः ॥१६॥

श्रुतिः—होत्रर्त्विजाऽग्निना वाचा, वाग्वै यज्ञस्य होता तद्येयं वाक् सोऽयमग्निः स होता स मुक्तिः साऽतिमुक्तिः ॥ ३ ॥

याज्ञवल्क्येति होवाच यदिदं सर्वमहोरात्राभ्यामाप्तं सर्वमहोरात्राभ्यामभिपन्नं केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इत्यध्वर्युणर्त्विजा चक्षुषाऽऽदित्येन, चक्षुर्वै यज्ञस्याध्वर्युस्तद्यदिदं चक्षुः सोऽसावादित्यः सोऽध्वर्युः स मुक्तिः साऽतिमुक्तिः ॥ ४ ॥

याज्ञवल्क्येति होवाच यदिदं सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तं सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत इत्युद्गात्रर्त्विजा वायुना प्राणेन, प्राणो वै यज्ञस्योद्गाता तद्योऽयं प्राणः स वायुः स उद्गाता स मुक्तिः साऽतिमुक्तिः ॥ ५ ॥

अक्षरार्थस्तु—एवं पृष्टो याज्ञवल्क्य आह *होत्रर्त्विजाऽग्निना वाचेति । एतस्यार्थं श्रुतिरेवाह *वाग्वा इत्यादिना । अत्र यज्ञशब्दो यजमानवचनः, यज्ञो वै यजमान इति श्रुतेः । यज्ञस्य या वाक्सैव होता यदेतद्यज्ञस्य साधनद्वयमध्यात्मं वाक् अधियज्ञं होता ऋत्विगेतत्साधनद्वयमधिदैवतरूपेणाग्न्यात्मनोपास्यमानं यजमानस्य मृत्युरतिमुक्तये भवतीत्यर्थः । एवं चक्षुरध्वर्युश्चादित्यात्मना द्रष्टव्यः । उद्गाता प्राणश्च वाय्वात्मना । एवं परिच्छेदलक्षणस्य सौरचान्द्रकलालक्षणस्य च मृत्योरत्ययोपाये कथिते परलोकप्राप्तिसाधनं प्रष्टुमुपक्रमते—यदिदं प्रसिद्धम् अन्तरिक्षमानारम्बणमनालम्बनम् इवशब्दादस्त्येव तत्रालम्बनं तं

याज्ञवल्क्येति होवाच यदिदमन्तरिक्षमनारम्बणमिवाथ केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति ब्रह्मणर्त्विजा मनसा चन्द्रेण, मनो वै यज्ञस्य ब्रह्मा तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा स मुक्तिः साऽतिमुक्तिरित्यतिमोक्षः, अथ सम्पदः ॥ ६ ॥

वा०–अथ सम्पद उच्यन्ते स्वल्पे कर्मणि कर्मणः ॥
महतश्चिन्तनं सम्पत्तया प्राप्यं महाफलम् ॥१७॥
एवं सत्यश्वमेधादेः पाठो विप्रैः कृतोऽर्थवान् ॥

त्सर्वनाम्ना केनेति पृच्छति, आलम्बनं विना फलप्राप्तेरसम्भवात् । केनाक्रमणेनावष्टम्भेन यजमानः कर्मफलं प्रतिपद्यमानोऽतिमुच्यत इत्यर्थः । ब्रह्मणेत्यादि पूर्ववत् । ब्रह्माणमृत्विजं मनश्चंद्रात्मना ध्यायंश्चन्द्रं मनसाऽऽलम्बनेन स्वर्गलोकं प्राप्नोति अतिमुच्यत इति भावः । उक्तन्यायेनानुक्तत्वगादयोऽपि वाय्वाद्यात्मना ध्यातव्या इत्यभिप्रेत्योपसंहरति श्रुतिः *इत्यतिमोक्ष इति ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

अथ सम्पद इत्यत्रापेक्षितं पूरयन्सम्पत्पदार्थमाह *अथेति । दर्शनभेदकथनानन्तरमित्यर्थः । महतोऽश्वमेधादेः कर्मत्वादिकिञ्चित्सादृश्यात्स्वल्पेऽग्निहोत्रादौ सम्पत्तिः सम्पद् यथाशक्त्याऽग्निहोत्रादिनिर्वर्तनेनाश्वमेधादि निर्वर्त्यते मयेति ध्यानं सम्पदित्यर्थः ॥ १७ ॥ अश्वमेधादिफलमप्युक्तध्यानेन लभ्यते इत्यत्र मानमाह *एवमिति । विहिताध्ययनस्यार्थज्ञानानुष्ठानादिपरम्परया फलवत्त्वमिष्टम् । नचाश्वमेधादौ विप्राणामधिकारोऽतस्तेषामध्ययनार्थवत्त्वानुपपत्त्या सम्पदादिफलसिद्धिरेष्टव्येत्यर्थः । ननु महतो फलस्य कथमल्पीयस्या सम्पदाऽऽप्तिस्तत्राह ।

न शास्त्रस्य ह्युपालम्भः सम्पदैवास्तु तत्फलम् ॥ १८॥

श्रुतिः–याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होताऽस्मिन् यज्ञे करिष्यतीति तिसृभिरिति कतमास्तास्तिस्र इति पुरोऽनुवाक्या च याज्या च शस्यैव तृतीया किं ताभिर्जयतीति यत्किञ्चेदं प्राणभृदिति॥७॥

वा०–होतृप्रयुक्तऋग्जातित्रये सम्पादयन्नमून् ॥
लोकांस्त्रैलोक्यमाप्नोति समत्वात्त्रित्वसंख्यया ॥१९॥
समिन्मांसादिमुख्यानामुज्ज्वलत्वादिसाम्यतः ॥

---

*न शास्त्रस्येति । नास्तित्वचनस्यातिभार इति भावः ॥ १८ ॥

कतिभिर्ऋग्भिरित्यादिश्रुतेरयमर्थः–कतिभिर्ऋग्भिः कतिसंख्याभिः ऋग्जातिभिरद्यास्मिन्यज्ञे होता ऋत्विक्करिष्यति शस्त्रं शंसतीत्यर्थः । मुनिराह *तिसृभिरिति । आहेतरः *कतमास्तास्तिस्र इति । संख्येयविषयोऽयं प्रश्नः कतिभिरित्यादिः, पूर्वप्रश्नस्तु संख्याविषयः । मुनिराह *पुरोऽनुवाक्येत्यादिना । तत्र प्राग्यागकालाद् याः प्रयुज्यन्ते ऋचः सा ऋग्जातिः पुरोऽनुवाक्येत्युच्यते । यागार्थं याः प्रयुज्यन्ते ऋचः सा ऋग्जातिर्याज्या । शस्त्रार्थं याः प्रयुज्यन्ते सा शस्या । याः काश्चन ऋचः स्तोत्रिया अन्या वा एतास्वेवतिसृषु ऋग्जातिष्वंतर्भवंति । किं ताभिर्जयतीति प्रश्नः यत्किञ्चेदं प्राणभृदित्युत्तरम्॥७॥ननु संपदुच्यत इति प्रतिज्ञातमत्र कस्यापि कुत्र चित्संपादनं न प्रतीयत इत्याशङ्क्य कण्डिकातात्पर्यमाह *होतृप्रयुक्तेति । त्रिलोक्यन्तर्भूतप्राणभृच्छब्दोपलक्षितलोकत्रयात्मना ऋग्जातित्रयं ध्यायन् त्रिलोकीं जयतीत्यर्थः । त्रिलोक्यां ऋक्त्रयः सम्पादने निमित्तमाह *समत्वादिति॥१९॥उत्तरकण्डिकातात्पर्यमाह *समिदिति ।

देवलोकादिसम्पत्त्या देवलोकादिमाप्नुयात् ॥ २० ॥

श्रुतिः–याज्ञवल्क्येति होवाच कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति तिस्र इति कतमास्तास्तिस्र इति या हुता उज्ज्वलन्ति, या हुता अतिनेदन्ते, या हुता अधिशेरते, किं ताभिर्जयतीति या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत इव हि देवलोको, या हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयत्यतीव हि पितृलोको, या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयत्यध इव हि मनुष्यलोकः ॥८॥

श्रुतौ कत्याहुतीरिति कत्याहुतिप्रकारा इत्यर्थः । शेषं पूर्ववत् । या हुताः समिदाद्याहुतयः उज्ज्वलंति, या हुता मांसाद्याः अतिनेदंति अतीव शब्दं कुर्वन्ति, या हुताः क्षीरादयः अधिशेरते अधोगत्वा भूमिमधिशेरते । किं ताभिराहुतीभिर्जयतीति या हुता उज्ज्वलंति ताभिर्देवलोकमेव जयति । तत्र हेतुः *दीप्यत इति ॥ उज्ज्वलत्वसामान्येन देवलोकः मया निर्वर्त्यत इति समिदाद्याहुतीर्देवलोकत्वेन ध्यायन् तमेवाप्नोतीत्यर्थः । मांसाद्याहुतीनां पितृलोकजयहेतुत्वे हेतुमाह श्रुतिः *अतीव हि पितृलोक इति । अयमर्थः–पितृलोकसंबद्धानां हि संयमिनीपुरे यमेन पीड्यमानानां हा हतोऽस्मि मुंच मुंचेति शब्दो भवति । मांसाद्याहुतयोऽपि कुत्सितं शब्दं कुर्वंति तेन शब्दसामान्यान्मांसाद्याहुतिः पितृलोकत्वेन ध्यायंस्तज्जयतीत्यर्थः । पय आद्याहुतेः मनुष्यलोकजयहेतुत्वे निमित्तमाह श्रुतिः *अध इव हीति । मनुष्यलोकस्य पापप्रचुरस्याधोगमनं प्रसिद्धम् । अस्ति हि पयआद्याहुतीनामधस्ताद्गमनं, तेन सामान्येन क्षीराद्या-

याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीत्येकयेति कतमा सैकेति मन एवेत्यनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति ॥ ९ ॥

वा०—ब्रह्मणो मनसो वृत्तिष्वनन्तास्वन्तवर्जितान् ।
विश्वान्सम्पादयन्देवाननन्तं लोकमाप्नुयात् ॥ २१ ॥

श्रुतिः—याज्ञवल्क्येति होवाच कत्ययमद्योद्गाताऽस्मिन्यज्ञे स्तोत्रियाः स्तोष्यतीति तिस्र इति कतमास्तास्तिस्र इति पुरोऽनुवाक्या च याज्या च शस्यैव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरो-

---

हुतीर्मनुष्यलोकत्वेन भावयन्स्तं जयतीत्यर्थः॥८॥ *याज्ञवल्क्येति होवाचेति पूर्ववत् । अयमृत्विग्ब्रह्माऽऽहवनीयस्य दक्षिणतः स्थित्वा कतिभिर्देवताभिर्यज्ञं गोपायति । अत्र प्रतिवादिबुद्धिव्यामोहार्थं कतिभिरिति बहुवचनम्, जल्पकथायाः प्रस्तुतत्वात् । मुनिराह *एकयेति । कतमा सैकेति । मनसा हि ब्रह्मा व्याप्रियते ध्यानेन तेन मनःपदेन देवता तया, मनसा यज्ञं गोपायतीत्यर्थः । एतत्सर्वमभिप्रेत्यानंतं वै मन इत्यादि व्याचष्टे *ब्रह्मण इति ॥ २१ ॥

श्रुतौ वै प्रसिद्ध्यर्थः । प्रसिद्धं हि मनसो वृत्तिभेदेनानंत्यं विश्वेदेवानामप्यानंत्यम, अनंता वै विश्वेदेवा इति श्रुत्यंतरेऽपि प्रसिद्धमित्यर्थः ॥ ९ ॥ याज्ञवल्क्येत्यादि पूर्ववत् । *कति स्तोत्रिया इति । कतिपयानामृचां समुदायः स्तोत्रिया नामेत्यर्थः । प्रतिवचनं तु स्तोत्रियाः शस्या वा याः काश्चन ताः सर्वाः तिस्र एवेति । प्रगीतमृग्जातं स्तोत्रम्, अप्रगीतं

ऽनुवाक्याऽपानो याज्या व्यानः शस्या किं ताभिर्जयतीति पृथिवीलोकमेव पुरोऽनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्युलोकꣳ शस्यया ततो ह होताश्वल उपरराम ॥ १० ॥

इत्युपनिषदि प्रथमं ब्राह्मणं समाप्तम् ।

उक्तास्वृग्जातिषूद्गात्रा गीयमानासु सम्पदा ॥
लोकत्रयस्य प्राणादेरपि लोकत्रयं व्रजेत् ॥ २२ ॥
कर्मण्यल्पे महाकर्म तत्फलं चानया दिशा ॥
ध्यायेन्महाफलप्राप्त्यै लोकेऽप्येवमुदीर्यते ॥ २३ ॥
गया भूर्ब्राह्मणो विष्णुरन्नं ब्रह्मेति सम्पदा ॥
श्राद्धे फलस्य बाहुल्यं मत्वा सम्पादयन्ति हि ॥२४॥

इति वार्त्तिकसारे तृतीयाध्याये प्रथमं ब्राह्मणं समाप्तम् ।

शस्त्रम् । कतमा इत्यादि पूर्ववत् । प्रकारान्तरेण पृच्छति *कतमास्ता या अध्यात्ममिति । याः पुरोऽनुवाक्यादयोऽधियज्ञमुक्ता अध्यात्मं ताः का इत्यर्थः । उत्तरमाह *प्राण एवेत्यादिना ॥ १० ॥

अत्रापि संपदोऽप्रतीतेः संपत्प्रकारं स्पष्टयति *उक्तास्विति । अयं भावः—संख्यासामान्यात्प्राणादित्रयं पुरोऽनुवाक्यादित्रये क्रमेण संपाद्य पुनश्चादित्वमध्यत्वांतत्वसाम्यात्तत्र भूरादिलोकत्रयदृष्टिं कुर्वंल्लोकत्रयं जयतीति॥२२॥उक्तां सम्पदमुपसंहरति *कर्मणीति । तस्या एव लक्षणान्तरमाह *तत्फलमिति । फलभूतलोकसम्पादनस्यापि सम्पत्वेन पूर्ववाक्ये उक्तत्वादल्पकर्मणि महत्कर्मसम्पादनवत्तत्फलसम्पादन-

बन्धाख्यमृत्युस्तन्मृत्युर्विदुषोऽनुक्रमस्तथा ॥
प्रयोजकलयो मृत्योः प्रेरकश्चात्र पृच्छयते ॥ १ ॥

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इति। अष्टौ ग्रहा अष्टावतिग्रहा इति ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे त इति ॥ १ ॥

प्राणो वै ग्रहः सोऽपानेनातिग्राहेण गृहीतोऽपानेन

मपि संपदेवेत्यर्थः। उक्तार्थे शिष्टाचारं प्रमाणयति *लोकेऽपीत्यादिना ॥ २३ ॥ २४ ॥

इति टीकायां तृतीयाध्याये प्रथमं ब्राह्मणं समाप्तम्।

आर्तभागप्रश्नान्संगृह्णाति *बन्धेति । द्वितीयब्राह्मणं सप्तम्यर्थः । सर्वं मृत्युनाऽऽप्तमित्यत्र उक्तमृत्युः किं लक्षणः, तस्य च मृत्युरस्ति न वा, विदुष उत्क्रान्तिरस्ति न वा, नेति पक्षे प्राणवत्प्रयोजकस्य कर्मादेरपि लयोऽस्ति न वा, कालकर्मेशानां मध्ये बन्धाख्यमृत्योः प्रेरकं किं वेति पञ्चप्रश्नाः क्रियन्त इत्यर्थः ॥ १ ॥

श्रुत्यर्थस्तु—अथानन्तरं ममायं न गोचर इत्युपरते आश्वले एनं मुनिं जारत्कारवो जरत्कारुगोत्रः ऋतभागस्यापत्यमार्तभागः पप्रच्छ। कति ग्रहाः कत्यतिग्रहाः। इतिशब्दो वाक्यसमाप्त्यर्थः। मुनिराह *अष्टौ ग्रहा इत्यादि। कतमे त इति संख्येयविषयः प्रश्नः ॥ १ ॥

ग्रहादिलक्षणस्य मृत्योर्विशेषात्मतां दर्शयितुं सामान्यलक्षणमाह *अधिभूतेति । अध्यात्मादिपरिच्छेदकरः क्रियाकारकफलात्मको मोहनिमित्तरागाद्यवष्टंभो विषयेन्द्रि-

हि गन्धाञ्जिघ्रति ॥ २ ॥

वाग्वै ग्रहः स नाम्नाऽतिग्राहेण गृहीतो वाचा हि नामान्यभिवदति ॥ ३ ॥

जिह्वा वै ग्रहः स रसेनातिग्राहेण गृहीतो जिह्वया हि रसान्विजानाति ॥ ४ ॥

चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति ॥ ५ ॥

श्रोत्रं वै ग्रहः स शब्देनातिग्राहेण गृहीतः श्रोत्रेण हि शब्दाञ्छृणोति ॥ ६ ॥

मनो वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान्कामयते ॥ ७ ॥

हस्तौ वै ग्रहः स कर्मणाऽतिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोति ॥ ८ ॥

त्वग्वै ग्रहः स स्पर्शेनातिग्राहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः ॥ ९ ॥

यरूपो यथोक्तमृत्युरित्यर्थः ।

श्रुतौ प्राणशब्दो घ्राणवचनः, इन्द्रियप्रकरणात् । अपानशब्दोऽपि तद्ग्राह्यगन्धपरः । विषयाणामेवातिग्रहत्वोक्तेः घ्राणस्य ग्रहत्वसाधकं गन्धग्राहित्वमनुभवेनाह श्रुतिः *अपानेन हीति । अत्रापानशब्दोऽश्वासवचनः, अपश्वासेनोपसृतं गंधं घ्राणेन सर्वलोको जिघ्रतीत्यर्थः ॥ २ ॥ वाग्वै ग्रहः इष्टानिष्टोक्तिप्रकरणात् सा वागाख्यो ग्रहो नाम्ना व्यक्तव्येन विषयेणातिग्राहेण गृहीतः । दीर्घश्छान्दसः । वक्तव्यासङ्गेन प्रयुक्ता वाक्सर्वानर्थैर्युज्यत इत्यर्थः । समानमन्यत् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

वा०-अधिभूताधियज्ञादिपरिच्छेदफलात्मकः ॥
मोहासङ्गात्मको मृत्युर्ग्रहातिग्रहबन्धवान् ॥ २ ॥
ग्रहा प्राणादयो ज्ञेया गृह्णन्ति विषयान्यतः ॥
घ्राणादिप्रेरकत्वेन गन्धाद्याः स्युरतिग्रहाः ॥ ३ ॥
पूर्वब्राह्मणसंप्रोक्तध्यानसंयुक्तकर्मभिः ॥
परिच्छेदविनाशेऽपि मृत्योः सर्वस्य न क्षयः ॥ ४ ॥
हिरण्यगर्भरूपेऽपि श्रूयन्ते हि क्षुधादयः ॥
अतो मृत्योरशेषस्य मृत्युरन्योऽत्र पृच्छयते ॥ ५ ॥
निर्णयौ मृत्युतन्मृत्यू बन्धमोक्षावबुद्धये ॥

बन्धवान्बन्धात्मकः ॥२॥प्राणो वै ग्रह इत्यादेरर्थमाह *ग्रहा इति। प्राणादीनां ग्रहत्वे हेतुः *गृह्णन्तीति। विषयाणामतिग्रहत्वे हेतुः *घ्राणादीति। गन्धाद्या अनादिवासनया घ्राणादिप्रेरकत्वेन घ्राणादीन्ग्रहानातिक्रम्य स्ववशं नयन्तीत्यतिग्रहाःइत्यर्थः॥३॥

यदिदमित्यादिद्वितीयप्रश्नोऽनुपपन्नः स मुक्तिः सातिमुक्तिरित्यत्र सूत्रप्राप्तेर्मृत्युनिवर्त्तकत्वेनोक्तत्वादित्याशङ्क्याह *पूर्वेति ॥४॥ सूत्रपदं प्राप्तस्यापि न सर्वमृत्युनिवृत्तिरित्येतदेव स्पष्टयति *हिरण्येति। हिरण्यगर्भप्राप्तेः सर्वमृत्युनिवर्त्तकत्वाभावे फलितमाह *अत इति ॥५॥ नन्वेवमपि मृत्युतन्मृत्युनिश्चयस्यापुमर्थत्वात्तन्निर्णयाय तद्विषयप्रश्नद्वयमप्यनुपपन्नमिति तत्राह *निर्णयाविति। अयं बन्धोऽयं मोक्ष इति निश्चयाभावे बन्धनिवृत्तिकामस्य तदुपाये प्रवृत्त्ययोगान्मृत्युतन्मृत्युधियोऽपि परम्परया सुखहेतुत्वेन पुमर्थत्वमिति भावः। मृत्युतन्मृत्योः प्रष्टव्यत्वे हेत्वन्तरमाह *दुर्वचाविति। चक्षुरादेर्घटादेश्चेन्द्रियत्वेन विषयत्वेन च प्रसिद्धत्वेऽपि

दुर्वचौ च ग्रहादीनां लोकेऽत्यन्ताप्रसिद्धितः ॥ ६ ॥
ग्रहातिग्रहवद्बन्धो देहोऽप्येष तथाऽप्यसौ ॥
जन्मान्तरेष्वसञ्चारान्नाप्रसिद्धो न दुर्वचः ॥ ७ ॥
एकमेव मनः सर्वजन्मगामीति तार्किकाः ॥
अक्षान्तराण्यपीत्यन्ये तेन सङ्ख्याऽत्र दुर्वचा ॥ ८ ॥
मनोन्यायः समोऽन्येषु तेनाशेषविवक्षया ॥

ग्रहातिग्रहबन्धात्मत्वेनाप्रसिद्धत्वादित्यर्थः ॥ ६ ॥ बन्धस्य निर्णयत्वे देहस्यापि बन्धात्मत्वात्तद्विषयप्रश्नोऽपि स्याद्, विनापि प्रश्नं तन्निर्णये ग्रहादिविषयप्रश्नो ऽपि व्यर्थः स्यादिति मत्वा शङ्कते *ग्रहेति। वैषम्येणोत्तरमाह *तथापीति। देहस्य बन्धात्मत्वेऽपि तत्स्वरूपे तत्संख्यायां वा विप्रतिपत्त्यभावान्न स दुर्वचः, अत एव प्रसिद्ध इत्यर्थः ॥ ७ ॥ ग्रहशब्दितेन्द्रियसंख्यायां विप्रतिपत्तिं दर्शयन्तस्य दुर्वचत्वमुपपादयति *एकमिति ॥ अणुपरिमाणं मन एव लोकान्तरं गच्छति, अन्येन्द्रियाणि तु तत्रैवादृष्टादिना नूतनान्युत्पद्यन्त इति केचिद्वदन्ति, तत्पक्षे आत्मनो मनःसम्बन्धमात्रे यत्नः कार्यः तावतैव मुक्तिसम्भवात्। औपनिषदास्तु सर्वेन्द्रियाणां सह गमनागमनमस्तीत्याहुः। तत्पक्षे सर्वेन्द्रियनिवृत्त्यर्थं यतितव्यमिति ग्रहादिषु संख्याविषयः प्रश्न उपपन्न इति भावः ॥ ८ ॥ प्रतिवचनतात्पर्यमाह *मन इति। विमतानि लोकान्तरं गच्छन्ति इन्द्रियत्वान्मनोवद् विपक्षे तेषां प्रतिभवे उत्पत्त्यादिकल्पनागौरवं बाधकमिति मत्वा शेषेन्द्रियाणां बन्धकत्वविवक्षयाऽष्टौ ग्रहा इत्युक्तमित्यर्थः। तर्ह्येकादश ग्रहा इति वक्तव्ये किमित्यष्टौ ग्रहा इत्युक्तं तत्राह *अन्येष्विति। अन्येषां पाद-

पर्यग्रहीदक्षसंख्यामन्येऽन्तर्भावदर्शिताम् ॥ ९ ॥
यस्येन्द्रियस्य योऽर्थोऽस्मिन् जन्मन्यन्यत्र तत्तथा ॥
उतान्यथेति सन्देहात्सङ्ख्येयं पृच्छ्यते पुनः ॥ १० ॥
दृष्टानुसार्यदृष्टं तु कल्पनीयमितीदृशात् ॥
न्यायात्प्राह यथादृष्टमिन्द्रियार्थव्यवस्थितिम् ॥ ११ ॥
बन्धत्वं विशदीकर्त्तुं ग्रहातिग्रहकल्पनम् ॥
मोचनीयो ग्रहग्रस्तस्तथैवाज्ञानबन्धनात् ॥ १२ ॥

श्रुतिः-याज्ञवल्क्येति होवाच यदिदꣳ सर्वं मृत्योरन्नं कास्वित्सा देवता यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सोऽपामन्नमप पुनर्मृत्युं जयति ॥ १० ॥

वा०-ग्रस्तं हिरण्यगर्भान्तं मृत्युना सकलं जगत् ॥

पायूपस्थानामत्रैवान्तर्भाव इत्यभिप्रायेण दर्शितमनुक्तोपलक्षणार्थमिति यावत् ॥ ९ ॥ नन्वेवमपि इन्द्रियस्वरूपे कस्यापि विमत्यभावात्कतमे त इति प्रश्नानुपपत्तिरित्याशङ्क्य तत्रापि प्रकारान्तरेण सन्देहं सम्भावयति *यस्येति ॥ १० ॥ प्रत्युक्तितात्पर्यमाह *दृष्टेति ॥ ११ ॥ प्रथमप्रश्नस्यावश्यकतामुपसंहरति *बन्धत्वमिति । अत एव द्वितीयप्रश्नोऽप्यावश्यक इत्याह *मोचनीय इति । ग्रहग्रस्तस्य मुक्तिः सुप्तादौ यद्यपि स्वतःसिद्धा तस्यापि ज्ञानादज्ञाननिरासेनात्यन्तिकमुक्तिः संपाद्येत्याह *तथेति ॥ १२ ॥ एवं प्रश्नवैकल्पं निरस्य यदिदं सर्वमित्यादि व्याचष्टे *ग्रस्तमिति ॥ १३ ॥

यदिदं व्याकृतं जगत्सर्वं मत्योरन्नं मृत्युना ग्रस्तं कास्वित्का नु स्याद्देवता यस्या देवताया मृत्युरन्नं भवतीति श्रुत्यक्षरार्थः ॥ १० ॥ प्रष्टुरभिप्रायमाह *अस्ती-

ग्रहातिग्रहरूपेण मृत्युस्तस्यास्ति वा न वा ॥ १३ ॥
अस्ति चेदनवस्था स्यादनिर्मोक्षोऽन्यथा भवेत् ॥
इत्यसौ दुर्वचः प्रश्नो दृष्टान्तेनापनुद्यते ॥ १४ ॥
वह्नेः सर्वाशिनो मृत्योर्यथा मृत्युर्जलं महत् ॥
बन्धमृत्योस्तथामृत्युरज्ञानं बन्धहृल्लये ॥ १५ ॥
अज्ञानमृत्योर्विज्ञानं मृत्युस्तस्यापि तत्तथा ॥
तत्कातकरजोन्यायात्स्वानवस्थामिहानयेत् ॥ १६ ॥
प्राक्तनान्यपि जन्मानि सम्यग्ज्ञानमपह्नुते ॥
अपह्नुते स्वमित्यस्मिन्नर्थे ते का चमत्कृतिः ॥ १७ ॥

ति । यदि मृत्योर्मृत्युं वक्ष्यति तदा तस्यापि मृत्यन्तरेण भाव्यमित्यनवस्था स्याद्, यदि न वक्ष्यति तर्हि ग्रहादिलक्षणमृत्योर्मुक्तिरेव न स्यादतः प्रतिवचनं कष्टमिति भावः । मृत्युरस्तीति पक्षमादाय प्रत्युक्तिश्रुतितात्पर्यमाह *दृष्टान्तेनेति ॥ १४ ॥ अग्निवदित्यादिदृष्टान्तश्रुतिं व्याचष्टे *वह्नेरिति । अग्नेर्मृत्युत्वे हेतुः *सर्वाशिन इति ॥ दार्ष्टान्तिकमाह *बन्धेति । लये सुषुप्त्यादावज्ञानस्य मृत्युत्वे हेतुः *बंधहृदिति । कर्तृत्वादिसर्वबन्धस्य प्रलयादावज्ञानमात्रतयाऽवशिष्टत्वाचस्य मृत्युत्वमित्यर्थः ॥ १५ ॥ अज्ञानस्य तर्हि को वा मृत्युस्तत्राह *अज्ञानेति । ब्रह्मधियोऽपि मृत्यन्तरसत्त्वेनानवस्था स्यात्, नेत्याह *मृत्युरिति । ज्ञानस्य स्वपरनिवर्तकत्वे दृष्टान्तमाह *तदिति । तस्मादित्यर्थः ॥ १६ ॥ विचित्रशक्तित्वाच ब्रह्मधियः स्वनाशकत्वं नाश्चर्यकरमित्याह *प्राक्तनानीति । ज्ञानं हि 'कालत्रयेऽपि मम जन्म नास्ति' इति विदुषो बुद्धिमुत्पादयति तज्जन्मान्यपि निरस्यतीत्यर्थः ॥ १७ ॥ इ-

श्रुतिः-याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो३नेति, नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते ॥ ११ ॥

वा०—अथ तत्त्वविदः प्राणा उत्क्रामन्त्यथ वा नहि ॥
स्यात्पुनर्जनिरुत्क्रान्तावनुत्क्रान्तौ मृतिः कथम् ॥१८॥
नोत्क्रामन्ति न तिष्ठन्ति किं तु निर्वातदीपवत् ॥
न कारणं शिष्यतेऽत्र तस्य ज्ञानेन निह्नुतेः ॥ १९ ॥
अनारब्धफलं कर्म तदुत्क्रान्तेः प्रयोजकम् ॥
स्थितेर्निमित्तमारब्धं ते नष्टे ज्ञानभोगतः ॥ २० ॥
उपादाननिमित्ताभ्यां हीनानामुत्क्रमः कथम् ॥

ष्टान्तकथनेनैव ब्रह्मज्ञानं मृत्योरपि मृत्युरित्यर्थादुक्तमिति मत्वा ज्ञानफलमाह श्रुतिः *अप पुनरिति ॥ १० ॥ यत्रायमित्यादेरर्थं वदन्प्रश्नतात्पर्यमाह *अथेति । बन्धनिवृत्त्यनन्तरं विद्वान्यस्मिन्काले म्रियते तदा उत् ऊर्ध्वमस्माद्ब्रह्मविदः सकाशात्प्राणा उत्क्रामन्ते न वेत्यर्थः ॥ १८ ॥ नेतीत्यादिप्रतिवचनतात्पर्यमाह *नेति । अत्रैव समवनीयन्त इति श्रुतौ विदुष्येव प्राणा लीयन्त इत्युक्तं, तत्रावधारणप्रयोजनमाह *नेति । यथाऽज्ञस्य प्राणाः प्रलयादावज्ञाने लीनाः कारणात्मना तिष्ठन्ति नैवं तत्त्वविदः प्राणा इत्यर्थः । तत्र हेतुमाह *तस्येति । अज्ञानस्येत्यर्थः ॥ १९ ॥ नोत्क्रामन्ति न तिष्ठन्तीत्युक्तमुपपादयति *अनारब्धेत्यादिना ॥ २० ॥ उत्क्रान्तिस्थित्योरभावे फलितमाह *तस्मादिति ॥ २१ ॥

श्रुत्यर्थस्तु-विद्वद्देह उच्छ्वयत्युच्छूनतां प्रतिपद्यते । आध्मा-

कथं वा ऽत्र स्थितिस्तस्माद्युक्त आत्यंतिको लयः ॥२१॥
प्राणत्यागेन देहोऽयं म्रियते बाह्यवायुना ॥
आपूर्णः स्थौल्यमापन्नो निश्चेष्टो दृश्यते यतः ॥ २२ ॥
श्रुतिः-याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेति ।
वा०-प्राणा एव विलीयंते किंवा सर्वं प्रयोजकम् ॥
आद्ये प्राणजनिर्भूयो द्वितीये नाम तत्कथम् ॥ २३ ॥
अप्रयोजकनामेव शिष्यते न प्रयोजकम् ॥
अविद्याकामकर्मादि नोक्तदोषद्वयं ततः ॥ २४ ॥
परवाचाऽभिनिष्पत्तेर्विदुषो बन्धनं प्रति ॥
नामाप्रयोजकं युक्तस्तच्छेषः परदेहवत् ॥ २५ ॥

यति बाह्यवायुना पूर्यते आध्मातो मृतो निश्चेष्टः शेते, इतिवाक्यं प्रत्यक्षसिद्धदेहमरणानुवादकमिति भावः ॥ ११ ॥ विदुष उत्क्रमणाभावे तस्य मरणप्रतिपादकवाक्यशेषविरोधः स्यादित्याशङ्क्याह *प्राणेति ॥ २२ ॥ किमेनमित्यादि चतुर्थप्रश्नतात्पर्यमाह *प्राणा इति । कस्मिन्सति किं स्यात्तत्राह *आद्य इति । *तत्कथमिति । तस्य विदुषो नाम कथमन्यैरुच्चार्येत, दृश्यते हि शुको मुक्त इति व्यवहार इति भावः ॥ २३ ॥ द्वितीयकल्पमादाय नामेति प्रतिवचनतात्पर्यमाह *अप्रयोजकेति । नाम्नः प्राणाद्यप्रयोजकत्वं दर्शयितुं प्रयोजकस्वरूपमाह *अविद्येति । विदुषो नाममात्रावशेषत्वे फलितमाह *नोक्तेति ॥ २४ ॥ नाम्नोऽप्रयोजकत्वमुपपादयति *परेति । विद्वन्नाम्नः परनरानिर्वर्त्यत्वेनान्यदेहवद्विदुषो बन्धाहेतुत्वात् नामशेषत्वोक्तिर्युक्तेत्यर्थः ॥ २५ ॥ कि-

भर्तृप्रपञ्च आहात्र नाममात्रावशेषिणः ॥
पुंसोऽन्तरालेऽवस्थानं द्वयोः संसारमोक्षयोः ॥ २६ ॥
हिरण्यगर्भपर्यंतः संसारोऽज्ञानकर्मजः ॥
भोगेन क्षपिते तस्मिन्निवृत्तं स्याद्वपुर्द्वयम् ॥ २७ ॥
अविद्यया परिच्छिन्नो जीव ऊषररूपया ॥
भवेदद्वैतविद्यायामधिकारी विमुक्तये ॥ २८ ॥
नामशेषस्तु तेनैतद्व्याख्यानं नहि युज्यते ॥
यस्मादद्वैतविद्यायां नाधिकारो वपुर्विना ॥ २९ ॥
नचाविद्या परिच्छेत्री तमोरूपा हि सा यतः ॥
न संसारक्षये कृत्यमस्त्यद्वैतात्मविद्यया ॥ ३० ॥

मेनमित्यादिप्रश्नप्रतिवचने व्याख्याय तत्र परोक्तमर्थं दूषयितुमनुभाषते *भर्तृप्रपञ्च इति । अवस्थानं किमेनमित्यादिना प्रतिपाद्यत इति शेषः ॥ २६ ॥ उक्तमेव व्यक्तीकर्त्तुं तत्प्रक्रियामाह *हिरण्येति । सर्वकर्मानुष्ठानेन क्रमेण तत्तत्फलं भुक्त्वा समुच्चयानुष्ठानेन सूत्रपदं प्राप्तस्याप्राप्तभोगाभावात्कामासिद्ध्या कर्मनिवृत्तौ तन्मूलकदेहद्वयं निवर्त्तत इत्यर्थः ॥२७॥ देहद्वयनाशे तर्हि मुक्तः स्यादिति नेत्याह *अविद्ययेति । क्षितेरूषरवदवस्थितात्माविद्यया परस्मात्परिच्छिन्नो नामावशेषः सन्नन्तरावस्थो भवति तेनायमद्वैतविद्यायामधिकारी न तु मुक्त इत्यर्थः॥२८॥दूषयति *एतदिति । अयुक्तिमेवोपपादयति *यस्मादिति ॥२९॥ यदुक्तमविद्यया परिच्छिन्नो जीव इति तत्राह *नचेति । तमस आच्छादकत्वमेव दृष्टं न परिच्छेदकत्वमित्यर्थः ॥ ३० ॥ सूत्रान्तसर्वभोगेन कामादिनिवृत्त्या देहद्वयनाशमङ्गीकृत्य तावतैव सर्वदुःखनिवृत्तेरद्वैत-

नच भोगेन संसारः क्षीयते किंतु वर्द्धते ॥
ससान्नब्राह्मणे भोक्तुरुक्ता ह्यक्षयहेतुता ॥ ३१ ॥
आगामिकर्मणोऽश्लेषाद्विद्वद्भोगो न वृद्धिकृत् ॥
अज्ञस्य भोगकालीनं कर्म संसारकारणम् ॥ ३२ ॥
नांतराले स्थितं तस्मान्नामशेषागिरोच्यते ॥
किन्तु प्रयोजकाशेषलयान्मुक्तिरुदीर्यते ॥ ३३ ॥
श्रुतिः-अनन्तं वै नामानन्ता विश्वेदेवा अनंतमेव स तेन लोकं जयति ॥ १२ ॥
वा०-मुक्तावप्यवशिष्टत्वान्नाम्नोऽनंतत्वसाम्यतः ॥

धीर्द्वैथेत्युक्तमङ्गीकारं परिसजति *न च भोगेनेति । अत्र पुरुषो वा अक्षितिरिति वाक्यं प्रमाणयति *ससेति । ज्ञानकर्मभ्यां भोक्ता भोग्यस्य निरन्तरमुत्पादनात्पुरुषो भोग्याक्षयहेतुरित्युक्तामित्यर्थः ॥ ३१ ॥ कथं तर्हि त्वन्मते वा संसारक्षयस्तत्राह *आगामीति । भोगो हि संस्कारद्वारा सजातीयभोगसिध्यर्थं कर्म कारयति कृतमपि तत् कर्म विदुषा न श्लिष्यते तदधिगमन्यायात् । अतः संसारक्षयोऽस्मन्मत उपपद्यते इति भावः । त्वन्मते तु नैवमित्याह *अज्ञस्येति ॥३२॥ परमतनिराकरणमुपसंहरति *नेति । भोगेन कामादिनिवृत्तिद्वारा देहद्वयनिवृत्यसम्भवः पञ्चम्यर्थः । त्वदुक्तार्थोऽपि न सम्भवति अप पुनर्मृत्युं जयतीति पूर्ववाक्य एव विदुषो मुक्तेरुक्तत्वादित्याशङ्क्य नेत्याह *किंत्विति । तस्यैव विशदीकरणार्थमिदं परिशेषादिति भावः ॥ ३३ ॥ अनतं वै नामेत्यादेरर्थमाह *मुक्ताविति । ब्रह्मास्मीति दर्शनेन विश्वान्देवानात्मत्वेनोपगम्यानतं लोकं जयतीति सिद्धानुवादेन ब्रह्मवि-

विश्वान्संवादयन्देवाननंतं लोकमश्नुते ॥ ३४ ॥
ग्रहातिग्रहबंधाख्यमृत्योर्यत्स्यात्प्रयोजकम् ॥
कालकर्मेश्वरादीनां मध्ये तत्किमितीर्यताम् ॥३५॥
अविद्वद्विषयः प्रश्नो विदुषो जन्मसंक्षयात् ॥
आतत्त्वबोधमज्ञानी बध्यतेऽनंतजन्मभिः ॥ ३६ ॥
श्रुतिः–याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृत-स्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चंद्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीति ॥

वा०–अनुगृह्णंति वागादीन्स्वांशैरग्न्यादिदेवताः ॥

द्या स्तूयत इति भावः ॥ ३४ ॥ यत्रास्येत्यादिप्रश्नतात्पर्यमाह *ग्रहेति ॥ ३५ ॥ अत्र विवक्षितं पुरुषशब्दार्थमाह *अविद्वदिति ॥ ३६ ॥

अक्षरार्थस्तु–यत्र यस्मिन्कालेऽस्य पुरुषस्याज्ञस्य मृतस्य वागग्निमप्येति वातं प्राणोऽप्येतीति सर्वत्र सम्बन्धः। आकाशमात्मेत्यत्रात्मशब्देन हृदयाकाश उच्यते। स आकाशमप्येति लोमानि ओषधीरपियन्ति अप्सु लोहितं रेतश्च स्थाप्यते तदा क्वायं पुरुषो भवतीति।

पुरुषशब्दस्याज्ञपरत्वे वागप्येतीत्यादिश्रुतिरनुपपन्ना। 'वाङ्मनसी दर्शनात्' इत्यादिन्यायेनाविदुषो वागादिलयाभावादित्याशङ्क्य वागादिशब्देन तत्तत्करणाधिष्ठातृदेवतांशा लक्ष्यन्ते तेषामप्ययो नाम मरणकाले करणप्रेरणं विनाऽग्न्यादिस्वरूपेणावस्थानमतो नानुपपत्तिरित्याह *अनुगृह्णन्ती-

भोगक्षये मृतौ स्वांशान्संहरन्ति यथायथम् ॥ ३७ ॥
पुंसो देहग्रहणे या देहस्थानेषु देवताः ॥
अंशान् निदधाति स्वं स्वं न देहग्रहणात्पुरा ॥ ३८ ॥
अधिष्ठातृवियोगेन न्यस्तदात्रोपमैर्युतः ॥
वागादिभिरसौ किंस्वित्प्रयोजकमुपाश्रयेत ॥ ३९ ॥
किं कारणात्मतामेति किं वा केनचिदात्मना ॥
अवतिष्ठत एवायं किंवा कर्मैव संश्रितः ॥ ४० ॥
गुणान्वा यदि वेशानं कालं वा दैवमेव वा ॥

ति ॥ ३७ ॥ ननु वर्त्तमानदेहपाते देवतांशानामुपसंहारश्चेद्देहान्तरग्रहे करणान्यधिष्ठातृशून्यानि भोगसाधनानि न स्युस्तत्राह *पुंस इति ॥ ३८ ॥ स्थूलदेहविगमेऽपि मोक्षादर्वाग्जीवस्य लिङ्गाश्रयत्वात् कायमिति प्रश्नानुपपत्तिस्तत्राह *अधिष्ठात्रीति । यद्यपि जीवो लिङ्गमाश्रितस्तथापि स्थूलदेहाभावे भूमौ निक्षिप्तलवित्रवदाधिष्ठातृहीनं वागादि न भोगदमिति सतोऽपि तस्यासत्समत्वाद्भोगहेत्वाश्रयप्रश्नो युक्त इत्यर्थः ॥ ३९ ॥ प्रश्नवाक्यं व्याचष्टे *किमिति । स्थूलदेहं हित्वा स्थितो जीवो स्वाभासप्रत्यगविद्यालक्षणकारणरूपतामेतीति जीवस्यापि कार्यत्वमिच्छन्तः स्वयूथ्या वदन्ति। स्थूलदेहे नष्टे प्रतिबन्धाभावादसाधारणेन स्वेन रूपेण तिष्ठतीत्येके । मीमांसकसांख्यतार्किकमतानि क्रमेणाह *किं वा कर्मेति ॥ ४० ॥ ज्योतिर्विदां मतमाह *कालमिति । देवताकाण्डाभिप्रायमाह *दैवमिति । लोकायतिकयोगाचारमाध्यमिकमतानि क्रमेणाह *यदृच्छामिति । प्राक्सतो जीवस्य ध्वंसो विनाशः, तं यातीति जीवकार्यत्ववादिनो

यदृच्छां संततिं शून्यं विनाशं वेति भण्यताम् ॥४१॥
श्रुतिः—आहर सोम्य हस्तमार्तभागावामेतस्य वेदिष्यावो न नावेतत्सजन इति ।
वा०–प्रश्नेन तुष्टः संन्यस्य विजिगीषां स वादिना ॥
निर्गतौ विजिगीषुभ्यो मिथो निश्चयमूचतुः ॥ ४२ ॥
श्रुति– तौ होत्क्रम्य मंत्रयांचक्रोत ॥
वा०–संसारभूमिवर्तित्वान्नैवायं कारणाश्रयः ॥

मतान्तरमाह *विनाशमिति । प्रश्नं विनिगमयति* भण्यतामिति ॥ ४१ ॥ आहरेत्यादेरर्थमाह *प्रश्नेनेति । तुष्टिश्चान्यासाधारणप्रश्नकरणादिति ध्येयम् । सन्तोषादेव हस्तग्रहणमपि ।

अक्षरार्थस्तु–आवामेवैतस्य त्वत्पृष्टस्य वेदितव्यं यत्तद्वेदिष्यावो निरूपयिष्यावः कस्मान्नौ आवयोरेतद्वस्तु सजने जनसमुदाये निर्णेतुमुचितं न भवति विद्याया गोप्यत्वादिति भावः । तथाच स्मृतिः ।

आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः ।
आप्तशक्तोऽर्थदः साधुः स्वाध्याप्या दश धर्मतः ॥ १ ॥
विद्ययैव समं कामं मर्त्तव्यं ब्रह्मवादिना ।
आपद्यपि च घोरायां न त्वेनामीरिणे वपेत् ॥
विद्या ब्राह्मणमित्याह शेवधिस्तेऽस्मि र क्ष माम् ।
असूयकाय मां मा दास्तदा स्यां वीर्यवत्तिमा ॥ इति ॥४२॥

तौ होत्क्रम्येत्यादिश्रुतिसूचितं विचारप्रकारं दर्शयन्स्वमतशुद्ध्यर्थं परपक्षान्दूषयति *संसारेत्यादिना । जीवस्य कारणमात्रतया लीनत्वे कृतनाशस्तदापीतेरिसादिन्यायविरोधश्च

कर्मादिपरतन्त्रत्वात्स्वाश्रयोऽयं न चेष्यते ॥ ४३ ॥
जडत्वाद्गुणकालादि न जीवं नेतुमर्हति ॥
हठो यदृच्छा शून्यं तु मानहीनं तथेतरत् ॥ ४४ ॥
देवेश्वरौ स्वतन्त्रौ चेद्विधिशास्त्रमनर्थकम् ॥

श्रुतिः—तौ ह यदूचतुः कर्म हैव तदूचतुरथ यत्प्रश-शꣳसतुः कर्म हैव तत्प्रशशꣳसतुः पुण्यो वै पुण्येन कर्म-णा भवति पापः पापेनेति, ततो ह जारत्कारव आर्त-भाग उपरराम ॥ १३ ॥

इत्युपनिषदि द्वितीयं ब्राह्मणं समाप्तम् ॥

वा०–अतोऽसाधारणो जन्महेतुः कर्मावशिष्यते॥४५॥
सति कर्मणि वैचित्र्यं देहानामुपपद्यते ॥
देवेशानुगृहीतत्वाज्जाड्यदोषो न कर्मणः ॥ ४६ ॥
इति सर्वं विचार्यैतौ कर्मैव प्रशशंसतुः ॥

स्यादिति भावः ॥ ४३ ॥ कालादीत्यादिशब्देन कर्मणः स्वातन्त्र्येण भोक्त्राश्रयत्वनिरासः । हठशब्दः स्वभाववचनो यदृच्छापदपर्यायः तस्य प्रयोजकत्वे नियतं हेत्वपादानं न स्या-दिति भावः । *इतरदिति । सन्ततिं विनाशं वेति पक्षद्वय-यमपि मानहीनमित्यर्थः ॥ ४४ ॥ तौ ह यदूचतुरित्यादेरर्थमाह *अत इति ॥४५॥ जडत्वान्न कर्मापि प्रयोजकमित्युक्तं तत्रा-ह *देवेशेति । देवा अग्न्यादयः, ईशः परमात्मा, ताभ्यामनु-गृहीतं सद्विचित्रकार्यहेतुरित्यर्थः ॥ ४६ ॥ अथ यत्प्रशशं-सतुरित्यादेरर्थमाह *इतीति । न केवलं कर्मकाण्डमि-त्यूचतुः कालादिहेतूनां मध्ये कर्मैव प्रधानमिति प्रशशंसतुरित्य-र्थः । उक्तं हि 'वैषम्यनैर्घृण्ये न सापेक्षत्वाद्' इति । पुण्यो वै

देहोत्कर्षापकर्षौ तु पुण्यापुण्यविभेदतः ॥ ४७ ॥

इति वार्तिकसारे तृतीयाध्यायस्य द्वितीयं ब्राह्मणं समाप्तम् ॥

वा०-तृतीये ब्राह्मणे पुण्यफलावधिरुदीर्यते ॥
अश्वमेधः परं पुण्यं ब्रह्मलोकः फलावधिः ॥ १ ॥
प्रत्यक्षः स्थावरत्वाख्यः स्पष्टः पापफलावधिः ॥
विज्ञायते द्वयं ज्ञानादियत्ता हेयसंसृतेः ॥ २ ॥
आसक्तिरहितं पुण्यं विद्योपेतं विमुक्तये ॥
अतः फलावधिर्मोक्षः संसारो नेति केचन ॥ ३ ॥

पुण्येनेत्यादेरर्थमाह *देहेति ॥ ४७ ॥

इति टीकायां तृतीयाध्याये द्वितीयं ब्राह्मणं समाप्तम् ।

कर्म प्रयोजकमित्युक्तं तत्फलस्यावधिः कः ? इत्यपेक्षायां निरूपणायानन्तरं ब्राह्मणमिति सङ्गतिमाह *तृतीयेति । यद्यप्ययमर्थ उद्गीथब्राह्मणेऽप्युक्तस्तथापि साध्यं सर्वं स्वाविद्योत्थमित्यस्मिन्ब्राह्मणे कथ्यतेऽतोऽर्थभेदादगतार्थतेति भावः । सर्वं कर्मफलमाविद्यमेवेति वक्तुमुत्कृष्टपुण्यतत्फले दर्शयति *अश्वमेध इति ॥१॥ पापफलस्याप्यवधिमाह *प्रत्यक्ष इति । ब्रह्मादिस्थावरान्तस्य कर्मफलत्वज्ञाने फलितमाह *विज्ञायत इति । उभयं कर्मफलमिति ज्ञाते ब्रह्मलोकान्तं संसारमध्यपातित्वाद्धेयत्वेन प्रतिभातीत्यर्थः ॥ २ ॥ उक्तमेव दृढीकर्तुं पूर्वपक्षमाह *आसक्तीति । अयं भावः—यद्यपि केवलकर्मणः फलं संसारस्तथापि विद्यासहितकर्मणो मुक्तिः फलम् । यथा केवलविषदध्यादि मरणज्वरादिकरमपि मन्त्रशर्करादियुक्तं जीवनपुष्ट्याद्यारभते तद्वत् । अतो ब्रह्मलोको न पुण्यफलावधिरिति ॥ ३ ॥

तदयुक्तं यतः कर्म न मोहस्य निवर्तकम् ॥
मोहानिवृत्तौ तत्कार्यात्संसारान्मुच्यते कथम् ॥४॥
प्रत्यग्याथात्म्यसम्मोहः क्रियाकारकरूपवान् ॥
प्रथते ऽपास्तनिःशेषक्रियाकारकवस्तुनि ॥ ५ ॥
प्रत्यग्याथात्म्यविज्ञानं तन्मोहस्य निवर्त्तकम् ॥
भविष्यतीति चेत्तर्हि कर्मणा कृत्यमत्र किम् ॥ ६ ॥
सममज्ञानकार्यत्वं यद्यपि ज्ञानकर्मणोः ॥
मेयैकात्म्यानुरोधित्वं तथाऽप्यतिशयो धियः ॥ ७ ॥
कर्माविद्यानुरोधि स्यान्न त्वैकात्म्यानुरोधि हि ॥
सर्वस्यैकात्म्यमात्रत्वे कः किं केन करिष्यति ॥ ८ ॥
यथा स्वर्गः कर्मसाध्यस्तथा मुक्तिरपीति चेत् ॥

किं ज्ञानयुक्तं कर्माविद्यानिवर्त्तनद्वारा मुक्तिहेतुरुत साक्षात् ? तत्राद्यं प्रत्याह *तदिति । द्वितीयं निराह *मोहेति ॥ ४ ॥ ननु कर्मणो मोहनिवर्त्तकत्वे को दोषस्तत्राह *प्रत्यगिति । निर्विशेषे चिदात्मनि तदविद्याकर्माद्यात्मना विजृम्भतेऽतोऽविद्याकार्यत्वात्कर्म नाविद्यानिवर्त्तकमिति भावः ॥ ५ ॥ अस्तु तर्हि कर्मसहितं ज्ञानं तन्निवर्त्तकमिति शङ्कते *प्रत्यगिति । निरपेक्षस्यैव ज्ञानस्य लोकेऽज्ञाननिवर्त्तकत्वदृष्टेः कर्मसाहित्यकल्पनं वृथेति दूषयति *तर्हीति ॥ ६ ॥ ननु कर्म नाविद्यानिवर्त्तकम् अज्ञानजत्वाद्रज्जुसर्पज्ञानवद् इत्युक्तमयुक्तं, ज्ञानेऽपीत्थमनुमानसम्भवादित्याशङ्क्य वस्त्वननुसारित्वमुपाधिरित्याह *सममिति ॥ ७ ॥ अस्तु तर्हि कर्मणोऽपि वस्त्वनुसारित्वम्, नेत्याह *कर्मेति । कर्तृत्वादिभेदसापेक्षं कर्म, ज्ञानं तु तदुपमर्दीति विशेष इति भावः ॥ ८ ॥ स्वर्गकामवाक्यात्स्वर्गस्य

मुक्तिस्वभाववीक्षायां न युक्ता कर्मकार्यता ॥ ९ ॥
उत्पाद्यमाप्यं संस्कार्यं विकार्यं च क्रियाफलम् ॥
नैव मुक्तिर्यतस्तस्मात्कर्म तस्या न साधनम् ॥ १० ॥
कर्मस्वभाववीक्षायामपि कर्म न साधनम् ॥
एकेन वा भवेन्मुक्तिर्यदि वा सर्वकर्मभिः ॥ ११ ॥
सकृत्प्रवृत्तैरथवा यावज्जीवप्रयोगतः ॥
काम्यैर्वा यदि वा नित्यैरुभयैर्वा विमुच्यते ॥ १२ ॥
श्रौतैर्वा यदि वा स्मार्तैर्यदि वोभयकर्मभिः ॥
केवलैर्वाऽथवा ज्ञानसंयुक्तैर्वेति भण्यताम् ॥ १३ ॥
एकस्य मुक्तिदत्वे स्यात्कर्मान्तरमनर्थकम् ॥
सर्वेषां मुक्तिदत्वे तु फलैक्यादेककर्मता ॥ १४ ॥
सर्वेष्वपि विकल्पेषु मानाभावो ह्यतिस्फुटः ॥
नचाश्रौषं श्रुतेर्वाक्यात्कर्म मोक्षफलं क्वचित् ॥१५॥

कर्मजन्यत्ववद्विविदिषावाक्यान्मोक्षस्य कर्मजन्यत्वं दुर्वारमिति शङ्कते *यथेति। मोक्षस्वरूपे कर्मस्वरूपे च विचार्यमाणे तयोः साध्यसाधनभावायोगाद्विविदिषावाक्यं शुध्यादिद्वारा ज्ञानहेतुत्वमात्रपरमिति मत्वा मुक्तेः कर्माजन्यत्वमुपपादयति *मुक्तीत्यादिना ॥ ९ ॥ १० ॥ तस्याः साधनत्वमेवोपपादयितुं शाखाचङ्क्रमणव्यावृत्त्यर्थं बहुधा विकल्पयति *एकेन वेत्यादिना ॥ ११ ॥ १२ ॥ १३ ॥ आद्यं प्रत्याह *एकस्येति । द्वितीयं प्रत्याह *सर्वेषामिति । सर्वकर्मणां मुक्तिलक्षणैकफलहेतुत्वे दर्शादिवदेककर्मतापत्तिः । तथाच कर्मभेदप्रतिपादकभेदलक्षणविरोधः स्यादिति भावः ॥ १४ ॥ अत्राशिष्टपक्षान्दूषयति *सर्वेष्विति ॥ १५ ॥ न केवलं तत्र मानाभावः मा-

न तत्र दाक्षिणा यान्ति नाविद्वांसस्तपस्विनः ॥
न कर्मणेत्यादिवाक्यात्कर्म प्रत्युत निन्द्यते ॥ १६ ॥
निन्द्यतां केवलं कर्म तस्यानित्यफलत्वतः ॥
विद्यासमुच्चितं नित्यं मुक्त्यर्थमिति चेन्न तत् ॥ १७॥
एकदेशे चैककाले स्थितयोरविरुद्धयोः ॥
समुच्चयः फलैक्ये स्यान्न त्वसौ ज्ञानकर्मणोः ॥ १८ ॥
बाध्यबाधकभावेन पञ्चास्योरणयोरिव ॥
एकदेशानवस्थानान्न समुच्चय एतयोः ॥ १९ ॥
साध्यसाधनरूपत्वादेककालानवस्थितिः ॥
हेतुस्वरूपकार्येषु विरोधस्त्वनयोः स्फुटः ॥ २० ॥
अध्यासः कर्मणो हेतुः प्रमाणं बोधकारणम् ॥
न भासकं कर्मरूपं बोधरूपं तु भासकम् ॥ २१ ॥
कर्मकार्यं भाविजन्म तन्निवृत्तिस्तु बोधजा ॥
समुच्चितात्केवलाद्वा नातो मोक्षोऽस्ति कर्मणः॥२२॥
अश्वमेधादि यत्पुण्यं महोपासनया युतम् ॥
तत्फलं संसृतिस्तस्या भुज्युना पृच्छयतेऽवधिः ॥२३॥

नविरोधश्चेत्याह *न तत्रेति ॥ १६ ॥ १७ ॥ समुच्चितस्यापि कर्मणो मुक्तिहेतुत्वं नेत्युक्तमुपपादयितुं समुच्चययोग्यं वस्तु दर्शयति *एकेति । प्रकृते तद्वैलक्षण्यमाह *न त्वित्यादिना ॥ १८ ॥ पञ्चास्यः सिंहः । उरणो मेषः ॥ १९ ॥ प्रकारान्तरेणापि तयोर्विरोधमाह *हेत्विति ॥ २० ॥ हेतुविरोधं व्यनक्ति *अध्यास इति । स्वरूपविरोधं स्पष्टयति *नेति ॥ २१ ॥ कार्यविरोधमाह *कर्मेति । परमतनिरसनमुपसंहरति *समुच्चितादिति ॥ २२ ॥ उक्तानुवादपूर्वकमथ हैनमित्यादेस्तात्पर्यमाह *अश्वमेधेति ॥ २३ ॥ प्रश्नतात्पर्यमुक्त्वा प्र-

श्रुतिः-अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच । मद्रेषु चरकाः पर्यव्रजाम ते पतञ्चलस्य काप्यस्य ग्रहानैम तस्यासीद् दुहिता गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वाऽऽङ्गिरस इति, तं यदा लोकानामन्तानपृच्छामाथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन्, स त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति ॥१॥

वा०-ब्रह्माण्डाद्बहिरन्तश्च समष्टिव्यष्टिरूपिणः ॥
व्याप्तिर्हिरण्यगर्भस्य संसारस्यावधिर्मतः ॥ २४ ॥

तिवचनतात्पर्यं सङ्क्षेपेणाह *ब्रह्माण्डादिति । हिरण्यगर्भपदं प्राप्तस्य या बहिरन्तश्च व्याप्तिः सैव कर्मफलस्यावधिरित्यर्थः ॥२४॥ ब्राह्मणस्यैवंप्रवृत्तावपि किमिति भुज्युः स्वस्य पूर्वनिर्वृत्तकथामाह इत्याशङ्क्य अलौकिकत्वादयमर्थो गुरुमुखत एव ज्ञेय इति प्रदर्शनार्थमित्याह *आगमेति ॥ २५ ॥

अक्षरार्थस्तु-भुज्युरिति नामतः लह्यस्यापत्यं लाह्यः तस्यापत्यं लाह्यायनिः। मद्रानाम जनपदास्तेष्वध्ययनार्थं व्रतचरणाच्चरकाः पर्यव्रजाम पर्यटितवन्तः । पतञ्चलस्य नामतः काप्यस्य कपिगोत्रस्य ग्रहानैम गतवन्तः। तस्य दुहिता गन्धर्वेणामानुषेण केनचिदाविष्टाऽऽसीत् तं सर्वे वयं परिचारिताः सन्तो ऽपृच्छाम कोसीति-किं नामा किं सतत्त्व इति, सोऽब्रवीद्गंधर्वः सुधन्वा नामत आङ्गिरसो गोत्रतः।तं यदा यस्मिन्काले लोकानामन्तानपृच्छामाथ तस्मिन्काले एनं गन्धर्वं भुवनकोशपरिमाणज्ञानायाब्रूम पृष्टवन्तो वयं कथं पारिक्षिता अभवन्निति । स च पृष्टमस्मभ्यमब्रवीत्सोऽहं गन्धर्वाल्लब्धविद्यस्त्वां पृच्छामि क्व पारिक्षिता अभवन्निति॥१॥

आगमैकाधिगम्योऽयमर्थ इत्युपदर्शयन् ॥
गन्धर्वाख्यायिकामाह गन्धर्वस्तद्गुरुस्ततः ॥ २५ ॥
लोकान्तानपि गन्धर्वादश्वमेधकृतां फलम् ॥
श्रुत्वा पारिक्षितोक्त्याऽत्र वादिनं तं व्यमोहयत् ॥२६॥
अश्वमेधकृतो वक्ति भुज्युः पारिक्षिता इति ॥
परितः क्षितिमावेष्ट्य स्थिता इति विवक्षया ॥ २७ ॥
द्विर्याज्ञवल्क्यमुद्दिश्य प्रश्नोक्तिस्त्रासजन्मने ॥
अत्रस्तोऽतीन्द्रियज्ञानं दर्शयन्निदमुक्तवान् ॥ २८ ॥

श्रुतिः—स होवाचोवाच सोऽगच्छन्वै ते तद्यत्राश्वमेधयाजिनो गच्छन्तीति, क्व चाश्वमेधयाजिनो गच्छन्तीति, द्वात्रिंꣳशतं वै देवरथाह्न्यान्ययं लोकस्तꣳसमन्तं पृथिवी द्विस्तावत्पर्येति ॥

ननु गन्धर्वोपदिष्टाश्वमेधयाजिनां गतिरत्र पृच्छ्यते चेत् तेषां च प्रसिद्धसंज्ञां हित्वा किमित्यप्रसिद्धसंज्ञोपादानं तत्राह *लोकान्तानिति ॥२६॥ ननु पारिक्षितशब्दः कथमश्वमेधकृद्वचनस्तत्राह *अश्वमेधेति ॥ २७ ॥ व्यामोहार्थमप्रसिद्धसंज्ञाग्रहणेऽपि क्व पारिक्षिता अभवन्निति द्विरुक्तिः किमर्था? तत्राह *द्विरिति । इदं दिव्यज्ञानं तव नास्ति अतो निगृहीतोऽसीति भर्त्सनार्था द्विरुक्तिरित्यर्थः । स होवाचेत्यादेरर्थमाह *अत्रस्त इति ॥ २८ ॥

इयमत्राक्षरयोजना । एवं भर्त्सितोऽपि निर्भीतः स मुनिरुवाच । वैशब्दो गन्धर्वोक्तिस्मरणार्थः । हे भुज्यो स गन्धर्वस्ते तुभ्यमित्थमुवाच पारिक्षितशब्दितास्तत्रागच्छन्यत्राश्वमेधयाजिनो गच्छन्तीति ॥

एतत्सर्वं सङ्क्षेपेण दर्शयन्द्वात्रिंꣳशतमित्यादिवाक्यमवतार-

वा०-गन्धर्वेण गतिः प्रोक्ता ह्यश्वमेधकृतामिति ॥
भूयः पृष्टः स्वयं वक्तुं प्राह लोकस्य विस्तृतिम् ॥ २९ ॥
आदित्यरथगत्याऽध्वामितो यावदहर्निशम् ॥
द्वात्रिंशद्गुणितस्तावान्व्याप्तो भानुगभस्तिभिः॥३०॥
इयानेव प्राणिभोगसिद्धये लोक इष्यते ॥
इतः परस्ताद् द्विगुणा पृथिव्यालोकवर्जिता ॥ ३१ ॥
अन्तरालोकयुक्तः सन्बहिरालोकवर्जितः ॥
लोकालोकगिरिर्मध्ये पृथिव्योरनयोः स्थितः ॥ ३२ ॥
श्रुतिः-ताꣳ समन्तं पृथिवी द्विस्तावत्समुद्रः पर्येति ॥
वा०- समुद्रो द्विगुणो भूमेर्घनोदाख्यो बहिः स्थितः ॥

यति *गन्धर्वेणेति। अश्वमेधकृतां गतिरेव पारिक्षितशब्दितानामपीति तत्र गन्धर्वेणोक्तेत्युक्त्वा क्वन्वश्वमेधयाजिनो गच्छंतीति भुज्युना पुनः पृष्टस्तेषां गतिं वक्तुं भुवनकोशपरिमाणमाहेत्यर्थः ॥ २९ ॥ अवतारितवाक्यं व्याचष्टे *आदित्येति । श्रुतौ देवरथाह्नानीत्यत्र देव आदित्यस्तस्य रथगत्या आह्ना य देशपरिमाणं छिद्यते तदेव रथाह्नं तद् द्वात्रिंशद्गुणितं देवरथाह्नानि अहोरात्रमादित्यरथगत्या यावान्पन्था मितस्तावान्देशो द्वात्रिंशद्गुणितः तत्किरणव्याप्तः पृथिवीत्युच्यते ।

रविचन्द्रमसोर्यावान्मयूखैरवभास्यते ॥
ससमुद्रसरिच्छैलस्तावती पृथिवी मता ॥ १ ॥
इति स्मृतेरिति भावः ॥ ३० ॥

अयं लोक इत्यस्यार्थमाह *इयानिति । तं समन्तमित्यादेरर्थमाह *इत इति ॥ ३१ ॥ लोकपरिमाणाद्द्विगुणपरिमाणा पृथिवी सा ऽऽलोकं परितो व्याप्नोति । न च रविचन्द्रमसोरिति वचनेन विरोधः, तत्र भोगभूमेरुक्तत्वादिति भावः ॥ ३२ ॥

अण्डाद्बहिर्घनोदोऽयमिति पौराणिका जगुः ॥ ३३ ॥
पुराणं बाध्यते श्रुत्या ध्यानार्था वा श्रुतिर्मता ॥
सर्वथाऽप्यण्डरूपोऽयं वैराजो देह इष्यताम् ॥ ३४ ॥
योऽण्डाद्बहिःस्थितो वायुः सूत्रात्मेति श्रुतीरितः ॥
एषोऽश्वमेधकृत्पुण्यपरिपाको न चापरः ॥ ३५ ॥
क्षुरधाराद्युपमितः सन्धिर्योऽण्डकपालयोः ॥
तेन बाह्यं नयत्येतानश्वमेधस्य देवता ॥ ३६ ॥

आलोकस्य व्यवधानाभावे कथं तत्राभाववचनं तत्राह *अन्तरिति ॥ ३२ ॥ तामित्यादेरर्थमाह *समुद्र इति । पृथिवीं समन्तात्ततो द्विगुणपरिमाणं जलं तां व्याप्य तिष्ठतीत्यर्थः । ननु घनोदाख्यसमुद्रोऽण्डाद्बहिरेव श्रूयते, 'दशोत्तरेण पयसा मैरेयाण्डं च तद्वृतम्'इत्यादौ, तत्कथं तस्याण्डान्तर्वर्त्तित्वमित्याशङ्क्य प्रत्यक्षश्रुतिविरोधे पुराणवचनं न स्वार्थसाधकमित्याह *अण्डादिति ॥ ३३ ॥ पुराणश्रुत्योरविरोधमाह *ध्यानेति । ननु घनोदस्यांडांतर्वर्त्तित्वप्रतिपादनपरेत्यर्थः । कीदृग्विधस्तर्हि श्रुत्यभिमतो भुवनकोशः? इत्याशंक्य नात्र भुवनकोशनिर्णयाय श्रुतिः प्रवृत्ता किन्तु ब्रह्माण्डशरीराद्विराजो बहिः सूत्रात्मनो व्याप्तिरस्ति सूत्रात्मत्वं च कर्मफलमेवेत्येतावदिह विवक्षितमित्याह *सर्वथेत्यादिना । सर्वथेत्यनेन घनोदो-अण्डांतर्वर्त्ती भवतु वा मा वेति श्रुतेस्तत्रानास्थां दर्शयति । नच तर्हि द्वात्रिंशदित्यादिपरिमाणकथनविरोधः, पृथिव्यादेरुक्तपरिमाणेन सूत्रध्यायिनो ध्यानविवक्षया तदुक्तिरविरुद्धेत्युक्तत्वादिति भावः ॥ ३४ ॥ ३५ ॥ तद्यावतीत्यादेरर्थमाह *क्षुरेति ॥ ३६ ॥

अयमर्थः—लोकादिपरिमाणे एवं स्थिते सति तत्तत्र यावती

श्रुतिः-तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं तावानन्तरेणाकाशस्तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्तान्वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेधयाजिनोऽभवन्नित्येवमिव वै स वायुमेव प्रशशंस तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति य एवं वेद, ततो ह भुज्युर्लाह्यायनिरुपरराम ॥ २ ॥

इत्युपनिषदि तृतीयं ब्राह्मणं समाप्तम् ।

वा० ते वायुभावमापन्नाः समष्टिव्यष्टिरूपतः ॥
अण्डाद्बहिस्तदन्तश्च तिष्ठन्त्यखिलरूपिणः ॥ ३७ ॥
अध्यात्मादिविभागेन व्याप्तिर्व्यष्टिरितीर्यते ॥

यावत्परिमाणा क्षुरस्य धारा यावद्वा सौक्ष्म्येण युक्तं माक्षिकायाः पत्रं तावानंतरेण आण्डकपालयोर्मध्ये आकाशच्छिद्रं, तेन छिद्रेण तानश्वमेधकृतः इन्द्रः अश्वमेधदेवताहिरण्यगर्भः सुपर्णो भूत्वा ज्ञानशक्तिप्रधानः सन् वायवे क्रियाशक्तिप्रधानाय प्रायच्छत् । सुपर्णशब्दस्यात्रौचित्यात्सूत्रवाचित्वम् । सूत्रस्यैव वायुत्वेऽपि उक्तावच्छेदकभेदाद्भेद इति च ध्येयम् । अर्चिरादिमार्गेण ब्रह्मलोकप्राप्त्याऽऽण्डकपालसमीपं प्राप्तानश्वमेधकृतः आंडकपालसंधिना हिरण्यगर्भो बहिर्नयति स्मेत्यर्थः । तान्वायुरित्यादेरर्थमाह *ते वायुत्विति ॥ ३७ ॥

श्रुतौ एवमिव वै एवमेव स गंधर्वो वायुमेव प्रशशंस अण्डाद्बहिर्यतो देवतान्तरस्य न गतिरतो देवतानां मध्ये वायुरेव महानिति प्रशशंसेत्यर्थः ॥२॥ तस्मात् वायुरेवेत्यत्र समष्टिव्यष्टिशब्दार्थमाह *अध्यात्मेति । वायोर्ज्यायस्त्वेन प्रशस्यमानत्वादसावे-

समस्तत्वेन संव्याप्तिः समष्टिरिति कीर्त्तिता ॥ ३८ ॥
समष्टिव्यष्टिरूपेण उपास्तेऽसौ सकृन्मृतः ॥
हिरण्यगर्भो भूत्वाऽथ मुच्यते म्रियते न तु ॥ ३९ ॥
संसारोत्कर्षसीमेत्थं वर्णिता ज्ञानकर्मजा ॥
इतो विरक्तमालक्ष्य वक्ष्यते स्वात्मनिर्णयः ॥ ४० ॥

इति वार्त्तिकसारे तृतीयाध्यायस्य तृतीयं ब्राह्मणं समाप्तम्

चतुर्थब्राह्मणे मोहयोग्यः कर्तृत्ववर्जितः ॥
विषयो ब्रह्मविद्याया अस्त्यात्मेति निरूप्यते ॥ १ ॥
अहंधीकर्मशास्त्राभ्यां द्रष्टेर्द्रष्टा न सिध्यति ॥
किंतु दृष्टयादिसंयुक्तो ब्रह्मताऽस्य विरुध्यते ॥ २ ॥

वांतर्व्याप्त्या व्यष्टिर्बहिर्व्याप्त्या समष्टिश्चेत्यर्थः ॥ ३८ ॥ अप पुनारित्यादेरर्थमाह *समष्टीति ॥ ३९ ॥ ब्राह्मणार्थमुपसंहरन्नुत्तरब्राह्मणास्यानेन सम्बन्धमाह *संसारेति ॥ ४० ॥

इति वार्त्तिकसारटीकायां तृतीयाध्याये तृतीयं ब्राह्मणं समाप्तम् ॥

त्वंपदार्थस्वरूपनिरूपणपरमुत्तरब्राह्मणमित्याह *चतुर्थेति । अज्ञानोपहितो वस्तुतः कर्तृत्वादिरहितो ब्रह्माभेदयोग्यः प्रत्यग्धातुः कश्चिद् अस्तीत्यत्र निरूप्यत इत्यर्थः ॥ १ ॥ उक्तार्थस्वरूपस्योपनिषदैकगम्यत्वं वक्तुं प्रत्यक्षादिना तत्सिद्धिशंकां निरस्यति *अहमिति ॥ २ ॥ ब्रह्माभेदयोग्यप्रत्यक्स्वरूपस्य मानांतरागोचरत्वे फलितमाह *अत इति ।

अतो ब्रह्मत्वयोग्यस्य प्रतीचोऽत्र बुभुत्सया ॥
अनूद्य ब्रह्मतामादौ तदर्थं परिपृच्छति ॥ ३ ॥

श्रुतिः—अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वांतरो यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानति स त आत्मा सर्वान्तरो यो व्यानेन व्यानिति स त आत्मासर्वान्तरो य उदानेनोदानिति स त आत्मा सर्वान्तर एष त आत्मा सर्वान्तरः ॥ १ ॥

वार्त्ति०–यत्साक्षादपरोक्षं स्याद्ब्रह्म तद्रूपतामयम् ॥
अर्हेत् सर्वान्तरस्तादृग्य आत्मा ब्रूहि तं मुने ॥ ४॥
साक्षादिति पदेनात्र व्यवधानं निवार्यते ॥
स्वर्गलोकादिवद्ब्रह्म नातो देशान्तरादिगम् ॥ ५ ॥
अगौणताऽपरोक्षार्था ब्रह्मत्वस्य विवक्षिता ॥

---

*पृच्छतीति । चक्रायणस्यापत्यं चाक्रायणः उषस्तिरिति नामतः सः पप्रच्छेत्यर्थः ॥ ३ ॥

प्रश्नवाक्यं योजयति *यदिति । यद्ब्रह्म उपनिषत्सु प्रसिद्धं तदभेदयोग्यो यस्त्वमर्थस्तं ब्रूहीत्यर्थः ॥ ४ ॥ प्रश्नवाक्यस्थं साक्षादितिपदं व्याचष्टे *साक्षादिति । साक्षात्पदेन व्यवधाने निवारिते अर्थसिद्धमर्थमाह *स्वर्गेति ॥ ५ ॥ अपरोक्षादित्यस्यार्थमाह *अगौणतेति । तेन सिद्धमर्थमाह *नामेति । नाम ब्रह्मेत्यादौ नामादौ ब्रह्मत्वं यथा गौणं नैवं

नामादेरिव नो गौणं ब्रह्मत्वं प्रत्यगात्मनः ॥ ६ ॥
आविर्भावो ऽपरोक्षत्वं तच्चास्त्यव्यवधानतः ॥
स्वप्रकाशस्वभावत्वादिति वाऽर्थः पदद्वये ॥ ७ ॥
अव्यावृत्ताननुगतं वस्तु ब्रह्मगिरोच्यते ॥
अकारणमकार्यं तदित्यनेनोदितं भवेत् ॥ ८ ॥
अपुमर्थमिदं प्राप्तं न चेदात्मैव तद्भवेत् ॥
यतोऽत आत्मरूपार्थं य आत्मेति विशेष्यते ॥ ९ ॥
सजातीयविजातीयाद्वितीयार्थनिवृत्तये ॥
सर्वान्तर इति प्राह सार्वात्म्यं तेन सिध्यति ॥ १० ॥
सार्वात्म्यं ब्रह्मणो योग्यं तच्च जीवात्मनीरितम् ॥

प्रतीच इत्यर्थः ॥ ६ ॥ अपरोक्षादित्यस्यार्थान्तरमाह *आवि-र्भाव इति । साक्षादित्यस्याप्यर्थान्तरमाह *अव्यधानत इति । घटादिवदन्तःकरणवृत्तिव्यवधानं विनेत्यर्थः । ब्रह्मणो व्यावृत्तिं विना स्फुरणमसिद्धम् इत्याशंक्यानुमानेन साधयति *तच्चा-स्तीति । अत्र हेतुः *स्वप्रकाशेति ॥ ७ ॥ ब्रह्मपदार्थमाह *अ-अव्यावृत्तेति । अव्यावृत्तपदेनाकार्यम्, अननुगतपदेन वस्तुतो ऽकारणमिति तत्रोक्तं भवतीत्यर्थः ॥ ८ ॥ यच्छब्दोपात्तं वि-शेष्यं य इत्यनूद्यात्मेति विशेष्यतेऽस्याभिप्रायमाह *अपुम-र्थमिति । नहि स्वर्गादेरात्यंतिकपुमर्थत्वमतो यथोक्तब्रह्मात्मेति निश्चयेन तस्यानतिशयपुमर्थत्वनिर्धारणायात्मविशेषणमित्य-र्थः ॥ ९ ॥ विशेषणान्तरव्यावर्त्यमाह *सजातीयेति ॥ सर्वान्त-रत्वं सर्वप्रपञ्चाधिष्ठानत्वं कल्पितस्याधिष्ठानापरिच्छेदकत्वादद्वि-तीयत्वेन सर्वात्मत्वं सिध्यतीत्यर्थः ॥ १० ॥ उक्तमर्थं

मुख्यापरोक्ष्यं जीवस्य योग्यं ब्रह्मणि वर्णितम् ॥११॥
अभेदो वास्तवो जीवब्रह्मणोर्व्यत्ययादतः ॥
विवक्षितस्तत्प्रसङ्गाद्यादिव्यामोह आर्थिकः ॥ १२ ॥
आत्मनो ब्रह्मता मुख्या ब्रह्मणोऽप्यात्मता तथा ॥
प्रत्यग्दृष्ट्या पराग्दृष्ट्या मिथो ब्रह्मात्मनोर्भिदा ॥१३॥
ब्रह्मत्वमात्मनो रूपं तमसा तत्तिरोहितम् ॥
आत्मत्वं ब्रह्मणोऽप्येवं ततो जीवेशभेदधीः ॥ १४ ॥
तमसो बोधविध्वंसे अब्रह्मानात्मताहतेः ॥
प्रत्यङ्मात्रावशेषत्वात्स्यामपूर्वादिमानहम् ॥ १५ ॥
अमूढो याज्ञवल्क्योऽत्र प्रत्यग्दृष्ट्या परामृशन् ॥
प्रत्याहैष त आत्मेति तं सर्वान्तरमद्वयम् ॥ १६ ॥
मुख्यापरोक्षोऽयं प्रत्यक् स्वप्रकाशोऽवभासते ॥

संक्षिप्याह *सार्वात्म्यमिति ॥ ११ ॥ सार्वात्म्यमापरोक्ष्यं च तत्त्वंपदार्थयोरसाधारणधर्मव्यत्यासेन वदतः कोऽभिप्राय इत्याशंक्य परमतात्पर्यमाह *अभेद इति । आवान्तरतात्पर्यमाह *तदिति ॥ १२ ॥ जीवेशयोः वास्तवाभेदः कथं, भेदधीविरोधादित्याशंक्य ब्रह्मात्मपदयोः सामानाधिकरण्येन वास्तवाभेदे सिद्धे प्रत्यक्षादिधीः कल्पितभेदविषयेत्याह *आत्मन इति ॥ १३ ॥ असतोऽपि भेदस्य प्रतीतौ हेतुमाह *ब्रह्मत्वमिति ॥ १४ ॥ द्वयोरज्ञानमात्रव्यवहितत्वे फलितमाह *तमस इति । अपूर्वादिमान्–कारणादिविलक्षण इति यावत् ॥ १५ ॥ एवं प्रश्नतात्पर्यमुक्त्वा प्रत्युक्तितात्पर्यमाह *अमूढ इति ॥ १६ ॥ तत्र एषपदार्थमाह *मुख्येति । नन्वक्षसन्निकृष्टस्यैवेतत्पदवाच्यत्वात्कथं प्रतीचि तत्प्रयोगस्तत्राह *वि-

एतच्छब्देन तं प्राह विस्पष्टत्वविवक्षया ॥ १७॥
अन्तर्मुखस्य विस्पष्टो नायं सन्देहगोचरः॥
इत्यभिप्रेत्य तत्प्रश्ने बहुमानं तु नाकरोत् ॥ १८ ॥
षष्ठ्यन्तस्य त इत्यस्य युष्मदूबुद्ध्युपलक्षितम् ॥
देहादिसर्वमाव्योम्नो दृश्यमर्थो विवक्षितः ॥ १९ ॥
आत्मेति च प्रमात्रादेः स्वरूपमभिधीयते ॥
प्रमात्राद्यागमापायसाक्षित्वात्तत्स्वरूपता ॥ २० ॥
यद्यस्मिन्व्यभिचार्येत तत्स्वरूपं न कुत्रचित् ॥
कुण्डलित्वं यथा पुंसः, साक्षी त्वव्यभिचारवान् ॥२१॥
व्यभिचारो मिथो यद्वत्प्रमात्रादेः ससाक्षिकः ॥
साक्षिणोऽव्यभिचारस्तु तथा किंसाक्षिको भवेत ॥२२॥

स्पष्टत्वेति ॥ १७ ॥ नन्वतिसूक्ष्मप्रश्ने कृतेऽपि मुनिः किमिति नाभ्यनंदत्तत्राह *अन्तरिति ॥ १८ ॥ एष त इत्यत्र त इतिषष्ठ्यंतपदप्रकृत्यंशे तत्सर्वं दृश्यं लक्ष्यत इत्याह *षष्ठ्यंतस्येति ॥ १९ ॥ आत्मशब्दार्थमाह *आत्मेति । प्रमात्रादेः कल्पनाधिष्ठानं तस्य वास्तवं रूपमात्मेत्यर्थः । तस्य मात्रादिस्वरूपत्वे हेतुमाह *प्रमात्रादीति ॥ २० ॥ मात्राद्यधिष्ठानस्यैवात्मत्वमुक्तं व्यक्तीकुर्वन् मात्रादेरनात्मत्वं दृष्टान्तेन साधयति *यदिति । यस्मिन्नधिष्ठाने सत्येव यद्वस्तु तेन वियुज्यते तत्तस्याधिष्ठानस्य स्वरूपं न भवतीत्यर्थः । साक्षिणोऽपि प्रतिदेहं व्यभिचारादनात्मत्वमाशंक्य हेत्वासिद्धिमाह *साक्षीति ॥ २१ ॥ तदेव व्यनक्ति *व्यभिचार इति । यथा मात्रादिकं तदभावश्च साक्षी पश्यन्नास्ते, तद्वत्साक्षिणो ऽभावं कश्चिन्न पश्यत्यतो न तस्य प्रतिदेहं भेदस्तस्यापि साक्षित्वा-

आत्मात्मवत्त्वसम्बन्धः षष्ठ्योक्तो जगदात्मनोः ॥
स्वतो निरात्मकं दृश्यमात्मना सात्मतां व्रजेत् ॥२३॥
आत्मा सर्वस्वरूपत्वात्सर्वान्तरगिरेरितः ॥
सर्पधारादिकल्पेषु रज्जोरान्तरता यथा ॥ २४ ॥
आत्मनोऽनवशेषेण तदन्यार्थाभिसङ्गतेः ॥
प्रत्यङ्मात्रतयैवावबोधादात्मनि लीयते ॥ २५ ॥
अतः सर्वान्तरत्वेन सर्वात्मत्वं विवक्षितम् ॥
न सर्वेष्वन्वयो यस्मादन्वयादि न चात्मनि ॥ २६ ॥
व्यतिरेकान्वयाभावाः कार्यकारणवस्तुनि ॥
अकारणमकार्यं तद्व्यतिरेकादिभाक्कथम् ॥ २७ ॥
अन्वेति सर्वकार्येषु कारणं तन्तवो यथा ॥

दिति भावः ॥ २२ ॥ एष त इत्यत्र तच्छब्दार्थः पूर्वमुक्तः, इदानीं षष्ठ्या विवक्षितं सम्बन्धमाह *आत्मेति । यथा जगदात्मनोराध्यासिकः सम्बन्धः षष्ठ्यर्थ इति भावः ॥ २३ ॥ आत्मा सर्वान्तर इत्यत्र सर्वान्तरत्वं सदृष्टान्तमाह *आत्मेति ॥ २४ ॥ सर्वात्मत्वेन चेदात्मा सर्वांतरस्तर्हि सर्वेष्वनुस्यूतत्वं सर्वात्मत्वमिति द्वैतापत्तिरित्याशंक्य विवक्षितं सार्वात्म्यमाह *आत्मन इत्यादिना । कल्पितं सर्वमधिष्ठानेन व्याप्तं सदधिष्ठानज्ञानेन तन्मात्रतया ऽवशिष्यते इति कृत्वाऽऽत्मनः सर्वात्मत्वमुक्तं नतु सर्वान्वयित्वेन, तस्मिन्नन्वयस्य व्यतिरेकस्य वाऽयोगादित्यर्थः ॥ २६ ॥ आत्मन्यन्वयाद्ययोगमेवाह *व्यतिरेकेति । व्यतिरेकोऽन्वयोऽभावश्चेति तथोक्तः। अभावशब्दः प्रागभावादिपरः । एते कार्यकारणसम्बन्धिनस्तद्विलक्षणब्रह्मणि न सम्भवन्तीत्यर्थः ॥ २७ ॥ कारणादीनामेवा-

व्यतिरेकस्तु कार्यस्य स्पष्टः कार्यान्तरात्मनः ॥ २८ ॥
प्रध्वंसप्रागभावौ च कार्याणां सर्वसम्मतौ ॥
आत्मनः सत्स्वभावत्वादभावः शङ्क्यतेऽपि न ॥२९॥
प्रत्यक्तया समाप्तत्वात्प्रतीचोऽन्यस्य वस्तुनः ॥
व्यतिरेकैकरूपस्य व्यतिरेको न लभ्यते ॥ ३० ॥
सर्वस्वरूपभूतस्य कुत्रान्वय इतीर्यताम् ॥
तस्मात्सार्वात्म्यमेवेह वक्ति सर्वान्तरोक्तितः ॥३१॥
इत्थं स्वानुभवाद्याज्ञवल्क्यः सर्वान्तरं जगौ ॥
अन्यः संशयमापद्य जिगीषुः परिपृच्छति ॥ ३२ ॥
तवात्मेत्युत्तरं दत्तं ममात्माऽत्र त्रिधेक्ष्यते ॥
देहो लिङ्गं च साक्षीति तेषु सर्वान्तरोऽत्र कः ॥३३॥
सर्वान्तरत्वं दुःसाध्यमल्पयोर्देहलिङ्गयोः ॥
सद्भावेऽन्यस्य किं मानमप्रमेयस्य साक्षिणः ॥ ३४ ॥

न्वयादिमत्त्वमुक्तमुदाहरणेन स्पष्टयति *अन्वेतीत्यादिना । तत्र प्रागभावादेरात्मनि प्रसक्तिरेव नास्तीत्याह *आत्मन- इति ॥ २८ ॥ २९ ॥ प्रपञ्चव्यतिरेकात्मनः प्रतीचो व्यतिरेकोऽपि दुर्लभ इत्याह *प्रत्यक्तयेति ॥ ३० ॥ आत्मव्यतिरिक्तस्य निःस्वरूपत्वात्तत्रात्मनो वास्तवान्वयोऽपि न घटत इत्याह *सर्वेति । आत्मनोऽन्वयाद्ययोगे फलितमाह *तस्मादिति ॥ ३१ ॥ एष इत्यादेरर्थमनुवदन्कतम इत्यादिप्रश्नमवतारयति *इत्थमिति ॥ ३२ ॥ संशयमेव स्फोरयति *तवेति ॥ ३३ ॥ तेषु यः सर्वात्मत्वयोग्यः स सर्वान्तर इत्याशङ्क्य तर्हि परिशेषात्साक्षीति वाच्यः स चासिद्धो मानागोचरत्वादित्याह *सर्वेति ॥ ३४ ॥ यः

एवं पृष्टः स्वानुभूतौ वादिनोऽनधिकारिताम् ॥
मत्वाऽनुमानतः सत्तामात्मनः प्रत्यपादयत् ॥ ३५ ॥
स्वप्रभे मानवैफल्यादप्रमेयत्वमिष्यते ॥
वादिभ्रान्तिनिवृत्त्यर्थं मानोक्तौ हीयतेऽत्र किम् ॥ ३६ ॥
प्राणादिकरणैश्चेष्टा कर्तृपूर्वा क्रियात्वतः ॥
छिदिक्रियावत्कर्तृत्वं न युक्तं देहलिङ्गयोः ॥ ३७ ॥
करणप्रेरकः कर्ता करणैः प्रेर्यते वपुः ॥
लिङ्गं तु करणात्मत्वान्नैवं कर्तृत्वमर्हति ॥ ३८ ॥
मुखसंचारिणा जाग्रद्यः प्राणेनानितीक्षिता ॥
सर्वप्रत्यक्तमः सोऽयमात्मा सर्वान्तरावधिः ॥ ३९ ॥
सुप्तेऽस्मिन्करणग्रामे यो सुप्तो ऽलुप्तदृष्टिकः ॥
सर्वान्सवासनारूपान्पश्यन्प्राणिति वायुना ॥ ४० ॥
स्पष्टेषु बहुलिङ्गेषु मानाभावमचूचुदः ॥
इत्युपालब्धये लिङ्गान्यपानादीन्युदाहरत् ॥ ४१ ॥

प्राणेनेत्यादिप्रत्युक्तिमादत्ते *एवमिति ॥ ३५ ॥ अप्रमेये प्रतीचि कथमनुमानोपन्यासस्तत्राह *स्वप्रभ इति ॥ ३६ ॥ य इत्याहिश्रुतिसूचितानुमानप्रकारमाह *प्राणादीति । पञ्च-वृत्तिप्राणेन चक्षुरादिकरणैश्च जायमाना देहचेष्टाऽत्र पक्षः । उ-क्तानुमानस्य स्थूललिंगदेहाभ्यामर्थान्तरत्वं निरस्यति *क-र्तृत्वमित्यादिना ॥ ३७ ॥ ३८ ॥ प्रतिवचनस्याभिप्रायमुक्त्वा प्राणं व्याचष्टे *मुखेति । प्राणितीत्यस्य व्याख्याऽनितीति । यः साक्षी प्राणं व्यापारवन्तं करोतीत्यर्थः ॥ ३९ ॥ य इतिपदं जाग्र-त्साक्षीपरतया व्याख्याय स्वप्नादिसाक्षीपरत्वेनापि व्याचष्टे *सुप्त इति ॥ ४० ॥ एकेनैव लिङ्गेन विवक्षितसिद्धेः किमपा-

एकादशेन्द्रियोत्पन्नचेष्टानामुपलक्षणम् ॥
प्राणाद्युदाहृतिस्तेन लिङ्गानां बहुता स्फुटा ॥ ४२ ॥
प्राणादिकार्यकरणः स्वतो ऽसंहत एकलः ॥
तच्चेष्टां कुरुतेऽकुर्वन्नयस्कान्तो मणिर्यथा ॥ ४३ ॥
रथादौ नियता चेष्टा चेतनेनानधिष्ठिते ॥
न दृष्टा, चेतनस्तेन प्राणादीनां प्रवर्त्तकः ॥ ४४ ॥

श्रुतिः–स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व इत्येवमेवैतद्व्यपदिष्टं भवति यदेव साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरः ॥

वार्त्ति॰ ससूत्रदारुयन्त्रेण सदृशं लिङ्गयुग्वपुः ॥
यः प्रेरयत्यसावात्मेत्युक्तेऽन्योऽपजहास तम् ॥४५॥
प्रतिज्ञाय पुरा साक्षाद्ब्रामहं दर्शयामि ते ॥

नेनेत्याद्यनेकलिङ्गेन ? तत्राह *स्पष्टेष्विति ॥ ४१ ॥ ४२ ॥ ननु प्राणनादिहेतुश्चेदात्मा संहतः, सक्रियश्च स्यात्तत्राह *प्राणादीति । चेष्टां कुरुते, चेष्टाहेतुरित्यर्थः । अकुर्वन्निति छेदः । सन्निधिमात्रेणान्यत्र क्रियाहेतुत्वे दृष्टान्तोऽयस्कान्त इति ॥ ४३ ॥ सङ्घातातिरिक्तचिदात्मैव नास्ति कुतस्तस्याक्रियत्वमित्याशङ्क्याह *रथादाविति । अचेतनप्रवृत्तिश्चेतनाधिष्ठानपूर्विका प्रवृत्तित्वाद्रथादिप्रवृत्तिवदित्यर्थः ॥ ४४ ॥ उक्तमर्थं संक्षिपन् यथेति प्रश्नमवतारयति *ससूत्रेति ॥ ४५ ॥ अपहासे हेतुं दर्शयन्प्रश्नवाक्यं व्याचष्टे *प्रतिज्ञायेति द्वाभ्याम् । तथा कर्तुं प्रत्यक्षयितुमिति यावत् । लिङ्गेन धावनादिनेत्यर्थः । दार्ष्टान्तिके लिङ्गेन

अशक्नुवंस्तथाकर्त्तुं लिङ्गेन प्रतिबोधयेत् ॥ ४६ ॥
यथा कश्चित्तथैव त्वं प्रतिज्ञाय पुराऽऽत्मनः ॥
अपरोक्षमनुक्त्वा तल्लिङ्गेनावेदयस्यहो ॥ ४७ ॥
लिङ्गं वाच्यं परोक्षार्थं न त्वात्मनि परोक्षता ॥
इति मत्वा हैवकारं पारोक्ष्यस्य निवर्त्तकम् ॥ ४८ ॥
मुख्यापरोक्ष्यमुक्तं त इति दर्शयितुं पुनः ॥
प्रत्यग्दृष्टिपरं वाक्यमुत्तरत्वेन वक्त्यसौ ॥ ४९ ॥
विद्वद्भाषामबुद्ध्वाऽन्यः सरूपादिष्विवात्मनि ॥
अक्षजन्यापरोक्षत्वं मत्वाऽपृच्छत्पुरेव तम् ॥ ५० ॥
दृष्टश्रुतमतज्ञातेष्वेषां सर्वान्तरस्तु कः ॥
दृष्ट्याद्यगोचरः प्रत्यागिति प्रश्नमपाकरोत् ॥ ५१ ॥

प्राणनादिनेत्यर्थः ॥ ४६ ॥ ४७ ॥

यथा कश्चिदसौ गौरिति प्रत्यक्षेन दर्शयिष्यामीत्युक्त्वा विब्रूयादन्यथैव लिङ्गेन ब्रूयादेवमेतदात्मस्वरूपं त्वया व्यपदिष्टमिति श्रुत्यक्षरार्थः ।

यदेवेत्यत्रावधारणतात्पर्यमाह *लिङ्गमिति । एवकारमाहेत्यर्थः ॥ ४८ ॥ एषत आत्मेति प्रतिवचनतात्पर्यार्थमाह *मुख्येति ॥ ४९ ॥ कतम आत्मेति पुनः प्रश्नस्य तात्पर्यमाह *विद्वदिति । सरूपादिष्विव घटादिष्विव ॥ ५० ॥ प्रश्नमुक्त्वा तदक्षराणि व्याकरोति *दृष्टेति । दृष्टश्रुतादिषु कतमः सर्वान्तरः ? सङ्घातादिवत्प्रत्यक्षतो दर्शयेत्यर्थः । आत्मनो विषयत्वेन प्रदर्शनमशक्यमिति न दृष्टेरित्यादिप्रत्युक्तितात्पर्यमाह *दृष्ट्यादीति ॥ ५१ ॥

दृष्ट्याद्यविषयत्वे कथमात्मसिद्धिस्तत्राह *नेमीति । शब्दादिवृत्तयस्तदभावश्च यत्कूटस्थस्य प्रसादात्सिध्यन्ति स्वमहिम्नैव

श्रुतिः—न दृष्टेर्द्रष्टारं पश्येः ॥

वार्ति०-वेद्मीति यद्बलाद्वक्ति न वेद्मीत्यपि यद्बलात् ॥
योगिनोऽनुभवन्त्येतमगोचरतयैव हि ॥ ५२ ॥
उक्तवर्त्मातिरेकेण नात्मवस्तु घटादिवत् ॥
शक्यते प्रतिनिर्देष्टुं प्रमाणागोचरत्वतः ॥ ५३ ॥
द्रष्टृदर्शनदृश्यानां साक्षिणः स्वप्रभस्य तत् ॥
प्रमाणागोचरत्वं तु वस्तुस्वाभाव्यतो भवेत् ॥ ५४ ॥
दृष्टेर्न पश्येर्द्रष्टारमिति प्रत्युत्तरं वचः ॥
वक्त्यगोचरतामेतद्वाक्यं व्याक्रियते स्फुटम् ॥ ५५ ॥
चक्षुर्जन्यमनोवृत्तिश्चिद्युक्ता रूपभासिका ॥
दृष्टिरित्युच्यते, द्रष्टा दृष्टेः कर्त्तेति लौकिकैः ॥ ५६ ॥
अतो दृष्टिद्वयं वाक्ये भाति षष्ठयन्तशब्दतः ॥
एका दृष्टिस्तृजन्तेन धातुना ऽन्येति तद्द्वयम् ॥ ५७ ॥

प्रथते विशुद्धमनसामित्यर्थः ॥ ५२ ॥ प्रत्यक्त्वेनाविषयतयैवात्मा ज्ञातव्य इत्युक्तमेवोपपादयति *आत्मेति ॥ ५३ ॥ तस्य प्रमाणागोचरत्वं वा कुतस्तत्राह *द्रष्टृीति ॥ ५४ ॥ प्रतिवचनतात्पर्यमुपसंहरन्नक्षरार्थं वक्तुं प्रतिजानीते *दृष्टेरिति ॥ ५५ ॥ अस्मिन्वाक्ये लौकिकी पारमार्थिकी चेति दृष्टिद्वयं प्रतीयत इति वक्तुं दृष्टिशब्दयोर्लोकसिद्धमर्थमाह *चक्षुरिति । कर्त्तेत्युच्यते इत्यनुषङ्गः ॥ ५६ ॥ एवं लौकिकप्रसिद्धौ फलितमाह *अत इति । एका वृत्तिरूपेत्यर्थः । द्रष्टारमित्यत्र तृजन्तेन धातुना, अन्या आत्मरूपा दृष्टिर्भातीत्यर्थः । दृष्टिद्वयसमर्थनमुपसंहरति *तद्द्वयमिति । तस्माद् द्वयमत्र भातीत्यनुषङ्गः॥५७॥ दृष्टेर्द्रष्टारमित्यत्र दृष्टेः कर्त्तारमित्येवार्थः, अतो नात्र दृष्टिद्वयं प्र-

भर्तृप्रपञ्चो व्याख्याति वाक्यं दृष्टिद्वयं विना ॥
दृष्टिः षष्ठ्यन्तशब्दोक्ता कर्तृमात्रं तृजन्ततः ॥ ५८ ॥
मैवं पदे तृजन्तेऽस्मिन्प्रकृतिप्रत्ययद्वयात् ॥
दृष्टितत्कर्तृसंसिद्धेः षष्ठ्यन्तस्यानपेक्षणात् ॥ ५९ ॥
अतो दृष्टिद्वयं वाच्यं नित्यानित्यविभेदि तत् ॥
मनोवृत्तिरनित्याऽन्या साक्षिचैतन्यरूपिणी ॥ ६० ॥
वृत्तिर्जडाऽप्यसावात्मचैतन्यच्छयया युता ॥
चैतन्यवद्भासकत्वाद् दृष्टिशब्दार्थतां व्रजेत् ॥ ६१ ॥
यत्सर्वव्यापिचैतन्यं तद्दृष्टिं व्याप्नुयात्तया ॥
दृष्ट्यैकतामुपगतमागन्तुकमिवेक्ष्यते ॥ ६२ ॥
व्याप्तत्वमेव द्रष्टृत्वं नाक्रिये द्रष्टृता स्वतः ॥
न धूमाग्न्योरिव व्याप्तिः किन्तु स्रक्सर्पयोरिव॥६३॥

तीयत इत्येकदेश्युक्तमनुवदति *भर्तृप्रपञ्च इति ॥ ५८ ॥ अस्मिन्पक्षे कर्त्तारमित्यस्य द्रष्टारमिति पदेनैव सिद्धेर्दृष्टेरितिपदं निरर्थकं स्यादिति दूषयति *मैवमिति ॥ ५९ ॥ स्वमतमुपसंहरन्दृष्टिद्वयं विभजते *अतइति ॥ ६० ॥ जडाया वृत्तेः कथं दृष्टिपदवाच्यत्वं ? तत्राह *वृत्तिरिति ॥ ६१ ॥ साक्षिचैतन्यस्य नित्यत्वे "इदानीमीक्षते" इति तत्रागन्तुकत्वधीर्न स्यात्तत्राह *यदिति। दृष्टिं बुद्धिवृत्तिम् ॥ ६२ ॥ नन्वात्मनो नित्यदृष्टिरूपत्वे द्रष्टेति व्यपदेशः कथं सिद्ध्येत्, दर्शनक्रियाकर्त्तुरेव द्रष्टृत्वात्तत्राह *व्याप्तत्वमिति । ननु वृत्तिव्याप्तत्वं चेद् द्रष्टृत्वं तर्हि व्यापकं विना तन्निरूपितव्याप्त्याश्रयस्यात्मनोऽवस्थानं न स्यात्तत्राह *नेति ॥६३॥ लोके व्याप्तिर्द्विधा मुख्या गौणी च। तत्राद्या व्याप्यव्यापकयोस्तादात्म्यरूपा । द्वितीया

कार्त्स्न्येन यत्र वृत्तिः स्याद्व्याप्यव्यापकवस्तुनोः ॥
व्याप्तिस्तत्रैव मुख्या स्यात्स्रग्जसर्पादिवस्तुवत् ॥६४॥
देशकालादिसम्भेदादसाधारणतत्त्वयोः ॥
व्याप्तिर्न मुख्या धूमाग्न्योर्हिमवह्निध्ययोरिव ॥ ६५ ॥
क्रियाकारकरूपा धीरक्रियाकारकात्मना ॥
व्याप्त्यैव जायते कुंभ आकाशेन यथा तथा ॥ ६६ ॥
व्याप्या दृष्टिर्जन्मवत्त्वादनित्याऽव्यापिका त्वियम् ॥
कूटस्थत्वेन साक्षित्वान्नित्या जन्मादिवर्जनात् ॥६७॥
कूटस्थदृष्टिस्तन्मोहो दृष्ट्याभासं च तत्त्रयम् ॥
साक्षी सर्वजगद्धेतुर्नियन्तेति च भण्यते ॥ ६८ ॥
कूटस्थदृष्टेः साक्षित्वं स्वमोहाभासवर्त्मना ॥
साक्ष्येणार्थेन सम्बन्धात्सिध्यत्येव स्वतो नतु ॥ ६९ ॥

स्त्वत्यन्तभिन्नयोर्देशाद्यभेदनिबन्धना । तथाच प्रकृते मुख्यैव सा विवक्षितेति वक्तुं व्याप्तिद्वयं क्रमेणोदाहरति *कार्त्स्न्येनेत्यादिना ॥ ६४ ॥ ६५ ॥ तत्राक्रियस्याप्यात्मनो मुख्या व्याप्तिरुपपद्यते इति सदृष्टान्तमाह *क्रियेति ॥ ६६ ॥ एवं दृष्टिद्वयं साक्षिणो द्रष्टृत्वं चोपपाद्य "नित्यानित्याविभेदि तव"इत्युक्तमुपपादयति *व्याप्येति । परिच्छिन्नेत्यर्थः । जन्माभावे हेतुः *साक्षित्वादिति । तस्य विकारित्वं व्यावर्त्तयति *कूटस्थत्वेनेति । तत्र साक्षित्वं कल्पितमिति भावः ॥ ६७ ॥ साक्षित्वमपि कारणत्वादिवद्वास्तवमेवास्तु तत्राह *कूटस्थेति । त्रयं मिथो गुणप्रधानत्वेन त्रिधोच्यते, तथाच कारणत्वादि चाविद्यमिति भावः ॥ ६८ ॥ अविकारिणोऽपि साक्षित्वमाह *कूटस्थेति । सम्बन्धादेवेत्यन्वयः ॥६९॥ अनित्यदृष्टिव्यतिरेकेणोक्तसाक्षिणि

व्यावृत्तत्वेन मात्रादेः सिद्धः साक्षी सुषुप्तगः ॥
नावेदिषं सुषुप्तोऽहमिति धीर्नान्यथा भवेत् ॥ ७० ॥
बुध्यादेः प्रविलीनत्वाद्देहादेश्च जडत्वतः ॥
लोष्ठादेरिव नैव स्यान्नाज्ञासिषमितीक्षणम् ॥ ७१ ॥
प्रत्यक्साक्ष्यतिरेकेण नाभावोऽपि प्रसिध्यति ॥
किमु भावो जगत्यस्मिन्साक्षी चानन्यसिद्धिकः॥७२॥
शून्यस्यापि हि शून्यत्वं तत्साक्षिणि सतीक्ष्यते ॥
असाक्षिकं चेत्तत्सिद्धं साक्षिवत्स्यात्स्वयम्प्रभम्॥७३॥
न देशकालावस्थादेरपेक्षा साक्षिसिद्धये ॥
देशादेः साक्ष्यपेक्षत्वात्स्वतः सिध्यति साक्ष्यतः॥७४॥
जन्मनाशादिसाक्षित्वाज्जन्मनाशादिवर्जिता ॥
साक्षिदृष्टिरियं नित्या मोहजन्या तथेतरा ॥ ७५ ॥

मानाभावमाशङ्क्यानुभवेन साधयति *व्यावृत्तत्वेनेति ॥ ७० ॥ उक्तमेव व्यनक्ति *बुध्यादेरिति । न देहद्वयकृतं सौषुप्तज्ञानमित्यत्र हेत्वन्तरमाह *देहादेश्चेति । अतः सौषुप्तनित्यानुभवाभावे परामर्शासिद्धिरिति फलमाह *नैवेति ॥ ७१ ॥ किञ्च शून्यवादिभिरपि तत्सिद्धये साक्ष्यभ्युपेयः किमु वक्तव्यमितरैरित्याह *प्रत्यगिति । *आभावोऽपीति । शून्यमपीत्यर्थः ॥७२॥ शून्यसिद्धेः साक्ष्यधीनत्वमाह *शून्यस्येति । साक्षिणं विना शून्यासिद्धिस्तस्य स्वप्रकाशत्वे च नाममात्रे विवाद इति भावः ॥७३॥ एवं नित्यानुभवं प्रसाध्य स्वतःसिद्धत्वं साधयति *नेति ॥७४॥ साक्षिनित्यत्वमुपसंहरति *जन्मेति । अनित्यदृष्टिस्वरूपमाह- *मोहेति ॥ ७५ ॥ मोहदृष्ट्युत्पत्तिप्रकारं दर्शयति *अविचारितेति ॥ अनिर्वचनीयं साभासमज्ञानं साक्षिसन्निधिमात्रेण

अविचारितसंसिद्धिर्मोहोऽयं साक्षिसन्निधेः ॥
साभासो मातृमानादिर्भवेद्धर्माद्यपेक्षया ॥ ७६ ॥
स्मृतिनिश्चयसन्देहरागद्वेषादिवृत्तिषु ॥
अहंरूपेण योऽन्वेति स प्रमाताऽसत्यनित्यचित् ॥७७॥
स्मराम्यहं निश्चिनोमि संशये रागवानिति ॥
अहंरूपान्वयः स्पष्टः कर्त्ता भोक्ताऽप्यसौ भवेत् ॥७८॥
प्रत्यङ्मोहोत्थबुध्यादिर्जडरूपप्रधानतः ॥
कर्त्तृता भोक्तृता त्वस्य चिदाभासप्रधानतः ॥ ७९ ॥
प्रमातुर्जायते वृत्तिश्चक्षुषा रूपरञ्जिता ॥
द्रष्टव्यं तु तया रूपं न साक्षी दृश्यते तया ॥ ८० ॥
दृष्टेर्द्रष्टारमात्मानं दृष्ट्या पश्येन्न दृश्यया ॥
इति वाक्यं मुनिर्वक्ति वर्णितन्यायगर्भितम् ॥८१॥
येन चक्षुरिदं दृष्टं चक्षुषा यं न पश्यति ॥

प्रमातृद्वारा ज्ञानाद्याकारेण परिणमत इत्यर्थः । तत्र निमित्तमाह *धर्मेति ॥ ७६ ॥ कोऽसौ माता यद्द्वारा ज्ञानादिपरिणामास्तत्राह *स्मृतीति । वृत्तिमदन्तःकरणावच्छिन्ना चित्प्रमातेत्यर्थः ॥७७॥ वृत्तिष्वहमर्थस्यान्वयेऽनुभवं प्रमाणयति *स्मरामीति । कर्तृत्वादिधर्मोऽपि प्रमातुरेवेत्याह *कर्त्तेति ॥ ७८ ॥ कर्तृत्वादेर्जडधर्मत्वे दुःखादिभोगस्य चेतनधर्मत्वानुभवो न स्यात्तत्राह *प्रत्यङिति । तथाच प्रमातुर्जडाजडस्वरूपत्वात्कर्तृताया जडप्रधानत्वेऽपि भोक्तृत्वस्य चित्प्रधानत्वान्नोक्तदोष इति भावः ॥ ७९ ॥ अनित्यदृष्टिनिरूपणमुपसंहरति *प्रमातुरिति ॥ ८० ॥ वाक्यार्थमाह *दृष्टेरिति ॥ ८१ ॥ द्रष्टुर्दृश्यज्ञानाविषयत्वे श्रुत्यन्तरं संवादयति *येनेति

ब्रह्म विद्धि तदेव त्वामिति श्रुत्यन्तरे स्फुटम् ॥ ८२ ॥
श्रुतिः-न श्रुतेः श्रोतारꣳ शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः । एष त आत्मा सर्वान्तरोऽतोऽन्यदार्त्तं ततो होषस्तश्चाक्रायण उपरराम॥२॥

इत्युपनिषदि चतुर्थं ब्राह्मणं समाप्तम् ॥

वाः-श्रुतिः श्रोतृजधीवृत्तिस्तस्याः श्रोताऽवभासकः ॥
श्रुत्या शब्दावगाहिन्या श्रोतारं शृणुयान्न तम् ॥८३॥
ऊहापोहात्मधीवृत्तिर्मतिस्तस्याः प्रकाशकम् ॥
अनूह्यमनपोह्यं तं न मन्वीथास्त्वमेनया ॥ ८४ ॥
अस्पष्ट ऊह्य आत्मा तु विस्पष्टो भानरूपतः ॥
अनपोह्योऽनुपाधित्वादात्मा नापैति कर्हिचित् ॥८५॥
निश्चयात्मकधीवृत्तिर्विज्ञातिस्तद्विभासकम् ॥
असंदिग्धं तया वृत्त्या न विज्ञातुं त्वमर्हसि ॥ ८६ ॥
दृष्टश्रुतमतज्ञातेष्वितथमात्मा न कश्चन ॥
किं तर्ह्येष तवात्मेति प्रोक्तः प्रत्यक्तया पुरा ॥ ८७ ॥
यः सर्वं विषयीकुर्वन्विषयी क्रियते नहि ॥

॥८२॥ न दृष्टेर्द्रष्टारं पश्येरित्येतद्विस्तरतो व्याख्याय न श्रुतेरित्यादेरर्थमाह *श्रुतिरिति ॥८३॥ न मतेरित्यादेरर्थमाह *ऊहेति । ॥ ८४ ॥ आत्मनोऽनूह्यत्वमुपपादयति *अस्पष्ट इति । त्वादिरिति शेषः । आत्मा ऊहात्मकधीवृत्तिगोचरो न भवति स्पष्टत्वादालोकवदित्यर्थः । हेत्वसिद्धिमुद्धरति *भानेति । अनपोह्यत्वं साधयति *अनपोह्येति ॥ ८५ ॥ न विज्ञातेरित्यादेरर्थमाह*निश्चयेति ॥ ८६ ॥ एष त इत्यादिवाक्यस्य व्यावर्त्याशङ्कामाह *दृष्टेति । तदुत्तरत्वेन वाक्यं व्याचष्टे* प्रोक्त

किन्तु भाति स्वयं सोऽयं सर्वान्तर इतीरितः ॥८८॥
सर्वान्तरत्वं सार्वात्म्यमन्यस्मिन् सति तत्कुतः ॥
न चेदन्यत्तदा सर्वशब्दार्थो नेति शङ्किते ॥ ८९ ॥
अतोऽन्यदार्तमित्याह दोषद्वयनिवृत्तये ॥
आरोपितप्रपञ्चस्य तत्त्वज्ञानेन पीडनात् ॥ ९० ॥
सर्पादीनां कल्पितानां रज्जुरात्मा यथा तथा ॥
मायामयस्य सर्वस्य चिद्वस्त्वात्मेति सुस्थितम् ॥९१॥

इति वार्त्तिकसारे तृतीयाध्यायस्य चतुर्थं ब्राह्मणं समाप्तम् ॥ ४ ॥

पञ्चमब्राह्मणे ब्रह्मबोधसंसिद्धिसाधनम् ॥
समुत्पन्ने तत्त्वबोधे मुक्तलक्ष्म च वर्ण्यते ॥ १ ॥
कहोलोषस्तयोः प्रश्ने पौनरुक्त्यं निवर्तयन् ॥
जीवात्मपरमात्मानौ भिन्नावित्याह कश्चन ॥ २ ॥

इति ॥ ८७॥ उक्तमेव स्मारयति *न इति ॥ ८८ ॥ अतोऽन्यद् इत्यादेः पातनिकामाह* सर्वेति ॥ ८९ ॥ तत्र वाक्यं पातयति *अतोऽन्यदिति । चितोऽन्यद्विनाशीति श्रुत्यर्थः ॥९०॥ ज्ञानानन्तरं द्वैतनिवृत्तावपि तत्पूर्वं तत्सत्त्वात्तदा कथं सर्वात्मत्वं तदाह *सर्पेति । कल्पितस्याधिष्ठानापरिच्छेदकत्वादिति भावः ॥ ९१ ॥

इति वार्त्तिकसारटीकायां चतुर्थब्राह्मणं समाप्तम् ॥

उत्तरब्राह्मणतात्पर्यमाह *पञ्चमेति । ब्रह्म च तद्बोधसिद्धिसाधनं चेत्यर्थः । लक्ष्म लक्षणम् ॥ १ ॥ स्वाभिप्रेतां सङ्गतिं वक्तुं भर्तृप्रपञ्चोक्तां तामाह *कहोलेति ॥ २ ॥ प्रश्नयोर्विषयभेदमुक्त्वा पञ्चमाध्यायशेषस्य कहोलप्रकरणै-

कहोलब्राह्मणोक्तोऽयमापञ्चमसमाप्तितः ॥
अशनायादिरहितः परमात्मा प्रपञ्च्यते ॥ ३ ॥
उषस्तब्राह्मणोक्तस्तु जीवात्माऽयं परेण सः ॥
षष्ठाध्यायेन सर्वेण प्रपञ्च्यत इति स्थितिः ॥ ४ ॥
मैवं प्रश्नस्य साम्येन प्रयुक्तेश्च समत्वतः ॥
आत्मद्वयासम्भवाच्च न जीवपरयोर्भिदा ॥ ५ ॥
साक्षादित्यादिकः प्रश्नो द्वयोरेकविधस्तथा ॥
प्रत्युक्तिश्चैव इत्यादिस्तत्रार्थो भिद्यते कुतः ॥ ६ ॥
एकेनैवात्मना देहे सात्मके सति यः पुनः ॥
द्वितीय आत्मा किं तेन तस्मादात्मद्वयं न हि ॥ ७ ॥
पृष्टो देहविभेदेन यद्यात्मा भिद्यते तदा ॥
सर्वान्तरत्ववचनं द्वयोरपि विरुध्यते ॥ ८ ॥
उषस्तपृष्टादन्यत्वं निवर्त्तयितुमात्मनः ॥
य एव साक्षादित्युक्तावेवकारः प्रयुज्यते ॥ ९ ॥
उपदेशस्य विषयस्त्वमर्थः शोधितः पुरा ॥

कवाक्यतामाह *कहोलेति ॥ ३ ॥ षष्ठाध्यायस्योषस्तप्रश्ने- नैकवाक्यतामाह* उषस्तेति ॥ ४ ॥ ब्राह्मणद्वये इत्यर्थ- द्वयं विवक्षितमित्येतदयुक्तमिति दूषयति* मैवमिति ॥ ५ ॥ हेतुत्रयं क्रमेणाह *साक्षादिति ॥ ६ ॥ ७ ॥ उषस्तकहो- लयोश्च सङ्घातभेदादात्मभेदं शङ्कित्वा परिहरति* पृष्ट इति । सङ्घातविशिष्टयोः परिच्छिन्नत्वाद्द्वयोः सार्वात्म्यायोगाच्चेति भा- वः ॥ ८ ॥ किंच यदेवेत्येवकारप्रयोगादपि प्रश्नद्वयविषयस्य न भेदशङ्कावकाश इत्याह* उषस्तेति ॥ ९ ॥ परोक्तसङ्गतिं निरस्य स्वाभिमतं तावत्प्रश्नवाक्यमवतारयति* उपदेशस्येति ॥ पू-

न ब्रह्मत्वं सम्यगुक्तमिति पृच्छति तत्पुनः ॥ १० ॥

श्रुतिः—अथ हैनं कहोलः कौषीतकेयः पप्रच्छ याज्ञवल्क्येति होवाच यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः। कतमो याज्ञवल्क्य सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति ॥

वा०—अशनायादिरहितब्रह्मताया अभाषणे ॥
न स्यात्सर्वान्तरत्वादि संसारिणि चिदात्मनि ॥ ११ ॥
इत्यभिप्रेत्य तेनोक्तं साक्षादित्यादिकं पुनः ॥
अनूद्य सर्वं पप्रच्छ कहोलो ब्रह्मरूपताम् ॥ १२ ॥
त्वमर्थाच्छोधितान्नान्यद्ब्रह्मेत्येतद्विवक्षया ॥
उक्तमेवोत्तरं भूय एष इत्याद्यवोचत ॥ १३ ॥

वैत्र त्वमर्थः प्राधान्येनोक्तः, तस्य प्राधान्येन ब्रह्मत्वप्रतिपादनार्थं कहोलप्रश्न आरभ्यत इत्यर्थः ॥ १० ॥

कहोल इति नामतः, कुषीतकस्यापत्यं कौषीतकेयः स पप्रच्छेति श्रुत्यर्थः ॥

आत्मनो ब्रह्मत्वमत्र प्रतिपिपादयिषितं चेत्तदेव प्रश्नपूर्वकं प्रतिपाद्यतां, किं यत्साक्षात्सर्वविशेषणस्य पुनः कथनेनेत्याशङ्क्याह* अशनायेति। अशनायादिरहितं स्वप्रकाशं यत्सर्वात्मकं ब्रह्म तदभेदयोग्यजीवस्वरूपनिर्धारणायैषस्तेनोक्तं साक्षादित्यादिसर्वविशेषणमर्थवदित्युक्तम्, अत्रापि तादृशजीवस्वरूपस्य ब्रह्मत्वनिर्धारणाय सर्वं विशेषणमनूद्यत इत्यर्थः ॥ ११ ॥ १२ ॥ ननु तत्पदार्थे पृष्टे एष त इत्यादिना त्वमर्थमेव तदुत्तरत्वेन वदतः कोऽभिप्रायस्तत्राह *त्वमिति

क्षुत्पिपासे शोकमोहौ जरामृत्यू इतीदृशैः ॥
त्रिभिर्युग्मैर्विशिष्टानां मध्येऽसौ कतमो वद ॥१४॥
यद्यन्यतम एतेषां तस्य न ब्रह्मता तदा ॥
एतेष्वनन्तर्गतस्तु न कोऽप्यात्मा जनैर्मतः ॥ १५ ॥
विद्वज्जनानुभूत्यैष क्षुदादेरवभासकः ॥
प्रसिद्ध इत्यभिप्रेत्य ब्रह्मत्वेन तमुक्तवान् ॥ १६ ॥
अत्येति योऽशनायादीन्विचारेण निरूपणे ॥
क्षुदादिसाक्षी तस्यास्य ब्रह्मत्वं केन बाध्यते ॥१७॥
नन्वेक आत्मा मूढानां विदुषां चेति ते मतम् ॥
उक्तोर्मिषट्कातीतत्वं तद्वन्धश्चास्य तत्कथम् ॥१८॥
अविचाराविचाराभ्यां यथा सर्पत्वरज्जुते ॥
तथाऽत्मन्यपि संसारभावाभावावितीक्ष्यताम्॥१९॥
क्षुत्पिपासे प्राणधर्मौ शोकमोहौ तु मानसौ ॥

॥ १३ ॥ कतम इत्यादिप्रश्नाभिप्रायमाह *क्षुदित्यादिना । अशनायादिधर्मिणां प्राणमनःशरीराणां मध्ये कस्यचिदात्मत्वमुच्यते चेत्, न तस्य ब्रह्माभेदयोग्यता, एतत्त्रयव्यतिरिक्तस्तु लोकाप्रसिद्ध इत्यर्थः ॥ १४ ॥ योऽशनायेत्यादिप्रत्युक्तितात्पर्यमाह* विद्वदिति ॥ १६ ॥ क्षुदादिसाक्षिणः प्रसिद्धत्वेऽपि तस्य ब्रह्मत्वोक्तिः कथमित्याशङ्क्याशनायादिरहितब्रह्मलक्षणलक्षितत्वादित्याह* अत्येतीति । साक्षिणोऽशनायादिमत्त्वप्रतिपत्तेः कथं तद्राहित्यमित्याशङ्क्यारोपितं तदिति मत्वाह *विचारेणेति ॥ क्षुधाद्यागमापायसाक्षित्वात्प्रतीचो न वस्तुतो क्षुधादिमत्त्वमित्याह *क्षुदादीति ॥१७॥ उक्तमर्थमाक्षेपसमाधानाभ्यां विशदयति *नन्वित्यादिना ॥ १८ ॥ १९ ॥ नन्वशनायादयो न

जरामृत्यू देहधर्मावात्मधर्मो न कश्चन ॥ २० ॥
प्राणसंचारबाहुल्याद्गमनादिश्रमे सति ॥
क्षुत्पिपासाजनिस्तेन प्राणधर्मत्वमेनयोः ॥ २१ ॥
इष्टस्य वस्तुनोऽसिद्धौ चेतसो याऽनवस्थितिः ॥
सशोको मानसो धर्मो मोहश्च विषयभ्रमः ॥ २२ ॥
जरा देहस्य शैथिल्यं मृत्युः प्राणवियुक्तता ॥
ते सर्वेऽप्यात्मनि भ्रान्त्या कल्पिता व्योमनैल्यवत् ॥ २३ ॥
यः स्वकारणसंसर्गः क्षुदादेरत्ययो मतः ॥
अनात्यन्तिकरूपत्वात्सोऽत्ययोऽत्र न गृह्यते ॥ २४ ॥
तत्कारणनिषेधो यः स्वमहिम्नैव वस्तुनः ॥

वस्तुत आत्मधर्माश्चेत्कस्य ते धर्मास्तत्राह *क्षुदिति ॥ २० ॥ तयोः प्राणधर्मत्वे युक्तिमाह *प्राणेति ॥ २१ ॥ शोकमोहशब्दयोरर्थं वदंस्तयोरन्तःकरणधर्मत्वमाह *इष्टस्येति । विषयभ्रमः विषयसत्यत्वभ्रम इत्यर्थः ॥ २२ ॥ जरामृत्युशब्दार्थं वदंस्तयोः स्थूलशरीरधर्मत्वमाह *जरेति ॥ एवं षडूर्मीणामनात्मधर्मत्वेऽप्यात्मनि प्रतीतिरुपपद्यत इति सदृष्टान्तमाह *ते इति ॥ २३ ॥ अत्येतीत्यत्रात्ययशब्दार्थं विवक्षुर्नात्र लोकप्रसिद्धार्थो गृह्यत इत्याह *य इति ॥ यः सुप्तिप्रलययोः क्षुधादेर्नाशः स स्वकारणसंसर्ग इति लोकसम्मतस्तस्यात्राग्रहणे हेतुमाह *अनात्यन्तिकेति ॥ २४ ॥ तस्य विवक्षितमर्थमाह *तदिति ॥ तच्छब्देनाशनायाद्युच्यते मोक्षविधौ तत्प्रतिपादने विवक्षिते सतीत्यर्थः ॥ तद्विद्वांसो मोक्षविदः करणात्ययादृते कार्यस्यात्यन्तिकात्ययायोगादशनायादिशब्देन वस्तुमहिम्नैव नित्यनिवृत्तमशनायादिमत्मा-

तमत्ययं मोक्षविधौ तद्विद्वांसः प्रचक्षते ॥ २५ ॥
प्राणहेतुस्तमः प्राणधर्माभ्यामुपलक्ष्यते ॥
सूत्रात्मा शोकमोहाभ्यां जरया मृत्युना विराट्॥२६॥
तमः सूत्रं विराजं च योऽत्येत्यात्मा स्वयंप्रभः ॥
असङ्गस्तत्परं ब्रह्म साक्षादित्यादिलक्षणम् ॥ २७ ॥
यथा विशुद्धमाकाशं सति वाऽसति वा मले ॥
नीहारादौ तथैवात्मा कार्यकारणवस्तुनि ॥ २८ ॥
परमात्मस्वभावोऽयं कहोलाय प्रपञ्चितः ॥
तद्बोधसाधनं सर्वकर्मत्याग इहोच्यते ॥ २९ ॥
उत्पन्नसम्यग्ज्ञानस्य संन्यासो लक्षणं यतः ॥
साधनं च तदुत्पत्तौ संन्यासस्तत्र गम्यताम् ॥ ३० ॥

श्रुतिः—एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ

णकारणमज्ञानं लक्ष्यत इत्यर्थः ॥ २५ ॥ उक्तमेव व्यनक्ति *प्राणेति । नन्वेवमपि सर्वकार्यातीतत्वमात्मनो न सिद्ध्येदित्याशङ्क्य तत्सिध्यर्थं शोकादिपदैः सूत्रविराजौ लक्ष्येते इत्याह *सूत्रेति ॥ २६ ॥ पदार्थमुक्त्वा वाक्यं योजयति *तम इति ॥ २७ ॥ स्वभावादेवात्मनः कालत्रयेऽप्यसङ्गत्वं दृष्टान्तेन प्रतिपादयति* तथेति ॥ २८ ॥ वृत्तानुवादपूर्वकमेतं वैतमित्याद्यवतारयति *परमेति । इहेति प्रकृतब्राह्मणोक्तिः ॥ २९ ॥ अत्र संन्यासो विधीयत इत्यत्र गमकमाह *उत्पन्नेति । अत्र हि विद्यासाधनं विद्वल्लक्षणं च प्रतिपिपादयिषितं, संन्यासस्योभयरूपत्वात्सोऽत्र प्रतिपाद्यत इत्यर्थः ॥ ३० ॥ वाक्यतात्पर्यमु-

भिक्षाचर्यं चरन्ति ॥

वार्ति०–ब्रह्मात्मनोर्यदेकत्वं ब्राह्मणद्वयनिश्चितम् ॥
एतं तमितिशब्दाभ्यां तदैकात्म्यमनूद्यते ॥ ३१ ॥
अत्येति योऽशनायादीन्स आत्मेतिगिरोच्यते ॥
तमात्मानं विदित्वाऽथ व्युत्तिष्ठन्त्येषणात्रयात् ॥३२॥
ब्रह्मप्रश्नेन पृष्टे ते तद्बोधफलसाधने ॥
इति मत्वोत्तरत्वेन व्युत्थानद्वयमुच्यते ॥ ३३ ॥
पूर्वं विदित्वा पश्चात्तु व्युत्थायेत्यन्वयाच्छ्रुतात् ॥
विद्वत्संन्यास आभाति ब्रह्मबोधफलात्मकः ॥ ३४ ॥
व्युत्थायाथ विदित्वेति व्यत्ययेनार्थिकान्वयात् ॥
सिद्धो विविदिषात्यागः स्पष्टः श्रुत्यन्तरेऽप्यसौ ॥३५॥
स्वात्मलोकं स्वमिच्छन्तः प्रव्रजन्तीति वक्ष्यति ॥
त्यागेनैकेऽमृतत्वं तु प्राप्ता इत्यपरा श्रुतिः ॥ ३६ ॥

क्त्वाऽक्षराणि व्याचष्टे* ब्रह्मेत्यादिना ॥ ३१ ॥ वाक्यं योजयति* तमिति ॥ ३२ ॥ एवं सामान्यतो वाक्यार्थमुक्त्वा विदित्वा व्युत्थायेत्यत्रार्थभेदं विवक्षुः प्रकृतवाक्यस्यापृष्टोत्तरत्वशङ्कां निरस्यति* ब्रह्मप्रश्नेनेति । अर्थादिति शेषः ॥ ३३ ॥ व्युत्थानद्वयप्रतिपादनपरत्वेन वाक्यं योजयति* पूर्वमित्यादिना ॥ ३४ ॥ *आर्थिकेति । संन्यासस्य ज्ञानसाधनत्वाद्योग्यतामहिम्ना व्युत्थानपदं व्यत्यासेनापि विदित्वेतिपदेनान्वेतीत्यर्थः ॥ ननु त्यागस्य बोधहेतुत्वे सिद्धे व्यवहितयोजनयाऽस्य वाक्यस्य विविदिषात्यागपरत्वकल्पनमुचितं, तदेवासिद्धमिति नेत्याह *स्पष्ट इत्यादिना ॥ ३५ ॥ ३६ ॥ 'ब्राह्मणः' इत्यत्र ब्राह्मणशब्दस्त्रैवर्णिकपर इत्यभिप्रेत्य 'कथं तर्हि भाष्य-

ब्राह्मणग्रहणश्रुत्या विप्राणामेव भाष्यकृत् ॥
संन्यासेऽधिकृतिं प्राह चतुर्थाश्रमरूप्यसौ ॥ ३७ ॥
विद्याङ्गतत्फलात्मानं गार्गीविदुरयोरपि ॥
स्त्रीशूद्रयोर्भाष्यकारः संन्यासमनुमन्यते ॥ ३८ ॥
पुत्रैषणेति पुत्रार्थं दारस्वीकारवाञ्छनम् ॥
कर्मणां साधने वित्ते तृष्णा वित्तैषणा मता ॥ ३९ ॥
लोकैषणेति देवादिलोकार्थोपासनार्थिता ॥
न कश्चिदन्यः संसार उक्तादस्त्येषणात्रयात् ॥ ४० ॥
मनुष्यलोकः पुत्रेण पितृलोकस्तु कर्मणा ॥

कुतः संन्यासस्य विप्रमात्राधिकारित्वमूचुः' इत्याशङ्क्य तेषां तात्पर्यमाह *ब्राह्मणेति । चतुर्थाश्रमरूपी दण्डधारणादिलिङ्गसहित इत्यर्थः ॥

"ब्राह्मणः क्षत्रियो वाऽपि वैश्यो वा प्रव्रजेद् गृहात्"

इत्यादिस्मृतेः सर्वकर्मत्यागलक्षणस्तत्फलत्यागरूपो वा संन्यासस्त्रैवर्णिकसाधारणः । लिङ्गधारणं तु विप्राणामेवेति भाष्यकृदभिप्राय इत्यर्थः ॥३७॥ तत्र नियामकमाह *विद्येति । अपशूद्राधिकरणे रैक्ववाचक्नवीप्रभृतीनां ब्रह्मविद्यामभ्युपगच्छाद्भिः स्त्रीशूद्राणामपि सर्वकर्मफलत्यागलक्षणः संन्यासोऽभ्युपगतः, संन्यासस्य ज्ञानहेतुत्वाङ्गीकृतेः । तन्न्यायेन क्षत्रियवैश्ययोरपि लिङ्गं विना सर्वकर्मत्यागोऽस्तीति भाष्यकृतामपि सम्मतमिति भावः ॥३८॥ एषणात्रयशब्दार्थमाह *पुत्रेत्यादिना ॥ ३९ ॥ अत्रैव सर्वकामानामन्तर्भावमाह *नेति । अनात्मलोकमात्रस्यैषणात्रयविषयपुत्रादिसाध्यत्वादत्रैव सर्वसंसारहेतवः कामा अन्तर्भवन्तीत्यर्थः ॥ ४० ॥ उक्तेऽर्थे वाक्यान्तरं संवादयति *मनुष्येति

विद्यया देवलोकश्चेत्यब्रवीत्सङ्ग्रहं श्रुतिः ॥ ४१ ॥
न्याय्यां वृत्तिं समुल्लङ्घ्य तद्विरुद्धतया स्थितिः ॥
व्युत्थानमुदितं, राज्ञः सामन्तो व्युत्थितो यथा ॥४२॥
भिक्षया लक्ष्यते चर्या परिग्रहविवर्जिता ॥
किं भोग्यं परिगृह्णीयात्सर्वभोग्येषु दोषदृक् ॥ ४३ ॥
लोकत्रयार्थैषणाभ्यो व्युत्थानं चापरिग्रहः ॥
द्वयं बोधमहिम्नैव विदुषां न तु यत्नतः ॥ ४४ ॥
आनन्दैकस्वभावं स्वमात्मानं पश्यतः कुतः ॥
कामः परिग्रहो वा स्याद्योऽकाम इति वक्ष्यति ॥४५॥
न दुःखहानयेऽप्यस्य साधनानां परिग्रहः ॥
बुभुक्षादिनिषेधेन निर्दुःखात्माऽवबोधनात् ॥ ४६ ॥

॥ ४१ ॥ व्युत्थायेत्यत्र व्युत्थानशब्दार्थमाह *न्याय्यामिति । एषणानुगुणतया स्थितिमतिक्रम्य तत्प्रतिकूलत्वेन या स्थितिः सा व्युत्थानमित्युदितं महद्भिरिति शेषः । तत्र लोकप्रसिद्धिं प्रमाणयति *राज्ञ इति ॥ ४२ ॥ 'अथ भिक्षाचर्यम्'इत्यत्र भिक्षाशब्दस्य विवक्षितमर्थमाह *भिक्षयेति । गात्रयात्रामात्रहेतुभिक्षान्नादिव्यतिरिक्तसर्वभोग्यत्यागो भिक्षाशब्देन लक्ष्यत इत्यर्थः । इयं च चर्या विवेकिनामतिसुलभेत्याह *किमिति ॥ ४३ ॥ एवं व्युत्थानमपरिग्रहश्चेति द्वयं विविदिषूणां साधनत्वेनोक्तं तद्विदुषां स्वतःसिद्धमाह *लोकेति ॥ ४४ ॥ अपरिग्रहादि विदुषां स्वतःसिद्धमित्यत्रोपपत्तिमाह *आनन्देति । श्रुतिसिद्धं चैतदित्याह *य इति ॥ ४५ ॥ विदुषः सुखार्थं परिग्रहाभावेऽपि दुःखनिवृत्त्यर्थं परिग्रहः स्यात्तत्राह *नेति । आत्मनः स्वतो निर्दुःखस्य साक्षात्कृतत्वाद् दुःखनिवृत्त्यर्थमपि विदुषोऽप्रवृत्तिः स्वतःसिद्धैवेति भावः ॥ ४६ ॥ नन्वेवं विदुषो

विदुषः कृतकृत्यत्वात्स्मार्तं संन्यासलिङ्गकम् ॥
भाष्य आश्रममात्रैकशरणानामितीरितम् ॥ ४७ ॥
न यथेष्टाचारशङ्का तस्येष्टानिष्टवर्जनात् ॥
आरब्धक्षपणायैव तस्य देहः प्रवर्त्तते ॥ ४८ ॥
फलात्मकोऽयं संन्यासस्तत्त्वविद्यापुरःसरः ॥

दण्डादिपरिग्रहोऽपि न स्यादित्याशंक्य, इष्टापत्तिरित्याह *विदुष इति । 'त्रिदण्डेन यतिश्च'इत्यादिस्मृतेः त्रिदण्डादिलिङ्गाभावे कथं तस्य यतित्वम् ? अत आह *स्मार्तमिति । 'एकं वैणवं दण्डमाददीत'इत्यादिश्रुतिविरोधात्स्मार्तं त्रिदण्डादि मुमुक्षुभिरपि साज्यं किमु विद्वद्भिरिति भाष्यकारैरेवोक्तम् । न च दण्डादिलिङ्गाभावे कथं विदुषां यतित्वम् इति वाच्यम् । 'अव्यक्तलिङ्गा अव्यक्ताचाराः' इत्यादिश्रुतेस्तेषां विधिनिषेधातीतत्वाल्लिङ्गराहित्यस्यैव विद्वत्संन्यासलिङ्गत्वाच्चेति भावः ॥ ४७ ॥ विदुषो विध्यभावेऽतिप्रसङ्गं शङ्कित्वा परिहरति *नेति । निषिद्धप्रवृत्तिहेतुकामानां समूलमुन्मूलितत्वादिति भावः । विदुषः कामाभावे भिक्षाचरणादावपि प्रवृत्तिर्न स्यादित्याशङ्क्य प्रारब्धप्रापितकर्मवशात्तत्प्रवृत्तिरविरुद्धेत्याह *आरब्धेति । नच प्रारब्धवशादेव निषिद्धेऽपि प्रवृत्तिरस्त्विति वाच्यम् । निषिद्धकर्मसु बुद्धिपूर्वकप्रवृत्तिहेतुवासनायां सत्यां सम्यग्ज्ञानमेव नोत्पद्येतेत्युत्तरत्वादिति ॥ ४८ ॥ एवं विदित्वा व्युत्थायेति विद्वत्संन्यासः, व्युत्थाय विदित्वेतिव्यत्यासयोजनया विविदिषासंन्यासश्चेत्यस्मिन्वाक्ये व्युत्थानद्वयमुच्यत इति व्याख्यातम् । इदानीं विदित्वेत्यत्र वेदनशब्दस्य साक्षात्कारवाचित्वमापातज्ञानवाचकत्वं च विवक्षित्वा संन्यासद्वयप्रतिपादनपरं वाक्यमित्याह

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २
(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मज भट्टशङ्करविरचितः । (मीमांसा) २
(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि–मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३
(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३
(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३
(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं संपूर्णम् (वेदान्तः) ३
(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीति प्रसिद्धया समेतम् । (वेदान्तः) १४
(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १
(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् । ८
(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्तः) २
(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ३
(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २
(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रवृत्तटीकया सहितः । हरिभद्रसूरिकृतः । १
(२८) शुद्धाद्वैतमार्तण्ड प्रकाशव्याख्यासहितः प्रमेयरत्नार्णवश्च १
(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १३
(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च ... ११
(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६
(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः । ४
(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २
(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः २
(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १
(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित–योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २
(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृतब्रह्माऽमृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४
(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः । २
(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्योः–प्रकाशः गोस्वामि श्रीश्री पुरुषोत्तमजीमहाराज विरचित ३
(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ... ४
(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद. शर्मकृता अध्यात्म सुधातरङ्गिण्याख्य टीकया सहिता । ३
(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च । २

(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्त्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ४

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणिता । रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्यया सहिता तर्कपाद । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाह्वटीकाद्वयसंवलिता । ११

(४७) व्याकरणसिद्धान्तसुधानिधीः । पर्वतीय विश्वेश्वरसूरिविरचितः । ८

(४८) विरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ७

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकया समलंकृतः । ७

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ५

(५१) पूर्वमीमांसा अधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यविरचिता परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत । १

(५२ प्रशस्तपादभाष्यटीकासंग्रहः । तत्र कणादरहस्यम् । श्रीशंकरमिश्रविरचितम २

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेत २

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः । ६

(५५) सांख्यसंग्रहः । तत्र सांख्यतत्त्वविवेचनम् श्रीषिमानन्द (क्षेमेन्द्र) विरचितम् । सांख्यतत्त्वयाथार्थ्यदीपनम् भावागणेशविरचितम् । समाससूत्रव्याख्या सर्वोपकारिणी च । १

(५६) न्यायपरिशुद्धिः । श्रीमद्वेङ्कटनाथ श्रीवेदान्ताचार्यप्रसादिता । श्रीनिवासाचार्यविरचित न्यायसारसमाख्यया टीकया युता । २

पत्रादिप्रेषणस्थानम् ।	जयकृष्णदास गुप्तः, सेक्रेटरी, चौखम्बा संस्कृत सीरीज आफिस, बनारस सिटी ।

June 1919.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 258.

बृहदारण्यकवार्तिकसार ।

श्रीमद्विद्यारण्यस्वामिविरचितः ।

महेश्वरतीर्थकृतया लघुसङ्ग्रहाख्यया

टीकाया समलङ्कृतः ।

पर्वतीयश्रीमन्नित्यानन्दपण्डितप्रदर्शितरीत्या

वझे इत्युपनामकेन भाऊशास्त्रिणा

संशोधितः ।

BRIHADARANYAKAVARTIKASARA

BY VIDYARANYA SWAMI,

WITH A COMMENTARY CALLED LAGHUSANGRAHA BY

MAHESHWAR TIRTH.

EDITED BY

BHAU SHASTRI VAJHE.

FASCICULUS VIII—८.

PUBLISHED & SOLD BY THE SECRETARY

CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.

AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO; BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1918.

Price Rupee one.

॥ श्रीः ॥

—*—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—२५८

१ अस्यां चौखम्बा—संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तवको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तवके एक एव ग्रन्थो मुद्र्यते।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति।

४ भारतवर्षीयैः,ब्रह्मदेशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्-मुद्राः ७ आनकाः ८

५ अन्यैर्देयं प्रतिस्तवकं ... ... " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति ... ...

अन्यो विविदिषात्याग आपातज्ञानरूपकः ॥ ४९ ॥
ज्ञानद्वयं विवक्षित्वा विदित्वेत्यस्य कीर्तनात् ॥
त्यागद्वयं लक्ष्यतेऽत्र व्यत्ययेनान्वयं विना ॥ ५० ॥
न ज्ञानिवद्विविदिषोस्त्यागः स्वाभाविकस्ततः ॥
भिक्षाचर्यं चरन्तीति साधनत्वेन तद्विधिः ॥ ५१ ॥
त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् ॥
इत्यादिश्रुतिषु स्पष्टं साधनत्वमुदीरितम् ॥ ५२ ॥
फलसाधनभेदेन वाक्यभेदो भवेदिति ॥
मा शङ्क्यतामपूर्वार्थलाभेनादूषणत्वतः ॥ ५३ ॥
कश्चिद्यज्ञोपवीतादित्यागं नेच्छत्यसद्धि तत् ॥
यज्ञं यज्ञोपवीतं च त्यक्त्वेति स्पष्टमीरणात् ॥ ५४ ॥
यज्ञोपवीतं भूः स्वाहेत्यप्सु त्यक्त्वा निरेषणः ॥

---

*फलेत्यादिना ॥ ४९ ॥ ५० ॥ वाक्यस्य विविदिषासंन्यासपरत्व-पक्षे चरन्तीति पदस्यार्थविशेषमाह *नेति । वाक्यस्य विद्वत्संन्यासपरत्वे विदुषि सर्वत्यागस्य स्वतःसिद्धत्वाच्चरन्तीत्यनुवादो युज्यते, विविदिषोस्तु विधिं विना त्यागस्याप्राप्तेस्तत्सिद्ध्यर्थं चरन्तीत्यत्र लेट्परिग्रहः कर्त्तव्य इति भावः ॥ ५१ ॥ ननु त्यागस्य ज्ञानहेतुत्वे सिद्धे विधिकल्पनं तदेवासिद्धमिति, नेत्याह *त्याग इति ॥ ५२ ॥ उभयपरत्वे वाक्यभेद इत्याशङ्क्यैकार्थत्वाभावेनैकवाक्यत्वासम्भवे इष्ट एव स इत्याह *फलेति ॥ ५३ ॥ यज्ञोपवीतादित्यागस्याप्रमाणत्वात्परमहंससंन्यास एव नास्तीति कस्यचिन्मन्दमतेर्मतमनूद्य निरस्यते *कश्चिदिति । 'त्यक्त्वा गूढश्चरेन्मुनिः' इति श्लोकशेषः ॥ ५४ ॥ श्रुत्यन्तरमपि प्रमाणयति *यज्ञोप-

यतिरात्मानमन्विच्छेदिति जाबालगीः श्रुता ॥ ५५ ॥
यस्तु त्यक्तुं न शक्नोति रागादिप्रबलत्वतः ॥
गार्हस्थ्यादौ स्थितो रागं पाचयत्वेष कर्मभिः ॥५६॥
कर्मानधिकृता अन्धबाधिराद्या यथारुचि ॥
आश्रमात्मकसंन्यासं गृह्णन्तूत्तमजन्मने ॥ ५७ ॥
अव्रती वा व्रती वेति जाबालोपनिषद्वचः ॥
ब्रूते व्रतादिशून्यानामपि संन्यासमाश्रमम् ॥ ५८ ॥
संन्यास एवं त्रिविधो विद्वद्विविदिषाऽऽश्रमैः ॥
कृतकृत्यस्तु संन्यस्य स्वात्ममात्ररतिर्भवेत् ॥ ५९ ॥
त्यक्त्वा विविदिषुः पुत्रवित्तलोकैषणा अथ ॥
अनुतिष्ठति विद्यार्थं श्रवणादीन्यहर्निशम् ॥ ६० ॥
आहुर्हिरण्यगर्भादिध्यानलोकैषणात्मकात् ॥
न व्युत्थानं पुमर्थत्वादिति श्रद्धाजडं किल ॥ ६१ ॥

वीतमिति ॥५५॥ 'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यादिवचनस्य तर्हि का गतिरित्याशङ्क्य तस्याविरक्तविषयत्वमाह *यस्त्विति॥५६॥ एवं विदुषां विविदिषूणां च संन्यासमुक्त्वाऽग्निहोत्राद्यनधिकारिणामपि तमाह *कर्मेति ॥ यथारुचि कुटीचकादिष्वन्यतममित्यर्थः । उत्तमजन्मने ब्रह्मलोकादिप्राप्तये ॥५७॥ तेषां त्रिदण्डधारणाद्याश्रमरूपसंन्यासाधिकारोऽस्तीत्यत्र मानमाह *अव्रतीति ॥५८॥ संन्यासत्रैविध्यमुपसंहरति *संन्यास इति । तत्र विद्वद्विविदिषासंन्यासयोः परमहंसत्वेनैकत्वात्कथं त्रैविध्योक्तिरित्याशङ्क्य तयोरप्यवान्तरवैलक्षण्यमाह *कृतकृत्य इत्यादिना ॥५९॥६०॥ याज्ञवेत्यादिवाक्यमवतारयितुं भूमिकामारचयति *आहुरिति ॥ हिरण्यगर्भोपासनात्मकलोकैषणा न त्याज्या पुमर्थत्वादिति यद्

समाना हीतराभ्यां सा नात्मलोकाप्तिहेतवः ॥
इति मत्वैकतां तासामेषणानामवोचत ॥ ६२ ॥
श्रुतिः—या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैष-
णा सा लोकैषणोभे ह्येते एषणे एव भवतः ॥
वा०—कर्मण्येवाधिकारस्ते मा फलेष्विति शास्त्रतः
एषणात्वात्फलं त्याज्यं न तु कर्मादिसाधनम् ॥ ६३ ॥
इति भ्रमं व्युदसितुं प्राब्रवीत् साध्यसाधने ॥
उभे अप्येषणे एव भवतस्त्यागयोर्द्वयोः ॥ ६४ ॥
अविशुद्धधियः कर्मण्यधिकारो, विशुद्धधीः ॥
सत्यां विविदिषोत्पत्तौ तदर्थं कर्म सन्त्यजेत् ॥६५ ॥
श्रुतिः—तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन
तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं
च मौनं च निर्विद्याथ ब्राह्मणः ॥

आहुस्तद्वचः श्रद्धामात्रप्रयुक्तमित्यर्थः ॥ ६१ ॥ कुतस्तत्राह *समानेति ॥ ६२ ॥

अक्षरार्थस्तु—या पुत्रैषणा सा वित्तैषणा ऽदृष्टफलसाधनत्वसाम्यात्, या वित्तैषणा कर्मसाधनभूता सा लोकैषणा, फलार्थैव सा, सर्वोऽपि जन्तुः फलार्थप्रयुक्त एव हि साधनमुपादत्तेऽतः फलेच्छान्तर्भूतैव साधनेच्छेत्येकैवैषणेत्यर्थः ॥

उभे ह्येते एषणे इत्याद्यवतार्य व्याचष्टे *कर्मणीत्यादिना ॥ ६३ ॥ ॥ ६४ ॥

फलं साधनं च एते उभे अपि हि यस्मादेषणे एव भवतस्तस्मादुभयं त्याज्यमित्यर्थः ।

फलवत्कर्मणोऽपि त्याज्यत्वे कर्मण्येवेत्याद्युक्तस्मृतिविरोध इत्याशङ्क्य तस्याविरक्तविषयत्वान्मैवमित्याह *अविशुद्धेति ॥६५॥

वार्त्ति०—यस्माद्ब्रह्मविदः पूर्वे फलसंन्यासमाप्नुयुः ॥
तस्माद्विविदिषुः कुर्यात्पाण्डित्यं फलसिद्धये ॥ ६६ ॥
पाण्डित्यबाल्यमौनानि श्रवणादीनि तैरयम् ॥
भवति ब्राह्मणस्तच्च ब्राह्मण्यं ब्रह्मरूपता ॥ ६७ ॥
पण्डेति बुद्धेर्नामैतत्सा जाता यस्य मानतः ॥
स पण्डितस्तस्य कर्म पाण्डित्यं श्रवणं तु तत् ॥ ६८ ॥
आचार्याच्चागमाच्छ्रुत्वा निःशेषं वेदनं ततः ॥
बालभावेन तिष्ठासेद्युक्त्या मननतत्परः ॥ ६९ ॥
श्रवणं शास्त्रतात्पर्यनिश्चयो, मननं पुनः ॥
अर्थासम्भावनोच्छित्त्यै युक्तीनामनुचिन्तनम् ॥ ७० ॥
असम्भावनया ज्ञाने दुर्बले सत्यथैषणाः ॥
उद्भवन्ति ततो ज्ञानं कुर्वीत प्रबलं सुधीः ॥ ७१ ॥
नैवात्मा बलहीनेन लभ्य इत्यपरा श्रुतिः ॥
अनाविष्करणं बाल्यं दम्भादेरिति सूत्रकृत् ॥ ७२ ॥
पाण्डित्येन विदित्वाऽथ छित्वा बाल्येन संशयम् ॥

तस्माद् ब्राह्मण इत्यादेर्भाष्योक्तमर्थमाह *यस्मादित्यादिना॥६६॥ ॥६७॥वाक्यतात्पर्यमुक्त्वाऽक्षराणि व्याचष्टे *पण्डेत्यादिना॥६८॥ ॥६९॥ पाण्डित्यबालशब्दयोः श्रवणमननवाचित्वमुक्तं, किं तच्छ्रवणं मननं चेति तत्राह *श्रवणमिति॥७०॥श्रवणेनात्मनि निर्णीते किं मननेनेत्याशङ्क्य तस्याप्यवश्यानुष्ठेयत्वमाह *असम्भावनयेति ॥ ७१ ॥ तत्र "नायमात्मा बलहीनेन लभ्यः" इति मुण्डकश्रुतिमपि प्रमाणयति *नेति ॥ एवं बाल्यशब्दस्यैतद्भाष्योक्तमर्थमुक्त्वा "अनाविष्कुर्वन्नन्वयात्"इत्यधिकरणोक्तार्थमाह *अनाविष्करणमिति ॥ ७२ ॥ बाल्यं च पाण्डित्यं च नि-

मुनिर्ध्यानसमाधिभ्यां भवेद्धीवृत्तिशान्तये ॥ ७३ ॥
प्रशान्तवृत्तिके चित्ते परमानन्ददीपके ॥
कृतकृत्यो ब्रह्मभावं गतो ब्राह्मण उच्यते ॥ ७४ ॥
भाष्याभिप्रायतस्त्वेतत्पाण्डित्याद्युपवर्णितम् ॥
अथोच्यते वार्त्तिकोक्तं पाण्डित्यादिचतुष्टयम् ॥७५॥
पदार्थाधिगतिः पूर्वं ततस्तदभिसङ्गतिः ॥
विरुद्धार्थनुतिः पश्चात्ततो वाक्यार्थबोधनम् ॥ ७६ ॥
ब्राह्मणो बुद्धवाक्यार्थः साक्षादित्यादिलक्षणः ॥
ब्राह्मण्यं गौणमन्यस्य ब्रह्मबोधार्थजन्मनः ॥ ७७ ॥

श्रुतिः—स ब्राह्मणः केन स्यात् ॥

विद्याथ मुनिरित्यस्यार्थमाह *पाण्डित्येनेति ॥ ७३ ॥ अथ ब्राह्मण इत्यस्यार्थमाह *प्रशान्तेति ॥ ७४ ॥ ७५ ॥

अमौनं श्रवणमननं, मौनं निदिध्यासनं च निर्विद्य निष्पाद्य अथ साक्षात्कारानन्तरं ब्राह्मणो भवतीति श्रुत्यर्थः ॥

वार्त्तिककारमते पाण्डित्यमित्यादिना त्वमर्थशोधनं विधीयत इत्याह *पदार्थेति । अनन्तरं बाल्येनेत्यादिना तत्पदार्थशोधनं विधीयत इत्याह *तत इति । अथ मुनिरित्यत्र मुनिशब्देन तत्त्वमर्थयोर्विरुद्धपारोक्ष्यमद्वयत्वादिनिवृत्तिरुच्यत इत्याह *विरुद्धेति । एवं शोधितपदार्थद्वयस्य विरुद्धांशपरित्यागेन लक्षणया वाक्यादखण्डधीरुदेतीत्याह *तत इति ॥ ७६ ॥ अनन्तरं यत्साक्षादित्युक्तलक्षणया ब्रह्मभूतो विद्वान् अथ ब्राह्मण इत्यनेनोच्यत इत्याह *ब्राह्मण इति ॥ नच भाष्यवार्त्तिकयोः परस्परविरोधः, उपास्यदेवतासाक्षात्कारपर्यन्तमुपासिनं कृतवतः केवलविचाराज्ज्ञानोदयः, इतरस्य ध्यानादिति व्यवस्थायाः वक्त-

वार्ति०-प्रश्नः स ब्राह्मणः केनेत्याक्षेपो वाऽत्र पृच्छ्यते॥
ब्राह्मण्यसाधनं यद्वा लक्षणं ब्रह्मवेदिनः॥ ७८॥
एषणात्यागपाण्डित्याद्युपायात्साधनान्तरम्॥
पृष्टं तस्योत्तरं प्राह येन स्यादितिवाक्यतः॥ ७९॥
विराड्ढिरण्यगर्भादिर्यासौ सत्यामुपासनात्॥
ब्राह्मण्यं लभ्यते यद्वा महता तपसा वरात्॥ ८०॥
प्रयासो बहुलस्तत्र फलं त्वेतावदेव हि॥
इत्यभिप्रेत्य येन स्यात्तेनेदृगिति भण्यते॥ ८१॥
आक्षेपपक्षे केन स्यान्न केनापीति योजना॥

व्यत्वादिति। ननु ब्राह्मणत्वादिजातिविषयो ब्राह्मणशब्दः कथं विदुषि प्रयुज्यते? तत्राह *ब्राह्मण्यमिति॥ विप्रजन्मनो ब्रह्मधीयोग्यत्वात्तत्र ब्राह्मणशब्दो गौणः, विदुषि मुख्य इत्यर्थः॥ ७७॥ स ब्राह्मणः केन स्यादित्यत्र किंशब्दस्य सम्भावितमर्थद्वयमाह *प्रश्न इति। प्रश्नपक्षेऽप्यर्थद्वयमाह *अत्रेति॥ ७८॥ ननु श्रवणादेर्ब्राह्मण्यं प्रति साधनत्वस्य सिद्धत्वात्तत्साधनप्रश्नोऽनुपपन्नस्तत्राह *एषणेति॥ श्रवणादिकं सिद्धवत्कृत्य साधनान्तरमस्ति वेति पृष्टमित्यर्थः। प्रत्युक्तिमवतार्य व्याचष्टे *तस्येत्यादिना। अयमर्थः—यद्यपि तीव्रतपःप्रसादितभगवत्प्रसादः, क्रममुक्तिफलकसूत्राद्युपासनं च साधनान्तरमस्ति तथापि येन येन साधनेन ब्राह्मणो भवेत्तेन सर्वेणापीदृश एव ब्राह्मणः स्यात्। श्रवणादिलभ्याद् ब्राह्मण्यादधिकं ब्राह्मण्यं दुष्करसाधनान्तरेणापि न लभ्यतेऽतोऽतिदुर्लभमिदमेव सम्पादनीयमिति॥ ७९॥ ८०॥ ८१॥ केनेत्येतत्साधनप्रश्नपरत्वेन व्याख्याय, आक्षेपपरत्वेन व्याचष्टे *आक्षेपेति॥ ब्राह्मण्यस्य श्रव-

न कर्मणा न प्रजयेत्यन्यसाधननिह्नवेः ॥ ८२ ॥
श्रुतिः-येन स्यात्तेनेदृश एवातोऽन्यदार्त्तं ततो ह
कहोलः कौषीतकेय उपरराम ॥ १ ॥
इत्युपनिषदि पञ्चमं ब्राह्मणं समाप्तम् ॥
वा०-शङ्क्यमानेन येन स्यात्तेनेदृङ् न ततोऽधिकः ॥
सन्त्यज्य निश्चितं कस्माच्छङ्क्यते साधनान्तरम् ॥८३॥
लक्षणप्रश्नपक्षे तु येनेदृक्तेन लक्ष्यताम् ॥
इत्युत्तरं वचो योज्यं तस्यार्थः प्रविविच्यते ॥ ८४ ॥
गीतायां कुत्रचित्प्रोक्तं स्थितप्रज्ञस्य लक्षणम् ॥
अन्यत्र विष्णुभक्तस्य गुणातीतस्य च क्वचित् ॥८५॥
येन चिह्नेन तत्राग्र्यमीदृगेव निरेषणः ॥
उपलक्षयितुं शक्यस्तदेवास्त्वस्य लक्षणम् ॥ ८६ ॥

णादिव्यतिरिक्तसाधनान्तरं नास्तीत्याक्षेपे हेतुमाह *नेति ॥८२॥ येनेत्यादेरर्थमाह *शङ्क्यमानेनेति । साधनान्तरस्य ब्राह्मण्यसाधनत्वेन शङ्क्यमानस्याप्येतत्फलादधिकफलाभावात्सर्वसम्मतं श्रवणाद्येवानुष्ठेयमित्यर्थः ॥ ८३ ॥ केनेत्यस्य विद्वल्लक्षणप्रश्नपरत्वे प्रत्युक्तितात्पर्यमाह *येनेति । वाक्यस्यान्वयमुक्त्वा प्रतिज्ञापूर्वकमक्षरार्थमाह *तस्यार्थ इत्यादिना । केन चिह्नेन परमहंसो ब्राह्मण इति ज्ञातुं शक्यः स्यादिति प्रश्ने कृते, गीतायां द्वितीयाध्याये स्थितप्रज्ञस्य यल्लक्षणमुक्तं, द्वादशाध्याये विष्णुभक्तस्य, चतुर्दशाध्याये गुणातीतस्य, तेषां मध्ये येन लक्षणेन ईदृशः स्याद् विद्वत्परमहंस इति ज्ञातुं शक्यः स्यात्तेनैव ज्ञातव्यः । अध्यायत्रयोक्तलक्षणानां मध्येऽन्यतमलक्षणयुक्तो ब्राह्मण इति ज्ञातव्य इत्यर्थः ॥८४॥८५॥८६॥ केनेत्यस्य विद्वल्लक्षणाक्षेप-

आक्षिप्यते यदा लक्ष्म तदाऽभिप्राय उच्यते ॥
नियतं लक्षणं किञ्चिन्न ह्यस्ति ब्रह्मवेदिनः ॥ ८७ ॥
रागी कश्चिद्विरक्तोऽन्यः क्रुद्धोऽन्यः शान्तिमान्परः ॥
प्रारब्धभोगनानात्वात्कथं लक्ष्म नियम्यते ॥ ८८ ॥
देहेन्द्रियमनोबुद्धिधर्मानेषोऽत्यवर्त्तत ॥
प्रत्यगात्मैकसम्बोधात्तद्धर्मैर्लक्ष्यते कथम् ॥ ८९ ॥
सर्वसंसारभावोऽस्य न यथा लक्षणं तथा ॥
सर्वाभावोऽपि नैव स्यात्सुषुप्ते व्यभिचारतः ॥ ९० ॥
शोभते श्रद्धधानानां लक्ष्मैतन्न विवेकिनाम् ॥
वेद्यानुरोधतो यस्याद्युज्यते लक्ष्म तद्विदः ॥ ९१ ॥
भावाभावोभयध्वंसि ब्रह्म वेद्यं, ततः श्रुतिः ॥
येनेदृगेव तेनेति लक्षणं तद्विदोऽब्रवीत् ॥ ९२ ॥

एवं आक्षेप्तुरभिप्रायं प्रतिज्ञापूर्वकं स्पष्टयति *आक्षिप्यत इत्यादिना ॥८७॥८८॥ किं मुक्तस्य लक्षणं भावधर्मो वा संसाराभावो वा ? नाद्य इत्याह *देहेति ॥ देहादेस्तद्धर्माच्च तत्त्वज्ञानेनातीतो मुक्तः, नास्य बुध्यादिधर्मः शमादिर्लक्षणं वैयधिकरण्यादित्यर्थः ॥ ८९ ॥ द्वितीयं प्रत्याह *सर्वेति ॥ ९० ॥ ननु ज्ञानात्पूर्वं यत्साधनममानित्वादि तत्सर्वमूर्ध्वं ज्ञानिलक्षणमिति सम्प्रदायविदः, न तदन्यथयितुं युक्तमत आह *शोभत इति। साम्प्रदायिकाः श्रद्धालवः सन्तो विदुषो यल्लक्षणमाचक्षते तत्सर्वं व्यवहारावस्थस्यैव,न तदतीतस्येत्यर्थः। तर्हि व्यवहारातीतस्य किं लक्षणमित्याशङ्क्य ब्राह्मणलक्षणमेव तल्लक्षणमित्याह *वेद्येति॥९१॥ वेद्यस्वरूपं दर्शयन् येन स्यादित्यादेरर्थमाह* भावेति ॥ ९२ ॥

येनेदृशः स्याद् येन बोधेन परमहंसो भावाभावोभयविलक्ष-

ब्रह्म यादृक्तादृगेव भवेद्विद्वान्निबोधतः ॥
बोधोऽतो लक्षणं तस्य बोधश्च स्वात्मसाक्षिकः ॥९३॥
अतोऽन्यदार्त्तमित्येष व्यतिरेकस्त्रिधोच्यते ॥
प्रतीचो ब्रह्मतेहोक्ता ततोऽन्यद्यद्विनाशि तत् ॥९४॥
निरेषणत्वं विद्याया हेतुरार्त्ता इहेषणाः ॥
विदुषो लक्षणं बोध आर्तं तल्लक्षणान्तरम् ॥ ९५ ॥

इतिवार्त्तिकसारे तृतीयाध्याये पञ्चमं ब्राह्मणं समाप्तम् ॥

षष्ठेऽस्मिन्ब्राह्मणे ब्रह्मकार्यं सर्वं विविच्यते ॥
सर्वान्तरत्वं निर्णेयं ब्रह्मणः सर्वनिर्णयात् ॥ १ ॥

णो वेदान्तवेद्यं यत्परमात्मा स्यात्तेनैव बोधेन लक्षितो भवतीति श्रुत्यक्षरार्थः ॥

उक्तमेव स्पष्टयति *ब्रह्मेति । बोधवत्त्वं वा कथं ज्ञातुं शक्यत इत्यत आह *बोधश्चेति ॥ ९३ ॥ अतोऽन्यदित्यादेरर्थमाह* अत इति । अस्मिन्ब्राह्मणे ब्रह्मात्मैक्यं, तद्बोधसाधनं, बुद्धलक्षणं चेति त्रयस्यापि प्रकृतत्वादतःशब्देन त्रयमपि परामृश्य तद्व्यतिरिक्तस्य हेयत्वमुच्यतइत्यर्थः । तदेव दर्शयति *प्रतीच इत्यादिना ॥ ९४ ॥ ९५ ॥

इति वार्तिकसारटीकायां पञ्चमं ब्राह्मणं समाप्तम् ॥

ब्रह्मणः सर्वान्तरत्वमुक्तं तन्निर्णयश्च सर्वनिर्णयाधीन इति सर्वस्य ब्रह्मकार्यस्य निर्णयाय गार्गीब्राह्मणमिति सङ्गतिमाह *षष्ठ इति ॥ १ ॥ गार्गिप्रश्नस्य व्याप्तिमूलत्वं दर्शयन् अथ हैन-

श्रुतिः—अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदं सर्वमप्स्वोतं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्चेति गन्धर्वलोकेषु गार्गीति कस्मिन्नु खलु गन्धर्वलोका ओताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति चन्द्रलोकेषु गार्गीति कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतीन्द्रलोकेषु गार्गीति कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेषु गार्गीति कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति ॥

वा०—यद्यत्कार्यं कारणेन व्याप्तमन्तर्बहिश्च यत् ॥
इति तर्केण पप्रच्छ कारणस्य परम्पराम् ॥ २ ॥
पार्थिवं कठिनं सर्वमोतप्रोतं द्रवे जले ॥
दधिपिण्डद्रवक्षीरे जलं तत्र तथा स्थितम् ॥ ३ ॥

मित्यादि व्याचष्टे* यद्यदिति ॥ २ ॥

गार्गी नामतः वचक्नोर्दुहिता वाचक्नवीति श्रुत्यर्थः ॥

यदिदमित्यादेरर्थमाह *पार्थिवमिति ॥ ३ ॥ ओतप्रोत-

दीर्घतन्तुवदोतत्वं तिर्यक्तन्तोरिवेतरत् ॥
यद्वाऽन्तर्व्याप्तिरोतत्वं प्रोतत्वं तु बहिः स्थितम् ॥ ४ ॥
जलस्य कारणं तेजस्तेजसो वायुराश्रयः ॥
श्रुत्यन्तरादिदं ज्ञेयं, वायोस्तु वियदाश्रयः ॥ ५ ॥
भूम्यादिवियदन्तानां भूतानामुत्तरोत्तरम् ॥
सूक्ष्मताव्यापिते दृष्टे ताभ्यां कारणतोच्यताम् ॥ ६ ॥
पञ्चभूतेभ्य उत्पन्ना अस्मद्देहादयोऽखिलाः ॥
ब्रह्माण्डान्ता इमे देहा भोग्यत्वाल्लोकसंज्ञकाः ॥ ७ ॥
यथैकस्मादिक्षुरसादुत्तरोत्तरपाकतः ॥
गुडादीनि बहूनि स्युर्भूतेभ्योऽण्डादयस्तथा ॥ ८ ॥
नरगन्धर्वमार्तण्डचन्द्रनक्षत्रदेवताः ॥

शब्दयोरर्थमाह* दीर्घेति । सर्वं कार्यं स्वकारणेन व्याप्तं दृश्यते, पार्थिवं धातुजातं चाद्भिर्व्याप्तम्, अन्यथा सक्तुमुष्टिवद्विशीर्येत। ता आपः केनान्तर्बहिर्व्याप्ता इति प्रश्नार्थः ॥ ४ ॥ अत्र तेजसि गार्गीति वाक्यं तैत्तिरीयकश्रुतिपर्यालोचनयाऽध्याहार्यमित्याह *जलस्येति ॥ ५ ॥ पञ्चभूतानाम् उत्तरोत्तरहेतुहेतुमद्भावे युक्तिमप्याह* भूम्यादीति । श्रुतौ अन्तरिक्षलोकेष्वित्यत्रान्तरिक्षलोकशब्देनाकाशमात्रं ग्राह्यम् ॥६॥ कस्मिन्नु खल्वन्तरिक्षलोका इत्यादौ लोकशब्दैर्विवक्षितमर्थमाह *पञ्चेति ॥ ७ ॥ गन्धर्वादिशब्दानामत्र विवक्षितार्थं वक्तुं पञ्चभूतस्यानेकावस्थाः सन्तीति सदृष्टान्तमाह *यथेति ॥ ८ ॥ अवस्थाविशेषानेव प्रकटयन्वाक्यार्थमाह *नरेत्यादिना ॥ ९ ॥

अयमर्थः । भूम्यादिवियत्पर्यन्तस्योत्तरोत्तरहेतुत्वं श्रुतियुक्तिभ्यामुपपादितम्, तस्य भूतपञ्चकस्य या मनुष्यशरीरारम्भ-

इन्द्रो विराट् तदण्डश्चेत्येता भूतदशाः स्थिताः ॥९॥
तत्तद्देहारम्भदशास्तत्तन्नाम्ना समीरिताः ॥
स्थूलसूक्ष्मदशास्वासु कार्यकारणताक्रमात् ॥ १० ॥
पञ्चीकृतानां भूतानां सूक्ष्मताऽण्डे समाप्यते ॥
श्रुतिः-स होवाच गार्गि मातिप्राक्षीर्मा ते मूर्द्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि मातिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम ॥ १ ॥
इत्युपनिषदि षष्ठं ब्राह्मणं समाप्तम् ॥
वा०-एतावदेव तर्केण गम्यं न तु ततः परम् ॥ ११ ॥
अण्डारम्भकभूतानामपञ्चीकृतभूतजम् ॥
सूत्रं कारणमित्येतदागमेनैव गम्यते ॥ १२ ॥
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् ॥

कावस्था सा स्थूलतमा, इयमेवावस्था कस्मिन्नु खल्वन्तरिक्षलोक इत्यत्रान्तरिक्षलोकशब्देन लक्ष्यते । सा च स्वकारणीभूतायां गन्धर्वलोकशब्दितगन्धर्वशरीरारम्भकपञ्चभूतदशायां वर्त्तते, सा चादित्यशरीरारम्भकभूतावस्थायाम्, एवं चन्द्रादिष्वपि योज्यम् । इन्द्रशरीरारम्भकभूतदशा प्रजापतिलोकशब्दितचतुर्मुखशरीरारम्भकभूतदशायाम् सा च ब्रह्मलोकशब्दितब्रह्माण्डारम्भिकायां पञ्चीकृतपञ्चमहाभूतस्यातिसूक्ष्मावस्था तस्यां वर्त्तत इति ॥ १० ॥ मातिप्राक्षीरित्यादेरर्थमाह *एतावदिति ॥ ११ ॥ १२ ॥

अक्षरार्थस्तु—हे गार्गि मातिप्राक्षीः, अण्डारम्भकपञ्चभूतकारणस्यापञ्चीकृतपञ्चभूततत्कार्यात्मकसूत्रस्यागमैकगम्यत्वादनुमानेन तन्मा प्राक्षीरित्यर्थः । पृच्छन्त्यास्त्व ते मूर्द्धा मा व्यपप्तद् विस्पष्टं मापतेत् । माङ्योगेनाड्लोपेऽपि तदभावश्छान्दसः । अनतिप्रश्न्यामिति ।

सूत्रान्तर्याम्यक्षराणि तार्किका नानुमन्वते ॥ १३ ॥
तर्काभासो भवेत्तेषु हेतुदृष्टान्तवर्जनात् ॥
अन्यथाप्रतिपत्त्याऽतो मूर्द्धपातं मुनिर्जगौ ॥ १४ ॥

इति वार्त्तिकसारे तृतीयाध्यायस्य षष्ठं ब्राह्मणं समाप्तम् ॥ ६ ॥

सप्तमब्राह्मणे तर्कं सन्त्यज्यागममार्गतः ॥
ब्रह्माण्डकारणं सूत्रमन्तर्यामी च वर्ण्यते ॥ १ ॥
सूत्रान्तर्यामिणौ जानन्गन्धर्वस्योपदेशतः ॥
तर्कान्नेति विवक्षित्वा कथां भुज्युवदुक्तवान् ॥ २ ॥

सूत्रदेवताया आगमैकगम्यत्वात्तेन प्राप्तुं योग्यः तमतीत्यानुमानेन प्रश्नोऽतिप्रश्नः स यस्या देवतायाः साऽतिप्रश्न्या नातिप्रश्न्याऽनतिप्रश्न्या ताम् । केवलागमगम्यां देवतामतिपृच्छसि अतो गार्गि मातिप्राक्षीः मर्त्तुं चेन्नेच्छसीति भावः । सूत्रस्य तर्कागोचरत्वे स्मृतिं प्रमाणयति *अचिन्त्या इति । तत्र वादिसम्मतिमप्याह *सूत्रेति ॥ १३ ॥ सूत्रादिषु वादिभिरनुमानाप्रयोगे हेतुमाह *तर्केति । तस्य तर्कागोचरत्वे सिद्धे मा ते मूर्द्धेत्यादिमुनिवचनमुपपन्नमित्याह *अन्यथेति ॥१४॥

इति वार्तिकसारटीकायां षष्ठं ब्राह्मणं समाप्तम् ॥ ६ ॥

ब्रह्मणः सर्वान्तरत्वनिर्णयायानुमानगम्यं सर्वकार्यं निर्णीतम् । आगमगम्यं निर्णेतुमनन्तरब्राह्मणमिति सङ्गतिमाह *सप्तमेति ॥ १ ॥ अस्योपदेशमात्रगम्यत्वे आख्यायिकाप्रणयनमपि लिङ्गमित्याह* सूत्रेति ॥ २ ॥

श्रुतिः-अथ हैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञमधीयानास्तस्यासीद्भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबन्ध आथर्वण इति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च वेत्थ नु त्वं काप्य तत्सूत्रं येनायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति सोऽब्रवीत्पतञ्चलः काप्यो नाहं तद्भगवन्वेदेति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमं च लोकं परं च लोकꣳ सर्वाणि च भूतानि योऽन्तरो यमयतीति सोऽब्रवीत्पतञ्चलः काप्यो नाहं तं भगवन्वेदेति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति ॥

अथ हैनमुद्दालको नामतः अरुणस्यापत्यमारुणिः पप्रच्छ। मद्रेषु देशेष्ववसाम उषितवन्तः। पतञ्चलो नामतः, कपिगोत्रः काप्यस्तस्य गृहेषु यज्ञं यज्ञशास्त्रमधीयानाः। तस्यासीदित्यादि पूर्ववत्। वेत्थेति। हे काप्य तत्सूत्रं वेत्थ अनुजानीषे, किं? येन सूत्रेणायं च लोक इदं च जन्म, परश्च लोकः प्रतिपत्तव्यं जन्म, सर्वाणि च भूतानि ब्रह्मादिस्तम्बपर्यन्तानि सन्दृब्धानि संग्रथितानि स्रगिव सूत्रेण विष्टब्धानि भवन्ति,तत्किं वेत्थेति पूर्वेण सम्बन्धः। एवं पृष्टः स काप्यः नाहं तत्सूत्रं वेद भगवन्निति संपूजयन्नुवाच। सोऽब्रवीत्पुनर्गन्धर्वः किं वेत्थ तमन्तर्यामिणम्। अन्तर्यामी विशेष्यते य इमं च लोकं परं च लोकं सर्वाणि च भूतानि अन्तरोऽभ्यन्तरः सन् यमयति, दारुयन्त्रमिव भ्रामयति स्वं स्वमुचितव्यापारं कारयतीत्यर्थः।

वा० सूत्रबद्धं दारुयंत्रं पुरुषो नर्तयेद्यथा ॥
अन्तर्यामी जगत्तद्वत्सूत्रबद्धं नियच्छति ॥ ३ ॥
सूत्रान्तर्यामिणौ सर्वं जगत्यनुगतावतः ॥
तौ विद्वानखिलं वेत्तीत्यतो ज्ञातव्यता तयोः ॥ ४ ॥

श्रुतिः–स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्स भूतवित्स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत्तदहं वेद तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वांस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्द्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्रं तं चान्तर्यामिणमिति

अत्र सोऽब्रवीदित्यादिना सूत्रतदन्तर्गतान्तर्यामिणोर्विज्ञानं स्तूयते । इममेवार्थं श्लोकाभ्यां संगृह्णाति *सूत्रबद्धमित्यादिना ॥ ३ ॥ स्तुतिप्रयोजनमाह* अत इति ॥ ४ ॥

श्रुतौ–ब्रह्मवित् परमार्थवित् तन्नियम्यभूरादिलोकज्ञश्चाग्न्यादिदेवांश्च वेत्ति, सर्वप्रमाणभूतान्वेदानपि जानाति, भूतानि ब्रह्मादीनि, आत्मानं कर्तृत्वादिविशिष्टं, सर्वं च जगत्तेनैवान्तर्यामिणा नियम्यमानं वेत्तीत्येवमब्रवीत् गन्धर्वः । अहं च तत्सूत्रान्तर्यामिद्वयं जाने हे याज्ञवल्क्य, त्वं तदुभयमविद्वांश्चेदब्रह्मवित्सन् यदिह ब्रह्मगवीर्ब्रह्मविदां स्वभूता गाः उदजसे उन्नयसि अन्यायेन, अतो मच्छापदग्धस्य ते मूर्द्धा विस्पष्टं पतिष्यतीत्येवमुक्तो मुनिराह—वेद वा जानाम्येवाहं गौतम, गौतमेति गोत्रतः । एवमुक्तः प्रत्याह गौतमः यो वै कश्चित्प्राकृत इदं त्वयोक्तं ब्रूयात्कथं वेद वेदेत्यात्मानं श्लाघयंस्तस्य किं तेन गर्जितेन, कार्येण तद्दर्शय यथा वे-

यो वा इदं कश्चिद् ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति ॥ १ ॥

स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्रंसिषतास्याङ्गानीति वायुना हि गौतम सूत्रेण संदृब्धानि भवन्तीत्येवमेवैतद्याज्ञवल्क्यान्तर्यामिणं ब्रूहीति ॥ २ ॥

वार्त्ति०--समष्टिव्यष्टिरूपेण भुज्युं प्रति य ईरितः ॥
स एव वायुः सूत्रात्मा तेन सर्वं जगद्धृतम् ॥ ५ ॥
ब्रह्मादिस्तंबपर्यंतं प्राणिकर्म पुरा कृतम् ॥

त्थ तथा ब्रूहीति ॥ १ ॥

सहेत्यादिप्रत्युक्तौ वायुर्वा इत्यादि व्याचष्टे *समष्टीति । भुज्युब्राह्मणे समष्टिव्यष्टिलिङ्गात्मा यो हिरण्यगर्भः स एव क्रियाशक्तिप्रधानः सन्वायुरित्युच्यत इत्युक्तम्, स एवात्र सूत्रशब्देनापि कथ्यत इत्यर्थः । वायुना वै तदित्यादेरर्थमाह *तेन सर्वमिति ॥ ५ ॥ कथं तस्य विधारकत्वमित्याशङ्क्य लिङ्गात्मकस्य तस्य सर्वविधारकत्वमनुभवसिद्धमिति वक्तुं लिङ्गस्वरूपमाह *ब्रह्मेत्यादिना । ब्रह्मणा सूत्रेण यजमानावस्थायां यत्कर्म कृतं, यानि च कर्माणि जन्मान्तरसृष्टिसाधनानि प्राणिभिः कृतानि, तत्सर्वं सूत्रात्मना परिणतं यजमानदेहान्ते फलदानार्थमभिव्यक्तमिति यावत् । तच्च प्रलये मूलकारणे तदात्मना स्थित्वा पुनरभिव्यक्तं भवति । एवंविधसूत्रात्मक एवायं सर्ववासनाश्रयः समष्टिव्यष्ट्यात्मकलिङ्गदेहः । यत लिङ्गं पञ्च महाभूतानि दश बाह्येन्द्रियाणि, पञ्चवृत्तिप्राण एकः, चतुर्विधान्तःकरणमेकमिति

वाय्वात्मना परिणतं वर्त्तते कारणात्मनि ॥ ६ ॥
मूर्त्तामूर्त्तब्राह्मणोक्तवासना एतमाश्रिताः ॥
तदात्मकमिदं लिङ्गं यत्सप्तदशमुच्यते ॥ ७ ॥
विष्टब्धो वायुना देह इत्यतन्मरणे सति ॥
अवायोर्वपुषो कर्मायोग्यत्वादवसीयताम् ॥ ८ ॥
अपञ्चीकृतभूतानां कार्यं सूत्रमुदीरितम् ॥
अण्डारम्भकभूतानि प्रोतान्योतानि चात्र हि ॥ ९ ॥
सूत्रादप्यान्तरं तत्त्वमन्तर्याम्याख्यमुच्यते ॥
कार्यकारणभावोऽयं यस्मिन्नुक्ते समाप्यते ॥ १० ॥
भूमिष्ठोऽभ्यन्तरो भूमेर्भूम्यज्ञातश्च भूवपुः ॥
नियच्छति भुवं योऽन्तः स आत्माऽन्यस्य तेऽपि मे॥११॥

श्रुतिः-यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ३ ॥

सप्तदशविधत्वेनोच्यते तद् इदं सूत्रात्मकमेवेत्यर्थः ॥६॥७॥ तस्य लिङ्गात्मकत्वेऽपि कथं विधारकत्वमित्याशङ्क्यानुभवसिद्धं तदिति दर्शयन् तस्माद्वै इत्यादेरर्थमाह *विष्टब्ध इति ॥ ८ ॥

यस्माद्वाय्वात्मकलिङ्गेन सर्वं विधृतं हे गौतम, तस्मादेव पुरुषं प्रेतमुद्दिश्याहुः व्यस्रंसिषत विस्रस्तानि अस्य पुरुषस्यांगानीति प्राणात्मकवायौ गते देहस्य कर्मायोग्यत्वदर्शनादतो वायुनेत्यादिना निगमयति श्रुतिः ॥

वृत्तं कीर्तयंस्तत्फलोक्तिपूर्वकं तेनान्तर्यामिप्रश्नस्य सङ्गतिमाह *अपञ्चीकृतेत्यादिना । भूतानां तत्कार्येन्द्रियादेश्च स्वरूपं सूत्रमित्युक्तमित्यर्थः ॥ ९ ॥ १० ॥ यः पृथिव्यामित्यादेरर्थमाह* भूमिष्ठ इति ॥ ११ ॥ पृथिव्यामिति प्र-

वा०—लोकं धत्ते स्वयं भूमिः स्वान्तर्यामी स्वयं ततः
इति स्वभाववादोऽयं भूमिष्ठत्वेन वार्यते ॥ १२ ॥
अन्तरत्वेन भूमिष्ठपर्वतादिर्निवर्त्तते ॥
भूदेवतानिवृत्तिः स्याद्यं न जानाति भूरिति ॥ १३ ॥
नान्तर्यामी विदेहत्वे साधनानामसम्भवात् ॥
देहिता तु न दृष्टेति न दोषोभूवपुष्मतः ॥ १४ ॥
भूदेवताया यो देहो देहोऽन्तर्यामिणोऽपि सः ॥
देवस्य कर्मणेशस्य मायया चार्जितो यतः ॥ १५ ॥

थमविशेषणस्य प्रयोजनमाह *लोकमिति ॥ भूः स्वयं स्वभावादेव लोकं च धृत्वा स्वात्मानं च नियच्छतीति शङ्कापनुत्त्यर्थमित्यर्थः ॥ १२ ॥ पृथिव्यां तिष्ठन्नन्तर्यामीत्युक्ते गिरिनगरादिसर्वोऽपि तथेति सर्वस्यांतर्यामित्वप्राप्तौ पृथिव्यांतर इति विशेषणमित्याह *अन्तरत्वेनेति ॥ उक्तविशेषणद्वयस्य पृथिवीदेवतायामपि सत्त्वात्तद्व्यावृत्त्यर्थं पृथिवी न वेदेति विशेषणमित्याह *भूदेवेति । सा ह्यहमस्मि पृथिवीत्यात्मानं जानातीति तद्व्यावृत्तिरनेन क्रियत इत्यर्थः ॥ १३ ॥ यस्य पृथिवी शरीरमित्यस्य व्यावर्त्याशङ्कामाह* नेति ॥ अन्तर्यामिणः शरीरमस्ति नवा, अन्त्ये देहादिमत एव तक्षादेर्वास्यादिनियन्तृत्वादिदृष्टेर्नास्य नियन्तृता । आद्ये 'न तस्य कार्यं करणं च विद्यते' इत्यादिश्रुतिविरोध इति भावः । उक्तशङ्कानिवर्त्तकत्वेनोत्तरवाक्यं व्याचष्टे *न दोष इत्यादिना । पृथिवीशरीरेण सशरीरः सन्नीश्वरः पृथिवीं नियच्छति । यथा भूदेवतायाः स्वकर्मारब्धेन शरीरेणासाधारणः सम्बन्धः, एवमीशस्यापि जगन्मात्रस्य तदविद्यार्जितत्वान्न नियन्तृत्वानुपपत्तिरिति भावः ॥ १४ ॥ १५ ॥

न चैकदेहयोगेऽपि यन्तृयन्तव्यसङ्करः ॥
बहिष्ठां देवतां भूमिमन्तस्थेशो नियच्छति ॥ १६ ॥
कार्योपाधिर्बहिष्ठः स्यात्कारणोपाधिरान्तरः ॥
उपाधिमात्रतो भेदो वस्तुतस्तु न भिद्यते ॥ १७ ॥
अतस्ते मेऽखिलस्यापि सोऽन्तर्याम्यात्मतां गतः ॥
अमृतत्वान्न जीवत्वमात्मत्वेऽप्यस्य शङ्क्यते ॥ १८ ॥
सार्वात्म्यं वक्तुमस्यैव बहूपाधिषु वर्णितः ॥
सर्वात्मशक्तियुक्तो यः सोऽन्तर्यामीति गम्यताम् ॥१९॥

श्रु०–योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं योऽपोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥४॥ योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयत्येष त आत्माऽन्तर्याम्य-

---

ननु पृथिवीशरीरेणैवेशस्य शरीरवत्त्वे तस्य नियम्यत्वं नियन्तृत्वं च स्यादिति नेत्याह *न चेति । कार्यकारणतादात्म्यापन्नां भूदेवतां तत्तादात्म्याभिमानरहितो मायोपहितः परमेश्वरो नियच्छतीत्यर्थः ॥ १६ ॥ भेदाङ्गीकृतावद्वैतहानिमाशङ्क्याह *उपाधीति । एतेन यः पृथिवीमित्यादेरर्थ उक्तः ॥ १७ ॥ एष इत्यादेरर्थमाह *अत इति ॥ भेदस्यौपाधिकत्वादित्यर्थः । त इति प्रतिवादिवाचकशब्दः स्वस्यान्येषां चोपलक्षणमित्याह *ते मेऽखिलस्यापीति ॥ ईशस्य प्रत्यगभिन्नत्वे संसारित्वमाशङ्क्यामृतपदसूचितं परिहारमाह *अमृतत्वादिति । एकत्वेऽपि बिम्बप्रतिबिम्बवत्कल्पितभेदसत्त्वेन बन्धमुक्तव्यवस्थोपपत्तेर्नेश्वरस्य संसारितेति भावः ॥ १८ ॥ योऽप्सु तिष्ठन्नित्याद्यनेकोदाहरणतात्पर्यमाह *सार्वात्म्यमिति ॥ १९ ॥

मृतः ॥ ५ ॥ योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षꣳ शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ६ ॥ यो वायौ तिष्ठन्वायोरन्तरो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः॥७॥यो दिवि तिष्ठन् दिवोऽन्तरो यं द्यौर्न वेद यस्य द्यौः शरीरं यो दिवमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः॥८॥ य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥९॥ यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो यं दिशो न विदुर्यस्य दिशः शरीरं यो दिशोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १० ॥ यश्चन्द्रतारके तिष्ठꣳश्चन्द्रतारकादन्तरो यं चन्द्रतारको न वेद यस्य चन्द्रतारकꣳ शरीरं यश्चन्द्रतारकमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ११ ॥ य आकाशे तिष्ठन्नाकाशादन्तरो यमाकाशो न वेद अस्याकाशः शरीरं य आकाशमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १२ ॥ यस्तमसि तिष्ठꣳस्तमसोऽन्तरो यं तमो न वेद यस्य तमः शरीरं यस्तमोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १३ ॥ यस्तेजसि तिष्ठꣳस्तेजसोऽन्तरो यं तेजो न वेद यस्य तेजः शरीरं यस्तेजोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत इत्यधिदैवतमथाधिभूतम् ॥ १४ ॥ यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यꣳ सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि

भूतान्यन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत इत्यधिभूतमथाध्यात्मम् ॥ १५ ॥ यः प्राणे तिष्ठन् प्राणादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १६ ॥ यो वाचि तिष्ठन्वाचोऽन्तरो यं वाङ् न वेद यस्य वाक् शरीरं यो वाचमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १७ ॥ यश्चक्षुषि तिष्ठꣳश्चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १८ ॥ यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो यꣳ श्रोत्रं न वेद यस्य श्रोत्रꣳ शरीरं यः श्रोत्रमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १९ ॥ यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ २० ॥ यस्त्वचि तिष्ठꣳस्त्वचोऽन्तरो यं त्वङ् न वेद यस्य त्वक् शरीरं यस्त्वचमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ २१ ॥ यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानꣳशरीरं यो विज्ञानमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ २२ ॥ यो रेतसि तिष्ठन् रेतसोऽन्तरो यꣳ रेतो न वेद यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः

वा०–प्रत्यग्ध्वान्तं चिदाभासं स्वकार्यनियमात्मकम् ॥

केचिन्निरुपाधिकमेव परमन्तर्यामिणमाहुः, तान् प्रत्याह* प्रत्यगिति ॥ चिदाभासाक्रान्तं प्रत्यगज्ञानं स्वकीयविवर्तनियमनरूपमिष्टं,

तदुपाधिर्नियन्तैष परः प्रोक्तो न तु स्वतः ॥ २० ॥
सर्वज्ञः सर्वशक्तिश्च सर्वभुक्सर्वगो ध्रुवः ॥
जगज्जनिस्थितिध्वंसहेतुरेष महेश्वरः ॥ २१ ॥
नारायणाभिधो मंत्र एतस्यैवाभिधायकः ॥
पञ्चाक्षरेण मन्त्रेण शिव इत्येष गीयते ॥ २२ ॥
हिरण्यगर्भं हैरण्यगर्भीया एनमूचिरे ॥
व्यासस्तत्तत्पुराणेषु तत्तद्रूपतयोचिवान् ॥ २३ ॥

श्रुतिः–अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातैष त ऽन्तर्याम्यमृतोऽतोऽन्यदार्त्तं ततो होद्दालक आरुआत्मा णिरुपरराम ॥ २३ ॥

इत्युपनिषदि सप्तमं ब्राह्मणं समाप्तम् ॥

तदुपहितश्च परमात्मा नियन्तेत्युच्यते, नतु स्वतो नियन्तृत्वं निर्व्यापारत्वादित्यर्थः ॥ २० ॥ निरुपाधिकस्यैव सर्वज्ञत्वादिवदन्तर्यामित्वं किं न स्यात् इत्याशङ्क्य दृष्टान्तासिद्धिमाह *सर्वज्ञ इति । सर्वज्ञत्वादौ हेतुः *जगदिति ॥ २१ ॥ ब्रह्मविष्णुरुद्राः सृष्ट्यादिहेतुत्वेन पुराणेषु श्रूयन्ते कथमन्तर्यामिणस्तद्धेतुत्वमित्याशङ्क्यायमेव चतुर्भुजमूर्त्याद्युपहितो विष्ण्वादिशब्दैरभिधीयत इत्याह* नारायणेत्यादिना । मन्त्रेणेति उपास्य इति शेषः ॥ २२ ॥ २३ ॥

यस्तेजसीत्यत्र तेजःशब्दस्तेजःसामान्यपरः । यो रेतसीत्यत्र रेतःशब्दः प्रजननवचनः ॥

वार्ति०—भूम्यादिदेवताः कस्मान्न स्वान्तर्यामिणं विदुः॥
अदृष्टोऽश्रुत इत्याह कारणं तदवेदने ॥ २४ ॥
दृष्टिश्रुतिमतिज्ञातिविषयत्वं चिदात्मनः ॥
उषस्तब्राह्मणे पूर्वं युक्त्या सम्यङ् निवारितम् ॥ २५ ॥
मागोचरातिवर्त्तित्वान्मातृमानादिसाक्षिणः ॥
द्रष्टुरन्यस्य चाभावान्न तं पश्यन्ति देवताः ॥ २६ ॥
अदृष्टत्वाश्रुतत्वादि प्रत्यग्ध्वान्तेऽपि सम्भवेत् ॥
तन्निवृत्त्यै श्रुतिर्द्रष्टा श्रोता मन्तेत्यभाषत ॥ २७ ॥
द्रष्टृत्वश्रोतृताद्यस्य दृष्टिश्रुत्यादिसाक्षिणा ॥
अलुप्तचित्स्वभावत्वान्न विकारो मनागपि ॥ २८ ॥
लोकसिद्धा नियम्यस्य जीवस्य द्रष्टृता तथा ॥

अदृष्टो द्रष्टेत्याद्यवतारयति*भूम्यादीति ॥२४॥ तस्य दृष्ट्याद्यविषयत्वं वा कथमित्याशङ्क्योक्तमर्थं स्मारयति *दृष्टीति । पृथिव्यादिक्षेत्रज्ञानां महाभागत्वेऽप्यन्तर्यामिणो दृष्ट्याद्यगोचरस्वभावत्वात्ते तं न पश्यन्तीत्यर्थः ॥ २५ ॥ अत्रैव हेत्वन्तरमाह *मागोचरेति ॥ शब्दादिहीनत्वात्प्रमात्रादिसाधकस्वप्रकाशसाक्षिण एकत्वेन स्वसाधकचैतन्यान्तराभावाच्च न ग्राह्यतेत्यर्थः॥२६॥ ननूक्तशङ्काया अदृष्टोऽश्रुत इत्यादिनैव निराससम्भवात्किं द्रष्टृत्वादिकथनेनेति तत्राह* अदृष्टत्वेति । दृष्ट्याद्यविषयत्वं साक्षिमात्रभास्येऽज्ञानेऽपि सम्भवात्तस्यान्तर्यामित्वशङ्कानिवृत्त्यर्थं श्रुतिर्द्रष्टेत्याद्यभाषतेत्यर्थः ॥ २७ ॥ नन्वात्मनो द्रष्टृत्वे सविकारत्वमत आह *द्रष्टृत्वेति ॥ २८ ॥ नान्योऽतोऽस्तीत्याद्यवतारयति* लोकेत्यादिना ॥ एकस्मिञ्छरीरे द्रष्टृद्वयाभावान्नान्तर्यामिणो द्रष्टृत्वमिति या शङ्का तामुच्छेत्तुमुत्तरवाक्यमित्यर्थः

अन्तर्याम्यपि चेद् द्रष्टा देहे भासेत तद्वयम् ॥ २९ ॥
इतिशङ्कानिवृत्त्यर्थं नान्योऽतोऽस्तीति भण्यते ॥
लोके जीवतया मूढैरन्तर्याम्येव भाव्यते ॥ ३० ॥
साधारणो यथा सूर्यो मां प्रत्येवैति पामरैः ॥
असाधारणरूपेण भाव्यते जीवता तथा ॥ ३१ ॥
बुद्धिस्थः पर एवात्मा जीवात्मेति निगद्यते ॥
बुध्यागमापायसाक्षी नियन्तेत्युच्यते परः ॥ ३२ ॥
सूत्रान्तर्यामिणौ शास्त्रगम्यत्वेन प्रतिष्ठितौ ॥
अप्रतिष्ठिततर्केण गम्यमानमितो ऽपरम् ॥ ३३ ॥

इति वार्तिकसारे तृतीयाध्याये सप्तमं ब्राह्मणं समाप्तम् ॥

॥ २९ ॥ द्रष्टृव्यतिरिक्तान्तर्यामिणोऽसत्त्वे कथं तद्भेदधीस्तत्राह* लोक इति ॥३०॥ अद्वयश्चिद्धातुः स्वाज्ञानजबुध्याद्यवच्छिन्नो बहुधाऽऽरोपितो मूढैरित्येतद् दृष्टान्तेन साधयति *साधारण इति । यथा लोके सवितुः सर्वसाधारण्येऽपि मां प्रत्येवायमभिमुखस्तिष्ठतीति स्वासाधारण्येन तमारोपयन्ति द्रष्टारः,तथा मूढाः स्वाविद्योत्थबुध्यादिभिरात्मानं बहुधा कल्पयन्तीत्यर्थः ॥ ३१ ॥ अद्वितीयः पर एवात्माऽविद्याद्युपाधिनाऽनेकधा भातीत्युक्तमुपसंहरति *बुद्धिस्थ इति ॥ ३२ ॥ ब्राह्मणार्थमुपसंहरन्नतोऽन्यदित्यादेरर्थमाह* सूत्रेति ॥ ३३ ॥

इति वार्तिकसारटीकायां सप्तमं ब्राह्मणं समाप्तम् ॥ ७ ॥

वा०-अष्टमब्राह्मणे ब्रह्मतत्त्वं सम्यङ् निरूप्यते ॥
सूत्रमन्तर्यामिता च यत्रोतप्रोततां व्रजेत् ॥ १ ॥
पूर्वत्र गौतमोऽपृच्छत्सूत्रान्तर्यामिवस्तुनी ॥
ओतप्रोतात्मतां गार्गी तयोरेवात्र पृच्छति ॥ २ ॥
श्रुतिः-अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो ह-

अक्षरब्राह्मणतात्पर्यं वदन्सङ्गतिमाह *अष्टमेति ॥ १ ॥ अ-स्यागतार्थतामाह* पूर्वत्रेति । सूत्रादिस्वरूपमेव प्राङ् निर्णीतं, न तस्य व्याप्यव्यापकभावः । अत्र तु सूत्रस्य व्यापकमाकाशं तस्य च व्यापकमक्षरं निर्णीयत इत्यर्थभेदासिद्धिः ।

श्रुत्यक्षरार्थस्तु-अथ ह वाचक्नव्युवाच पूर्वं याज्ञवल्क्येन निषिद्धा मूर्द्धपातभयादुपरता सती पुनः प्रष्टुं ब्राह्मणानुज्ञां प्रार्थयते । हे ब्राह्मणा भगवन्तः पूजावन्तः हन्त यद्यनुमतिर्भवतामस्ति तर्हीमं याज्ञवल्क्यं द्वौ प्रश्नौ प्रक्ष्यामि तौ प्रश्नौ चेन्मम वक्ष्यति युष्माकं मध्ये जातु कदाचिदपीमं ब्रह्मोद्यं ब्रह्मवदनं प्रति जेता कश्चिदपि नैव भवेदित्येवमुक्ताः ब्राह्मणाः अनुज्ञां प्रददुः पृच्छ गार्गीति । सा लब्धानुज्ञा याज्ञवल्क्यमाह अहं वै त्वा याज्ञवल्क्य यथा लोके काश्यः काशिषु भवः प्रसिद्धशौर्यः, वैदेहो वा विदेहानां राजा उग्रपुत्रः शूरान्वय इत्यर्थः । उज्ज्यमवतारितज्याकं धनुः पुनरधिज्यमारोपितज्याकं कृत्वा द्वौ बाणवन्तौ बाणशब्देन शराश्रयो वंशखण्डो लक्ष्यते, तद्वन्तौ शरौ सपत्नातिव्याधिनौ शत्रूणामतिपीडाकरौ हस्ते कृत्वोपोत्तिष्ठेत्समीपतः आत्मानं दर्शयेद् एवमेवाहं त्वां शरस्थानीयाभ्यां द्वाभ्यां प्रश्नाभ्याम् उपोदस्थामुपास्थितवत्यस्मि, त्वं ब्रह्मविच्चेत् तौ मे ब्रूहीति । आहेतरः पृच्छ गार्गीति ॥ १ ॥

न्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति पृच्छ गार्गीति १

सा होवाचाहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वां द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति ॥ २ ॥

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद् भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति ॥३॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद् भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाशे तदोतं च प्रोतं चेति ॥ ४ ॥

वा०–अण्डोर्ध्वाधोमध्यदेशान्कालं च व्याप्य तिष्ठति ॥
सूत्रमित्याहुराचार्या ओतं प्रोतं च कुत्रचित् ॥ २ ॥
अण्डारम्भकभूतानां न पृष्टा सूत्रओतता ॥

स होवाचेत्यादेरर्थमाह* अण्डेति । यद्वस्तु उर्ध्वमुपरि दिवोऽण्डकपालाच्चाधः पृथिव्या अण्डकपालात् यच्चान्तरा मध्ये द्यावापृथिव्योरण्डकपालयोरिमे च द्यावापृथिवी यद् भूतं चातीतं भवच्च वर्त्तमानं भविष्यच्च लिङ्गगम्यं सर्वं द्वैतजातं यस्मिन्नेकं भवति तत्सूत्रसंज्ञकं वदन्ति । तच्च सूत्रं पृथिवीधातुरिवाप्सु कुत्र ओतश्च प्रोतश्चेत्यर्थः ॥ २ ॥ ननु गार्गिब्राह्मणे ब्रह्मलोकशब्दिताण्डारम्भकभूतपर्यन्तस्यैवोतप्रोतत्वोक्तेस्तस्य कुत्र ओतत्वादसिपृष्ट्वा कथं सूत्रस्य ओतत्वादि पृच्छयत इति तत्राह* अण्ड-

सूत्रेण विधृतं सर्वमिति पूर्वत्र निर्णयात् ॥ ४ ॥
तार्किकत्वनिवृत्त्यर्थमाचार्योक्तिमुदाहरत् ॥
निःशेषदेशकालोक्त्या सूत्रसर्वात्मतोदिता ॥ ५ ॥
व्यक्तं सर्वं सूत्ररूपमव्यक्तव्योमसंज्ञिके ॥
ओतं प्रोतं च विद्धीति प्राह पृष्टमनूद्य सः ॥ ६ ॥
देशकालौ च सूत्रेण स्यूतौ देशात्मकं ततः ॥
वियन्नाकाशमत्रेति सूचनायानुवादगीः ॥ ७ ॥
आकाशो वै नाम नामरूपयोर्निर्वहेज्जनिम् ॥
इत्याह कारणं ब्रह्म श्रुतिराकाशशब्दतः ॥ ८ ॥
आसमन्तात्काशतेऽयमित्याकाशत्वमात्मनः ॥
जगत्कारणता तस्य सर्ववेदान्तसम्मता ॥ ९ ॥

ति । सूत्रलक्षणकथनेनार्थात्तदपि ज्ञातमित्यर्थः ॥ ४ ॥ आचक्षत इति परोक्तिरस्यागमैकसमधिगम्यत्वसूचनार्थेत्याह* तार्किकत्वेति । प्रश्नार्थमनुवदन् प्रत्युक्तिं व्याचष्टे *निःशेषेत्यादिना ॥ ५ ॥ ६ ॥ ननु पृष्टस्यानुवादः किमर्थस्तत्राह* देशेति । अस्मिन्वाक्ये आकाशशब्दोऽव्याकृतवचनो न वियद्वाचकः, वियतोऽपि जगदेकदेशत्वेन जगदात्मकसूत्रेऽन्तर्भूतत्वादिति सूचनाय पुनरनुवादरूपेण सूत्रस्य सर्वात्मत्वोक्तिरित्यर्थः ॥ ७ ॥ भूताकाशे रूढस्याकाशशब्दस्य कथं जगत्कारणवाचित्वं तत्राह *आकाश इति । नामरूपयोरुत्पत्तिं यस्तु नियमयेत्स आकाशो नामेति श्रुत्यन्तरे दृष्टत्वात्प्रयोगबाहुल्येनाकाशशब्दो ब्रह्मण्यपि संभवतीति भावः ॥ ८ ॥ योगवृत्त्याऽपि तत्र तत्सम्भवमाह *आसमन्तादिति ॥ ९ ॥ आकाशशब्दितस्य जगत्कारणवाचित्वे तस्यैव सर्वान्तरत्वात्कस्मिन्नु खल्वाकाश इत्यादि पुनः प्रश्ना-

मायाप्रयुक्तमेवेदं कारणत्वं न वास्तवम् ॥
अपूर्वानपराद्युक्तेः कुतो वास्तवहेतुता ॥ १० ॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ॥
इति मायाप्रयुक्तं तत्कारणत्वं श्रुतिर्जगौ ॥ ११ ॥
व्यावृत्तिविधिरूपाभ्यां तमोवद्भावरूपिणी ॥
मायाऽनुभूयमानेयं प्रत्याख्यातुं न शक्यते ॥ १२ ॥
व्यावृत्तः शुक्लपीतादेरन्धकारोऽनुभूयते ॥
तथा विधिमुखेनापि द्विरेफोदरवत्तमः ॥ १३ ॥
स्वप्नाज्जागरणाच्चैवं व्यावृत्ता सुप्तिरीक्ष्यते ॥
मूढोऽस्मीति विभात्येष मोहो विधिमुखादपि ॥ १४ ॥
अहङ्कारजनेः पूर्वं मोहश्चिन्मात्रवर्त्यभूत् ॥
तदुत्पत्तावहङ्कारविशेषणमिवेक्ष्यते ॥ १५ ॥
प्रत्यक्त्वं मोहयुक्तं पूर्वं व्यक्तं जगज्जनेः ॥
अव्याकृताख्यमभवत्सूत्रं तत्र समाश्रितम् ॥ १६ ॥
एषोऽन्तर्याम्येष योनिरिति श्रुतिसमीक्षणे ॥

नुपपत्तिरित्याशङ्क्याह *मायेति । तत्र हेतुमाह* अपूर्वेत्यादिना- ॥ १० ॥ ॥ ११ ॥ नन्वात्मनि मायैव नोपपद्यते स्वप्रकाशत्वा- त्कुतस्तत्कारणत्वस्य मायिकतेति तत्राह *व्यावृत्तीति ॥ १२ ॥ व्यावृत्तिविधिरूपाभ्यामनुभवं दृष्टान्तेन स्पष्टयति *व्यावृत्त इति ॥ १३ ॥ दार्ष्टान्तिके तमाह* स्वप्नादिति । सुप्तिरविद्या ॥ १४ ॥ नन्वाश्रयानिरूपणान्मोहोऽनुपपन्नः, स किमात्माश्रयो- ऽहङ्काराश्रयो वा ? नाद्यः 'अहमज्ञः' इति प्रतीतिविरोधात् । नान्त्यः, तत्कार्यस्य तदाश्रयत्वायोगादिति तत्राह*अहङ्कारेति । प्रथमप्रश्ना- र्थमुपसंहरति *प्रत्यगिति ॥१६॥ केचित्तु-अव्याकृतान्तर्यामिणोर्भेदं

नोक्तान्तर्यामिणः कल्प्यमन्यत्तत्त्वान्तरं बुधैः ॥१७॥

श्रुतिः-सा होवाच नमस्तेऽस्तु याज्ञवल्क्य
योम एतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति॥५॥

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद् भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिꣳस्तदोतं च प्रोतं चेति ॥६॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद् भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं चेति ॥

वार्त्ति०-बोद्धुं बोधयितुं चैतदत्यन्तं दुःशकं त्विति ॥
विस्मिता प्रणनामासौ तमव्याकृतवादिनम् ॥ १८ ॥
भूयोऽपि पृष्टमप्राक्षीत्प्रधानादिषु शङ्कया ॥
प्रधानादीन्जगद्धेतून्वादिनः स्थापयन्ति हि ॥ १९ ॥
सावधारणमाकाश एवेत्यन्यनिवृत्तये ॥
आहोत्तरं मूर्द्धपातं सूचयंस्तर्कनिर्णये ॥ २० ॥

कल्पयन्ति तान्प्रत्याह* एष इति ॥ १७ ॥ सा होवाच नमस्तेऽस्त्वित्यादेस्तात्पर्यमाह *बोद्धुमिति ॥ १८ ॥

यो मे मम एतं प्रश्नं व्यवोचः विशेषेणापाकृतवानसि तस्मै तुभ्यं नमोऽस्तु । अपरस्मै द्वितीयाय प्रश्नाय धारयस्व दृढीकुरु आत्मानमिति श्रुत्यक्षरार्थः ॥ ५ ॥

सा होवाच यदूर्ध्वमित्यादौ पृष्टस्य पुनर्वचने हेतुमाह *भूयोऽपीति ॥ १९ ॥ प्रत्युक्तितात्पर्यमाह* सावधारणमिति ॥ नन्वाकाश एवेत्यवधारणेनापि कथं प्रधानादिव्यावृत्तिः? तत्राह *मूर्द्धेति । तार्किककल्पितप्रधानादेः सूत्राश्रयत्वोक्तौ मूर्द्धपातप्रसक्तेरुक्तत्वादागमगम्यं ब्रह्मैवाकाशशब्देनोक्तमित्येवकारेण सू-

यद्वा तन्तुष्विव पटः सूत्रं बहुषु संश्रितम् ॥
इत्याशङ्क्य पुनः प्रश्न एवकारो बहुत्वनुत् ॥ २१ ॥
श्रुतिः—कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥७॥
वा०—कस्मिन् खल्वयमाकाश ओतश्च प्रोत ईर्यताम् ॥
अनोतत्वे स्वतन्त्रत्वात्प्रधानत्वं प्रसज्ज्यते ॥ २२ ॥
सूक्ष्मत्वाद् दुर्वचं सूत्रं व्योम सूक्ष्मतरं ततः ॥
व्योमाश्रयः सूक्ष्मतमो न वाग्गोचरमेत्यतः ॥ २३ ॥
वेत्ति चेन्निग्रहस्थानमवाच्यस्योक्तितो भवेत् ॥
अनुक्तौ वादिताहानिरिति गार्ग्या विवक्षितम् ॥२४॥
उक्तदोषद्वयास्पृष्टं प्रत्युत्तरमभाषत ॥
एतद्वा अक्षरं गार्गि प्राहुस्तद्ब्राह्मणा इति ॥ २५ ॥

श्रुतिः—स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रो-

---

चितमिति भावः ॥ २० ॥ नन्वनुमानगम्यप्रधानादेराकाशशब्दवाच्यत्वशङ्काऽप्यनुपपन्ना उक्तदोषादेवेत्यरुचेः पक्षान्तरमाह *यद्वेति । कार्यमात्रस्यानेकाश्रयत्वदृष्टेः सूत्रस्यापि कार्यत्वादव्याकृतातिरिक्तमाश्रयान्तरं सम्भवति, तच्च किम् ? इति भूयः प्रश्नः कृतः । आकाश एवेत्येवकारेण वियदादिसर्वप्रपञ्चस्याप्यव्याकृतमात्रजन्यत्वात्तन्मात्राश्रितत्वमित्याशङ्कामपाकृतवानिति भावः ॥ २१ ॥ कस्मिन्नु खल्वाकाश इत्यादेरर्थमाह *कस्मिन्निति । एवंपृच्छन्त्या गार्ग्यास्तात्पर्यमाह* अनोतत्व इत्यादिना ॥ २२ ॥ २३ ॥२४॥ प्रतिवचनमवतारयति* उक्तेति । दोषद्वयास्पृष्टत्वं चानुपदमेव व्यक्तीकरिष्यति ॥ २५ ॥ एतद्वै तदक्षरमित्यत्र एतत्पदमुपस्तप्रश्नोक्तत्वम्पदलक्ष्यसाक्षिपरमित्याह

स्थमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन ॥ ८ ॥

वा०—एतच्छब्देन तस्याह प्रत्यक्साक्षिकतामसौ ॥
प्रत्यक्तया तदैकात्म्यं स्वयमेव प्रतीयताम् ॥ २६ ॥
न व्यावृत्तं विशेषेभ्यो नानुवृत्तं च गोत्ववत् ॥
अव्यावृत्ताननुगतं चैतन्यं केन वीक्ष्यताम् ॥ २७ ॥
यस्मात्प्रसिद्धं नास्त्यन्यत्प्रसिद्धं यन्न कस्य चित् ॥
स्वप्रभत्वादसङ्गत्वाद्वैशब्दस्तत्प्रसिद्धये ॥ २८ ॥
साक्षादित्यादिना पूर्वं योऽशनायादिना तथा ॥
यत्नादभिहितः प्रत्यक् तच्छब्देन स गृह्यते ॥ २९ ॥
क्षराद्विरुद्धधर्मत्वादक्षरं ब्रह्म भण्यते ॥
कार्यकारणरूपं तु नश्वरं क्षरमुच्यते ॥ ३० ॥
ध्वस्तात्माज्ञानतत्कार्याः प्रत्यग्याथात्म्यबोधतः ॥
त्यक्तसर्वैषणा अत्र ब्राह्मणा इति कीर्तिताः ॥ ३१ ॥
शास्त्रैकगम्यतासिध्यै वदन्तीत्यभिधीयते ॥

---

*एतदिति । तस्यैतच्छब्दनिर्देशयोग्यतामाह*प्रत्यक्तयेति॥२६॥ ॥२७॥ वस्तुत्वादैकात्म्यमपि घटवदस्वप्रकाशमित्याशङ्क्य वैषम्यमाह* यस्मादिति ॥ स्वेतरस्याप्रसिद्धत्वेऽपि स्वस्य प्रसिद्धत्वाल्लौकिकत्वमाशङ्क्याह *प्रसिद्धमिति ॥ कार्यकारणनिर्मुक्तमद्वयं स्वप्रकाशमसङ्गं वस्तु वैशब्दार्थः ॥२८॥ कहोलप्रश्नोक्तस्तत्पदार्थोऽत्र तच्छब्दार्थ इत्याह* साक्षादिति ॥ यत्नात्—तज्ज्ञानोपाय्योपन्यासादिति यावत् ॥२९॥ अक्षरं ब्राह्मणा वदन्तीति पदत्रयं क्रमेण व्याचष्टे*क्षरादित्यादिना ॥ ३० ॥ ३१ ॥ अत्र वदन्तीति परोक्त्याऽवाच्यं वदतो विप्रतिपत्तिर्नाम निग्रहस्थानम्, अवदतो वादित्वहानिरिति गार्ग्या विवक्षितं दोषद्वयं परिहृतमित्याह* ब्राह्मणा-

ब्राह्मणास्तद्वदन्तीति स्वापराधनिषेधगीः ॥ ३२ ॥
नावाच्यं वच्म्यहं किंतु वदन्ति गुरवोऽखिलाः ॥
इति वच्मि यतस्तेन वादिताऽपि न हीयते ॥ ३३ ॥
गुरवोऽपि कथं प्राहुरवाच्यमिति चेच्छृणु ॥
स्थूलादीनां निषेधेन लक्षयन्त्यक्षरं बुधाः ॥ ३४ ॥
अभावशेषो नाशङ्क्यो निषेधावधिशेषणात् ॥
नाभावनिष्ठो लोकेऽपि निषेधः किमुताक्षरे ॥ ३५ ॥
नञर्थः पर्युदासो वा स्थूलादेरन्यताऽक्षरे ॥
विवक्षिता न च द्वैतं स्थूलादेः कल्पितत्वतः ॥ ३६ ॥
ननूत्सर्गविशेषौ स्तो यत्र तत्र निषेधगीः ॥
दातव्यं दधि विप्रेभ्यो न चैत्रायेत्युदाहृतेः ॥ ३७ ॥
बाढमज्ञानमात्मा च द्वयं सामान्यमुच्यते ॥

इत्यादिना ॥ ३२ ॥ ३३ ॥ अस्थूलादिवाक्यमवतार्य व्याचष्टे*गुरव इति । अस्थूलादिपदानि अभाववाचकानि तद्भासकसाक्षिणं लक्षयन्तीत्यर्थः ॥ ३४ ॥ ननु तेषां वाच्यार्थमात्रपर्यवसायित्वं किं न स्यात्तत्राह* अभावेति ॥ निरवधिकनिषेधायोगादित्यर्थः । किञ्च 'अस्थूलो घटः' इत्यादिलौकिकवाक्यमपि नाभावमात्रनिष्ठं किं सर्वजगदाधारत्वेन प्रस्तुताक्षरबोधिवाक्यमित्याह*नेति ॥३५॥ प्रसक्तप्रतिषेधो नञर्थ इत्युक्त्वा पर्युदासस्तदर्थ इति पक्षान्तरमाह *नञर्थ इति ॥ ब्रह्मणः स्थूलादिभिन्नत्वविवक्षायामद्वैतहानिस्तत्राह *नचेति ॥ ३६ ॥ प्रसक्तप्रतिषेधो नञर्थ इतिपक्षमाक्षिपति *नन्विति । यथा 'ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्याय' इत्यत्र ब्राह्मणसामान्ये दातव्यत्वेन प्राप्तं दधि तद्विशेषे निषिध्यते, तद्वदद्वैते विषयभेदाभावान्नात्र स्थूलादेर्निषेध इत्यर्थः ॥ ३७ ॥ वस्तुतो अद्वयत्वेऽपि तत्र सामान्यविशेषव्यवस्था युक्तेति परिहरति

विशेषः शुद्ध आत्माऽतो निषेधोऽत्र प्रवर्त्तताम् ॥३८॥
निषेधः कल्पितस्यापि स्थूलादेरिह युज्यते ॥
अध्यस्तव्योमनैल्यादिनिषेधस्योपलम्भनात् ॥ ३९ ॥
यदि वाऽक्षरयाथात्म्यं स्थूलादेरिह भण्यते ॥
स्रग्याथात्म्यमहेर्यद्वन्न तु किञ्चिन्निषिध्यते ॥ ४० ॥
स्थूलादिहेतोर्दाहो वा ध्वान्तस्य प्रत्यगात्मनि ॥
अस्थूलादिसमुत्थात्मयाथात्म्यज्ञानवह्निना ॥ ४१ ॥
नन्वोतप्रोतवाक्येन व्यक्तमव्याकृते जगत् ॥
विलापितं, पुनः कस्मात्स्थूलादिः प्रतिषिध्यते ॥४२॥
समस्तव्यस्ततां कश्चिद्वक्त्योतप्रोतवाक्यतः ॥
ब्रह्मणस्तद्व्युदासाय स्थूलादि प्रतिषिध्यते ॥ ४३ ॥
व्यक्तावस्थाऽथवैतेषां निषिद्धा कारणात्मनि ॥

बाढमिति ॥ ३८ ॥ शुद्धब्रह्मणि वस्तुनोऽप्रसक्तस्यापि निषेधः सम्भवतीति सदृष्टान्तमाह निषेध इति ॥ यथाऽज्ञाते व्योमतत्त्वे प्राप्तं नैल्यादि ज्ञाते तस्मिन्निषिध्यते तद्वत्प्रकृतेऽपीत्यर्थः ॥३९॥ प्रसक्तप्रतिषेधानुरोधेनास्थूलादिवाक्यस्यार्थमुक्त्वा पर्युदासमनुसृत्यार्थान्तरमाह* यदि वेति ॥ तदेव दृष्टान्तेनाह* स्रगिति ॥ स्थूलादिजगतोऽद्वयत्वावेदनपरं वाक्यं न निषेधपरमित्यर्थः ॥ ४० ॥ प्रतीचि स्थूलादिहेत्वबोधस्य वाक्योत्थबोधेन बाधपरं वाक्यमित्याद्यं कल्पमाश्रित्यार्थान्तरमाह *स्थूलादीति ॥ ४१ ॥ स्थूलादिवाक्यस्य गतार्थत्वं शङ्कते* नन्विति ॥ ४२ ॥ स्वयूथ्यमतनिरासपरत्वेनार्थपरत्वमाह*समस्तेति ॥ ४३ ॥ प्रकारान्तरेणागतार्थत्वमाह *व्यक्तेति ॥ यदूर्ध्वमित्यादिना स्थूलादीनां व्यक्तावस्था कारणे निरस्ता । तेषामेव शक्त्यवस्थायाः कार्यकारणविलक्षणेऽक्षरे निरासार्थमस्थूलादिवाक्यमित्यर्थः ॥४४॥

शक्त्यवस्थानिषेधस्तु क्रियतेऽत्राक्षरात्मनि ॥ ४४ ॥
एवं च सति तत्पूर्णं ब्रह्म कृत्स्नं भविष्यति ॥
नोचेदकृत्स्नमेव स्याच्छक्त्यवस्थाऽनपह्नवात् ॥ ४५ ॥
नवा निषेधः स्थूलादेस्तस्य प्रागेव सिद्धितः ॥
तन्निषेधानुवादेन प्रतीचि ब्रह्म बोध्यते ॥ ४६ ॥
स्थूलादिमेयमामातृनिषेधे स्वप्रभं फलम् ॥
विद्धि सर्वान्तरं ब्रह्म साक्षादित्यादिलक्षणम् ॥४७॥
नेतिनेतीतिवद् व्याख्या सर्वाऽपीह समीक्ष्यताम् ॥
सर्वेषामपि चोद्यानामेवंसति न सम्भवः ॥ ४८ ॥

शक्त्यवस्थानिषेधे किं फलं ? तदाह* एवमिति ॥ ४५ ॥ तत्त्व-मादिवाक्यवद्विधिमुखेन बोधकमस्थूलादिवाक्यं न निषेधपर-मित्यर्थान्तरमाह *नवेति ॥ ओतप्रोतवाक्येन स्थूलादिनिषेध-स्य सिद्धत्वात्स्थूलसूक्ष्मयोरभेदाच्चेति हेत्वर्थः। किं परं तर्हि वा-क्यं तदाह* तन्निषेधेति ॥४६॥ स्थूलादिनिषेधमनूद्य तत्साक्षिणि त्वमर्थे ब्रह्मत्वबोधप्रकारमभिनयति *स्थूलादीति । स्थूलादि-र्हि मातृमानमेयात्मत्वेन त्रिधा स्थितस्तन्निषेधे तदवधिभूतं यत्स्व-प्रकाशं स्फुरणमस्ति तदेवोक्तविशेषणं ब्रह्म विद्धीति योजना ॥ ४७ ॥ कथं नञवति वाक्ये विधिमुखेन बोधकत्वं ? तत्राह *नेति नेतीति । विधिमुखेन बोधकत्वे वाक्यस्याभाव-निष्ठत्वमक्षरस्य सद्वयत्वमित्यादिचोद्यमनवकाशमिति लाभं दर्श-यति *सर्वेषामिति ॥ ४८ ॥

अस्थूलमित्यादिश्रुतेरक्षरार्थस्तु-अस्थूलं स्थूलादन्यद् । एवं तर्ह्यणु ? अनणु, तथाऽ ह्रस्वमदीर्घम्, एवं चतुर्भिः परिणामैर्द्रव्य-धर्मप्रतिषेधः, न द्रव्यं तदक्षरमित्यर्थः। अस्तु तर्ह्याग्नेयो लोहितो गुणः, ततो ऽप्यन्यद् अलोहितम्। भवतु तर्ह्यपां स्नेहनमस्नेहम्।

यत्किञ्चिद्वस्तु लोकेऽस्मिन्वाचो गोचरतां गतम् ॥
प्रमाणस्य च तत्सर्वमक्षरे प्रतिषिध्यते ॥ ४९ ॥
मागोचरे निषिद्धे च मानहीनं तदक्षरम् ॥
कथमस्तीति चेत् कोऽर्थः कथंशब्दस्य कथ्यताम् ॥५०॥
आक्षिप्यते ऽक्षरे सत्ता मानं वा तत्र पृच्छयते ॥
प्रमाणाभावमात्रेण सत्ता ऽऽक्षेप्तुं न शक्यते ॥५१॥
मानस्याभिव्यञ्जकत्वादव्यक्तं स्यादमानकम् ॥
नैतावता वस्तुसत्ता नास्तीति ग्राहकं विना ॥ ५२ ॥

एवमच्छायं छायाविलक्षणम् । अतमः अन्धकारादन्यद् । भवतु वायुः, अवायुः । भवेत्तर्ह्याकाशम्, अनाकाशम् । भवतु तर्हि जतुवत्सङ्गात्मकम्, असङ्गम् । अस्तु तर्हि रसः, अरसम् । तथाऽगन्धम् । तथाऽचक्षुष्कम् । 'पश्यत्यचक्षुः' इति मन्त्रवर्णात् । तथा ऽश्रोत्रं 'स शृणोत्यकर्णः' इति श्रुतेः । भवतु तर्हि वाग्, अवाक् । तथाऽमनस्तथाऽतेजः । अतेजस्कमप्राणमित्याध्यात्मिको वायुः प्रतिषिध्यते । मुखं तर्हि द्वारं, तदमुखम् । तथाऽमात्रं मानमेयान्वयरहितम् । अस्तु तर्हि छिद्रवदन्तरम्, अनन्तरम् । भवेत्तर्हि बहिस्तस्माद्बाह्यम् । अस्तु तर्हि भक्षयितृ, न तदश्नाति किञ्चन । भवेत्तर्हि भक्ष्यं कस्यचित्, न तदश्नाति कश्चन ॥ ८ ॥

एतत्सर्वमभिप्रेत्यानुक्तविशेषान्तरं किञ्चिदस्त्विति शङ्कां वारयति *यत्किञ्चिदिति । उक्तविशेषनिषेधोऽनुक्तविशेषनिषेधोपलक्षणमिति भावः ॥ ४९ ॥

अक्षरस्य मानाविषयत्वे शून्यत्वापत्तिं शङ्कते *मागोचरेति । उक्तचोद्यं परिहर्तुं शङ्कितुराशयं पृच्छति* कोऽर्थ इति ॥ ५० ॥ किंशब्दसूचितं विकल्पं दर्शयति *आक्षिप्यत इति ॥ आद्यं

नास्यास्तित्वे यथा मानमेकत्वादक्षरात्मनः ॥
तथा तन्नास्तितायां च, नातोऽसत्ताऽक्षरात्मनः ॥५३॥
नासत्त्ववत्तस्य सत्त्वं मानहीनं न भासते ॥
स्वतोऽवभासरूपत्वादन्याभासानपेक्षणात् ॥ ५४ ॥
यथा कुम्भः प्रकाशाय भानयोगमपेक्षते ॥
तथा भानं प्रकाशाय नान्यत्किञ्चिदपेक्षते ॥ ५५ ॥
प्रमाणप्रश्नपक्षेऽपि मानं तद्भानसिद्धये ॥
अज्ञानहानयेवोत विवादविनिवृत्तये ॥ ५६ ॥
दत्तमुत्तरमाद्यस्य स्वप्रकाशत्ववर्णनात् ॥
अज्ञानहानिर्बोधात्स्यादस्मादक्षरवाक्यजात् ॥ ५७ ॥
नाक्षरास्तित्वबोधश्चेत् वाक्यात्स्यात्किं फलं भवेत् ॥

प्रत्याह* प्रमाणेति ॥ ५१ ॥ उक्तमेव व्यनक्ति *मानस्येति ॥ नहि दीपाभावे तदभिव्यङ्ग्यघटादि तमसाऽऽवृतं तदभावग्राहकमानं विना नास्तीति सुवचमिति भावः ॥ ५२ ॥ तर्ह्यक्षराभावो मानेन निश्चीयते तत्राह *नेति ॥ एकत्वान्निर्विशेषत्वादिति यावत् ॥ ५३ ॥ नन्वक्षरतदभावयोर्मानागोचरत्वेऽभाववत्तत्सत्त्वमपि न भासेतेति नेत्याह *नेति ॥५४॥ अक्षरास्तित्वं स्वतःसिद्धं तदभावस्तु नैवमित्यत्र दृष्टान्तमित्याह *यथेति ॥ ५५ ॥ एवमक्षरस्य सत्ताऽऽक्षिप्यत इति पक्षं निरस्य तत्र प्रमाणं पृच्छ्यते इतिपक्षमनूद्य विकल्पयति *प्रमाणेति ॥ ५६ ॥ आद्यं प्रत्याह *दत्तमिति ॥ द्वितीयेऽज्ञाननिवर्त्तकं मानमस्थूलादिवाक्यमेवेत्युत्तरमाह *अज्ञानेति ॥ ५७ ॥ अस्य वाक्यस्य स्थूलाद्यभाववोधित्वात्कथमक्षराकारधीजनकत्वमित्याशङ्क्याह *नेति ॥ तथाच वाक्यस्य फलवत्त्वाय लक्षणयाऽक्षरबोधित्वमुक्तमङ्गीकार्यमिति भावः ॥ नचाक्षरस्य वाक्यजन्यधीविषयत्वे मानागोचर-

स्थूलाद्यनेकधर्माणां निषेधस्य प्रगामतः ॥ ५८ ॥
विवादोऽप्यक्षरे किं स्यान्निरुपाधौ चिदात्मनि ॥
अन्तर्यामिणि सोपाधावोतप्रोतेऽथवा वद ॥ ५९ ॥
चित्स्वरूपे विवादश्चेज्जगदान्ध्यं प्रसज्ज्यते ॥
अन्तर्यामिण्यतो वादिविवादः परिशिष्यते ॥ ६० ॥
प्रशासनेन लिङ्गेन स विवादोऽपनुद्यते ॥
अन्तर्यामिण्यभ्युपेते सुशकं बोद्धुमक्षरम् ॥ ६१ ॥
ईशितव्यार्थसम्बन्धादन्तर्याम्येतदक्षरम् ॥
चैतन्याभासमोहाख्यवर्त्मनैव न तु स्वतः ॥ ६२ ॥

श्रुतिः—एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः ।

त्वमुक्तं विरुध्येतेति वाच्यम् । अक्षरस्य स्वप्रकाशत्वेन मानप्रकाश्यविलक्षणत्वमात्रस्य तत्रोक्तत्वादिति ॥ ५८ ॥ तृतीयं कल्पं द्वेधा विकल्पयति *विवाद इति ॥ ५९ ॥ आद्ये प्रत्याह* चिदिति ॥ द्वितीयं परिशिनष्टि *अन्तर्यामिणीति ॥ ६० ॥ कथं तर्हि विवादनिराकरणमित्याशंक्योत्तरवाक्यमादत्ते* प्रशासनेनेति ॥ नन्वक्षरं प्रक्रम्यान्तर्यामिण्यनुमानोक्तिरयुक्ता तत्राह *अन्तर्यामिणीति ॥ ६१ ॥ कथम् अन्तर्यामिज्ञानादक्षरधीरित्याशङ्क्य तयोर्वास्तवाभेदमाह* ईशितव्येति ॥ तथाचान्तर्यामिण्यनुमानसिद्धतटस्थलक्षणद्वाराऽक्षरस्वरूपलक्षणं सिध्यतीति भावः ॥ ६२ ॥

एतस्य वा इत्यादेरक्षरार्थस्तु—एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ सर्वप्राणिप्रकाशोपकारत्वाल्लौकिकप्रदीपवल्लोकप्रयोजनविज्ञानवता स्वतन्त्रेण निर्मितौ

एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः।

एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्द्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ति।

एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्पन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां च दिशमनु।

एतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः॥९॥

विधृतौ च सन्तौ तच्छासने आज्ञायां तिष्ठतः, नियतदेशकालनिमित्तोदयास्तमयवृद्धिक्षयाभ्यां वर्त्तेते। द्यौश्च पृथिवी च द्यावापृथिव्यौ सावयवत्वात्स्फुटनस्वभावे, गुरुत्वात्पतनस्वभावे अपि न स्फुटिते न पतिते, ततोऽक्षरेण विधृते तच्छासने तिष्ठतः। 'येन द्यौरुग्रा पृथिवी दृढा'इति मन्त्रवर्णात्॥ निमेषादयः कालावयवाः विधृतास्तिष्ठन्ति, ते हि सर्वस्य जनिमतः कलयितारः। यथा लोके प्रभुणा निर्मितो गणक आयं व्ययं चाप्रमत्तो गणयति, तथा प्रभुस्थानीय ईश्वर एषां कालावयवानां प्रशास्ता इत्यर्थः॥ प्राच्यः प्रागञ्चना गंगाद्याः श्वेतेभ्यो हिमवदादिभ्यः पर्वतेभ्यः स्पन्दन्ते, प्रतीच्यः सिन्ध्वाद्याः, अन्याश्च यां यां दिशमनु प्रवृत्तास्तां तां दिशं न व्यभिचरन्तीत्यर्थः॥

दर्वीशब्दो दर्वीहोमवचनः। यो न कस्य चित् प्रकृतित्वेन विकृतित्वेन वा वर्तते स दर्वीहोमः, तमन्वायत्ता अनुगता इत्यर्थः॥ ९॥

वा० एतस्य वा अक्षरस्य शासने इत्यदो जगत् ॥
स्याद्व्यवस्थितमर्यादं सूर्यचन्द्रादिलक्षणम् ॥ ६३ ॥
विवादगोचरापन्ना यन्तृपूर्वा जगत्स्थितिः ॥
व्यवस्थितत्वाल्लोकस्य राजपूर्वा स्थितिर्यथा ॥ ६४ ॥
सूर्यचन्द्रौ द्युभूलोकौ कालो नद्यो यथायथम् ॥
नियमेन प्रवर्त्तन्ते सा प्रवृत्तिर्व्यवस्थितिः ॥ ६५ ॥
धने दानेन नष्टेऽपि तत्फलप्रद ईश्वरः ॥
यतोऽस्ति तेन दातारं तं प्रशंसन्ति वैदिकाः ॥ ६६ ॥
नापूर्वं फलदं तस्मिन्मानाभावात्, फलं पुनः ॥
ईशादप्युपपन्नत्वान्नैवापूर्वस्य कल्पकम् ॥ ६७ ॥
सेव्याद्राज्ञः फलप्राप्तिर्दृश्यते न त्वपूर्वतः ॥
दानादिक्रियया सेव्यादीशात्तद्वत्फलं भवेत् ॥ ६८ ॥
देवता यागकर्तारं पितरः श्राद्धकारिणम् ॥

श्रुत्यक्षराणि व्याचष्टे *एतस्येति ॥ इदं जगदक्षरस्य शासने स्थित्वा वक्ष्यमाणप्रकारेण व्यवस्थितमर्यादं स्यादित्यर्थः ॥ ६३ ॥ उक्तमर्थमनुमानारूढं करोति *विवादेति ॥ ६४ ॥ 'सूर्यचन्द्रादिलक्षणम्'इत्युक्तम् । तत्रादिशब्देन विवक्षितमर्थं दर्शयन् "व्यवस्थितमर्यादम्"इत्युक्तं व्यनक्ति *सूर्येति ॥ ६५ ॥ ददतो मनुष्याः प्रशंसंतीत्यस्यार्थमाह *धन इति ॥ नष्टधनादीनां फलदानासामर्थ्यात्प्रशंसादृष्टेश्च फलदात्रेश्वरेण भाव्यमित्यर्थः ॥ ६६ ॥ अपूर्वस्यैव फलदातृत्वमिति केचित्, तान्प्रत्याह* नेति ॥ फलान्यथाऽनुपपत्तिरेव मानमिति तत्राह *फलमिति ॥ ६७ ॥ विनिगमकाभावमाशङ्क्याह* सेव्यादिति ॥ विमतं विशिष्टज्ञानवद्दातृकं कर्मफलत्वात्सेवाफलवदित्यर्थः ॥ ६८ ॥ यजमानं देवा इत्यादेरर्थमाह *देवतेति ॥

नाप्नुयुर्हव्यकव्यार्थं यदि नाभूत्प्रशासिता ॥ ६९ ॥
श्रुतिः—यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति ॥
वार्त्ति०-होमदानतपांस्यज्ञैर्बहुकृत्वः कृतान्यपि ॥
विनाशिफलदानीति शासनं तत्प्रशासितुः ॥ ७० ॥
अज्ञानमात्रतो बन्धो ज्ञानमात्रेण मुक्तता ॥
इत्याश्चर्याणि सर्वाणि कल्पयन्तीश्वरास्तिताम् ॥७१॥
विवादशङ्काऽपीशेऽस्मिन्न सम्भाव्येति दर्शयन् ॥
प्रशासनं लिङ्गरूपं प्रपञ्चितमनेकशः ॥ ७२ ॥
श्रुतिः-यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः ॥ १० ॥
वा०—यदप्रबोधात्कार्पण्यं ब्राह्मण्यं यत्प्रबोधतः ॥
तदक्षरं प्रबोद्धव्यं यथोक्तेश्वरवर्त्मना ॥ ७३ ॥

देवादीनामीश्वराणामपि हव्याद्यर्थित्वेन मनुष्याधीनत्वाख्यहीनवृत्तिभाक्त्वं नियन्तृकल्पकमित्यर्थः ॥ ६९ ॥

यो वा इत्यादेरर्थमाह *होमेति ॥ यस्याज्ञानादसकृदनुष्ठितानि विशिष्टफलान्यपि कर्माणि नश्वरफलमेव प्रयच्छन्तीत्येतदपि ईश्वराज्ञां विना न घटत इत्यर्थः ॥७०॥ ईश्वरास्तित्वे हेत्वन्तरं वदन् प्रकृतमुपसंहरति *अज्ञानेति ॥७१॥ अत्रानेकलिङ्गोदाहृतेस्तात्पर्यमाह *विवादेति ॥७२॥ यो वा इत्यादिद्वितीयपर्यायार्थमाह *यदिति । ईश्वरवर्त्मनेति शासितृत्वादितटस्थलक्षणद्वारेत्यर्थः ॥ ७३ ॥

श्रुतौ लोकाद्देहात्प्रैति स कृपणः पणक्रीतो दासादिरिव भवतीत्यर्थः ॥ १० ॥

श्रुतिः-तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्ट्रश्रुतꣳश्रोत्रमतं मन्त्राविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रेतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति ॥ ११ ॥

वा०-अक्षरस्य प्रशास्तृत्वं स्वमोहाभासकल्पितम् ॥
न स्वाभाविकमित्येतद्वक्त्यदृष्टादिवाक्यतः ॥ ७४ ॥
मागोचरातिवर्त्तित्वाददृष्टं स्यात्तदक्षरम् ॥
अभावत्वनिषेधार्थं द्रष्ट्रक्षरमितीर्यते ॥ ७५ ॥
कूटस्थदृक्त्वं द्रष्टृत्वं न दृश्ये दृष्टिकर्त्तृता ॥
ओतप्रोतगिराऽशेषदृश्यवस्तुनिराकृतेः ॥ ७६ ॥
उक्तद्रष्ट्रतिरेकेण दृश्यं नास्ति यथा तथा ॥
जीवदृक्प्रतिषेधार्थं नान्यदित्याद्युदीरणम् ॥ ७७ ॥
विजातीयसजातीयवस्त्वन्तरनिषेधतः ॥
कूटस्थमेकं चैतन्यं सिद्धं वस्त्वक्षरं परम् ॥ ७८ ॥

तद्वा इत्यादेस्तात्पर्यमाह *अक्षरस्येति ॥ ७४ ॥ तत्रादृष्टमितिपदं व्याचष्टे *मागोचरेति ॥ अप्रमेयत्वादसत्त्वे प्राप्ते द्रष्टृपदमादत्ते* अभावत्वेति ॥ ७५ ॥ तर्हि दृष्टिकर्तृत्वात्क्रियावत्त्वं स्यात्तत्राह *कूटस्थेति ॥ दृष्टिशब्दितवृत्तिव्याप्तत्वमेव द्रष्टृत्वं न दृश्यविषयक्रियावत्त्वमित्युक्तमित्यर्थः ॥ तत्र हेतुः *ओतेति ॥ ७६ ॥ नेत्यादिवाक्यतात्पर्यमाह *उक्तेति ॥ ७७ ॥ प्रकरणार्थमुपसंहरति* विजातीयेति ॥ ओतप्रोतवाक्येन प्रत्यगतिरिक्तं जडं निरस्तम्, नान्यदित्यादिना चाजडं, तस्मादखण्डं वस्तु श्रुतितात्पर्यगम्यं सिद्धमित्यर्थः ॥ ७८ ॥ एतस्मिन्नित्या-

एतस्मिन्नक्षरे गार्गि स्रजि क्लृप्तफणीन्द्रवत् ॥
ओतः प्रोतश्च निःशेष आकाशोऽकारणात्मनि॥७९॥
अक्षरं स्वात्मसम्मोहात्कारणत्वं निगच्छति ॥
तथा कार्यत्वमप्येतन्निरवद्यं तदेकलम् ॥ ८० ॥
सर्वस्याक्षरमात्रत्वात्कृत्स्नज्ञेयसमाप्तितः ॥
न ज्ञेयं शिष्यते किञ्चिन्नाप्यध्वस्तं तथा तमः ॥८१॥

इति वार्तिकसारे तृतीयाध्याये अष्टमं ब्राह्मणं समाप्तम्।

श्रुतिः—सा होवाच ब्राह्मणा भगवन्तस्तदेव बहु मन्येध्वं यदस्मान्नमस्कारेण मुच्येध्वं न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ततो ह वाचक्नव्युपरराम ॥ १२ ॥

इत्युपनिषदि अष्टमब्राह्मणं समाप्तम् ॥

द्विवाक्याक्षराणि योजयति *एतस्मिन्निति ॥ निःशेषः सकार्यः ॥७९॥ नन्वकारणात्मनीति कथमक्षरस्य कार्यकारणवैलक्षण्यमुच्यते तस्य सर्वाश्रयत्वाश्रवणाव, तत्राह *अक्षरमिति ॥८०॥ निरवद्यं तदेकलमित्येतदेव स्पष्टयति *सर्वस्येति ॥ ८१ ॥

सा होवाचेति ॥ हे ब्राह्मणाः भगवन्तस्तदेव बहु मन्यध्वं यत्पूर्वं मयोक्तं अस्माद्याज्ञवल्क्यादनुज्ञां प्राप्यास्मै नमस्कारं कृत्वा मदुक्तं बहु मन्यध्वं मनसा विजयाशां मुञ्चध्वमित्यर्थः ॥ किं तत्त्वदुक्तमिति तदाह न वै युस्माकं मध्ये जातु इमं याज्ञवल्क्यं ब्रह्मोद्यं प्रति जेतेति पूर्वमेव मया प्रतिज्ञातमद्यापि ममायमेव निश्चयः ब्रह्मोद्यं प्रति, एतत्तुल्यो नास्तीति ॥ ततः स्वप्रश्ननिर्णयाद्याज्ञवल्क्यस्याप्रकंप्यत्वं प्रतिपद्य ब्राह्मणान् प्रति हितं चोक्त्वा वाचक्नव्युपरराम ॥ १२ ॥

इति वार्तिकसारटीकायां अष्टमं ब्राह्मणं समाप्तम् ।

वार्त्ति०-नवमब्राह्मणे देवनिर्णयस्तदुपासनम् ॥
अष्टधा पञ्चधा चोपनिषदश्चोच्यते क्रमात् ॥ १ ॥
सूर्यचन्द्रादयो देवाः शासितव्या उदीरिताः ॥
तेषां विस्तार आनन्त्यं सङ्क्षेपस्त्वेकदेवता ॥ २ ॥
त्रयश्चेत्यादिभिर्लक्ष्या बहुशब्दैरनन्तता ॥
सुषुप्तिप्रलयावस्थः कारणात्मैकदेवता ॥ ३ ॥
नानात्वैकत्वरूपाभ्यां तिष्ठति प्राणदेवता ॥
नियन्तव्यनियन्तृत्वसम्बन्धस्य प्रसिद्धये ॥ ४ ॥
ब्रह्मेशः सूत्रमण्डं च जीवो लिङ्गं वपुर्बहिः ॥
इत्यष्टावस्थातां भर्तृप्रपञ्चस्तान्त्रिकीं जगौ ॥ ५ ॥

श्रु०-अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्येति स हैतयैव निविदा प्रतिपेदे यावन्तो वै-

---

शाकल्यब्राह्मणतात्पर्यमाह *नवमेति ॥ १ ॥ वृत्तेनास्य सङ्गतिमाह* सूर्येति । नियम्यदेवताः कतीत्यपेक्षायां तासां विस्तारसङ्क्षेपोक्तिद्वारा प्रागुक्तमपि ब्रह्म पुनः स्पष्टयितुमेतद्ब्राह्मणमित्यर्थः ॥ २ ॥ नन्वत्र देवविस्तारोऽनन्त इति न वर्ण्यते तद्वाचिपदाश्रवणात् तत्राह *त्रयेति । संक्षेपेणैका देवतेत्युक्तं व्यनक्ति *सुषुप्तीति ॥३॥ कारणात्मा स एवात्र प्राणदेवतेत्युच्यते इतिमत्वा तस्य विकासमङ्कोचात्मनाऽवस्थानफलमाह *नियन्तव्येति ॥ ४ ॥ एकदेशिमतमनूद्य निराचष्टे* ब्रह्मेत्यादिना । अण्डमिति विराडुच्यते चशब्देन जातिर्दैवमित्युक्तमवस्थाद्वयं समुच्चीयते । बहिर्वपुः स्थूलदेहः ॥ ५ ॥

श्रुतेरयमर्थः—अथ गार्ग्यामुपरतायामेनं याज्ञवल्क्यं विदग्ध इति नामतः शकलस्यापत्यं शाकल्यः पप्रच्छ कतिसंख्या-

श्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिंꣳशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्येक इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥ १ ॥ स होवाच महिमान एवैषामेते त्रयस्त्रिंꣳशत्त्वेव देवा इति कतमे ते त्रयस्त्रिंꣳशदित्यष्टौ वसव एकादश रुद्रा द्वा-

---

का देवता इति, स याज्ञवल्क्यः ह किल एतया वक्ष्यमाणया निविदा देवतासंख्यां प्रतिपेदे यावन्तो यावत्संख्याका देवा वैश्वदेवस्य निविदि श्रूयन्ते तावन्तो देवा इति ज्ञातव्यानित्यर्थः । ननु केयं निविन्नाम ? उच्यते । देवतासङ्ख्यावाचकानि मन्त्रपदानि कानिचिद्वैश्वदेवशस्त्रे शंस्यन्ते तानि निवित्संज्ञकानि स्युस्तान्येव दर्शयति । त्रयश्च त्री च शता त्रयश्च त्रीणि च शतानि च त्रयश्च त्री च सहस्रा त्रयश्च त्रीणि सहस्राणि । उपलक्षणमेतदनंतानां शाकल्योऽप्योमिति होवाच । एषा षडधिकत्रिशताधिकत्रिसहस्रलक्षणा देवतानां मध्यमा संख्या सम्यक्तया ज्ञातेत्यर्थः ॥ पुनस्तेषामेव संकोचविषयां संख्यां पृच्छति कत्येवेति ॥ त्रयस्त्रिंशत् षट् त्रयो द्वावध्यर्द्ध एक इति देवतासंकोचविषयां संख्यां पृष्ट्वा पुनः संख्येयरूपं पृच्छति कतमे त इत्यादिना ॥ १ ॥

स याज्ञवल्क्य उवाच—एषां त्रयस्त्रिंशतां देवानामे-

दशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति ॥ २ ॥

कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदं वसु सर्वं हितमिति तस्माद्वसव इति ॥३॥

कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदाऽस्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति ॥ ४ ॥

कतम आदित्या इति द्वादश वै मासाः संवत्सर·

तत्त्रयश्च त्री च शतेत्यादयो महिमानो विभूतयः ॥ परमार्थतस्तु त्रयस्त्रिंशत्त्वेव देवा इति ॥ तेषामेव स्वरूपं प्रश्नपूर्वकं निर्द्धारयति *कतमे त्रयस्त्रिंशदित्यादिना ॥ २ ॥

अग्न्यादिनक्षत्रान्ता एते वसव इत्युक्त्वा तेषां वसुत्वे हेतुमाह* एतेषु हीति ॥ यस्माच्छरीरेन्द्रियाद्याकारेण तेषु तेषु अग्न्यादिषु वसुषु कर्मफलं समाहितं, तेषु च ते वसन्ति तस्माद्वसव इत्यर्थः ॥ ३ ॥

*कतमे रुद्रा इति ॥ दशेमे पुरुषे प्राणाः, पंच कर्मेंद्रियाणि, पञ्च ज्ञानेन्द्रियाणि चात्मा मन एकादशानां पूरणम् । ते प्राणा यदाऽस्माच्छरीरान्मरणशीलात्प्राणिनामिह कर्मफलोपभोगक्षये उत्क्रामन्ति अथ तदा रोदयन्ति तत्तदा यस्माद्रोदयन्ति तस्मात्ते रुद्रा इति ॥ ४ ॥

*कतम आदित्या इति ॥ द्वादश मासाः संवत्सरस्य कालस्यावयवाः वै प्रसिद्धाः, एते मासाभिमानिनीदेवता इत्यर्थः ॥ आदित्या हि यस्माद् एते पुनः पुनः परिवर्त्तमानाः प्राणिनामा-

स्यैत आदित्या एते हीदꣳ सर्वमाददाना यन्ति ते यदिदꣳसर्वमाददाना यन्ति तस्मादादित्या इति ॥ ५ ॥

कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति ॥ ६ ॥

कमते षडित्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्चैते षडेते हीदꣳ सर्वꣳ षडिति ॥ ७ ॥

कतमे ते त्रयो देवा इतीम एव त्रयो लोका एषु हीमे सर्वे देवा इति कतमौ तौ द्वौ देवावित्यन्नं चैव

यूंषि कर्मफलं चाददाना गृह्णन्तो यन्ति गच्छन्ति यस्मादिदं सर्वमाददाना यन्ति तस्मादादित्या इति ॥ ५ ॥

*अशनिरिति । अशनिर्वज्रं वीर्यमिति यावत् । यो येन वीर्येण प्राणिनः पीडयति तदिन्द्रस्य कर्मेति कृत्वा इंद्र इत्युपचर्यत इत्यर्थः ॥ *कतमो यज्ञ इति पशव इति ॥ यज्ञसाधनत्वात्पशूनां यज्ञत्वोक्तिरुपचारात् ॥ ६ ॥

*कतमे षडिति । वसुत्वेन पठिता अग्न्यादयश्चन्द्रमसं नक्षत्राणि च वर्जयित्वा षड् भवन्ति । हि यस्मादुक्तं सर्वमेते एव तस्मादेते षट् भवन्ति । सर्वो वस्वादिविस्तार एतेष्वेव षट्स्वन्तर्भवतीत्यर्थः ॥ ७ ॥

*कतमे ते त्रयो देवा इति । इम एव त्रयो लोकाः पृथिवीमग्निं चैकीकृत्य एको देवः, अन्तरिक्षं वायुं चैकीकृत्य द्वितीयः, दिवमादित्यं चैकीकृत्य तृतीयः । एषु हि यस्मात्त्रिषु देवेषु सर्वे देवा अन्तर्भवन्तीति तेनैते देवास्त्रय इत्यर्थः । कतमौ द्वौ देवाविति । अन्नं च प्राणश्च विराट् सूत्रश्चेत्यर्थः । तयोरेव सर्वान्तर्भावात् ॥ *कतमोऽ-

प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवत इति ॥ ८ ॥
तदाहुर्यदयमेक इवैव पवतेऽथ कथमध्यर्ध इति यद-स्मिन्निदꣳसर्वमध्यार्ध्नोत्तेनाध्यर्ध इति कतम एको देव इति प्राण इति स ब्रह्म तदित्याचक्षते ॥ ९ ॥

वार्त्ति०—तदसन्नेति नेतीति निष्प्रपञ्चत्वमात्मनः ॥
कथायिष्यत्यतोऽवस्था भ्रान्त्या ब्रह्मणि कल्पिताः ॥६॥
अन्तर्यामितया पूर्वमव्याकृततयाऽपि च ॥
कथितं कारणं प्राणो वायुः सूत्रमुदीर्यते ॥ ७ ॥
सूत्राकारविकारोऽयं कारणादधिकस्तु सः ॥
अस्वतन्त्रतयाऽर्द्धश्च वायोरध्यर्द्धता ततः ॥ ८ ॥
ईदृगध्यर्द्धताऽन्येषु द्विसंख्यादिष्वपीक्ष्यते ॥

ध्यर्द्ध इति । योऽयं पवते वायुः ॥ ८ ॥

तदाहुश्चोदयन्ति यदयं योऽयं वायुरेक एव । *कथमध्यर्द्ध इति । यदस्मिन्सर्वमध्यर्ध्नोत्, यद्यस्माद्वायौ सति इदं जगद-धिकमृद्धिं प्राप्नोति तेनाध्यर्द्ध इति । *कतम एको देव इति प्राण इति ॥ ९ ॥

अत्र वायुप्राणशब्दयोः पौनरुक्तिमाशङ्क्याह *अन्तर्या-मितयेति । पूर्वब्राह्मणे प्रकृतं जगत्कारणमत्र प्राणशब्देन विवक्षितम्, वायुशब्देन सूत्रमित्यर्थः ॥ ७ ॥ अध्यर्द्धशब्दस्य सूत्रे प्रवृत्तौ भावितं निमित्तान्तरमाह *सूत्रेति । कार्या-वस्थायाः कारणापेक्षया स्थूलत्वादाधिकत्वम्, अन्तर्याम्यपेक्षया हीनत्वादर्धत्वं च विवक्षित्वा वायोरध्यर्द्धत्वमुक्तमित्यर्थः ॥ ८ ॥ कथं तर्हि श्रुत्या तत्र निमित्तान्तरमुक्तं तत्राह*ईदृगिति । उक्तविवक्षयाऽध्यर्द्धत्वस्यान्नादिसर्वकार्येष्वपि सम्भवादधिकस-

अतोऽधिकसमृध्यैव श्रुतिरध्यर्द्धतां जगौ ॥ ९ ॥
अनन्तेष्वेषु देवेषु यो यो देव उपास्यते ।
तेन तेन स्वरूपेण प्राण एक उपास्यते ॥ १० ॥
इति दर्शयितुं देवभेदानां प्राणरूपता ॥
निर्णीता प्राणदेवोऽयं परोक्षं ब्रह्म भण्यते ॥ ११ ॥
स्वरूपमपि सद्ब्रह्म स्वाविद्याव्यवधानतः ॥
परोक्षं भाति तत्तस्मादुपास्यं चित्तशुद्धये ॥ १२ ॥
भूकामरूपव्योमानि तमोरूपजलान्यथा ॥
रेत इत्यष्टधा भिन्नं ब्रह्मोपास्यमुदीर्यते ॥ १३ ॥
क्षितिदेहोऽग्निनयनो मनःसंकल्पसाधनः ॥
देवस्तिष्ठति देहेषु त्वगसृङ्मांसरूपधृक् ॥ १४ ॥
पितृजन्यास्थिमज्जादेराश्रयोऽस्य तु कारणम् ॥
मातृभुक्तान्नजं बीजं प्रथमोपास्तिरीदृशी ॥ १५ ॥

श्रुतिः—पृथिव्येव यस्यायतनमग्निर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणम्

वृद्धिहेतुत्वेनैव वायोरध्यर्द्धत्वं श्रुतिरुक्तवतीत्यर्थः ॥ ९ ॥ सर्वस्य देवविस्तारस्य जगत्कारणत्वमात्रोक्तेस्तात्पर्यमाह *अनन्तेष्वित्या-दिना ॥ १० ॥ स ब्रह्म त्यदित्याचक्षत इत्यस्यार्थमाह *प्राण-देवोऽयमिति ॥ त्यदित्यस्य व्याख्या *परोक्षमिति ॥ ११ ॥ क-थं प्रत्यगभिन्नब्रह्मणः पारोक्ष्यं ? तत्राह *स्वरूपमिति ॥ १२ ॥ पृथिव्येवेत्याद्युत्तरश्रुत्यर्थं गृह्णाति* भूकामेति । यथा यथावदुपा-स्यमित्यन्वयः ॥ १३ ॥ तात्पर्यमुक्त्वाऽक्षरार्थमाह* क्षितीत्या-दिना ॥ १४ ॥ १५ ॥

श्रुत्यर्थस्तु—यस्य देवस्य पृथिव्येवायतनं शरीरम्, अग्निर्लोकः

स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ शारीरः पुरुषः स एष वदैव शाकल्य तस्य का देवतेत्यमृतमिति

लोकयत्यनेनेति लोको नेत्रमित्यर्थः। मनोज्योतिर्मनसा ज्योतिषा संकल्पादिकार्यं करोति सोऽयं मनोज्योतिः, तं विशेषणत्रयविशिष्टं पुरुषं पृथिव्यभिमानिनं देवं यो विद्याद्विजानीयात्स एव वेदिता स्यादिति सम्बन्धः। पृथिवीदेवस्य सर्वकार्यकरणसङ्घातं प्रत्याश्रयत्वमाह *सर्वस्यात्मनः परायणमिति। सर्वो हि देहस्त्वङ्मांसरुधिरास्थिमज्जाशुक्रभेदेन षड्विधो भवति। तत्राद्यकोशत्रयं मातृजन्यम्। अहं पृथिवीत्यभिमन्यमानो देवश्च शरीरारम्भकमातृजकोशत्रयाभिमानितया तिष्ठति, तस्य पार्थिवांशप्रधानत्वात्। आत्मनः परायणमित्यत्रात्मशब्देन पितृजन्यकोशत्रयं लक्ष्यते। तथा पृथिवीदेवस्त्वगादिकोशत्रयरूपेण वर्त्तमानः पितृजं त्रितयं कार्यं लिङ्गं च प्रति परायणम्—आश्रय इत्यर्थः। एवं शाकल्येनोक्तो याज्ञवल्क्य आह—यदि तद्विज्ञानेन पांडित्यं लभ्यतेऽहं तं पुरुषं वेदैव यः सर्वस्यात्मनः परायणमात्थ वदसि। अत्र शाकल्यस्य वचनं द्रष्टव्यम्—यदि त्वं वेत्थ पुरुषं तर्हि ब्रूहीति। याज्ञवल्क्य आह—य एवायं शारीरः, शरीरं हि पांचभौतिकं तत्र पार्थिवांशे जनकत्वेन स्थितः शारीरः, मातृजांशत्रयरूपः शरीरविशेषायतन इत्यर्थः॥ स एव देवो यस्त्वया पृष्टः हे शाकल्य, किं वास्ति तत्र वक्तव्यं विशेषणान्तरं तद्वदैव पृच्छेत्यर्थः। एवं प्रक्षोभितोऽमर्षवशं गत आह—तस्य देवस्य शारीरस्य का देवतेति किं कारणमित्यर्थः॥ अस्मिन्प्रकरणे देवताशब्दस्तत्कारणवचनः। अमृतमिति होवाच। अत्रामृतं मातृभुक्तान्नरसो विवक्षितः।

होवाच ॥ १० ॥

काम एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात् सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ य एवायं काममयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति स्त्रिय इति होवाच ॥ ११ ॥

वार्त्ति०—कामदेहो बुद्धिनेत्रो मनोज्योतिः सुखाश्रयः॥
रतीच्छात्मा स्त्रिया दीप्यो द्वितीयोपास्तिरीदृशी॥१६॥
शुक्लादीन्यत्र रूपाणि भास्वराण्युत्तरत्र तु ॥

अन्नरसाद्धि लोहितद्वारा शरीरमुत्पद्यते, एतदेवाभिप्रेत्योक्तम् अस्य तु कारणं मातृभुक्तान्नजं वीर्यमित्यत्र वीर्यशब्दो लोहितवचनः ॥ १० ॥

य एवायं काममय इत्यत्र य एवायं कामायतनस्त्वया पृष्टः स एवाध्यात्ममपि काममयः पुरुष इत्यर्थः । अन्यत्सर्वं पूर्ववदेव योज्यम् । अत्र सर्वविशेषणान्युपासनार्थानि द्रष्टव्यानि ॥ ११ ॥

काम एवेत्यादेरर्थमाह *कामदेह इति । अस्यैव पदस्य व्याख्या *रतीच्छात्मेति । स्त्रीसङ्गाभिलाषो रतीच्छा अस्यैवात्मा देहो यस्य देवस्य स तथोक्तः । "तस्य का देवतेति स्त्रिय इति होवाच" इत्यस्यार्थमाह *स्त्रिया दीप्य इति । स्त्रीहेतोर्हि कामस्य दीप्तिर्जायते । तत्र हेतुः *सुखाश्रय इति । सुखहेतुत्वादित्यर्थः ॥ १६ ॥

रूपाण्येवेत्यादिद्विरुक्तेरपुनरुक्तिमाह *शुक्लादीनीति ॥ य एवासावादित्य इत्यादेरर्थमाह *देव इति ॥ साधारणरूपायतनो देवो रूपविशेषाश्रयः सूर्यमण्डलविशेषायतनत्वात् तस्य सत्य-

देवो वर्णोऽयं सूर्यस्तद्धेतौ दृशि सत्यगीः ॥ १७ ॥
अधिदैवाध्यात्मभागौ शेषेषूपासनेष्वपि ॥
व्याख्यानव्यौ यथा योगमित्युक्तोपास्तिरष्टधा ॥१८॥

श्रु०—रूपाण्येव यस्यायतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवासावादित्ये पुरुषः स एष वदैव शाकल्य तस्य का देवतेति सत्यमिति होवाच ॥१२॥

आकाश एव यस्यायतनꣳ श्रोत्रं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ श्रौत्रः प्रातिश्रुत्कः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति दिश इति होवाच ॥ १३ ॥

तम एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः पराय-

---

शब्दितं चक्षुः कारणं "चक्षोः सूर्यो अजायत"इतिश्रुतेरिति भावः ॥ १७ ॥ उक्तन्यायमुत्तरपर्यायेष्वतिदिशति *अधिदैवमिति ॥ १८ ॥

य एवायं श्रोत्रे भवः श्रौत्रः, श्रोत्रेऽपि प्रतिश्रवणवेलायां विशेषतो भवतीति प्रातिश्रुत्कः । अत्र सर्वाणि श्रवणानि प्रतिश्रवणशब्दार्थः । तस्य का देवतेति दिश इति होवाच । 'दिशस्तत्राधिदैवतम्'इति श्रुत्यन्तरात् ॥ १३ ॥

तम एव यस्यायतनमित्यत्र तमःशब्देनान्धकारः परिगृह्यते ।

णꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं छायामयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति मृत्युरिति होवाच ॥ १४ ॥

रूपाण्येव यस्यायतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायमादर्शे पुरुषः स एष वदैव शाकल्य तस्य का देवतेत्यसुरिति होवाच॥१५॥ आप एव यस्यायतनꣳहृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳसर्वस्यात्मनः परायणं यमात्थ य एवायमप्सु पुरुषः स एष वदैव शाकल्य तस्य

अध्यात्मं छायामयोऽज्ञानमयः पुरुषस्तस्य कारणं मृत्युरीश्वरः "मृत्युनैवेदमावृतमासीत्"इति श्रुत्यन्तरात् । स चाज्ञानमयस्याध्यात्मिकपुरुषस्य कारणम् । अविवेकिप्रवृत्तेरीश्वरमात्राधीनत्वादिति भावः ॥ १४ ॥

रूपाण्येव यस्यायतनमित्यत्र प्रकाशात्मकरूपविशेषो गृह्यत इत्युक्तम् । तादृशरूपायतनस्य देवस्य विशेषायतनं प्रतिबिम्बाधार आदर्शादिः,तस्य च कारणमसुः प्राणः । प्राणवता हि निघृष्यमाणे दर्पणादौ प्रतिबिम्बाभिव्यक्तियोग्यो यो रूपविशेषो निष्पद्यते, अतः प्राणः प्रतिबिम्बस्य कारणमिति भावः ॥ १५ ॥

आप एव यस्यायतनमित्यत्र साधारणाः सर्वा आपो गृह्यन्ते, तस्य वापीकूपाद्याश्रयास्त्वप्सु विशेषावस्थानं, तस्य च वरुण-

का देवतेति वरुण इति होवाच ॥ १६ ॥

रेत एव यस्यायतनꣳहृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳस वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं पुत्रमयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति प्रजापतिरिति होवाच॥१७॥

शाकल्येति होवाच याज्ञवल्क्यस्त्वाꣳ स्विदिमे ब्राह्मणा अङ्गारावक्षयणमक्रता ३ इति ॥ १८ ॥

वा०–पञ्चधोपासनं प्रष्टुं क्षोभयामास वाक्यतः ॥
त्वामङ्गारावक्षयणं संदंशं चक्रुरित्यतः ॥ १९ ॥

शब्दितमुदकं कारणम् । मूत्रलोहिताद्यात्मकाद्धि जलादेष सङ्घातो भवति, सङ्घातश्च पुरुषद्वारा कूपादिजलानां हेतुरिति भावः॥१६॥

रेतःसामान्यायतनस्य देवस्य विशेषायतनं पुत्रः, तस्य च कारणं प्रजापतिशब्दितः पितेत्यर्थः ॥ १७ ॥

तूष्णीम्भूतं शाकल्यं याज्ञवल्क्यो ग्रहेणेवाविशयन्नुवाच शाकल्येति संबोध्य । त्वां स्विदिति वितर्के । नूनम् इमे ब्राह्मणाः अङ्गारावक्षयणम् अङ्गारा अवक्षीयन्ते यस्मिन् सन्दंशादौ तदङ्गारावक्षयणं त्वां कृतवन्त इति । “अतिनिर्मन्थनादग्निश्चन्दनादपि जायते”इति न्यायेनातिवादेन मां कोपयित्वा मदग्नौ शिशुवत्पतन्तं त्वामनिवारयतामेषां ब्राह्मणानां प्रायेण त्वं हन्तव्यत्वेन सम्मत इति भावः ॥ १८ ॥

शाकल्येत्यादेस्तात्पर्यमाह *पञ्चधेति ॥ १९ ॥

एवमुक्तोऽपि कालचोदितः सन्पुनश्चोदयितुं याज्ञवल्क्येति होवाच शाकल्यः । यद्यपि कुरुपञ्चालानां ब्राह्मणानत्यवादीः ‘स्वयम्भीताः सन्तः त्वां अङ्गारावक्षयणं कृतवन्तः’ इत्यु-

श्रु०–याज्ञवल्क्येति होवाच शाकल्यो यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः किं ब्रह्म विद्वानिति दिशो वेद सदेवाः सप्रतिष्ठा इति यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥ १९ ॥

वार्त्ति०—साक्षात्करणपर्यन्तं किमुपासनमस्ति ते ॥
इति पप्रच्छ स क्षुब्धो दिगुपास्तिं परो जगौ ॥ २० ॥
ध्येयरूपत्वाभिमानः साक्षात्कार उपास्तिषु ॥
किंदेवोऽसीत्यतः प्रश्न आदित्योऽस्मीति चोत्तरम् २१॥

श्रु०–किंदेवतोऽस्यां प्राच्यां दिश्यसीत्यादित्यदेवत इति स आदित्यः कस्मिन् प्रतिष्ठित इति चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेष्विति च-

---

त्त्या ब्राह्मणानधिक्षिप्तवानसि, किं ब्रह्मवित्त्व सन्नधिक्षिपसि, किं वाऽज्ञः सन् ? अज्ञत्वे ब्रह्मवित्पणभूता गावो नापहर्त्तुं शक्यन्ते, विद्वांश्चेत्का तर्हि फलवती विद्येति वाच्यमित्यर्थः । याज्ञवल्क्य आह–दिशो वेद दिग्विषयं विज्ञानं ममास्तीत्यर्थः ॥ तच्च विज्ञानं केवलं दिङ्मात्रस्य न भवति किं तु देवैः प्रतिष्ठाभिश्च सहिता दिशो वेदेत्याह *सदेवाः सप्रतिष्ठा इति ॥ १९ ॥

शाकल्य आह–यद् दिशो वेत्थ सदेवाः सप्रतिष्ठाः यदि साक्षात्कारपर्यन्तं विज्ञानं तवास्ति किन्देवतोऽस्यां प्राच्यां दिश्यसीत्यत्र प्रश्नप्रत्युक्त्योरर्थं संक्षेपेणाह *साक्षादिति ॥ २० ॥ प्राच्यां दिशि का देवतेति वक्तव्ये किन्देवतोऽसीति कथं मुनिविशेषणत्वेन देवता पृच्छ्यते तत्राह *ध्येयेति ॥ २१ ॥

याज्ञवल्क्यो हि साक्षात्कारपर्यन्तोपास्त्या सर्वं जगदात्मत्वेनोपगम्य 'अहमस्मि दिगात्मा' इति व्यवस्थितो दिशो वेद सदेवाः सप्रति

क्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रति- ष्ठितानीति हृदय इति होवाच हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्ती- त्येवमेवैतद्याज्ञवल्क्य ॥ २० ॥

स आदित्यो नेत्ररूपद्वारा बुद्धौ प्रतिष्ठितः ॥

ऊर्ध्वान्तास्वन्यादिक्ष्वेवं सर्वं बुद्धौ प्रतिष्ठितम् ॥ २२ ॥

श्रु०—किंदेवतोऽस्यां दक्षिणायां दिश्यसीति यमदेव- त इति स यमः कस्मिन्प्रतिष्ठित इति यज्ञ इति कस्मिन्नु

ष्ठा इत्युक्तत्वात् यथा याज्ञवल्क्यस्य प्रतिज्ञानं तथैव शाकल्यः पृष्ट- वान् 'किंदेवतस्त्वमस्यां दिश्यसीति, कया देवतया त्वं प्राचीदिग्रू- पेण सम्पन्नः' इत्यर्थः ॥ इतर आह *आदित्यदेवत इति ॥ प्राच्यां दिशि ममादित्यो देवता सोऽहमादित्यदेवतः। सदेवा इत्येतदुक्तम्, सप्रतिष्ठा इति तु वक्तव्यमित्याह* स आदित्यः कस्मिन्प्रतिष्ठि- त इति चक्षुषीति॥ चक्षुषो ह्यादित्यो निष्पन्नः 'चक्षोः सूर्यो अजा- यत' इति श्रुतेः। कार्यं हि कारणे प्रतिष्ठितं भवति। कस्मिंश्चक्षुः प्रतिष्ठितमिति रूपेष्विति। चक्षुषो रूपाधीनत्वात्तस्मात्सआदित्यं चक्षुः प्राच्या दिशा सह तत्स्थैश्च सर्वैं रूपेषु प्रतिष्ठितम्। कस्मिन् रूपाणि प्रतिष्ठितानि हृदय इति होवाच। हृदय इति बुद्धिमनसी एकीकृत्य निर्देशः। हृदयेन हि रूपाणां स्मरणम्, अतो वास- नात्मना हृदये रूपाणि प्रतिष्ठितानीत्यर्थः ॥ २० ॥

इममेवार्थं संग्रहेण दर्शयन्नुक्तन्यायमन्यत्राप्यतिदिशति *स आदित्य इति ॥ २२ ॥

*यमः कस्मिन्प्रतिष्ठित इति यज्ञ इति ॥ कथं पुनर्य- ज्ञस्य कार्यं यम इति चेद्, उच्यते। ऋत्विग्भिर्निष्पादिते यज्ञे

यज्ञः प्रतिष्ठित इति दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठितेति श्रद्धायामिति यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददाति श्रद्धायाᳪ ह्येव दक्षिणा प्रतिष्ठितेति कस्मिन्नु श्रद्धा प्रतिष्ठितेति हृदय इति होवाच हृदयेन हि श्रद्धां जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २१ ॥

किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति वरुणदेवत इति स वरुणः कस्मिन्प्रतिष्ठित इत्यप्स्विति कस्मिन्न्वापः प्रतिष्ठिता इति रेतसीति कस्मिन्नु रेतः प्रतिष्ठितमिति हृदय इति तस्मादपि प्रतिरूपं जातमाहुर्हृदयादिव

दक्षिणया दिशा यजमानस्तेभ्यो यज्ञं निष्क्रियते तेन यज्ञेन दक्षिणां दिशं सह यमेनाभिजयति तेन यज्ञे यमस्तत्कार्यत्वाद्दक्षिणया दिशा सह प्रतिष्ठितः ॥ कस्मिन्यज्ञः प्रतिष्ठित इति दक्षिणायामिति । दक्षिणया हि स निष्क्रियते तेन दक्षिणाकार्यं यज्ञः । कस्मिन्दक्षिणा प्रतिष्ठितेति श्रद्धायामिति । श्रद्धा नाम दित्सुनामास्तिक्यबुद्धिः । कथं तस्यां प्रतिष्ठिता दक्षिणेत्याशङ्क्याह श्रुतिः *यदा ह्येवेत्यादिना ॥ कस्मिन्नु श्रद्धा प्रतिष्ठितेति होवाच हृदयस्य हि वृत्तिश्च श्रद्धा, यस्माद् हृदयेन श्रद्धां जानाति,वृत्तिश्च वृत्तिमति प्रतिष्ठिता, तस्माद् हृदये च श्रद्धा प्रतिष्ठिता भवतीति ॥ २१ ॥

*वरुणः कस्मिन्प्रतिष्ठित इति अप्स्विति । अपां हि वरुणः कार्यं श्रद्धाया आपः 'श्रद्धातो वरुणमसृजत' इति श्रुतेः। कस्मिन्न्वापः प्रतिष्ठिता इति रेतसीति। 'रेतसो ह्यापः सृष्टाः' इति श्रुतेः ॥ कस्मिन्न रेतः प्रतिष्ठितमिति हृदय इति। यस्माद् हृदयस्य कार्यं रेतः। कामो हि हृदयस्य वृत्तिः,कामिनो हि हृदयाद्रेतोऽवस्कन्दति तस्मादेव प्रति-

सृष्टो हृदयादिव निर्मित इति हृदये ह्येव रेतः प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २२ ॥

किंदेवतोऽस्यामुदीच्यां दिश्यसीति सोमदेवत इति स सोमः कस्मिन्प्रतिष्ठित इति दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठितेति सत्य इति तस्मादपि दीक्षितमाहुः सत्यं वदेति सत्ये ह्येव दीक्षा प्रतिष्ठितेति कस्मिन्नु सत्यं प्रतिष्ठितमिति हृदय इति होवाच हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २३ ॥

किंदेवतोऽस्यां ध्रुवायां दिश्यसीत्यग्निदेवत इति सोऽग्निः कस्मिन्प्रतिष्ठित इति वाचीति कस्मिन्नु वा-

---

रूपमनुरूपं पुत्रं जातमाहुर्लौकिकाः 'अस्य पितुर्हृदयादिवायं पुत्रः सृप्तः निसृतः,सुवर्णेन कुण्डलमिव हृदयादिव निर्मितः'इति। तस्माद् हृदये ह्येव रेतः प्रतिष्ठितं भवतीति ॥ २२ ॥

सोमदेवत इत्यत्र सोम इति सोमलतां देवतां चैकीकृत्य निर्देशः। स सोमः कस्मिन्प्रतिष्ठित इति दीक्षायामिति। दीक्षितो हि यजमानः सोमं क्रीणाति क्रीतेन सोमेनेष्ट्वा ज्ञानवान्नुत्तरां दिशं सोमदेवताधिष्ठितां प्रतिपद्यते । कस्मिन्नु दीक्षा प्रतिष्ठितेति सत्य इति । यस्मात्सत्ये दीक्षा प्रतिष्ठिता तस्मादेव दीक्षितमाहुः—सत्यं वदेति। एवंवदतां—'कारणभ्रंशे कार्यभ्रंशो मा भूत्'इत्याशयः । अतः सत्ये ह्येव दीक्षा प्रतिष्ठितेति । कस्मिन्नु सत्यं प्रतिष्ठितमिति हृदय इति होवाच । तदेव साधयति श्रुतिः हृदये हीत्यादिना ॥ २३ ॥

किंदेवतोऽस्यां ध्रुवायां दिश्यसीति। मेरोः समन्ततो वसतामव्यभिचारादूर्ध्वा दिक् ध्रुवेत्युच्यते। अग्निदेवत इति। ऊर्ध्वायां हि प्रकाशभूयस्त्वम्,प्रकाशश्चाग्निः,सोऽग्निः कस्मिन्प्रतिष्ठित इति वाची-

क्प्रतिष्ठितेति हृदय इति कस्मिन्नु हृदयं प्रतिष्ठि-
मिति ॥ २४ ॥

वार्त्ति०–प्राच्यां रूपोपसंहारो दिक्त्रये कर्म संहृतम् ॥
ध्रुवायां संहृतिर्नाम्नो हृद्येवं सर्वसंहृतिः ॥ २३ ॥
निःशेषं ब्रह्मलोकान्तं संहृत्य हृदयात्मना ॥
याज्ञवल्क्ये स्थिते भूयः पप्रच्छ हृदयाश्रयम् ॥ २४ ॥
देहस्थे हृदये स्पष्टे मन्यमानोऽन्यमाश्रयम् ॥
लीनोऽहनीत्यधिक्षेप्तुं वक्त्येषोऽहल्लिकेत्यमुम् ॥२५॥
श्रु०–अहल्लिकेति होवाच याज्ञवल्क्यो यत्रैतदन्यत्रा-

ति। कस्मिन्वाक् प्रतिष्ठितेति हृदय इति होवाच याज्ञवल्क्यः॥२४॥

एवं विभागवादिन्या श्रुतेराशयमाह *प्राच्यामिति। आद्य-पर्याये हृदये रूपप्रपञ्चोपसंहारो दर्शितः। दक्षिणायामित्यादि-पर्यायत्रयेण तत्रैव कर्मोपसंहार उक्तः, यज्ञात्मकस्य पुत्रोत्पा-दनात्मकस्य विद्यायुक्तस्य च कर्मणः क्रमेणोक्तत्वात्। ध्रुवाया-मित्यस्य पर्यायेण तस्मिन्नेव नामोपसंहारः कृतः, वाचो हृदये प्रतिष्ठितत्वोक्तेः, एवं नामरूपकर्मात्मकस्य सर्वस्य जगतः संहृतिः हृदये प्रस्तुतश्रुत्योक्तेरर्थः ॥ २३ ॥ कस्मिन्नु हृदयमि-त्यादिप्रश्नमुत्थापयति *निःशेषमिति। ब्रह्मलोकान्तं जगन्मा-त्रमिति शेषः ॥ २४ ॥ हृदयस्याधारे पृष्टे अहल्लिकेति नामान्तरेण शाकल्यं सम्बोधयतो मुनेराशयमाह *देहस्थ इति। हृदयाश्रयस्य स्पष्टत्वात्तस्याश्रयान्तरं पृच्छन्तमधिक्षेप्तुमहनि लीयते इति विगृह्य प्रेतवाचिनाऽहल्लिकशब्देन संबोधितवान् ॥ प्रेतादिर्हि रात्रौ व्यज्यतेऽहर्लीनो भवतीति भावः ॥ २५ ॥

हृदयस्य देहस्थत्वं व्युत्पादयति श्रुतिः *यत्र कस्मिन्काले

स्मन्मन्यासै यद्ध्येतदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयाꣳसि वैनद्विमथ्नीरन्निति ॥ २५ ॥

कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ इति प्राण इति कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति कस्मिन्न्वपानः प्रतिष्ठित इति व्यान इति कस्मिन्नु व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नूदानः प्रतिष्ठित इति समान इति ॥

वार्त्ति० प्रतिष्ठिते देहलिङ्गे तद्वै प्राणादिवायुषु ॥

एतद्धृदयमस्य शरीरस्यान्यत्र क्वचिद्देशान्तरे अस्मदस्मत्तो वर्त्तत इति मन्यासै मन्यसे तस्मिन्काले देहो मृतः स्यादित्यर्थः। एवं हृदयस्य देहस्थत्वं व्युत्पाद्य वनसिंहन्यायेन देहस्य हृदयाश्रितत्वमाह—यद्धि यदि एतद् हृदयमन्यत्रास्मत्तो भवेत् ॥ श्वानो वा एतच्छरीरं तदा अद्युर्भक्षयेयुः, वयांसि पक्षिणो वा एतद्विमथ्नीरन्विकर्षेरन् इत्येवं हृदयशरीरयोरन्योऽन्यप्रतिष्ठितत्वमुक्तम् ॥२५॥

तयोराश्रयं पृच्छति—कस्मिन्नु त्वं च शरीरं चात्मा तव हृदयं च प्रतिष्ठितौ स्थ इति प्राण इति। देहात्मानौ प्राणवृत्तौ प्रतिष्ठितौ स्याताम्। कस्मिन्नु प्राणः प्रतिष्ठित इति। अपान इति। साऽपि प्राणवृत्तिरपानवृत्त्या चेन्न गृह्येत प्रागेव प्रेयात्। कस्मिन्न्वपानः प्रतिष्ठित इति व्यान इति। साऽप्यपानवृत्तिरध एव यायात्, प्राणवृत्तिश्च प्रागेव यायात् मध्यस्थया चेद् व्यानवृत्त्या न गृह्येत। कस्मिन्नु व्यानः प्रतिष्ठित इति उदन इति सर्वास्तिस्रो वृत्तय उदाने कीलस्थानीये चेन्न बद्धाः विश्वङ्क्त्व ईयुः। कस्मिन्नूदानः प्रतिष्ठित इति समान इति। समाने प्रतिष्ठिताः सर्वा ह्येता वृत्तयः। एतदुक्तं भवति शरीरहृदयवायवः अन्योऽन्यप्रतिष्ठिता वर्तन्ते इति ॥

पञ्चधोपासनं त्वेवं समाम्नातं समापितम् ॥ २६ ॥
एतावदेव शाकल्यो वेत्ति मायामयं तु तत् ॥
इति मत्वा श्रुतिस्तत्त्वं वदत्युक्तनिषेधतः ॥ २७ ॥
विहायाख्यायिकारूपं स्वेनैव वचसा श्रुतिः ॥
स एष नेति नेतीति वक्ति तत्त्वविनिर्णयम् ॥ २८ ॥
श्रुतिः—स एष नेतिनेत्यात्माऽ गृह्यो नहि गृह्यते ऽशीर्यो नहि शीर्यते ऽसङ्गो नहि सज्जते ऽसितो न व्यथते न रिष्यत्येतान्यष्टावायतनान्यष्टौ लोका-अष्टौ देवा अष्टौ पुरुषाः ॥

वार्त्ति० समापय्यात्मविज्ञानं याज्ञवल्क्यात्मिका सती ॥
पश्चात्पप्रच्छ शाकल्यमब्रह्मिष्ठत्वसिद्धये ॥ २९ ॥
स एष नेति नेत्यादि सर्वो वा प्रश्न ईक्ष्यताम् ॥

उक्तमर्थं सङ्क्षिपन्प्रकृतमुपसंहरति *प्रतिष्ठित इति ॥ २६ ॥ स एष इत्यादिवाक्यमवतारयति *एतावदिति ॥ २७ ॥ ननु शाकल्ययाज्ञवल्क्योः संवादात्मिकेयमाख्यायिका, न चात्र शाकल्येनाक्षरं पृष्टं, तत्कथं तत्कथनार्थं याज्ञवल्क्यस्य प्रवृत्तिरत आह *विहायेति ॥ २८ ॥ स एष इत्यादिवाक्यस्य श्रौतत्वे एतान्यष्टावित्यादिवाक्यस्यासङ्गतिरित्याशंक्य वाक्यभेदान्मैवमित्याह *समापय्येति । शाकल्यस्याब्रह्मिष्ठत्वसिद्धौ ब्रह्मवित्सभायां प्रश्नानधिकारात्तस्मिन्नपराधो दर्शित इति भावः ॥ २९ ॥ स एष इत्यादिश्रौतं वाक्यम्, एतानीत्यादिप्रश्नवाक्यमित्युक्तो विभागः । इदानीमेकवाक्यत्वमाश्रित्याह *स इति । एकवाक्यत्वे हेतुः*मध्य इति । कस्मिन्नु हृदयमित्यादौ सति वाक्यभेदे तद्धेतुरितिशब्दो मध्ये दृष्टः, न च न रिष्य-

मध्ये वाक्यच्छिदोऽसत्त्वादितिशब्दस्य पूर्ववत् ॥३०॥
ऐकात्म्ये सर्वमेवेदं समासव्यासरूपतः ॥
समापनीयमित्युक्ते भूयः प्रश्नोत्तरे इमे ॥ ३१ ॥
पुमर्थेऽवसितं शास्त्रं भवत्यैकात्म्यवर्णने ॥
तदनुक्तौ तु पूर्वोक्तं सर्वं स्यात्तुषकण्डनम् ॥ ३२ ॥
नाक्षरब्राह्मणे प्रोक्ता विज्ञानानन्दरूपता ॥
तथौपनिषदत्वं च द्वयं तदुपवर्ण्यते ॥ ३३ ॥
नेतिनेतीति पूर्वत्र मूर्त्तामूर्त्तविवेचने ॥
अत्राप्यस्थूलमित्युक्तं स एष इति भण्यते ॥ ३४ ॥
अथवाऽशेषवेदान्तप्रसिद्धः स इतीरितः ॥
स्वानुभूतप्रसिद्धिस्तु प्रोक्तैष इतिशब्दतः ॥ ३५ ॥
देवाविस्तारसङ्क्षेपावष्टधा पञ्चधा च यत् ॥
उपास्यमुक्तं तत्सर्वं नेतिनेतीत्यपोह्यते ॥ ३६ ॥
इतिशब्देन निर्दिष्टे हृदये तस्मिन्नपोदिते ॥

त्येतान्यष्टावित्यत्र मध्ये वाक्यच्छिद् इतिशब्दो दृश्यते तस्मादेकमिदं प्रश्नवाक्यमित्यर्थः ॥ ३० ॥ एवं वाक्यमवतार्य प्रश्नप्रत्युक्त्योरभिप्रायमाह *ऐकात्म्येति ॥ ३१ ॥ प्रश्नोत्तराभ्यामैकात्म्यवर्णनेन वा किं फलं तत्राह *पुमर्थ इति ॥ ३२ ॥ ऐकात्म्यमपि पूर्वब्राह्मणे कथितमेवेति पुनरुक्तिमाशङ्क्य तत्रानुक्तविशेषोऽत्र कथ्यते इत्याह *नेति ॥ ३३ ॥ तात्पर्यमुक्त्वाऽक्षराणि व्याचष्टे *नेति नेतीति ॥ ३४ ॥ स एष इतिपदयोरर्थान्तरमाह *अथवेति ॥ ३५ ॥ नेतीत्यत्रेतिशब्देन प्रकृतं सर्वं द्वैतं परामृश्य नकारेण निषिध्यत इत्याह *देवेति ॥ ३६ ॥ आत्मपदार्थमाह *इतीति ॥ आत्मशब्दस्य स्वरूपवाचित्वात्कस्य

योऽवशिष्टः स आत्माऽस्य दृश्यस्यात्मवतो मतः ॥३७॥
आत्मात्मवत्त्वसम्बन्धो नान्यो दृग्दृश्ययोरिति ॥
मत्वाऽऽत्मशब्दो दृग्वस्तुन्यवाच्येऽपि प्रयुज्यते ॥३८॥
ननु ब्रह्माधिकारेऽस्मिन्कथमात्मेति वर्ण्यते ॥
नैष दोषोऽतिरेकेण नात्मनो ब्रह्मता यतः ॥ ३९ ॥
ग्राह्यत्वं शर्णिता सङ्गो बन्धो भीतिश्च हिंसनम् ॥
जाड्याज्जडस्य धर्माः स्युर्नतु सन्त्यात्मवस्तुनि ॥ ४० ॥
कार्यधर्मानतीत्यैतांस्तद्धेत्वज्ञाननिह्नुतेः ॥
अपूर्वानपरः पूर्ण आत्मा स्वात्मन्यवस्थितः ॥ ४१ ॥
इदं यदाश्रुतेर्वाक्यं तदा तत्त्वं निरूपितम् ॥

स्वरूपमित्यपेक्षायामाह *अस्य दृश्यस्येति ॥ ३७ ॥ वाचामगोचरे प्रतीचि आत्मपदप्रयोगे हेतुमाह *आत्मेति । प्रयुज्यते, लक्षणयेति शेषः ॥ ३८ ॥ आत्मशब्दमाक्षिप्य परिहरति *नन्विति ॥ ३९ ॥ अगृह्य इत्यादिपदानि व्याचष्टे *ग्राह्यत्वमिति ॥

अगृह्यः, न गृह्यः । श्रुतिरेव अगृह्यत्वादौ हेतुमाह *नहि गृह्यते । यद्धि व्याकृतं रूपादिमद्वस्तु तद्ग्रहणगोचरम्, इदं तु तद्विपरीतमात्मतत्त्वम् । तथाऽशीर्यो, यद्धि मूर्त्तं शरीरादि तच्छीर्येत, अयंतु तद्विपरीतत्वादेव, असङ्गः, मूर्त्तं हि मूर्त्तान्तरेण संसृज्यतेऽतएवासितः अबद्धः अबद्धत्वादेव न व्यथते न बिभेति तथा न रिष्यति ग्रहणविमरणसंगभीतिराहितत्वाद्धिंसां नापाद्यते न विनश्यतीत्यर्थः ।

ग्राह्यत्वादीनां जडधर्मत्वे हेतुमाह *जाड्यादिति । आत्मनश्चिद्रूपत्वान्न जडधर्माणां तत्र प्रसक्तिरित्याह *नत्विति ॥ ४० ॥ उक्तमेव व्यनक्ति*कार्येति ॥ ४१ ॥

याज्ञवल्क्यस्य वाक्यत्वे पृष्टमेतदनूदितम् ॥ ४२ ॥
आत्मा निरुह्य प्रत्युह्य पुरुषान्योऽत्यवर्त्तत ॥
तमौपनिषदं ब्रूहि मूर्द्धा पततु तेऽन्यथा ॥ ४३ ॥

श्रुतिः—स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्तन्त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्द्धा ते विपतिष्यतीति तꣳह न मेने शाकल्यस्तस्य ह मूर्द्धा विपपातापि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः ॥ २६ ॥

वार्त्ति०—योऽनूदितो नेतिनेति संविन्मात्रो ह्यविक्रियः॥
उक्तौ पुरुषनिर्वाहप्रतिवाहौ तु मायिकौ ॥ ४४ ॥
सृष्टिरष्टविधोपास्यरूपा निर्वाह उच्यते ॥
प्रतिवाहस्तु संहारो दिग्देवद्वारतो हृदि ॥ ४५ ॥

स एष इत्यादिवाक्यं पूर्वोक्तार्थद्वयानुसारेणोपसंहरति *इदमिति ॥ ४२ ॥ एतानीत्यादेरर्थमाह *आत्मेति ॥ ४३ ॥

एतान्यष्टावायतनानि पृथिव्येव यस्यायतनमित्येवमादीनि। अष्टौ लोका अग्निर्लोक इत्यादयः । अष्टौ देवा अमृतमिति होवाचेत्येवमादयः । अष्टौ पुरुषाः शारीरपुरुष इत्यादयः ।

एवं समुदायार्थमुक्त्वा स यस्तानित्यत्र स य इति पदद्वयस्यार्थमाह*य इति । अपेक्षितं पूरयति *संविन्मात्र इति । तत्र हेतुः *अविक्रिय इति । अविक्रियत्वमात्मनोऽनुपपन्नं तस्य सृष्ट्यादिकर्तृत्वोक्तेरिति तत्राह *उक्ताविति । तान् पुरुषान्निरुह्य प्रत्युह्येत्यत्र पुरुषशब्दोपलक्षितायतनादिचतुष्टयस्य यौ निर्वाहप्रतिवाहौ सृष्टिसंहारावुक्तौ तावाविद्यकाविसर्थः ॥ ४४ ॥ निर्वाहप्रातिवाहपदयोरर्थं विशदयति *सृष्टिरिति ॥ ४५ ॥ अत्यक्रामदित्येतद्

वस्तुवृत्तेन निःशेषकार्यकारणवर्जनम् ॥
तस्यातिक्रांतिरुद्दिष्टा स चोपनिषदि श्रुतः ॥ ४६ ॥
कर्मकांडे विरोधित्वान्न चायं श्रूयते क्वचित् ॥
ऐकात्म्यवस्तुविज्ञानं कर्मभिर्हि विरुध्यते ॥ ४७ ॥
अविरोधं मन्यमानाः केचिद्विज्ञानकर्मणोः ॥
कर्मछिद्रेऽपि कुर्वंति यथावस्त्वात्मबोधनम् ॥ ४८ ॥
यत्कर्तुमन्यथाकर्त्तुमकर्त्तुं चापि शक्यते ॥
कुर्वंतु स्वेच्छया तादृग्विज्ञानं तु न तादृशम् ॥ ४९ ॥
तस्मादुपनिषत्स्वेव ज्ञातः कर्मविरोधतः ॥
न कर्मकांडे, शाकल्यः कर्मित्वान्नैव वेत्ति तम् ॥ ५० ॥
ब्रह्मिष्ठा अपि गार्ग्याद्याः स्वस्वप्रश्नोत्तरे सति ॥
तुष्टा उपरतास्तेन स मुनिर्न शशाप तान् ॥ ५१ ॥
अब्राह्मिष्ठो ब्रह्मविदो द्विषन्ब्रह्मविदां धनम् ॥
शाकल्यो वाञ्छतीत्येनं शाकल्यमशपन्मुनिः ॥५२॥

व्याचष्टे *वस्तुवृत्तेनेति । औपनिषदपदं व्याचष्टे *स चेति । चोऽवधारणे, उपनिषद्येव श्रुत इत्यर्थः ॥ ४६ ॥ अवधारणे हेतुमाह *कर्मेति ॥ ४७ ॥ एकदेशिमतं दूषयितुमनुभाषते *अविरोधमिति । कर्मछिद्रेषु वस्त्वनुसृत्य ज्ञानमभ्यस्यंति चोदितकर्मकाले कर्म कुर्वन्तीति ज्ञानकर्मणोरविरोधं मन्यन्त इत्यर्थः ॥ ४८ ॥ तं निराकरोति *यदिति ॥ ४९ ॥ औपनिषदत्वमुपसंहरति *तस्मादिति । तं ह न मेने शाकल्य इत्येतद् व्याचष्टे *शाकल्य इति ॥ ५० ॥ वादित्वाविशेषेऽप्याश्वलादीनशप्तवतो मुनेः शाकल्यशापे हेतुमाह* ब्रह्मिष्ठा इत्यादिना ॥५१॥५२॥ तस्य ह मूर्द्धेत्यादेरर्थमाह *शापेनेति । अपि हेत्यादेरर्थमाह *तस्येति ।

शापेन दग्धशाकल्यस्तस्यास्थीन्यपि तस्कराः ॥
अपजह्रुरतः शास्त्रसंस्कारोऽप्यस्य नाभवत् ॥ ५३ ॥
शाकल्यो ब्रह्मविद्द्वेष्टा भ्रष्टो लोकद्वयाद्यतः ॥
ततो ब्रह्मविदां भक्तिः कार्या द्वेषो न कुत्रचित् ॥५४॥
य औपनिषदस्तस्य विज्ञानानन्दरूपता ॥
दातृता भोगमुक्त्योश्च वक्तव्येत्युत्तरा श्रुतिः ॥ ५५ ॥

श्रु०—अथ होवाच ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते तं वः पृच्छामि सर्वान्वा वः पृच्छामीति ते ह ब्राह्मणा न दधृषुः ॥ २७ ॥

तान् हैतैः श्लोकैः पप्रच्छ ।

परिमोषिणः तस्काराः संस्कारार्थं शिष्यैर्नीयमानान्यप्यस्थीनि धनमिति मन्यमाना अपजह्रुरिति श्रुत्यर्थः ॥ २६ ॥

अस्थ्यपहारे को दोषस्तत्राह *अत इति ॥ ५३ ॥ किमितीयमाख्यायिका विद्याप्रकरणे सूचिता तत्राह *शाकल्येति ॥ ५४ ॥ तं ह न मेने इत्यादिस्वमुखेनोक्त्वा पुनर्याज्ञवल्क्यमुखेन प्रवृत्ताया अथ हेत्यादिश्रुतेस्तात्पर्यमाह*य इति ॥ ५५ ॥

श्रुतेरक्षरार्थस्तु—अथानन्तरं तूष्णीम्भूतेषु विप्रेषु याज्ञवल्क्यः हे भगवन्त इति सम्बोध्योवाच वः युष्माकं मध्ये यो 'याज्ञवल्क्यं पृच्छामि' इति कामयते स मामागम्य पृच्छतु, सर्वे वा यूयं मां पृच्छत । वो युष्माकं मध्ये यो 'याज्ञवल्क्यो मां पृच्छतु' इति कामयते तं पृच्छामि, सर्वान्वा युष्मान्पृच्छामि । ते ह ब्राह्मणा एवमुक्ता अपि न दधृषुः न प्रगल्भाः संवृत्ताः ॥ २७ ॥ तेषु प्रतिवक्तुमप्रगल्भभूतेषु तानेतैर्वक्ष्यमाणश्लोकैः पप्रच्छ ।

महाप्रलयसम्पत्तौ जगतः पुनरुद्भवे ॥
कारणं पृच्छयते वृक्षसर्वसाधर्म्यपूर्वकम् ॥ ८६ ॥
श्रु०-यथा वृक्षो वनस्पतिस्तथैव पुरुषो ऽमृषा ॥
तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः ॥
त्वच एवास्य रुधिरं प्रस्यंदि त्वच उत्पटः
तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाहतात् ॥
मांसान्यस्य शकराणि कीनाटं स्नाववत्स्थिरम्
अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ॥
यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः
मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥

एतत्सर्वमभिप्रेत्य यथेत्यादिमन्त्रतात्पर्यमाह *महाप्रलयेति ॥ ८६ ॥

यथा लोके वृक्षो, वनस्पतिरिति विशेषणेन वृक्षस्य महत्त्वमाह । तथैव पुरुष इत्येतत्साधर्म्यम् । अमृषा सत्यम् । साधर्म्यमेव प्रकटयति-तस्य लोमानि तस्य पुरुषस्य लोमानि, वृक्षस्य पर्णानि त्वगस्य पुंसः वृक्षस्य बहिरुत्पाटिका, उत्पाटिकेति नीरसा त्वगुच्यते । त्वच एव सकाशादस्य पुरुषस्य रुधिरं प्रस्यन्दि वृक्षस्य त्वचः सकाशादुत्पटो निर्यासः, यस्मादेवं सर्वं समानं वनस्पतेः पुरुषस्य च तस्माद्रुधिरमातृण्णाद्धिंसितात्प्रैति निर्गच्छति वृक्षादिवाहताच्छिन्नाद्रस इव । मांसानि अस्य पुरुषस्य वृक्षस्य शकलानि शकराणि कीनाटं, कीनाटं नाम शकलेभ्योऽभ्यन्तरं वल्कलरूपं काष्ठसंलग्नं, पुंसः स्नावः तच्च स्थिरं दृढम्, अस्थीनि पुंसोऽन्तरतः स्नावोऽभ्यन्तरे भवन्ति, तथा कीनाटस्याभ्यन्तरतो दारूणि काष्ठानि । मज्जा मज्जोपमा कृता

वार्त्ति०—वृक्षः काण्डरुहो बीजरुहश्चेति द्विधा तयोः ॥
समः काण्डरुहेणैव रेतसो योऽभिजायते ॥ ५७ ॥
न पृच्छयतेऽतिस्पष्टत्वात्तद्वान्तरकारणम् ॥
किंत्वस्पष्टमशेषस्य पृच्छयते मूलकारणम् ॥ ५८ ॥
अन्वयव्यतिरेकाभ्यां बीजाख्यान्मूलकारणात् ॥
दृष्टा वृक्षजनिस्तद्वत्कस्मान्मूलाज्जगज्जनिः ॥ ५९ ॥
श्रु०—रेतस इति मा वोचत जीवतस्तत्प्रजायते
धानारुह इव वै वृक्षोऽञ्जसा प्रेत्य सम्भवः ॥

पुरुषस्य वृक्षस्य च मज्ज्ञाऽन्योन्यतुल्यैव नान्यो विशेषोऽस्तीति भावः। यद्यपि वृक्णश्छिन्नो वृक्षो रोहति मूलात्पुनर्नवतरः पुरुषस्य वृक्षेण सर्वसाधर्म्यदृष्टेरत्रापि साधर्म्यं वक्तव्यम्। अतः पृच्छामि मर्त्यो मनुष्यः स्वित्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति मृतस्य पुरुषस्य कुतः प्ररोहणमित्यर्थः।

रेतस इति मा वोचतेत्यादेस्तात्पर्यमाह *वृक्ष इत्यादिना। काण्डरुहश्छिन्नशेषादुत्पद्यमानो वृक्षः। मूलस्थानीयाज्जनकाद्रेतोद्वारा यो जायते तस्य काण्डरुहसमत्वान्नात्रापि साधर्म्यक्षतिरित्यतिस्पष्टमिदं न पृष्टम्। तथा च महाप्रलये लीनस्य जगतो जन्मकारणस्य पृष्टत्वात्तस्य नेदमुत्तरमिति भावः ॥ ५७ ॥ ५८ ॥ माऽस्तु जगतो मूलमित्याशङ्क्य धानारुह इत्याद्यादत्ते*अन्वयेति ॥ ५९ ॥

धानारुहो बीजादुत्पद्यमानः। श्रुताविवशब्दोऽर्थशून्यः। वृक्षोऽञ्जसा साक्षात्प्रेत्य मृत्वा सति मूले पुनः सम्भवः सम्भवतीत्यर्थः। यद्यदि सह मूलेनावृहेयुस्तदा वृक्षः पुनर्न भवेत्तस्मान्नोत्पद्येतातो वृक्षदृष्टान्तेन जगतोऽप्यवश्यं यन्मूलमस्ति, तच्च किम्? इति निरूपणीयमित्यर्थः ॥

यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् ॥
मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥
जात एव न जायते कोन्वेनं जनयेत्पुनः ॥
वा०–नित्यजातस्वभावत्वं न मन्तव्यं यतो मृतः ॥
पुनः पुनर्जायते स्यात्कृतनाशादिरन्यथा ॥ ६० ॥
को न्वेनं जनयेन्नित्यमित्युक्ता न विदुर्द्विजाः ॥
जित्वा तान्याज्ञवल्क्यस्तु गोसहस्रं गृहीतवान् ॥६१॥
जिगीषा तामसी धेनुजिघृक्षा वा कथं मुनेः ॥
यथा सात्त्विकवैराग्यशान्त्यादीनि तथेक्ष्यताम् ॥६२॥
न रजस्तमसी देहे विद्यमाने विनश्यतः ॥
किन्तु बोधेनाभिभूते भोगायोद्भवतः पुनः ॥ ६३ ॥
आविर्भावतिरोभावौ पर्यायाद्भोगबोधयोः ॥
यज्जीवन्मुक्तिशास्त्रं तत्सत्यमेवमुपपद्यते ॥ ६४ ॥

जात एवेत्यस्यार्थमाह *नित्येति । सर्वस्य जगतः प्रवाहरूपेण नित्योत्पन्नस्वभावत्वेन जनिष्यमाणस्याभावान्न मूलान्वेषणमित्यर्थः। एवं स्वभाववादिमतमनूद्य न जायत इति श्रुतिभागेनोत्तरमाह *नेति । प्रतिज्ञातेऽर्थे जायते इति पदं हेतूकरोति *यत इति । स्वभाववादे दोषमाह *स्यादिति ॥ ६० ॥ प्रश्नार्थमुपसंहरति *को न्विति । याज्ञवल्क्यस्य ब्रह्मविदां श्रेष्ठत्वे फलितमाह *जित्वेति ॥६१॥ विदुषो याज्ञवल्क्यस्य विजिगीषादिकमाक्षिपति *जिगीषेति । उत्तरमाह *यथेति ॥ ६२ ॥ ननु रजस्तमसोर्विद्यया नष्टत्वात्तत्कार्यरागादिः कथं शान्त्यादिवदनुवर्तेत तत्राह *नेति ॥६३॥ उक्ते ऽर्थे जीवन्मुक्तिशास्त्रान्यथाऽनुपपत्तिं प्रमाणयति*यदिति ॥ ६४ ॥ प्रासङ्गिकं समाप्य प्रकृतं विज्ञानवाक्य-

मुनिपृष्टं जगन्मूलं मुमुक्ष्वनुजिघृक्षया ॥
आह विज्ञानमानन्दं ब्रह्मेति श्रुतिरादरात् ॥ ६५ ॥
एतावदिह निर्णीतं विजिगीषुकथामुखात् ॥
तत्त्वमित्यखिलाध्यायतात्पर्यं चोपसंहृतम् ॥ ६६ ॥
विज्ञानमिति चैतन्यं न क्रिया नापि तत्फलम् ॥
न कारकं न चाभासः क्रियादेः किंतु भासकम् ॥ ६७ ॥
एतावन्मात्रयाथात्म्यात्कार्यकारणवस्तुनः ॥
श्रुत्या तत्त्वमसीत्युक्त्या तादात्म्यं प्रतिपाद्यते ॥ ६८ ॥
निर्धूताशेषदुःखौघहेतुत्वात्सुखमेव तत् ॥
अथैष परमानन्दो यो वै भूमेति शास्त्रतः ॥ ६९ ॥
विषयेन्द्रियसम्बन्धाद्यत्तु लोके सुखायते ॥
आद्यन्तवत्त्वादायासजन्यत्वाच्च न तत्सुखम् ॥ ७०॥
अव्यावृत्ताननुगतभास्वद्विज्ञानमात्रतः ॥

मादत्ते *मुनीति ॥ ६५ ॥ तस्यैवार्थान्तरमाह *एतावदिति ॥ अस्मिन्नध्याये विजिगीषुकथामुखेन तत्त्वनिर्णयादत्र निर्णीतमेव तत्त्वमध्यायषट्कतात्पर्यविषय इत्यप्यनेन वाक्येन सूचितमित्यर्थः ॥ ६६ ॥ तत्र विज्ञानपदस्यार्थमाह *विज्ञानमिति ॥ ६७ ॥ विज्ञानस्य कार्यकारणयोरन्यतरत्वान्न कारकादिवैलक्षण्यमित्याशङ्क्य तयोस्तत्रारोपादुभयविलक्षणं तदित्याह *एतावदिति । तस्य प्रत्यगभिन्नत्वमप्याह *श्रुत्येति ॥ ६८ ॥ आनन्दशब्दार्थमाह *निर्धूतेति । आनन्दशब्दस्य वैषयिकसुखार्थत्वात्कथं प्रकृतं विज्ञानमेव सुखमित्याशङ्क्य तस्य परमानन्दत्वे मानमाह *अथेति ॥ ६९ ॥ यत्त्वानन्दो वैषयिकसुखमिति तत्राह *विषयेति ॥ ७० ॥ उक्तविशेषणे हेतूकृत्य विशेष्यं वक्तुं ब्रह्मादामि-

निरविद्याद्वयत्वात्तत्साक्षाद्ब्रह्मेति शब्द्यते ॥ ७१ ॥
तदेवाविद्यया शक्त्या भोगमोक्षप्रदानतः ॥
जगतो मूलमित्याह रातिरित्यादिवाक्यतः ॥ ७२ ॥
अदृष्टफलसंप्रेप्सोः सुवर्णादि प्रयच्छतः ॥
फलदानेन तद्ब्रह्म परायणमुदीरितम् ॥ ७३ ॥
श्रु०-विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विद इति ॥ २८ ॥

इत्युपनिषदि नवमं ब्राह्मणं समाप्तम् ॥

दग्धमोहान्धकारस्य प्रत्यग्बोधाग्निना मुनेः ॥
ऐकात्म्ये वर्त्तमानस्य ब्रह्मात्मत्वात्परायणम् ॥ ७४॥
यत्र वाऽन्यदिवेत्येवं यत्र त्वस्येति शास्त्रतः ॥
भेदाभेदानुरोधेन व्याचक्षीत परायणम् ॥ ७५ ॥

त्याह *अव्यावृत्तेति। निरविद्याद्वयत्वम्—अविद्यातत्कार्यदुःखसंस्पर्शाभावोपलक्षिताखण्डसुखैकतानता ॥ ७१ ॥ कथं तर्हि ब्रह्मणः कारणादिभाव इति शङ्कां परिहरन्नुत्तरवाक्यमवतारयति *तदिति ॥ ७२ ॥ अवतारितवाक्यस्यार्थमाह *अदृष्टेति ॥ ७३ ॥

श्रुतौ—रातिरिति षष्ठ्यर्थे प्रथमा, रातेर्धनस्य दातुः कालान्तरफलदातृत्वाद्ब्रह्म परायणं परा गतिरित्यर्थः ॥

तिष्ठमानस्य तद्विद इत्यस्यार्थमाह *दग्धेति ॥ ७४ ॥

तद्विदो ब्रह्मविदोऽत एव तस्मिन्नेव वर्त्तमानस्य तद्ब्रह्म परायणमित्यनुषङ्गः ॥ २८ ॥

कर्मिणां भेदेन परायणं ब्रह्म, विदुषस्त्वभेदेनेत्ययुक्तम् । एकस्य परायणशब्दस्यार्थभेदायोगादिति तत्राह *यत्रेति । अविद्वद्दशायां भेदो, विद्वद्दशायां तदभावश्चेति वाक्यद्वयावगतभेदाभेदानुसारेणोभयविधम्परायणत्वं वाच्यमित्यर्थः ॥ ७५ ॥

तस्मात्तमस्विनो ब्रह्म भेदेनैव परायणम् ॥
ध्वस्ताविद्यस्य चैकात्म्यात्कैवल्येन परायणम् ॥ ७६ ॥
किं दुःखाभाव आनन्द उत भावस्तदाऽपि किम् ॥
संवेद्यश्चित्स्वभावो वा ब्रह्मानन्दोऽत्र चिन्त्यते ॥७७॥
आहुर्मोक्षं निरानन्दं साङ्ख्या वैशेषिका अपि ॥
तेषामानन्दशब्दोऽयं दुःखाभावस्य लक्षकः ॥ ७८ ॥
संवेद्यानन्दमिच्छन्ति मुक्तौ नैयायिकादयः ॥
भावरूपस्ततो मुख्यो विषयानन्दवन्मतः ॥ ७९ ॥
जक्षन्क्रीडन् रतिं प्राप्तः सर्वान्कामान्सहाश्नुते ॥
इत्यादिश्रुतयः प्राहुर्विषयानन्दतुल्यताम् ॥ ८० ॥
क्रियाकारकशून्यत्वेऽप्यस्यानन्दस्य वेदनम् ॥
यतो विज्ञानमानन्दं ब्रह्मेति श्रुतिरब्रवीत् ॥ ८१ ॥
यथा सुख्यहमस्मीति स्वानन्दः स्वेन गृह्यते ॥
ब्रह्मानन्दो ब्रह्मणैव गृह्यतां का विरुद्धता ॥ ८२ ॥

द्विविधं परायणत्वमुपसंहरति *तस्मादिति ॥ ७६ ॥ उक्तं ब्रह्मण आनन्दात्मत्वमुपपत्त्या द्रढयितुं विचारमारभते *किमिति ॥ ७७ ॥ तत्र पूर्वपक्षमाह *आहुरिति । कथं तर्हि तेषामानन्दश्रुत्युपपत्तिस्तत्राह *तेषामिति ॥ ७८ ॥ मुख्ये सम्भवति लक्षणाया अन्याय्यत्वादयं पक्षोऽतितुच्छ इति मत्वा पक्षान्तरमाह *संवेद्येति। मुक्तौ वेद्यानन्दाङ्गीकृतेर्न तत्रानन्दश्रुतिरमुख्यार्थेत्यर्थः ॥ ७९ ॥ मोक्षे सुखं संवेद्यमित्यत्र वाक्यान्तराण्युदाहरति *जक्षन्निति ॥ ८० ॥ मुक्तौ ज्ञानसामग्र्यभावात्कथं सुखविषया धीरित्याशङ्क्य श्रुतिप्रामाण्यमाश्रित्याह *क्रियेति ॥ ८१ ॥ किञ्चानन्दस्य वेद्यतया स्वानुभवसिद्धत्वादपि न तद्वेद्यत्वविरोधः शङ्क्यः, इत्याह *यथेति ॥ ८२ ॥ आ-

नैतदेवं यतो मोक्षे देहेन्द्रियविवर्जनात् ॥
ऐकात्म्यादपि नानन्दगोचरा युज्यते मतिः ॥ ८३ ॥
देहादिनैरपेक्ष्येण मतिश्चेज्जायते तदा ॥
लौकिकव्यवहारेऽपि देहादि स्यादनर्थकम् ॥ ८४ ॥
ब्रह्म चेन्नित्यमानन्दं वेत्ति विद्यात्तदा ध्रुवम् ॥
संसार्यपि तदैकात्म्यान्मुक्तौ कोऽतिशयो भवेत्॥८५॥
ब्रह्मानन्दमथान्यः सन्मुक्तौ वेत्ति घटादिवत् ॥
सर्ववेदान्तकोपः स्यात्तदैकात्म्यविरोधतः ॥ ८६ ॥
तस्माद्विज्ञानमानन्दमिति नानन्दगोचरा ॥
मतिः किन्तु चिदानन्दघनस्वाभाव्यमुच्यते ॥ ८७ ॥

नन्दो वेद्यो ब्रह्मणीति चोदिते सिद्धान्तयति *नेति । मोक्षे किमानन्दविषया धीरनित्या उत नित्या? तत्राद्यं निरस्य द्वितीयं प्रत्याह *ऐकात्म्यादिति ॥ ८३ ॥ मुक्तौ ज्ञानसामग्र्यभावेऽपि जन्यज्ञानाङ्गीकारे बाधकमाह *देहेति ॥ ८४ ॥ किञ्च मुक्तौ ब्रह्मीभूतः सन् ब्रह्मानन्दं वेत्ति उत ब्रह्मभिन्नः? आद्यमनुवदति *ब्रह्मेति । भूत्वेति शेषः । अस्मिन्पक्षे संसारदशायामपि ब्रह्माभिन्नत्वाज्जीवो ब्रह्मसुखं जानीयादित्याह *विद्यादिति । न च संसारदशायां ब्रह्मसुखमावृतमिति शङ्क्यम्, तस्य ब्रह्माभिन्नत्वे स्वस्य स्वविषयत्वायोगेन वेद्यत्वं न स्यात्। भिन्नत्वे प्रज्ञानघन इत्यादिश्रुतिविरोधः स्यादिति भावः ॥ ८५ ॥ अन्त्यमनूद्य प्रत्याह *ब्रह्मेति । घटादिवद्, दृश्यत्वेन तस्यानित्यत्वं स्यादिति शेषः । तस्यैव दूषणान्तरमाह *सर्वेति ॥ ८६ ॥ परमतनिरसनमुपसंहरति *तस्मादिति ॥ ८७ ॥ जक्षन्क्रीडन्नित्यादिश्रुतेर्मोक्षे ब्रह्मानन्दो वेद्य इत्युक्तमनूद्य परिहरति *जक्षादिति । यथा

जक्षदित्यादि यत्प्रोक्तं तच्चात्र न विरुध्यते ॥
सर्वात्मकत्वाद्विदुषः सर्वतः पाणितादिवत् ॥ ८८ ॥
योगिदेवादिदेहेषु जक्षणादि यदीक्ष्यते ॥
तेन सर्वात्मकब्रह्मविदो मुक्तिः प्रशस्यते ॥ ८९ ॥
ननु जक्षणवन्मुक्तौ सर्वात्मत्वात्परात्मनः ॥
दुःखित्वमपि सम्प्राप्तं कुम्भीपाकादिदेहिषु ॥ ९० ॥
नैवं नारकदेहेषु तादात्म्यभ्रान्त्यभावतः ॥
न दुःखं प्राप्यते नापि विद्यास्तुत्युपयोगि तत् ॥ ९१ ॥
आनन्दब्रह्मविज्ञानपदार्थैकत्वहेतुतः ॥
नीलोत्पलादिवन्नात्र संसर्गो ब्रह्मणीष्यते ॥ ९२ ॥
न जडं ज्ञानरूपत्वादानन्दत्वान्न निःसुखम् ॥

'सर्वतः पाणिपादं तद्' इत्यादिना सर्वात्मतोच्यते, तथाऽत्रापि विदुषः सर्वात्मताया विवक्षितत्वादानन्दावेद्यत्वमविरुद्धमित्यर्थः ॥ ८८ ॥ विदुषः सार्वात्म्येऽपि कथं जक्षणादिश्रुतिर्निर्वहेत्तत्राह *योगीति ॥ ८९ ॥ विदुषः सार्वात्म्येन योग्यादिषु प्राप्तजक्षणाद्यनुवादे स्यादतिप्रसक्तिरिति शङ्कित्वा परिहरति *नन्वित्यादिना ॥९०॥९१॥ विज्ञानवादिवाक्यीयब्रह्मानन्दस्याखण्डत्वेनावेद्यत्वमुक्तम् । केचित्–वाक्यार्थः संसर्गो वा विशिष्टो वेति वदन्तो विज्ञानादिवाक्यं नाखण्डार्थं मृष्यन्ते तान्प्रत्याह *आनन्देति । एतानि पदानि एकस्मिन्नेव बुभुत्सिते ब्रह्मप्रातिपदिकार्थे लक्षणया पर्यवस्यन्ति, अन्यथा क्व बुभुत्सितबोधिनो वाक्यस्य प्रामाण्यं स्यादिति भावः । संसर्गग्रहणं विशिष्टोपलक्षणार्थम्॥९२॥ विज्ञानादिवाक्यस्याखण्डार्थपरत्वे तस्य एकेनैव पदेन सिद्धेः पदान्तरं व्यर्थमित्याशङ्क्य विज्ञानादिपदानां लक्ष्यार्थैक्येऽपि

नान्तवद्ब्रह्मरूपं तदिति योऽयं पदत्रयम् ॥ ९३ ॥
विषयानन्दवन्नातो वेद्यं किंतु स्वयम्प्रभम् ॥
तादृगानन्दरूपत्वं सुप्तावप्यवसीयताम् ॥ ९४ ॥
तादृग्ब्रह्मात्मबोधेन कृतार्थत्वमतिस्तु या ॥
सा धीवृत्तिस्वरूपत्वाद्वेद्या विषयतुष्टिवत् ॥ ९५ ॥
आरभ्य मानुषानन्दमुत्तरोत्तरवृद्धितः ॥
श्रुता हैरण्यगर्भान्ता ब्रह्मानन्दस्य बिन्दवः ॥ ९६ ॥
आनन्दसागरः सोऽयमनन्यानुभवात्मना ॥
सर्वदा सर्वतो भाति सर्वं वस्तु तदात्मकम् ॥ ९७ ॥
शतानि पञ्च श्लोकानां द्वाविंशतिरितीरिता ॥
संख्या वार्त्तिकसारेऽस्मिन्पञ्चमाध्यायसङ्ग्रहे ॥ ९८ ॥

इति वार्त्तिकसारे तृतीयाध्यायः समाप्तः ।

व्यावर्त्यभेदादर्थवत्त्वोपपत्तिरित्यभिप्रेत्याह *नेति ॥ ९३ ॥ वाक्यार्थस्याखण्डैकरसत्वे फलितमाह *विषयेति । ब्रह्मानन्दस्यावेद्यत्वे हेत्वन्तरमाह *तादृगिति । प्रमात्राद्युपरमेऽपि स्वापे सुखस्फुरणादपि प्रतीचः सुखात्मत्वसिद्धिरित्यर्थः ॥ ९४ ॥ त्रिदुषाम् 'अहं धन्योऽस्मि'इति सुखस्यानुभूयमानत्वात्कथमवेद्यतेति तत्राह *तादृग्ब्रह्मेति । सुखरूपत्वं तादृक्शब्दार्थः ॥ ९५ ॥ एवं ब्रह्मानन्दस्यावेद्यत्वं प्रसाध्य तारतम्येन श्रूयमाणसर्वानन्दहेतुत्वेन तस्य निरतिशयत्वमप्याह *आरभ्येति ॥९६॥ आत्मनो निरतिशयानन्दचिदेकतानन्दत्वमुक्तमुपसंहरंच्छिष्यविश्वासाय स्वानुभवं प्रकटयति *आनन्देति ॥ ९७ ॥ अध्यायश्लोकसङ्ख्यां गणयति *शतानीति ॥ ९८ ॥

इति वार्त्तिकसारटीकायां तृतीयाध्याये नवमं ब्राह्मणं समाप्तम् ।

कथितः पञ्चमे जल्पः षष्ठे वाद उदीर्यते ॥
वादिनामपि शिष्याणां बुद्ध्यारोहो द्विधोक्तितः ॥१॥
षड् ब्राह्मणानि तेष्वाद्ये उपास्तिः क्रममुक्तये ॥
द्वितीये जाग्रदाद्युक्त्या प्रत्यगात्मविनिर्णयः ॥ २ ॥
तृतीये परलोकस्य मोक्षस्यापि निदर्शनम् ॥
दार्ष्टान्तिकं चतुर्थे तु पञ्चमे बोधसाधनम् ॥ ३ ॥
षष्ठे वंश इति प्रोक्ता ब्राह्मणार्था अथोच्यते ॥
प्रथमब्राह्मणे प्रोक्तं चतुष्पात्वेन चिन्तनम् ॥ ४ ॥

श्रुतिः—जनको ह वैदेह आसाञ्चक्रेऽथ ह याज्ञवल्क्य आवव्राज तꣳ होवाच याज्ञवल्क्य किमर्थमचा-

---

अवस्थात्रयनिर्मुक्तमसङ्गमजमव्ययम् ॥
आत्मानमद्वयं राममानन्दघनमाश्रये ॥ १ ॥

वृत्तवर्त्तिष्यमाणयोः सङ्गतिमाह *कथित इति । परपराजयमात्मविजयं च न्यायतो लब्धवतां वादिनामपि तत्त्वनिर्धारणे बुद्धिस्वास्थ्यं भवतीत्यध्याययोरुत्थाप्योत्थापकरूपः सम्बन्ध इति भावः ॥ १ ॥ अस्मिन्नध्याये ब्राह्मणसङ्ख्यां दर्शयंस्तदर्थानपि संगृह्णाति *षडित्यादिना ॥ २ ॥ ३ ॥ प्रथमब्राह्मणतात्पर्यमुक्तं स्पष्टं विभज्यत इत्याह *अथोच्यत इति ॥४॥

अक्षरार्थस्तु—अत्राचार्यवता श्रद्धादिसम्पन्नेन विद्या लब्धव्येत्याचारप्रदर्शनायाख्यायिका प्रणीयते ।

जनको ह वैदेह आसाञ्चक्रे आसनं कृतवान्दर्शनकामेभ्य आस्थायिकां दत्तवानित्यर्थः। अथ ह तस्मिन्नवसरे याज्ञवल्क्य आवव्राज आगतवान् । तमागतं यथावत्संपूज्य राजोवाच । किमर्थमचारीरागतोऽसि, किंपुनरपि पशूनिच्छन्नाहोस्विदण्वन्तान् सूक्ष्मवस्तु-

रीः पशूनिच्छन्नण्वन्तानीत्युभयमेव सम्राडिति होवाच ॥ १ ॥

यत्ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे जित्वा शैलिनिर्वाग्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छैलिनिरब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किꣳस्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य। वागेवायतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत का प्रज्ञता याज्ञवल्क्य वागेव सम्राडिति हो-

---

निर्णयफलाभ्प्रश्नान्मत्तः श्रुत्वा तेषामुत्तरं वक्तुं वा त्वदागमनमित्यर्थः। एवं पृष्ट उभयमेव सम्राडिति होवाच—प्रश्नप्रतिवचनं, पशुग्रहणम्, उभयमप्यभिलषितमित्यर्थः ॥ १ ॥

स्वयमेव प्रश्नमुत्थापयति। यत्ते तुभ्यं कश्चिदब्रवीदाचार्यः। अनेकाचार्यसेवी भवान्तच्छृणवामेति।आह राजा-अब्रवीन्मे कश्चिदाचार्यः जित्वा नामतः शिलिनोऽपत्यं शैलिनिः। वाग्वै ब्रह्म,वाग्देवतैव ब्रह्मेति। याज्ञवल्क्य आह—यथा मातृमान्—यस्य पुत्रस्य सम्यगनुशासनकर्त्री माता विद्यते स मातृमान्, तत ऊर्ध्वं यस्य पिताऽनुशास्ता स पितृमान्। उपयनादूर्ध्वमासमावर्त्तनाद्यस्याचार्योऽनुशास्ता स आचार्यवान्, एवं शुद्धित्रयहेतुसंयुक्त एवाचार्यः परमाप्तः। स यथा ब्रूयाच्छिष्याय तथाऽसौ शैलिनिरुक्तवान्वागेव ब्रह्मेति। अवदतो हि किं स्यादिति नहि मूकस्येहामूत्रार्थं किंचित्स्यात्। एवमनुमोदने कृते ब्रह्मविद्ययाऽऽत्मानं कृतकृत्यं मन्वानं राजानं प्रत्याह अब्रवीदिति। ते तुभ्यं तस्य ब्रह्मण आयतनं शरीरं प्रतिष्ठामाधारम् अब्रवीदुक्तवान्किमित्यर्थः। आह राजा

वाच वाचा वै सम्राड् बन्धुः प्रज्ञायते ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टꣳहुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राड् प्रज्ञायन्ते वाग्वै सम्राट् परमं ब्रह्म नैनं वाग्जहाति सर्वाण्येनं भू-

---

न मे ऽब्रवीद् इति। मुनिराह—यद्येवम् एकपाद्वा एतत्—एकः पादो यस्य तदेकपाद् ब्रह्म, त्रिभिः पादैः शून्यमुपास्यमानमपि न फलाय भवतीत्यर्थः। आह राजा-यद्येवं त्वं विद्वान् स वै नोऽस्मभ्यं ब्रूहि प्रतिष्ठामायतनं चेत्यर्थः। मुनिराह—वागेवायतनं वाग्देवस्य ब्रह्मणो वागेव करणम् आयतनं शरीरम्, आकाशोऽव्याकृताख्यः प्रतिष्ठा, प्रज्ञेत्येनदुपासीतेति। प्रज्ञेतीयमुपनिषद्ब्रह्मणश्चतुर्थः पादः। प्रज्ञा किं ब्रह्मणः स्वरूपभूता उत आयतनादिवद्भिन्नेति पृच्छति राजा—का प्रज्ञेति। ब्रह्मस्वरूपत्वेन प्रज्ञा चिन्तनीयेति मत्वा वागेव सम्राडिति होवाच। प्रज्ञात्वं कथमित्याशङ्क्य तदुपपादयति—वाचा वै सम्राड् बन्धुः प्रज्ञायते 'अस्माकमयं बन्धुः' इत्युक्ते प्रज्ञायते हि बंधुः। तथा ऋग्वेदादि व्याख्यातमधस्तात्। इष्टं यागादिनिमित्तं धर्मजातम्। हुतं होमनिमित्तम्। अशितमन्नदाननिमित्तम्। पायितं पानदाननिमित्तम्। अयं लोकः इदं जन्म, परश्च लोकः प्रतिपत्तव्यं जन्म। सर्वाणि च भूतानि वाचा वै सम्राट् ज्ञायन्ते अतो वाग्वै सम्राट् परमं ब्रह्म। नैनं यथोक्तब्रह्मवेदिनं वाग्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति उपहारसमर्पणादिभिरिह पूजयन्तीत्यर्थः। भावनापरिपाकवशादिह देवो

तान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवंविद्वानेतदुपास्ते हस्त्यृषभꣳसहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ २ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्म उदङ्कः शौल्बायनः प्राणो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेत्यप्राणतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य प्राण एवायतनमाकाशः प्रतिष्ठा प्रियमित्येनदुपासीत का प्रियता याज्ञवल्क्य प्राण एव सम्राडिति होवाच प्राणस्य वै सम्राट् कामायायाज्यं याजयत्यप्रतिगृह्यस्य प्रतिगृह्णात्यपि तत्र

भूत्वा पुनः शरीरे पतिते देवानप्येति अपिगच्छति य एवं विद्वानेतदुपास्ते । एवमनुशिष्टो राजा विद्यानिष्क्रियार्थमुवाच । हस्तितुल्यऋषभो हस्त्यृषभो यस्मिन् गोसहस्रे तद्धस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः । स होवाच याज्ञवल्क्यः अननुशिष्य कृतार्थमकृत्वा शिष्याद्धनं न हरेतेति मम पिता अमन्यत ममाप्ययमेवाभिप्रायः ॥ २ ॥

यदेवेत्यादि पूर्ववत् । उदङ्को नामतः शुल्बस्यापत्यं शौल्बायनः । प्राणो वै ब्रह्मेत्यत्र प्राणशब्दो वायुदेवतावचनः । प्राण एवायतनमित्यत्र प्राणशब्दः पञ्चवृत्तिप्राणविषयः । प्राणस्य प्रियत्वमुपपादयति—प्राणस्य वै सम्राट् कामायार्थाय अयाज्यं पतितादिकं याजयति, अप्रतिगृह्यस्य म्लेच्छादेः प्रतिगृह्णात्यपि । तत्र तस्यां दिशि ।

वधाशङ्कं भवति यां दिशमेति प्राणस्यैव सम्राट्
कामाय प्राणो वै सम्राट् परमं ब्रह्म नैनं प्राणो जहाति
सर्वाण्येनं भूतान्यभिक्षरन्ति। देवो भूत्वा देवानप्येति
य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳसहस्रं ददामीति
होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता
मेऽमन्यत नाननुशिष्य हरेतेति ॥ ३ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे बर्कुर्वा-
र्ष्णश्चक्षुर्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवा-
न्ब्रूयात्तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि
किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मे-
ऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि
याज्ञवल्क्य चक्षुरेवायतनमाकाशः प्रतिष्ठा सत्य-
मित्येनदुपासीत का सत्यता याज्ञवल्क्य चक्षुरेव
सम्राडिति होवाच चक्षुषा वै सम्राट् पश्यन्तमाहु-
रद्राक्षीरिति स आहाद्राक्षमिति तत्सत्यं भवति
चक्षुर्वै सम्राट् परमं ब्रह्म नैनं चक्षुर्जहाति सर्वा-
ण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति
य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति
होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता

वधनिमित्तमाशङ्कं वधाशङ्का, यां दिशमेति तस्कराद्याकीर्णां
तस्यां दिशि वधशङ्का भवतीत्यर्थः । एतत्सर्वं प्राणस्य प्रियत्वे
हेतुरित्याह * प्राणस्येति ॥ ३ ॥

बर्कुरिति नामतः वृष्णस्यापत्यं वार्ष्णः। चक्षुषि आदित्यो दे-
वता। चक्षुषः कथं सत्यत्वं तत्राह। चक्षुषा वै सम्राट् पश्यन्तमाहुः

मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे गर्दभीविपीतो भारद्वाजः श्रोत्रं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य श्रोत्रमेवायतनमाकाशः प्रतिष्ठाऽनन्त इत्येनदुपासीत काऽनन्तता याज्ञवल्क्य दिश एव सम्राडिति होवाच तस्माद्वै सम्राडपि यां कां च दिशं गच्छति नैवास्या अन्तं गच्छत्यनन्ता हि दिशो दिशो वै सम्राट् श्रोत्रꣳश्रोत्रं वै सम्राट् परमं ब्रह्म नैनꣳ श्रोत्रं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ५ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे स-

'अद्राक्षीस्त्वं हस्तिनम्' इति । स चेद् 'अद्राक्षम्'इत्याह तत्सत्यं भवति, श्रोत्रेण श्रुतं कदाचिदनृतमपि स्यादिति भावः ॥ ४ ॥

गर्दभीविपीत इति नामतः, भारद्वाज इति गोत्रतः । श्रोत्रे दिग्देवता । दिश आनन्त्यं यस्मात्तस्माद्वै सम्राट् प्राचीमुदीचीं वा यां काञ्चन दिशं गच्छति नैवास्या अन्तं गच्छति अतो अनंता दिशः । तथापि श्रोत्रे किमायातं तदाह—दिशो वै सम्राट् श्रोत्रं तस्माद्दिशोऽनन्त्यमेव श्रोत्रानन्त्यम् ॥ ५ ॥

सत्यकामो नामतः जबालाया अपत्यं जाबालः ।

त्यकामो जाबालो मनो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किꣳस्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य मन एवायतनमाकाशः प्रतिष्ठाऽऽनन्द इत्येनदुपासीत का आनन्दता याज्ञवल्क्य मन एव सम्राडिति होवाच मनसा वै सम्राट् स्त्रियमभिहार्यते तस्यां प्रतिरूपः पुत्रो जायते स आनन्दो मनो वै सम्राट् परमं ब्रह्म नैनं मनो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवंविद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति॥६॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे विदग्धः शाकल्यो हृदयं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छाकल्योऽब्रवीद् हृदयं वै ब्रह्मेत्यहृदयस्य हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य हृदयमेवायतनमाकाशः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थि-

---

मनसि चन्द्रो देवता । यस्मान्मन एवानन्दः तस्मान्मनसा कामुकः स्त्रियमभिहार्यते प्रार्थयते तस्यां प्रतिरूपोऽनुरूपः पुत्रो जायते स आनन्दः आनन्दहेतुः पुत्रः । स एनं मनसा निर्वर्त्तते तन्मन आनन्दहेतुः ॥ ६ ॥

सर्वभूतानां हृदयायतनत्वं शाकल्यब्राह्मणे उपपादितम-

तता याज्ञवल्क्य हृदयमेव सम्राडिति होवाच हृदयं वै सम्राड् सर्वेषां भूतानामायतनꣳ हृदयं वै सम्राड् सर्वेषां भूतानां प्रतिष्ठा हृदये ह्येव सम्राड् सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति हृदयं वै सम्राट् परमं ब्रह्म नैनꣳ हृदयं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवंविद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ७ ॥

इत्युपनिषदि प्रथमं ब्राह्मणम् ॥ १ ॥

वा०—वागाद्या देवतास्तासामाधारस्तत्तदिन्द्रियम् ॥
अव्याकृतं च नामेति पादाश्चत्वार ईरिताः ॥ ५ ॥
चतुष्पाद्ब्रह्म सर्वात्मरूपमस्तीति चिन्तनात् ॥
प्राणिभिः पूज्यते सर्वैरिह वागाद्यनुग्रहात् ॥ ६ ॥

नुसन्धेयम् । हृदये च प्रजापतिर्देवता ॥ ७ ॥

अत्र ब्रह्मणश्चतुष्पात्त्वेनोपासनं विभजत इत्युक्तम् । तदेव विभजते *वागाद्या इति । अत्र वाग्वै ब्रह्मेत्यादिनोक्ता अग्न्यादिदेवताः प्रथमः पादः । वागेवायतनमित्यग्न्यादिशरीरत्वेनोक्तवागादिकरणानि द्वितीयः पादः । आकाशः प्रतिष्ठेति तदाधारत्वेनोक्ताव्याकृतं तृतीयः पादः । प्रज्ञेत्यादिभिरुक्तप्रज्ञादिरस्य नामानि चतुर्थः पादः । तथा चाग्न्यादिदेवतासु ब्रह्मदृष्ट्या कार्यकारणात्मकं सर्वं जगदुपास्यत्वेनास्मिन्प्रकरणे विवक्षितं न त्वेकदेशावच्छिन्नोपास्तिः। देवानप्येतीति बहुवचनादेकैकोपास्तेरनेकदेवताऽऽप्त्ययोगादिति भावः ॥५॥ उपास्तिप्रकारमभिनयंस्तत्फलमाह *चतुष्पादित्यादिना ॥ ६ ॥ अत्र देवो भूत्वेत्या-

परत्राप्नोति देवत्वं भावनोपचयादयम् ॥
अतो विलक्षणं ब्रह्मविद्यायास्तदुपासनम् ॥ ७ ॥
प्रागपि ब्रह्मविद्याया ब्रह्मैवाभूद्यथा तथा ॥
देवोपासनतः पूर्वं नाभूद्देव उपासकः ॥ ८ ॥
किन्त्वविच्छिन्नतद्ध्यानाद्देवोऽस्मीत्यभिमन्यते ॥
तद्भावनाभावितः सन्मृतौ देवत्वमाप्नुयात् ॥ ९ ॥
असमाप्तेः पुमर्थस्य न मुख्यमनुशासनम् ॥
तद्दत्तां याज्ञवल्क्योऽतो नाग्रहीद्गुरुदक्षिणाम् ॥ १० ॥
यस्मिञ्ज्ञातेऽखिलं ज्ञातं कृतं कृत्यं च कामितम् ॥
प्राप्तं, त्याज्यं च संत्यक्तं मुख्यं तदनुशासनम् ॥ ११ ॥

इति वार्तिकसारे चतुर्थाध्याये प्रथमब्राह्मणं समाप्तम् ॥ १ ॥

द्वितीयब्राह्मणे जाग्रत्स्वप्नसुप्तिमुखान्निजम् ॥
आत्मानं शास्त्यतो राजा यथाविध्युपसन्नवान् ॥ १ ॥

दिश्रुतिरुपासनफलसङ्कीर्त्तनद्वारोपास्तिज्ञानयोर्वैलक्षण्यद्योतनपरे- त्याह *अत इति । भावनावशाद्देवत्वप्राप्तिकथनमतःशब्दार्थः ॥ ७ ॥ वैलक्षण्यमेव स्फुटयति *प्रागित्यादिना ॥ ८ ॥ ९ ॥ ननु याज्ञवल्क्येनास्या एवोपास्तेरनुशासनान्नानुशिष्येत्या- द्युक्तिरयुक्ता तत्राह *असमाप्तेरिति ॥ १० ॥ किं तर्हि मुख्यम- नुशासनं तदाह *यस्मिन्निति ॥ ११ ॥

इति वार्त्तिकसारे चतुर्थाध्याये टीकायां प्रथमब्राह्मणं समाप्तम् ॥ १ ॥

अनन्तरब्राह्मणतात्पर्यमाह *द्वितीयेति । निजमात्मानं प्रत्यगभिन्नपरमात्मानमित्यर्थः । समुदायतात्पर्यमुक्त्वा जनको हेत्यादेरर्थमाह *अत इति । आत्मज्ञानार्थमित्यर्थः ॥ १ ॥

श्रुतिः—जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच नमस्तेऽस्तु याज्ञवल्क्यानु मा शाधीति स होवाच यथा वै सम्राण्महान्तमध्वानमेष्यन् रथं वा नावं वा समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्माऽस्येवं वृंदारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसीति ॥

वार्त्ति०–उक्तोपासनतः प्राप्यो देवभावः पुरोदितः ॥
देवत्वान्मुच्यमानेन प्राप्तं पृच्छत्यसौ मुनिः ॥ २ ॥
उपासनानि सर्वाणि परविद्याधिकारतः ॥
क्रममुक्तिफलानीति प्रश्नेनानेन गम्यते ॥ ३ ॥

श्रुतौ—कूर्चादासनविशेषाद् उत्थायोप समीपमवसर्पन् पादयोर्निपतन्नित्यर्थः। अनु मा शाधि मामनुशाधीत्यर्थः। इतिशब्दो वाक्यसमाप्त्यर्थः। स याज्ञवल्क्य उवाच यथा वै लोके महान्तं दीर्घमध्वानमेष्यन् गमिष्यन् रथं वा स्थलेन गमिष्यन्नावं वा जलेन गमिष्यन् समाददीतैवमेवैताभिरुपनिषद्भिः मन्त्रैरेतादेत्यादिपूर्वोक्ताभिर्युक्तं ब्रह्मोपासीनः समाहितात्मा संयुक्तात्माऽसि। एवं वृन्दारकः पूज्यश्चाढ्यश्च न दरिद्रः, अधीतवेदश्च उक्ताश्चोपनिषदस्तवाचार्यैः स त्वमुक्तोपनिषत्कः, एवं सर्वविभूतिसम्पन्नोऽपि सन्नितो विमुच्यमानः एभिर्नौस्थानीयाभिः सहितः क्व गमिष्यसि किंवस्तु प्राप्स्यसीत्येतत्।

ननु देवानप्येतीति देवभावस्य फलत्वोक्तेः क्व गमिष्यसीति प्रश्नानुपपत्तिरित्याशङ्क्य प्रश्नस्य विषयभेदं दर्शयति *उक्तेति ॥ २ ॥ अनुपपत्तिं निरस्य प्रश्नस्य तात्पर्यमाह *उपासनानीति। अत्राधिकारशब्दः प्रकरणवचनः ॥ ३ ॥

ब्रह्मतत्त्वविदोऽप्यस्य राज्ञो गतिमजानतः ॥
तां वक्तुं प्रश्न इत्याहुः केचित्, तत्तु न युज्यते ॥४॥
यत्साक्षादित्युपक्रम्य य आत्मेत्युपसंहृतेः ॥
ब्रह्मणः स्वात्मरूपत्वाद्ब्रह्मणि स्यात्कथं गतिः ॥ ५ ॥
गतिगन्तव्यगंत्रादेरोतप्रोतात्मवर्त्मना ॥
ब्रह्मात्मनि समाप्तत्वाद्गतिः का परमात्मनि ॥ ६ ॥
ब्रह्मैव सन्नवाप्नोति ब्रह्मेत्यादिश्रुतेरयम् ॥
अविद्यामात्रविध्वस्तावनाप्तवदवाप्यते ॥ ७ ॥
गन्तव्यं तु न जानामीत्यविद्यां स्वात्मनि स्थिताम् ॥
प्रकटीकुर्वतो राज्ञ इथं तत्त्वमुपादिशत् ॥ ८ ॥

श्रुतिः–नाहं तद्भगवन्वेद यत्र गमिष्यामीत्यथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति ॥ १ ॥

इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वा

इत इत्यादेरर्थं स्वपक्षे दर्शयित्वा भर्तृप्रपञ्चोक्तं तमनूद्य दूषयति *ब्रह्मेति ॥ ४ ॥ अयुक्तिमेवाह*यदिति । ब्रह्मात्मनोरैक्यस्य श्रुतत्वात्तत्र गत्यनुपपत्तेर्गतिविषयप्रश्नोऽनुपपन्न इत्यर्थः ॥ ५ ॥ कथं गत्यनुपपत्तिस्तदभावे वा कथं परप्राप्तिस्तत्राह *गतीत्यादिना ॥ ६ ॥ ७ ॥ नाहं तदित्यादेरर्थमाह *गन्तव्यमिति ॥ ८ ॥

नाहं तत् भगवन्वेदेति राज्ञा स्वाज्ञाने प्रकटितेऽथ यदि न जानीषे तर्हि यत्र गमिष्यसि तत् ते तुभ्यं वक्ष्यामीति प्रतिज्ञाय ब्रवीतु भगवानिति राज्ञा पुनः प्रार्थितः सन्निन्धो हेत्यादिना विश्वतैजसप्राज्ञानुवादेन तुर्यं तत्त्वमुपदिदेशेत्यर्थः ॥ १ ॥

एवं ब्राह्मणशेषस्य समुदायतात्पर्यमुक्त्वा इन्धपदस्यार्थमाह

एतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परोक्ष-
प्रिया इव हि देवाः प्रत्यक्षद्विषः ॥ २ ॥

इन्ध्यतेऽहर्निशं यस्मादिन्धनामा ततः पुमान् ॥
वीर्यवद्दक्षिणं चक्षुः श्रौतो वाऽतिशयोऽत्र हि ॥९॥
परोक्षनामव्याजेन परमैश्वर्यवाचिनम् ॥
इन्द्रशब्दं प्रयुञ्जान इन्धस्याहेश्वरात्मताम् ॥ १० ॥

श्रुतिः—अथैतद्वामेऽक्षणि पुरुषरूपमेषाऽस्य पत्नी विराट् तयोरेष सꣳस्तावो य एषोऽन्तर्हृदय आकाशोऽथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डोऽथैनयो-

---

*इन्ध्यत इति ॥ इंध्यते दीप्यते स्थूलार्थभोक्तृत्वेन, विश्वस्य सदा जागरणे स्फूर्तेरिन्धनामत्वमुपपन्नमिति भावः ॥ दक्षिणेऽक्षणीति विशेषे निमित्तमाह *वीर्यवदिति ॥ विश्वस्य पुनः स्वामिनो भोक्तृत्वं लौकिकवत्क्वचिदभिव्यक्तस्य वक्तव्यं, दक्षिणे चक्षुषि तदभिव्यक्तिः श्रुत्यनुभवसिद्धा, तेन तद्भोक्तृत्वसिद्धये विशेषोक्तिरिति भावः ॥ ९ ॥

तं वा एतमित्यादेरयमर्थः—तं वा एतं दक्षिणाक्षिण्यभिव्यक्तं विश्वमिन्धनामानं सन्तमिन्द्र इत्याचक्षते परोक्षेण, यस्मात्परोक्षप्रिया इव हि देवाः प्रत्यक्षनामग्रहणं द्विषन्ति ॥ २ ॥

ननु देवानां परोक्षप्रियत्वेऽपि शब्दान्तरं विहायेश्वरवाचीन्द्रशब्दप्रयोगे को हेतुस्तत्राह *परोक्षेति ॥ १० ॥

अथैतदित्यादेरयमर्थः–प्रासङ्गिकध्यानारंभार्थोऽथशब्दः। पुरुषरूपशब्दश्चैतन्यवचनः। एतत्प्रसिद्धं वामाक्षिनिष्ठं यच्चैतन्यमेषाऽस्य विश्वस्य वस्तुत ईश्वरात्मत्वादिंद्रशब्दाभिहितस्य पत्नी । अत्र विराट्शब्दो भोग्यपरः, भोक्तुर्विश्वस्य भोग्या पत्नीत्यर्थः

रेतत्प्रावरणं यदेतदन्तर्हृदये जालकमिव ॥

वार्त्ति०—दक्षिणाक्षिणि चैतन्यं पुरुषो, वामचक्षुषि ॥
चैतन्यं स्त्रीतिभेदोऽयं कल्प्यते सुखबुद्धये ॥ ११ ॥
एकस्यैव हि देवस्य विभागः स्थानभेदतः ॥
अग्नीषोमात्मना श्रुत्या ध्यानार्थं त्विह भण्यते ॥१२॥
उक्ता जाग्रदवस्थैवमिन्द्रस्य व्यवहारकृत् ॥
दम्पत्योः सङ्गमः स्वप्ना हार्दाकाशेऽथ वर्ण्यते ॥ १३ ॥
सम्भूय स्तुतिरत्रेति संस्तावो हृदये सुषिः ॥

ननु विश्वस्येश्वरात्मत्वमुक्त्वा तस्य पुनर्भोग्यस्त्रीनिरूपणं किमर्थं तत्राह* दक्षिणेति । ब्रह्माभेदयोग्यत्वंपदलक्ष्यचैतन्यस्य दम्पतीत्वेन सुखाववोधार्थं दक्षिणनेत्रोपलक्षितचैतन्यं पुरुषः, वामनेत्रोपलक्षितं स्त्रीति केवलं श्रुत्या भेदः कल्पित इत्यर्थः॥११॥ उपासनार्थं वा चैतन्यभेदकल्पनमित्याह *एकस्येति ॥ स्थानं चक्षुर्द्वयम् । स्थानभेदादौपाधिकभेदे प्रसिद्धिं वक्तुं हिशब्दः । भोक्तारमग्न्यात्मना, भोग्यं सोमात्मना ध्यातुमित्यर्थः ॥ ध्यानफलं चोक्तमधस्तात् ॥ १२ ॥ इंध इत्यादिवाक्यतात्पर्यमुपसंहरंस्तयोरेष इत्याद्यवतारयति* उक्तेति । मिथुनत्वेन निरूपितस्य विश्वस्यावस्थांतरं तैजससंज्ञस्य हृदयाकाशे स्वप्नावस्था वर्ण्यत इत्यर्थः ॥ १३ ॥ अक्षराणि योजयति *सम्भूयेति ॥

य एषोऽन्तर्हृदय आकाशः स एष तयोर्दम्पत्योः संस्तावः । अत्र संभूय तौ संस्तवमन्योऽन्यस्तुतिं कुर्वाते मिथः संगतिं गच्छत इति यावत् । अत्र हृदयाकाशे ताभ्यां स्तुतिः क्रियत इति हृदयसुषिः संस्ताव इत्युच्यते इति योजना ।

अणिष्ठान्नरसो रक्तपिण्डो यः सोऽन्नमेतयोः ॥ १४ ॥
हृद्यन्तः शतनाडीनां पुञ्जं प्रावरणं विदुः ॥

श्रुतिः—अथैनयोरेषा सृतिः सञ्चरणी यैषा हृदयादूर्ध्वा नाड्युच्चरति यथा केशः सहस्रधा भिन्न एवमस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्त्येव ताभिर्वा एतदास्रवदास्रवति तस्मादेष प्रविविक्ताहारतर इवैव भवत्यस्माच्छरीरादात्मनः ॥ ३ ॥

वा० स्वप्नाज्जागरणप्राप्त्यै मार्गो नाड्यूर्ध्वगामिनी॥१५॥

अथैनयोरित्यादेरर्थमाह *अणिष्ठेति ॥ १४ ॥

दम्पत्योः स्तुतिहेतुत्वाद्युक्तिप्रारंभार्थः श्रुतावथशब्दः । योऽणिष्ठोऽन्नरसः स लोहितपिंडः सूक्ष्मासु नाडीष्वनुप्रविष्टोऽतर्हृदये मिथुनीभूतयोरेतदन्नं भवति, स्थितिसाधनं भवतीत्यर्थः ।

अथैनयोरेतत्प्रावरणमित्यादेरर्थमाह *हृद्यन्तरिति ॥ अंतर्हृदये छिद्रबहुमत्त्वान्नाडीशतं छिद्रस्य जालकं गवाक्षमिव प्रतीयमानं नाडीपुञ्जं यदस्ति, तदेनयोर्दंपत्योरेतदावरणं प्रसिद्धपरिधानस्थानीयमित्यर्थः ।

अथैनयोरेषेत्यादिश्रुतेरयमर्थः—एनयोरेषा सृतिर्मार्गः, संचरत्यनयेति सञ्चरणी भवति । का सा सृतिस्तत्राह—यैषा हृदयात् हृदयदेशादूर्ध्वाऽभिमुखा नाड्युच्चरति । नाडीनां परिमाणमाह—यथा लोके केशः सहस्रधा भिन्नोऽत्यन्तसूक्ष्मो भवत्येवमतिसूक्ष्मा अस्य देहस्य सम्बन्धिन्य एता हिता इत्येवमाख्याता नाड्यस्ताश्चांतर्हृदये हृदयमांसपिंडे प्रतिष्ठिता भवंति, एताभिरत्यंतसूक्ष्मनाडीभिरेतदन्नमास्रवत्प्राप्नुवदास्रवति व्याप्नोति ॥

ननूर्ध्वगतिन्या नाड्या मार्गत्वोक्तिरयुक्ता प्राप्तव्यदेशाभा-

यस्मादन्नरसः केशसहस्रांशेन सम्मितैः ॥
नाडीभेदैः स्वप्नदृशं याति सूक्ष्मतरस्ततः ॥ १६ ॥
स्थूलो रसः पुरीषात्मा बहिर्यात्यतिसूक्ष्मकः ॥
शरीरमिन्धमात्मानं तर्पयेत्सप्तधातुभिः ॥ १७ ॥
रसः सूक्ष्मतरो लिङ्गं पोषयन् लिङ्गधारिणः ॥
आत्मनो वासनाभोगकारी स्वप्ने च चिन्तने ॥ १८ ॥
स्वचिदाभाससंव्याप्तिः पुंभोगः सुखदुःखयोः ॥
सोऽप्यस्य देवतातन्त्रो देवताश्चान्नसंश्रयाः ॥ १९ ॥
प्रविविक्ततराहार इवैवेत्युपमानया ॥

वात्तत्राह *स्वप्नादिति॥१५॥ 'तस्मादेष प्रविवित्क्ताहारतरः' इत्यत्र तैजसस्थितिहेतोरन्नरसस्य सूक्ष्मतरत्वमुक्तमुपपादयति *यस्मादिति ॥ १६ ॥ सूक्ष्मतरान्नरसस्य तैजसस्थितिहेतुत्वं स्थूलसूक्ष्मांशयोर्विनियोगपूर्वकं दर्शयति *स्थूलइत्यादिना ॥ १७ ॥ उक्तान्नरसस्य लिङ्गपोषकत्वेऽपि तैजसस्य किमायातं तत्राह* लिङ्गधारिण इति ॥ लिङ्गपोषणद्वारा तदुपहितस्य स्वप्नमनोरथयोः वासनाप्रापितभोगहेतुत्वात्सूक्ष्मतरान्नरसस्तैजसाऽऽहारो भवतीत्यर्थः ॥ १८ ॥ नन्वविक्रियस्यात्मनः कथं भोगस्तत्राह *स्वेति ॥ अन्तःकरणधर्मसुखादिवृत्तिषु चैतन्यव्याप्तिरेव पुरुषस्य भोग इत्यर्थः ॥ कथं तर्ह्यात्मनि भोक्तृत्वधीस्तत्राह* सोऽपीति ॥ अपिरवधारणे । अस्यात्मनः स्वसम्बन्धितया प्रतीयमानो भोगः देवतातंत्र एव । देवताः इन्द्रियाणि, तत्तन्त्रलिङ्गतादात्म्यभ्रमादात्मनि भोक्तृत्वधीरिति भावः ॥ इंद्रियाणां तर्हि किं कारणमित्याशङ्क्योक्तं स्मारयति *देवता इति ॥ १९ ॥ प्रविविक्ताहारतर इवैवेत्यत्रेवशब्दस्य विवक्षितमर्थमाह* प्रविविक्तेति ॥

लिङ्गाहारादप्यणीयान्प्राज्ञाहारो विवक्षितः ॥ २० ॥

श्रुतिः–तस्य प्राची दिग्प्राञ्चः प्राणा दक्षिणा दिग्दक्षिणे प्राणाः प्रतीची दिक्प्रत्यञ्चः प्राणा उदीची दिगुदञ्चः प्राणा उर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवाञ्चः प्राणाः सर्वा दिशः सर्वे प्राणाः ॥

वा०–स्वप्नावस्था समाप्ताऽथ तस्य प्राचीति वाक्यतः ॥
सुषुप्तिरुच्यते तत्र युक्ता सर्वदिगात्मना ॥ २१ ॥
आश्रयैः करणैर्हीनो ग्रस्ताध्यात्माधिदैवतः ॥
सुषुप्तावेक एवास्ते प्रज्ञानघनविग्रहः ॥ २२ ॥

इवैवेत्यनया श्रुत्योपमोच्यते ॥ यथा प्रविविक्ताहारो विश्वः, विश्वाहारस्यापि स्थूलपुरीषाद्यंशापेक्षया सूक्ष्मत्वात् । तद्वदयमपि तैजसो न प्रविविक्ताहार एव किन्तु प्रविविक्ताहारतरः । यथा च प्राज्ञः प्रविविक्ताहारतर एव न तथा लिङ्गात्मा किन्तु प्रविविक्ताहारतर इव भवतीति लिङ्गाहारस्य प्राज्ञाहारतुल्यत्ववाचिना इवशब्देन प्राज्ञाहारस्य सूक्ष्मतमत्वं विवक्षितमित्यर्थः ॥ २० ॥

'अस्माच्छरीरादात्मनः' इति श्रुतौ शरीरात्मपदाभ्यां स्थूलाभिमानी विश्व उच्यते । अस्मात्तैजसः प्रविविक्ताहारतर इति पूर्वेण सम्बन्धः ॥ ३ ॥

उक्तमर्थमुपसंहरन्नुत्तरवाक्यमवतारयति *स्वप्नेति । ननु तस्य प्राची दिग्प्राञ्चः प्राणा इत्यादिना तैजसस्येव सुषुप्त्यवस्थायां प्राज्ञसंज्ञस्य सर्वदिगात्मत्वं सर्वप्राणात्मत्वं च कथमुच्यते तस्य परिच्छिन्नत्वादिति तत्राह *तत्र युक्तेति । प्राज्ञः सप्तम्यर्थः । सर्वदिगात्मतेत्युपलक्षणं सर्वप्राणात्मतेत्यपि द्रष्टव्यम् ॥ २१ ॥ युक्तेत्युक्तमुपपादयति *आश्रयैरिति । प्राज्ञस्य देहद्वयाभिमानाभावादीश्वराभेदविवक्षया सर्वात्मतोच्यत इति भावः ॥ २२ ॥ आत्मनो

इन्धतैजससौषुप्तैर्विराट्सूत्रेश्वरा अपि ॥
विवक्षिता अथैतेषां तत्त्वमात्मोपदिश्यते ॥ २३ ॥

श्रुतिः—स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यतेऽसङ्गो नहि सज्जतेऽसितो न व्यथते न रिष्यत्यभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः स होवाच जनको वैदेहोऽभयं त्वा गच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे नमस्तेऽस्त्विमे विदेहा अयमहमस्मि ॥ ४ ॥

इत्युपनिषदि द्वितीयब्राह्मणं समाप्तम् ॥ २ ॥

वार्त्ति० विराडिन्धादिभिर्भेदैरभिन्नो योऽवभासते ॥
स एष नेति नेत्यात्मा न कार्यं नापि कारणम् ॥२४॥
तेनैव ज्ञात्मनाऽशेषं तद्ध्वांतं ध्वांतजं तथा ॥
जग्ध्वा नेत्यात्मना विद्वान्पूर्णदृष्ट्याऽवशिष्यते ॥२५॥
गन्तव्यमुपदिश्यैवं प्राप्तोऽस्यभयमित्यृषिः ॥
ऊचे बोधस्ततः प्राप्तः प्राप्स्यसीत्यन्यथा वदेत् ॥२६॥

निष्प्रपञ्चत्वप्रतिपादकं स एष इत्यादिवाक्यमवतारयितुं भूमिकामारचयति *इन्धेति । वाक्यमवतारयति *अथेति । अवस्थात्रयनिरूपणानन्तरमित्यर्थः ॥ २३ ॥ वाक्यार्थं स्पष्टयति *विराडिति ॥ २४ ॥ प्रतीचि सर्वप्रपञ्चनिषेधे फलितमाह *तेनेति ।

अयमर्थः—विश्वं विश्वशब्दोपलक्षितं विराजं च तैजसहिरण्यगर्भयोः प्रविलाप्य तन्मात्रत्वेन भावयित्वा, तावपि प्राज्ञेश्वरमात्रत्वेनानुसंधाय, तावपि प्रत्यक्तत्त्वमात्रतयाऽनुसन्दध्यात्ततः स एष नेतिनेत्यादिवाक्योत्थबोधाभिव्यक्तनिजबोधेनैवाज्ञानतत्कार्यनाशयोरुक्तानन्दात्मनाऽवशिष्टो भवति ॥ २५ ॥

उक्तार्थमनुवदन्नभयं वा इत्यादेरर्थमाह *गन्तव्यमिति॥२६॥

भयहेतुरविद्यैव सा च दुःस्थितिसिद्धिका ॥
ततो विद्योदयादस्या ध्वस्तिरात्यन्तिकी भवेत् ॥२७॥
बोधमार्ग इह प्रोक्त ऐकात्म्यप्राप्तिसिद्धये ॥
न त्वर्चिरादिवत्तस्य प्राप्तये गतिकल्पना ॥ २८ ॥
ज्ञानेन सदृशीमन्यामपश्यन् गुरुदक्षिणाम् ॥
अभयं त्वेति वचसा दक्षिणामाशिषं ददौ ॥ २९ ॥
वेत्ति ब्रह्म मुनिः शब्दान्नतु साक्षाच्चकार तत् ॥
साक्षात्कृतय एषाऽशीरित्येवं केचिदूचिरे ॥ ३० ॥
साक्षात्कृतब्रह्मतत्त्वो जीवन्मुक्तो मुनिः स्थितः ॥
आशीर्विदेहमोक्षायेत्याहुरन्ये द्वयं न तत् ॥ ३१ ॥
शाब्दविज्ञानमात्रेण नाचार्यत्वेन युज्यते ॥
श्रोत्रियं ब्रह्मनिष्ठं च गुरुं यायादिति श्रुतेः ॥ ३२ ॥
जीवन्मुक्तस्य पतिते देहे मुक्तिः सुनिश्चिता ॥
तत्राप्याशीरतो मा भूद्दक्षिणार्थैव सा ततः ॥ ३३ ॥

एवं वचनभङ्ग्या राज्ञो बोधप्राप्तिमुक्त्वा न्यायतोऽपि तामाह *भयेति । दुःस्थितिसिद्धिका अनिर्वचनीयेत्यर्थः । तस्या अनिर्वचनीयत्वे फलितमाह *तत इति॥२७॥ विश्वाद्युक्तिफलमुपसंहरति *बोधेति । मुख्यमार्गं व्यावर्त्तयति *नत्विति ॥२८॥ अभयं त्वा गच्छतादित्यादिराज्ञोक्तेस्तात्पर्यमाह *ज्ञानेनेति ॥ २९ ॥ अस्यैव वाक्यस्यैकदेशीयोक्तार्थमनुवदति *वेत्तीत्यादिना । मतद्वयमप्यनुपपन्नमित्याह *न तदिति ॥ ३० ॥ ३१ ॥ आद्येऽनुपपत्तिमाह *शाब्देति ॥ ३२ ॥ द्वितीयेऽपि पक्षे तामाह *जीवन्मुक्तस्येति । अतः स्वोक्तार्थ एव परिशिष्यत इत्याह *दक्षिणेति ॥ ३३ ॥

उत्तमा दक्षिणैषाऽऽशीर्मध्यमा तु नमस्क्रिया ॥
स्वभूमिवपुषोर्दानं वित्तशाठ्यनिवृत्तये ॥ ३४ ॥
दक्षिणा त्रिविधाऽप्येषा व्यावहारिकदृष्टितः ॥
वस्तुदृष्ट्या तु नैवास्ति दक्षिणा न प्रतिग्रहः ॥ ३५ ॥
अहं ममेत्यविद्याधीः सहेतुर्नाशिता यदा ॥
पूर्णात्मनि तदा दृष्टे कः कस्मै किं च दित्सति ॥ ३६ ॥
इति वार्त्तिकसारे चतुर्थाध्याये द्वितीयब्राह्मणंसमाप्तम् ॥२॥
वार्त्ति० तृतीयब्राह्मणं स्वप्नसुषुप्त्योरतिविस्तृतिः ॥
क्रियते तौ हि दृष्टान्तौ परलोकविमोक्षयोः ॥ १ ॥
देहादिव्यतिरिक्तत्वं स्वप्रभत्वमसङ्गता ॥
स्वप्नप्रसङ्गतस्त्वेतत्त्रयमत्र प्रपञ्च्यते ॥ २ ॥

आशिष एव दक्षिणार्थत्वेन, नमस्तेऽस्त्वित्यादिना नमस्क्रिया, राज्यदानं दासत्वेन स्वशरीरसमर्पणं च किमर्थमत आह *उत्तमेति ॥ ३४ ॥ ३५ ॥ इमे विदेहा इत्यादिना राजा गुरुदक्षिणां दातुमिच्छति, कथं नेत्युच्यत इत्याशङ्क्योक्तं प्रपञ्चयति *अहमिति । अतो व्यवहारदृष्टिमवष्टभ्य इमे विदेहा इत्यादि राज्ञो वचनमिति शेषः ॥ ३६ ॥

इति वार्त्तिकसारे टीकायां द्वितीयब्राह्मणं समाप्तम् ॥ २ ॥

कूर्चब्राह्मणे सङ्क्षेपेणोक्तयोः स्वप्नसुषुप्त्योर्विस्तारोऽनन्तरब्राह्मणेन क्रियत इति पूर्वेणास्य सङ्गतिमाह *तृतीयेति । ननु 'तृतीये परलोकस्य मोक्षस्यापि निदर्शने' इत्यत्रास्य ब्राह्मणस्य परलोकमोक्षदृष्टान्तवर्णनपरत्वमुक्तम्, इदानीमन्यदेवोच्यतेऽतः पूर्वापरविरोधस्तत्राह *तौ हीति । अवधारणार्थो निपातः ॥१॥

एवं प्राधान्येन प्रतिपाद्यमर्थमुक्त्वा प्रासङ्गिकार्थान्विभजते *देहेत्यादिना ॥ २ ॥ ३ ॥

अद्वैतत्वं दृष्टयलोप आनंदैकस्वभावता ॥
इदं त्रयं सुषुप्तस्य प्रसङ्गेनोपपाद्यते ॥ ३ ॥

श्रुतिः—जनकं ह वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इति, अथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते तस्मै ह याज्ञवल्क्यो वरं ददौ सह कामप्रश्नमेव वव्रे तꣳ हास्मै ददौ तꣳ ह सम्राडेव पूर्वं पप्रच्छ ॥ १ ॥

वार्त्ति० एतेन संवदिष्येऽहमित्यागच्छन्मुनिर्यतः ॥
अग्निहोत्रोक्तितस्तुष्टः कामप्रश्नं वरं ददौ ॥ ४ ॥
नाप्राक्षीत्तत्र राजाऽसौ वरे दत्तेऽपि तत्कुतः ॥

श्रुत्यर्थस्तु—जनकं वैदेहं याज्ञवल्क्यो जगाम स च गच्छन्नेवैवं संकल्पितवान्समेनेन वदिष्य इति । सम्—एनेनेति छेदः । एनेन अनेन राज्ञा संवदिष्ये संवादं करिष्य इति(१)।एवं सङ्कल्प्य राजानं गतवानित्यत्र हेतुं वक्तुमाख्यायिकामाह श्रुतिः-अथ ह पुरा किल यद्यस्माज्जनकश्च याज्ञवल्क्यश्चाग्निहोत्रे निमित्ते समूदाते संवादं कृतवंतौ । तत्र जनकस्याग्निहोत्रविषयं विज्ञानातिशयमुपलभ्य परितुष्टो मुनिस्तस्मै ह किल वरं ददौ । स च राज्ञा कामप्रश्नमेव वरं वव्रे तं च वरमस्मै मुनिर्ददौ तस्मात्संवदिष्य इति सङ्कल्प्य गतवानिति पूर्वेण सम्बन्धः ॥ १ ॥

इममेवार्थं संग्रहेण दर्शयति *एतेनेति ॥ ४ ॥ नन्वग्निहोत्रप्रकरणे कामप्रश्नवरो दत्तश्चेत्किमिति तत्रैव राज्ञाऽऽत्मयाथात्म्यं न पृष्टमिति शंकते *नेति ॥ तत्र अग्निहोत्रप्रकरणे । तद्—आत्मयाथा-

---

(१) चतुर्थश्लोकानुरोधात् 'समेनेन'इति समस्तः श्रुतेः पाठो वार्तिककृदभिप्रेत इति भाति। टीकाकर्तुरपि तथैव श्रुतिव्याख्यानात् ।

विद्याया निरपेक्षत्वात्कर्मभिश्च विरोधतः ॥ ५ ॥
स्वोत्पत्तावेव विद्येयं सर्वकर्माण्यपेक्षते ॥
प्रत्यगात्मतमोध्वस्तौ नासौ कर्माण्यपेक्षते ॥ ६ ॥
स्वरूपमात्रलाभेन यतोऽविद्यां निहन्त्यतः ॥
अभ्यासादिप्रयोगं च नैवाकाङ्क्षति दीपवत् ॥ ७ ॥
लब्धात्मकं यथा दात्रं प्रयुक्तं पुरुषेण सत् ॥
करोति लवनं तद्वन्न दीपस्तु प्रयुज्यते ॥ ८ ॥
विद्या लब्धात्मिकाऽविद्यां घ्नन्ति कर्माण्यशेषतः ॥
निहन्तीत्यतिविस्पष्टो विरोधः कर्मविद्ययोः ॥ ९ ॥
वरदानेन संवादमिच्छन्तं तमशङ्कया ॥
आदौ राजेष्टमप्राक्षीत्प्रत्यग्ज्योतिबुभुत्सया ॥ १० ॥

श्रुतिः—याज्ञवल्क्य किंज्योतिरेवायं पुरुष इत्यादित्यज्योतिः सम्राडिति होवाचादित्येनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ २ ॥

त्म्यम् । उत्तरमाह *विद्याया इति ॥ ५ ॥ ननु विद्यायाः कर्मानपेक्षत्वे सर्वापेक्षाधिकरणन्यायविरोधस्तत्राह *स्वोत्पत्ताविति ॥ ६ ॥ अन्यानपेक्षत्वे हेतुः *स्वरूपेति । ननु विद्याया अन्यानपेक्षत्वमसिद्धम्, अभ्याससापेक्षत्वादिति, नेत्याह* अभ्यासेति॥७॥ दृष्टान्तासिद्धिमाशंक्य दीपस्यान्यानपेक्षत्वं व्यतिरेकेण स्पष्टयति *लब्धेति ॥ ८ ॥ विद्याकर्मणोर्विरोधमाह *विद्येति ॥ ९ ॥ तं हेत्यादेस्तात्पर्यमाह *वरेति । *प्रत्यगिति । प्रत्यग्ज्योतिर्बलादेव देहस्य कर्म तत्फलं चेत्येवं सम्भाव्य राजा तत्त्वजिज्ञासया युक्त्यन्तरं संवादार्थं पृष्टवानित्यर्थः ॥ १० ॥ किंज्योतिरेवायं पुरु-

वा० देहेन्द्रियादिसङ्घातः पुमान्किंज्योतिरुच्यताम् ॥
उपवेशनगत्यादि न युक्तं ज्योतिषा विना ॥ ११ ॥
किं सङ्घातगतं ज्योतिः किं सङ्घातिरेकि तत् ॥
अतिरिक्तत्वमादत्त आदित्यादेरुदाहृतिः ॥ १२ ॥
पूर्वब्राह्मण एवास्य कृतमात्मानुशासनम् ॥
मननायोच्यते युक्तिरादित्यादिनिदर्शनात् ॥ १३ ॥
यथा सङ्घातिरिक्तेन रव्यादिज्योतिषा जनः ॥
करोत्यासनगत्यादि तथा स्वप्ने चिदात्मना ॥ १४ ॥
रव्यादिकं बहिर्ज्योतिश्चिदात्मज्योतिरान्तरम् ॥
सङ्घस्तु मध्ये निर्ज्योतिर्ज्योतिषोर्वर्तते द्वयोः ॥ १५ ॥

ष इत्यत्र पुरुषशब्दस्यार्थं वदन्वाक्यं योजयति *देहेति । कार्यकरणसंघातस्य पुंसो ज्योतिरपेक्षां दर्शयन्किंज्योतिःपदं व्याचष्टे *उपवेशनेति । ज्योतिषा विना व्यवहारायोगात्केन ज्योतिषाऽयं पुमान्व्यवहरतीत्यर्थः ॥११॥ आदित्यज्योतिरित्यादिप्रत्युक्तितात्पर्यमाह *अतिरिक्तत्वमिति ॥१२॥ पूर्वं बोधोत्पत्तेरुक्तत्वात्पुनरुपदेशवैयर्थ्यं शङ्कित्वा परिहरति *पूर्वेति । उत्पन्नस्य ज्ञानस्यासम्भावनादिनिवृत्तिद्वारा दार्ढ्यार्थं पुनरुपदेश इति भावः । तदुक्तं भाष्यकारैः "अभयं वै जनकेत्याद्यागमोक्तदार्ढ्याय तर्कतः प्रपञ्चः कृतः" इति ॥ १३ ॥ आदित्यादिनिदर्शनेन वा कथं संघातातिरिक्तात्मनिश्चयस्तत्राह *यथेति ॥ १४ ॥ ननु रव्यादिज्योतिषैव सर्वव्यवहारादलमात्मज्योतिषा तत्राह *रवीति । बाह्यज्योतिषामुपरमेऽपि स्वप्नव्यवहारदृष्टेः, संघातस्य च जडत्वाद्बाह्याभ्यंतरज्योतिर्द्वयं विनाऽवस्थाद्वयव्यवहारो न घटत इति भावः ॥ १५ ॥ स्वप्नव्यवहारान्यथानुपपत्त्यैवात्मज्योतिःसि-

रवेः सङ्घातिरिक्तत्वं प्रसिद्धत्वान्निदर्शनम् ॥
अतोऽनुवादो रव्यादेर्न त्वत्र प्रतिपाद्यता ॥ १६ ॥

श्रुतिः—अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ३ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ४ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ५ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शांतेऽग्नौ शांतायां वाचि किंज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति ॥ ६ ॥

द्वौ किं रव्यादिनिदर्शनप्रदर्शनेनेत्यात्मनो ज्योतिष्ट्वेऽपि तस्य देहातिरिक्तत्वस्यास्फुटत्वात्तत्साधनाय रव्यादिदृष्टान्तकथनमित्याह *रवेरिति । प्रसिद्धमिति शेषः । निदर्शनं, रव्यादीति शेषः । कथं तस्य प्रसिद्धस्य प्रतिपादनं क्रियते तत्राह

आस्ते पर्येति कुरुते वाणिज्यादीन् निवर्तते ॥
इत्यनेकोक्तितोऽत्यन्तज्योतिःसापेक्षतोच्यते ॥ १७ ॥
आदित्येनैव न त्वेतद्देहादिगततेजसा ॥
इत्येवकारो यो ज्योतिश्चन्द्रादेर्न निराकृतिः ॥ १८ ॥
व्याप्तेरव्यभिचाराय बहुचन्द्राद्युदाहृतिः ॥
रवीन्द्वग्नित्रयं तारामण्यादेरुपलक्षणम् ॥ १९ ॥

---

*अत इति ॥ १६ ॥

आदित्येनैवायमित्यादेरर्थमाह *आस्ते इति ।

आस्ते उपविशति । पल्ययते पर्येति गच्छति । गत्वा कर्म वाणिज्यादि कुरुते । विपल्येति विपर्येति निवर्त्तत इत्यर्थः ।

आसनाद्यनेकक्रियोक्तिः किमर्था तत्राह *इतीति ॥ १७ ॥ आदित्येनैवेत्यवधारणमनुपपन्नं चन्द्रादेरपि व्यवहारहेतुत्वादित्याशङ्क्यैवकारव्यावर्त्यमाह *आदित्येनेति ॥१८॥ एकेनैवोदाहरणेन विवक्षितसिद्धेः किं चन्द्राद्यनेकोदाहरणेन तत्राह *व्याप्तेरिति । मण्यादिज्योतिषामपि प्रवर्त्तकानां सत्त्वे किमित्यादित्यादित्रयमेवोच्यते तत्राह *रवीति ॥ १९ ॥ चतुर्थपर्याये वागेवास्य ज्योतिरित्यत्र वाक्ये दशेन्द्रियपरत्वं वारयति *शब्द इति ।

वाचो ज्योतिष्ट्वमसिद्धमित्याशङ्क्य श्रुतिरेव साधयति *तस्माद्वा इति । यस्माद्वाचो ज्योतिष्ट्वं तस्माद्यत्र निबिडान्धकारसमये स्वोऽपि पाणिर्विस्पष्टं न ज्ञायतेऽथ तस्मिन्काले यत्र वागुच्चरति श्वा वा भषति गर्दभो वा रौति, तत्र शब्दः उपैव न्येति शब्ददीपितश्रोत्रद्वारा मनसा सङ्गतो भवतीत्यर्थः । तेन बाह्यचेष्टां प्रतिपद्यते पुरुषोऽतो व्यवहारहेतुत्वाद्वाचोऽपि ज्योतिष्ट्वमुपपन्नमिति भावः ॥ ५ ॥

शब्दो वागिति संप्रोक्तः स गन्धाद्युपलक्षणम् ॥
गन्धादीनपि विज्ञाय प्रवृत्तिर्वस्तुनीक्ष्यते ॥ २० ॥
अस्त्येवास्तमिते सूर्ये ज्योतिरित्येवकारतः ॥
तदयोगं व्यवच्छिन्दन् किंज्योतिरिति पृष्टवान् ॥२१॥
अस्तित्वेऽपि न देहादिगतं तत्किन्तु चन्द्रमाः ॥
इत्यन्ययोगव्यावृत्तिश्चन्द्र एवेत्युदीरिता ॥ २२ ॥
रविसोमाग्निशब्दादिज्योतींष्युक्तानि जागरे ॥
निदर्शनतया ज्योतिस्तैः स्वप्नेऽप्यनुमीयताम् ॥ २३ ॥
स्वप्ने देहव्यवहृतिर्भिन्नज्योतिःपुरःसरा ॥
व्यवहारत्वतो जाग्रद्व्यवहारो यथा तथा ॥ २४ ॥

शब्दो ज्योतिरित्येतद्गन्धादेरुपलक्षणमित्याह *गन्धादीति । तत्र हेतुः *गन्धादीनिति ॥ २० ॥ ननु द्वितीयपर्याये प्रश्नवाक्ये किंज्योतिरेवेत्येवकारोऽनुपपन्नः व्यवच्छेद्याभावात्तत्राह *अस्त्येवेति । सूर्यास्तमयानन्तरमपि व्यवहारदृष्टेस्तत्साधनं किञ्चिज्ज्योतिरस्त्येवेति ज्योतिःसद्भावमात्रप्रदर्शनार्थम् एवकारो नान्यव्यवच्छेदार्थ इत्यर्थः ॥ २१ ॥ प्रश्नगतैवकारस्यायोगव्यवच्छेदार्थकथनेन प्रत्युक्तिगतस्यापि तदर्थत्वशङ्का स्यात्तच्चानुपपन्नं, ज्योतिःसद्भावमात्रस्य राज्ञैव निश्चितत्वादित्याशङ्क्य तस्य पूर्वपर्यायवदात्मज्योतिर्व्यवच्छेदार्थकत्वमाह *अस्तित्व इति ॥ २२ ॥ उपसंहरति *रवीति । निदर्शनतयोक्तानीति सम्बन्धः । स्वप्नपदं सुप्तेरप्युपलक्षणम् । तैः निदर्शनैः ॥ २३ ॥ अनुमानप्रयोगमाह *स्वप्नेत्यादिना ॥ २४ ॥ अनेनानुमानेनात्मज्योतिषः सुषुप्तव्यवहारहेतुत्वे सिद्धे पुनः प्रश्नानु-

सुप्तौ च पुनरुत्थानव्यवहारस्य कारणम् ॥
अस्ति ज्योतिरिति ज्ञात्वा तद्विशेषं स पृष्टवान् ॥२५॥
स्वप्रकाशस्वरूपत्वात्तद्विशेषो ह्यतिस्फुटः ॥
तथाऽप्यविद्यया छन्नः सोऽस्पष्ट इव वर्त्तते ॥ २६ ॥
यत्प्रसादादविद्यादि सिध्यतीव दिवानिशम् ॥
तमप्यपह्नुतेऽविद्या नाज्ञानस्यास्ति दुष्करम् ॥२७॥
योऽविद्यात्माभिसम्बन्धः कल्पितोऽसौ न वास्तवः ॥
अतो ऽविद्यावृतत्वेऽपि न लोपोऽस्य मनागपि ॥२८॥
निःसङ्गस्य ससङ्गेन कूटस्थस्य विकारिणा ॥
आत्मनोऽनात्मना योगो वास्तवो नोपपद्यते ॥ २९ ॥
स्वतो बुद्धं स्वतः शुद्धं स्वतो मुक्तं निरात्मिका ॥
अविचारितसंसिद्धिरविद्या लिङ्गते कथम् ॥ ३० ॥
एतादृश्या अविद्याया विचारेण निवृत्तये ॥
आत्मैव ज्योतिरस्येति प्राह स्वप्नादिभासकम् ॥३१॥

पपत्तिरत आह *तद्विशेषमिति । अनुमानस्य विशिष्टविषयतया निष्कृष्टविशेषबुभुत्सया प्रश्नोपपत्तिरिति भावः ॥ २५ ॥ आत्मनः स्वप्रकाशत्वेन स्वतःस्फुरणान्न तस्मिन् प्रश्नो युक्त इति शङ्कित्वा परिहरति *स्वेति ॥ २६ ॥ नन्वविद्याया आच्छादकत्वमनुपपन्नम्, तस्या एव स्वसाधके प्रतीच्यसिद्धेरित्याशङ्क्याह *यदिति ॥ २७ ॥ तस्य दुष्करं नास्ति चेत्प्रतीचि स्वसंबन्धमपि वास्तवं प्रापयेत्तत्राह *य इति ॥२८॥ अविद्यात्मनोर्वास्तवसंबन्धे पूर्वोक्तां युक्तिं स्मारयति *निःसंगस्येति द्वाभ्याम्। विचित्रभ्रांतिजननसमर्थाऽप्यविद्या न वास्तवसंबन्धहेतुरिति भावः ॥२९॥३०॥ आत्मज्योतिषि प्रश्नमुक्त्वा प्रत्युक्तिमादत्ते *एतादृश्या इति॥३१॥

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा). ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं सम्पूर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीतिप्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्तः) ... २

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... ३

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित–योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृत ब्रह्मामृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः । २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविट्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्णं श्रीसुबोधिनीटिप्पण्योः–प्रकाशः गोस्वामि श्रीश्रीपुरुषोत्तमजीमहाराज विरचित ३

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्मकृता अध्यात्मसुधातरङ्गिण्याख्यटीकयासहिता २

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमाविरचितः । स्वकृतटीकाविभूषितश्च । २

(४६) याज्ञवल्कस्मृतिः। बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता। ४

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणिता। रामकृष्णविरचितयुक्तिस्नेहप्रपुरण्याख्यव्याख्यया सहिता तर्कपादः । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय–श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य–बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाह्वटीकाद्वयसंवलिता। ११

(४७) व्याकरणसिद्धान्तसुधानिधीः। पर्वतीय विश्वेश्वरसूरिविरचितः। ८

(४८) विरमित्रोदयः। लक्षणप्रकाशः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः। ७

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः। महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकयासमलंकृतः। ८

(५०) विरमित्रोदयः। राजनीतिप्रकाशः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः। ५

(५१) पूर्वमीमांसा अधिकरणकौमुदी। श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यविरचिता परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत १

(५२) प्रसस्तपादभाष्यटीकासंग्रहः । तत्र कणादरहस्यम्। श्रीशंकरमिश्रविरचितम् २

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेत ३

(५४) वीरमित्रोदयः । तीर्थप्रकाशः। महामहोपाध्याय श्रीमित्रमिश्रविरचितः। ६

(५५) सांख्यसंग्रहः। तत्र सांख्यतत्त्वविवेचनम् श्रीषिमानन्द (क्षेमेन्द्र) विरचितम् । सांख्यतत्त्वयाथार्थ्यदीपनम् भावागणेशविरचितम्। समाससूत्रव्याख्या सर्वोपकारिणी च। १

(५६) न्यायपरिशुद्धिः। श्रीमद्वेङ्कटनाथ श्रीवेदान्ताचार्यप्रसादिता। श्रीनिवासाचार्यविरचित न्यायसारसमाख्यया टीकयायुता।२

पत्रादिप्रेषणस्थानम्। } **जयकृष्णदास गुप्तः, सेक्रेटरी, चौखम्बा संस्कृत सिरीज आफिस, बनारस सिटी।**

July *1920.*

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 271.

बृहदारण्यकवार्तिकसार ।

श्रीमद्विद्यारण्यस्वामिविरचितः ।

महेश्वरतीर्थकृतया लघुसङ्ग्रहाख्यया

टीकाया समलङ्कृतः ।

पर्वतीयश्रीमन्नित्यानन्दपण्डितप्रदर्शितरीत्या

वझे इत्युपनामकेन भाऊशास्त्रिणा

संशोधितः ।

BRIHADARANYAKAVARTIKASARA

BY VIDYARANYA SWAMI,

WITH A COMMENTARY CALLED LAGHUSANGRAHA BY

MAHESHWAR TIRTH.

EDITED BY

BHAU SHASTRI VAJHE.

FASCICULUS IX–१.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT SERIES OFFICE, BENARES.

PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY:

AGENTS: OTTO HARRASSOWITZ, LEIPZIG:

PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press, Benares.

1919

Price Rupee one.

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—२७१

भास्यं स्वप्नसुषुप्त्यादि यस्मिन्भाने प्रकल्पितम् ॥
तद्भानं तत्स्वरूपत्वादात्मशब्देन भण्यते ॥ ३२ ॥
आत्माविद्यां तदुत्थं वा पराग्धीरवगाहते ॥
प्रत्यग्बुद्ध्यवगाह्योऽत आत्माऽहं भामि केवलः ॥ ३३ ॥
आत्मैवेत्येवकारेण स्वप्नदृश्येष्वनात्मसु ॥
ज्योतिष्ट्वशङ्का व्यावर्त्या वासनामयवस्तुषु ॥ ३४ ॥
अस्येति वासनाऽऽरोपो दृश्यो देहादिरुच्यते ॥
भास्यभासकसम्बन्धः षष्ठ्योक्तो वासनाऽऽत्मनोः ३५॥
ज्योतिष्ट्वं भासकत्वं स्याच्चिदाभासमुखेन तत् ॥
उपपन्नमसङ्गस्य भान्वादिवदनुग्रहात् ॥ ३६ ॥

आत्मशब्दार्थमाह* भास्येति । अवस्थात्रयकल्पनाधिष्ठानं तद्भासकं स्वप्रकाशरूपमात्मशब्देनेह विवक्षितमित्यर्थः ॥ ३२ ॥ तस्य स्वप्रकाशत्वं साधयति* आत्माविद्यामिति । अनात्मत्वं दृश्यत्वव्यापकम् आत्मनः सकाशाद् व्यावर्त्तमानं स्वव्याप्यं दृश्यत्वमपि व्यावर्त्तयतीत्याशयः । प्रत्यग्बुद्ध्याऽवगाह्यः प्रत्यक्चैतन्यात्मना भासमान इति यावत् । उक्तमात्मनः स्वप्रकाशत्वमुपसंहरन्स्वानुभवं प्रकटयति *अत इति ॥ ३३ ॥ आत्मैवास्य ज्योतिरित्यत्रात्मशब्दार्थमुक्त्वाऽवशिष्टपदानि क्रमेण व्याचष्टे *आत्मैवेत्यादिना ॥ वासनामयेषु स्वप्नगजादिष्वपि स्वसत्तायां प्रकाशाव्यभिचारात्स्वप्रकाशत्वशंका स्यात्, सा निवर्त्त्यत एवकारेणेत्यर्थः । ज्योतिःशब्देन भासकत्वोक्तिरयुक्ता, रूपादिमतो विषयसम्बन्धस्यैव भान्वादेर्भासकत्वदृष्टेः, आत्मनस्तद्विलक्षणत्वेन तदयोगादिति तत्राह *उपपन्नमिति । असङ्गस्यापीति शेषः ॥ ३४ ॥ ३५ ॥ ३६ ॥ उक्तमेव व्यनक्ति* भान्वादय इति ।

भान्वादयः प्रभाद्वारा चक्षुराद्यनुगृह्णते ॥
तथैवात्माऽनुगृह्णीते चिदाभासेन शेमुषीम् ॥ ३७ ॥
अविद्यान्वयवद्बुद्धेश्चिदाभासान्वयः सदा ॥
अस्ति तद्व्यतिरेकेण बुद्धेः परिणतिर्वृथा ॥ ३८ ॥
चिदाभासविहीनस्य क्षीरस्य परिणामतः ॥
न किञ्चिद्भासते वस्तु साभासा धीस्ततः सदा ॥३९॥
साभासपरिणामेन दुःखयस्मीत्यपि धीर्भवेत् ॥
तथा साभासमज्ञानं न वेद्मीत्यनुभूयते ॥ ४० ॥
अन्यथाऽऽत्मनि कौटस्थ्याद् बुद्धौ चैतन्यवर्जनात् ॥
सर्वोऽपि व्यवहारः स्यादन्धकारप्रनृत्यवत् ॥ ४१ ॥
चिदाभासानुग्रहोऽत्र ज्योतिष्ट्वं भानुवन्मतम् ॥
नतु रव्यादिवच्चक्षुर्ग्राह्यभास्वररूपता ॥ ४२ ॥

शेमुषीं बुद्धिम् । तथाचानुग्राहकत्वसामान्यादात्मनोऽपि ज्योतिष्ट्वं युक्तमिति भावः ॥ ३७ ॥ आत्मन उक्तानुग्राहकत्वसिध्यर्थं बुद्धौ चिदाभासानुवृत्तिं दृष्टांतेन साधयति* अविद्येत्यादिना । अविद्यायामाभासानुवृत्तिर्व्यवधायकाभावात्सिध्यति । तथाऽऽभासरहितद्रव्यपरिणामस्य भासकत्वादृष्टेर्विषयप्रकाशनार्थं बुद्ध्यादौ साभासायां चिदाभासाव्यभिचारो वक्तव्य इत्यर्थः ॥ ३८ ॥ ३९ ॥ माऽस्तु तर्हि विषयभासकत्वमित्याशङ्क्यानुभवविरोधात् मैवमित्याह *साभासेति ॥ ४० ॥ ननु बुद्ध्यादावाभासव्याप्त्यभावेऽपि केवलबुद्धिवृत्त्याऽऽत्मचैतन्येन वा उक्तानुभवः स्यादित्याह *अन्यथेति ॥ ४१ ॥ ज्योतिःशब्दार्थमुपसंहरति* चिदाभासेति ॥ ४२ ॥ आत्मनो ज्योतिष्ट्वे चक्षुर्ग्राह्यत्वमपि स्यात् । विमतं चक्षुर्ग्राह्यं ज्योतिष्ट्वाद् आदित्यादिवदित्याशङ्क्य मेयत्वोपाधिना दूषयति

आदित्यादिरनात्मार्थः सिध्यत्यक्षादिमानतः ॥
मात्रादिसिद्धिदस्यास्य स्वतःसिद्धेन मेयता ॥ ४३ ॥
नाप्रमेयत्वमात्रेण शशशृङ्गादितुल्यता ॥
अनन्यानुभवेनास्य विशदं स्फुरणं यतः ॥ ४४ ॥
स्यात्स्वप्नव्यवहारोऽयमात्मना ज्योतिषा दृशा ॥
देहादिव्यतिरिक्तत्वमेवं सिद्धं चिदात्मनः ॥ ४५ ॥
अत्र लोकायतो वक्ति देहाभिन्नत्वमात्मनः ॥
अहं मनुष्य इत्येवं प्रत्यक्षेण तथेक्षणात् ॥ ४६ ॥
चैतन्यं क्षितितोयाग्निमरुद्योगेन जायते ॥
सर्पादेरिव कार्ष्ण्यादिर्देहधर्मस्तताश्रितिः ॥ ४७ ॥
चैतन्यं देहधर्मश्चेन्मृतावविकलस्य तत् ॥
कस्मान्नेति न मन्तव्यं वायुना विकलत्वतः ॥ ४८ ॥
यः स्वप्नदेहमद्राक्षं सोऽहं पश्याम्यदो वपुः ॥

आदित्यादिरिति। उपाधेः साधनव्यापकत्वमाह मात्रादीति। मात्रादिसिद्धिहेतुत्वेन पूर्वसिद्धस्यात्मनो न मानाधीनसिद्धिकतेत्यर्थः ॥ ४३ ॥ आत्मनोऽप्रमेयत्वे शशशृङ्गवदसत्त्वापत्तिरिति नेत्याह *नेति ॥ ४४ ॥ आत्मैवास्यादिवाक्यार्थमुपसंहरन्फलितमाह* स्यादिति ॥ ४५ ॥ श्रुत्युक्तमात्मनो देहातिरिक्तत्वमुपपत्त्याऽपि दृढीकर्तुं पूर्वपक्षमाह *अत्र लोकायत इत्यादिना ॥ ४६ ॥ चैतन्यवत एवात्मत्वाद्देहस्य च तदभावात्कथमात्मत्वं तत्राह *चैतन्यमिति। भूतचतुष्टयसङ्घस्यैव देहत्वात्ततो जायमाना चितिर्देहधर्म एवेति तस्यैवात्मतेत्यर्थः ॥ ४७ ॥ कृष्णसर्पवच्चैतन्यदेहयोर्धर्मधर्मित्वेऽतिप्रसङ्गं शङ्कते* चैतन्यमिति। मृतिकाले वायोरभावादविकलत्वमसिद्धमिति परिहरति *नेति ॥ ४८ ॥ आ-

इत्येषा प्रत्यभिज्ञाऽन्यमात्मानं गमयेद्यदि ॥ ४९ ॥
तन्न, स्वप्ने यतोऽभिज्ञा भ्रांता न प्रमितिस्ततः ॥
दूरापेता प्रत्यभिज्ञा नात्माऽतो भिद्यते तनोः ॥ ५०
आत्मज्योतिः श्रुतौ यत्तु वर्णितं तच्च भौतिकम् ॥
देहाद्यनुग्राहकत्वादादित्यादिप्रकाशवत् ॥ ५१ ॥
चाक्षुषत्वप्रसङ्गोऽस्य नान्तःस्थातीन्द्रियत्वतः ॥
अन्तःस्थातीन्द्रियं यत्तच्चक्षुरादि न चाक्षुषम् ॥ ५२
तस्मात्प्रत्यक्षमानेन देहे चिद्धर्मकेऽञ्जसा ॥
गृह्यमाणे ततो भिन्नमात्मज्योतिर्न कल्प्यताम् ॥ ५३
अत्रोच्यते सर्वतीर्थदृशां स्वेष्टस्य वस्तुनः ॥
सिद्धिर्यदभ्युपगमात्तत्सिद्धिर्वार्यते कुतः ॥ ५४ ॥
अहं मनुष्य इत्यस्य प्रत्यक्षस्य न मानता ॥

त्मनो देहान्यत्वे मानं शङ्कित्वा परिहरति* य इत्यादिना । *सोऽहमिति । जागरण इति शेषः ॥ ४९ ॥ *दूरेति॥ अभिज्ञाविषयविषयत्वात्प्रत्यभिज्ञायाः स्वप्नेऽभिज्ञाविषयस्य सर्वस्य बाधितत्वेन मृषात्वाच्चेत्यर्थः ॥ ५० ॥ रव्यादिनिदर्शनेन देहातिरिक्तज्योतिषः श्रुत्या साधितत्वात्कथं तस्य देहधर्मत्वमित्याशङ्क्य तस्य भौतिकत्वेन भूतचतुष्टयात्मकदेहधर्मत्वं साधयति *आत्मेति । अनुग्राहकत्वं व्यञ्जकत्वम् । विमतं भौतिकं देहादिव्यञ्जकत्वाद् रव्यादिप्रकाशवदित्यर्थः ॥ ५१ ॥ भौतिकत्वे चक्षुर्ग्राह्यत्वमपि स्यादिति तत्राह *चाक्षुषत्वेति ॥ ५२ ॥ पूर्वपक्षमुपसंहरति* तस्मादिति ॥ ५३ ॥ सर्वैर्वादिभिः स्वाभिलषितं किञ्चिदिच्छद्भिः स्वप्रकाशो निर्विकारश्चिद्धातुरभ्युपगन्तव्य इति सिद्धान्तयति* अत्रेति ॥ ५४ ॥ यदुक्तं देहस्यात्मत्वेऽध्यक्षमेव मानमिति तद्दूषयति *अह-

अज्ञातज्ञापकत्वाख्यमानलक्षणवर्जनात् ॥ ५५ ॥
देहात्मत्वमविज्ञातं तद्बोधाच्चेत्प्रमाणता ॥
तदविज्ञातता केन सिध्यतीति निरूप्यताम् ॥ ५६ ॥
जडत्वान्न स्वतःसिद्धिर्नापि मानाद्विरोधतः ॥
निहन्त्यज्ञाततां मानं ज्ञातताजनकत्वतः ॥ ५७ ॥
मानादज्ञातता चेत्स्यात्तन्निवृत्तिः कुतो भवेत् ॥
न दाहज्वरनुत्त्यर्थमग्निना स्याद्भिषक्क्रिया ॥ ५८ ॥
मा भूदज्ञाततासिद्धिरिति चेत्कस्य मेयता ॥
प्रमितभ्रान्तशून्यानां युज्यते न प्रमेयता ॥ ५९ ॥
अज्ञातोऽर्थः प्रमेयोऽतो वक्तव्यं तस्य साधकम् ॥
स्वप्रकाशात्मनोऽन्यः को यथोक्तां धुरमुद्वहेत् ॥ ६० ॥
प्रत्यक्षमेकं मानं चेत्सा प्रत्यक्षस्य मानता ॥

मिति ॥ ५५ ॥ मानलक्षणाभावो ऽसिद्ध इति शंकते* देहेति ॥ देहात्मताया अज्ञातत्वे तस्य केनचित्सिद्धिरभ्युपेयते न वा ? आद्ये नित्योऽनुभवोऽङ्गीकर्त्तव्यः, तं विनाऽज्ञातत्वासिद्धिरित्यभिप्रेत्याह *तदिति ॥ ५६ ॥ विरोधमेव व्यनक्ति *निहन्तीति ॥ ५७ ॥ अज्ञातत्वस्य प्रामाणिकत्वे दोषान्तरमाह *मानादिति ॥ ५८ ॥ अज्ञातत्वसाधकमेव मानं तन्निवर्त्तकमपि स्यादिति, नेत्याह *माभूदिति । *प्रमितेति । प्रमाविषयस्यैव मेयत्वात्प्रमितिगोचरधियः स्मृतिवदप्रमात्वान्न प्रमितादेर्मेयत्वमित्यर्थः ॥५९॥ तेषाममेयत्वे फलितमाह *अज्ञात इति । अस्तु; ततः किं ? तत्राह *वक्तव्यमिति । अथापि कथं तत्रेष्टसिद्धिस्तत्राह *स्वेति । अज्ञातताया अनादित्वेन नित्यानुभवं विना तदसिद्धेरुक्तत्वादित्यर्थः ॥ ६० ॥ एवमज्ञातेऽर्थे प्रत्यक्षप्रामाण्यम्, अज्ञानत्वं नित्यनुभवायत्तं यस्मादतः तत्प्रामाण्यमिच्छता त्वयाऽपि

यस्य प्रसादतः सिद्धा स आत्मेत्यभ्युपेयताम् ॥६१॥
प्रमाणं मेयविषयं तत्फलं मातृसंश्रयम् ॥
इति यत्साक्षिकं सिध्येत्स आत्मेत्यभ्युपेयताम् ॥६२॥
शब्दादींस्तदभावं च संशयानृतनिश्चयात् ॥
विविच्य योऽनुगृह्णाति स आत्मेत्यभ्युपेयताम् ॥६३॥
देहेन्द्रियमनोबुद्धिसुखादीन्यो घटादिवत् ॥
वेत्त्येनमन्तरात्मानं स्वप्रकाशं विनिश्चिनु ॥ ६४ ॥
द्रष्टृदर्शनदृश्यानि यः स्वप्ने प्रसमीक्षते ॥
तदभावं सुषुप्ते च स आत्मेत्यभ्युपेयताम् ॥ ६५ ॥
सर्वेषां वादिनां स्वस्वमतमेतत्प्रसादतः ॥
सिध्यतीति विवादोऽस्मिन्कर्तुं शक्यो न केनचित्॥६६॥
सत्येवं यत्तु चैतन्यं देहधर्मतयोदितम् ॥
चिदाभासः स विज्ञेय आस्तामेव यथा तथा ॥ ६७॥

कूटस्थो नित्यानुभवोऽभ्युपेय इत्याह *प्रत्यक्षमिति ॥ ६१ ॥ तत्रैव हेत्वन्तरमाह *प्रमाणमिति । मानस्य मेयगोचरत्वं मानफलस्य मातृनिष्ठत्वं च साक्षिमात्राधीनसिद्धिकं, मानादिगोचरमानाभ्युपगमेऽनवस्थापातादिति भावः ॥ ६२ ॥ किंच जाग्रदादिष्वसंकीर्णव्यवहारहेतुत्वेनापि नित्यानुभवोऽङ्गीकर्त्तव्य इत्याह *शब्दादीत्यादिना ॥ ६३ ॥ ६४ ॥ ६५ ॥ नित्यानुभवसाधनमुपसंहरति* सर्वेषामिति ॥ ६६ ॥ एवं कूटस्थचैतन्ये सिद्धे चैतन्यं देहधर्म इति परभ्रान्तिरपि चिदाभासविषयत्वेन सालम्बना भवतीत्याह *सत्येवमिति ॥ ननु तस्यापि देहधर्मत्वमसिद्धं, तत्राह *आस्तामिति । तस्य तद्धर्मत्वेऽपि देहेनान्योऽन्यतादात्म्याध्यासात्तद्धर्मत्वभ्रमः सम्भवतीति भावः ॥ ६७ ॥ यदुक्तं भूत-

भूतेभ्यश्च चिदुत्पत्तिं न प्रत्यक्षप्रमाणिका ॥
स्वप्ने ऽभिज्ञाऽपि न भ्रांता ज्ञेयवद्बाधवर्जनात् ॥ ६८ ॥
स्वप्नदृष्टगजादीनां बाधो जागरणे यथा ॥
तद्दर्शनं तथा ऽबाध्यं प्रत्यभिज्ञा ततः प्रमा ॥ ६९ ॥
आदित्यादिसमत्वेन नच प्रत्यक्षमानिनः ॥
ज्योतिः साधयितुं युक्तमनुमानाद्विषस्तव ॥ ७० ॥
अन्तःस्थातीन्द्रियं तेऽस्ति न प्रत्यक्षैकमानिनः ॥
अतश्चाक्षुषतापत्तिरात्मज्योतिषि भौतिके ॥ ७१ ॥
ग्राहकग्रहणग्राह्यभावाभावविभागवत् ॥
स्वार्थमन्यानपेक्षं सच्चैतन्यं नाक्षमानकम् ॥ ७२ ॥

विकारश्चैतन्यमिति तन्न, त्वदभिमतप्रमाणस्य तदसाधकत्वादित्याह *भूतेभ्य इति ॥ यत्रोक्तं स्वप्नधीविषयस्य सर्वस्य मृषात्वात्तद्विषयप्रत्यभिज्ञाऽपि भ्रांतिरिति तद्दूषयति *स्वप्न इति ॥६८ ॥ उक्तमेव व्यनक्ति *स्वप्नदृष्टेति ॥ स्वप्ने विषयस्य चिदचिदात्मकत्वाद्बोधेन जडांशस्य बाधितत्वेऽपि चिदंशस्य साक्षिणो बाधाभावात्साक्षिविषयप्रत्यभिज्ञाऽपि प्रमैवेत्यर्थः ॥ ६९ ॥ यत्त्वप्युक्तमात्मज्योतिर्भौक्तिकं व्यञ्जकत्वाद्दीपप्रकाशवदिति तत्राह *आदित्येति । प्रत्यक्षमेव मानमस्येति प्रत्यक्षमानी लोकायतिकः । तस्यानुमानद्विषतो मते आदित्यादितुल्यमात्मज्योतिरिति साधयितुमशक्यम् अनुमानानुत्थानादित्यर्थः ॥ ७० ॥ यच्चोक्तमात्मज्योतिषो भौतिकत्वेऽपि न चाक्षुषत्वापत्तिः, चक्षुराद्यतीन्द्रियेषु व्यभिचारादिति तत्राह *अन्तःस्थेति ॥ ७१ ॥ अस्तु तर्हि चाक्षुषत्वमपीत्याशङ्क्यानुभवविरोधान्नैवमित्याह *ग्राहकेति ॥ मात्रादित्रयभावाभावसाक्षिणः स्वप्रकाशकेवलचैतन्यस्याक्षगम्यत्वादृष्टेरिति भावः ॥ ७२ ॥ देहात्मत्वादिनिराक-

अतोऽक्षगम्यदेहस्य न चैतन्यात्मतोचिता ॥
नाप्यात्मत्वे चक्षुरादेः प्रत्यभिज्ञोपपद्यते ॥ ७३ ॥
यमद्राक्षं पुरा कुम्भं तत्त्वचाऽद्य स्पृशाम्यहम् ॥
इत्येतत्प्रभिज्ञाने न भिन्नद्रष्टृकं भवेत् ॥ ७४ ॥
प्रत्यभिज्ञानकृत्तर्हि मन आत्मेति चेन्मतम् ॥
नैव, तस्यापि मनसो विषयत्वेन दर्शनात् ॥ ७५ ॥
शब्दादिस्वचितं साक्षात्स्मृतिस्वप्नगतं मनः ॥
कुम्भवद्वीक्ष्यते यस्मान्नात आत्मा मनोऽपि नः ॥ ७६ ॥
देहादिव्यतिरिक्तोऽतः प्रमात्रादिविलक्षणः ॥
आत्मैव ज्योतिरित्यत्र विस्पष्टं सुविचारितः ॥ ७७ ॥
आत्मैवास्येति देहादेः स्वरूपत्वेन चित्स्थिता ॥

रणमुपसंहरति *अत इति ॥ काणोऽहमित्याद्यनुभवादिन्द्रियाण्यात्मेति केचित, तन्मतं निरस्यति *नेति ॥ ७३ ॥ प्रत्यभिज्ञामभिनयति *यमिति ॥ इन्द्रियस्यात्मत्वे द्रष्टृभेदप्रसङ्गेनोक्तप्रत्यभिज्ञा न स्यादिति भावः ॥ ७४ ॥ अस्तु तर्हि मनस आत्मत्वम, उक्तदोषाभावादिति शङ्कते *प्रत्यभिज्ञेति । मनो नात्मा दृश्यत्वादिति दूषयति *नेति ॥ ७५ ॥ दृश्यत्वं स्फोरयति *शब्दादीति ॥ ७६ ॥ एवमुपपत्त्याऽऽत्मनो देहाद्यतिरिक्तत्वे सिद्धे आत्मैवास्येत्यादिवाक्यार्थः पूर्वोक्तो निरवद्य इत्युपसंहरति *देहेति ॥ ७७ ॥ कतम आत्मेति वाक्यमवतारयति *आत्मैवत्यादिना । आत्मैवास्य ज्योतिरित्युक्त्याऽस्य देहस्यात्मा स्वरूपं ज्योतिरिति ज्योतिषो देहस्वरूपत्वमुक्तं भवति । आत्मशब्दस्य स्वरूपवाचकत्वाद्धान्वादिनिदर्शनाच्च पुंव्यापारसाधनं ज्योतिः सङ्घाताद्भिन्नमित्युक्तम् । अत्र विरोधादात्मनि

चितो देहादिभेदोऽपि भान्वादिवदुदीरितः ॥ ७८ ॥

श्रुतिः-कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि ॥ ७ ॥

पूर्वोत्तरविरुद्धार्थं मत्वा पप्रच्छ भूपतिः ॥
बहवोऽर्थाः समीक्ष्यन्ते आत्माऽत्र कतमो वद ॥७९॥
पिण्डस्तावदिहैकार्थो द्वितीयो लिङ्गसंज्ञितः ॥
चिद्बिम्बतावधिश्चान्यश्चतुर्थो नेति नेति यः ॥ ८० ॥
देहादिभेदमाश्रित्य योऽयमित्युत्तरं जगौ ॥
अधिष्ठानारोप्यभाव आत्माऽस्येति विवक्षितः ॥८१॥
विचारदृष्ट्याऽधिष्ठानमेवात्माऽध्यस्तवस्तुनः ॥
तथापि जाड्यचैतन्यभेदोऽप्यस्ति हि लोकतः ॥८२॥
एवं सत्यविरोधः स्याद्भेदाभेदार्थवाक्ययोः ॥

सन्दिहानः सन् निर्दिधारयिषया पृच्छति राजेत्यर्थः ॥ ७८ ॥ अवतारितवाक्यं व्याचष्टे *बहव इत्यादिना । आत्मशब्दस्य लोकेऽनेकार्थत्वात्प्रकृते ज्योतिष्ट्वेन विवक्षित आत्मा कतम इत्यर्थः ॥ ७९ ॥ चिद्बिम्बतावधिरित्यन्तर्यामी साक्षी चोच्यते ॥ ८० ॥ प्रत्युक्तिमवतार्य व्याचष्टे *देहादीति ॥ देहाद्यतिरिक्तज्योतिष आत्मत्वे आत्मैवास्य ज्योतिरित्यत्र देहस्वरूपत्वं कथमुक्तं, तत्राह* अधिष्ठानेत्यादिना । कल्पितस्याधिष्ठानव्यतिरेकेण वस्तुतोऽभावाद्देहादिकल्पनाधिष्ठानं नित्यचैतन्यमेव सङ्घातस्य स्वरूपमिति तत्त्वदृष्ट्योक्तम्, लोकसिद्धव्यावहारिकभेदमाश्रित्यादित्यनिदर्शनेन तदेव देहादिभिन्नमिति न पूर्वोत्तरविरोध इति भावः ॥ ८१ ॥ ८२ ॥ विरोधनिराकरणमुपसंहरति *एवमिति । एवं

योऽयमित्युत्तरे शब्दद्वयमेवं विचार्यताम् ॥ ८३ ॥
यः पृष्टः स पराग्वृत्तिप्रमामेयातिलङ्घितः ॥
प्रत्यङ्मुखेन मानेन त्वयमित्युपदिश्यते ॥ ८४ ॥
पराश्चीति च मन्त्रोक्तिः साक्षादात्मेति च श्रुतिः ॥
पराङ्मानप्रमेयत्वमात्मनोऽपि न्यवारयत् ॥ ८५ ॥
कुम्भाकारेण कुम्भार्थो यथा प्रत्यक्ष ईक्ष्यते ॥
धीज्ञानेन तथा प्रत्यगात्माकारेण गृह्यते ॥ ८६ ॥
अयमित्यभिधायोग्यो लोके देहोऽपि वीक्ष्यते ॥
विज्ञानमय इत्युक्त्या स्थूलदेहो निवर्त्यते ॥ ८७ ॥
विज्ञायतेऽनेन सर्वमिति विज्ञानशब्दतः ॥
धीरुक्ता, तन्मयत्वं तु तत्प्राचुर्यं विवक्षितम् ॥ ८८ ॥
व्याचिख्युर्मयटं केचिद्विकारार्थे न तच्छुभम् ॥
अनिर्मोक्षो विकारत्वे प्रायार्थस्तूपपद्यते ॥ ८९ ॥

तात्पर्यमुक्त्वा योऽयमिति पदद्वयं व्याख्यातुमुपक्रमते* योऽयमिति ॥ ८३ ॥ विवेचनप्रकारमाह *य इति ॥ पराग्विषयिणी प्रमा पराग्वृत्तिप्रमा तस्या मेयत्वमतिलङ्घ्य स्थितो यः, यश्च वाक्योपदेशजन्यप्रत्यगाकारबुद्धिवृत्त्याऽयमिति गृह्यते सः, त्वया पृष्ट आत्मेत्यर्थः ॥ ८४ ॥ पराग्वृत्तिप्रमामेयातिलङ्घित इति यदुक्तं तत्साधयति *पराश्चीति ॥ ८५ ॥ प्रत्यङ्मुखेनेत्याद्युक्तमुपपादयति* कुम्भेति ॥ ८६ ॥ योऽयमिति पदयोरर्थमुक्त्वा पदान्तरमवतारयति *अयमिति ॥ अयमित्युक्ते तदभिधेययोग्यत्वेन देहस्यापि तदर्थत्वप्रसङ्गात्तन्निवृत्त्यर्थं विज्ञानमयविशेषणमित्यर्थः ॥ ८७ ॥ विज्ञानमय इत्यत्र विज्ञानपदार्थं वदन्मयटोऽपि विवक्षितार्थमाह *विज्ञायत इति ॥ ८८ विज्ञानं ब्रह्म तद्विकारो जीवो विज्ञानमय इति भर्तृप्रपञ्चः, तन्मतमनूद्य निराह *व्याचिख्युरिति ॥ ८९ ॥ उपपद्यत इत्युक्तं व्यनक्ति* बुद्धीति । अप्र-

बुद्धिविज्ञानसंपृक्तश्चन्द्रसंपृक्तराहुवत् ॥
प्रमीयते ततः प्रत्यग्विज्ञानमय उच्यते ॥ ९० ॥
द्रष्टृत्वाद्यभिसम्बन्धोऽकारकस्यापि सर्वदा ॥
धीविज्ञानकृतोऽतोऽपि विज्ञानमय उच्यते ॥ ९१ ॥
सर्वार्थकारणं बुद्धिर्द्वारमात्रं ततोऽपरम् ॥
इन्द्रियं तन्मयस्तस्माच्चिदाभासैकवर्त्मना ॥ ९२ ॥
प्राणा बुद्ध्यविनाभूता इति प्राणमयोऽप्यतः ॥
प्राणात्मवादः सम्प्राप्तः प्राणेष्विति निवार्यते ॥ ९३ ॥
दशेन्द्रियाणि मरुतः पञ्च च प्राणशब्दिताः ॥
प्राणेषु योऽर्थोऽनुगतः स आत्मेत्यवधार्यताम् ॥ ९४ ॥
धीरेवात्मेत्यपाकर्तुं हृदीति श्रुतिरभ्यधात् ॥

त्यक्षस्यापि राहोश्चन्द्रादिसम्बन्धाद्यथा प्रत्यक्षत्वम् एवं वस्तुतोऽसङ्गस्याप्यात्मनः काल्पनिकबुद्धिसम्बन्धादेव सविकल्पकप्रतीतिरिति तस्य तन्मयत्वमुपपन्नमित्यर्थः ॥ ९० ॥ तस्य तन्मयत्वे हेत्वन्तरमाह *द्रष्टृत्वादीति ॥ ९१ ॥ ननु आत्मा बुद्धिवच्चक्षुरादिनाऽपि संपृक्तो द्रष्टृत्वादि लभते, तथा च चक्षुरादि हित्वा किमित्यसौ विज्ञानेन विशेष्यते तत्राह *सर्वेति ॥ ९२ ॥ विज्ञानमयपदं व्याख्याय प्राणेष्वित्यस्य व्यावर्त्यमाह *प्राणा इति ॥ विज्ञानमय इत्यनेनैव प्राणमय इत्यप्युक्तं भवति, तदविनाभूतत्वादिन्द्रियाणाम् । तथा च तेषु पूर्वोक्तस्य मयडर्थस्यासम्भवात्तत्रार्थे मयडिति वक्तव्यमिति प्राणात्मवादप्रसक्तिरिति भावः ॥ ९३ ॥ प्राणेष्वित्यत्र प्राणशब्दप्रवृत्त्यर्थं व्याकुर्वन्नपेक्षितं पूरयति *दशेति ॥ ९४ ॥ विज्ञानात्मवादनिरासार्थं हृदीतिपदमित्याह* धीरिति । सप्तम्यर्थपदमपेक्षितं पूरयति *स्वार्थमिति ॥ स्वप्रकाशमित्यर्थः । यच्छब्दो व्यो-

स्वार्थं बुद्धौ यदाभाति स आत्मा बुद्धिनित्यदृक् ॥९५॥
हृदीत्याधारनिर्देशाद्धीस्थवृत्तिष्विहात्मता ॥
प्रसक्ता तन्निवृत्त्यर्थमन्तरित्युपदिश्यते ॥ ९६ ॥
परागर्थानुसारिण्यो यतो धीवृत्तयस्ततः ॥
प्रत्यक्त्ववाचकेनान्तःशब्देनैता निवर्तिताः ॥ ९७ ॥
जाड्यमात्मन इच्छन्ति कणभुङ्मतजीविनः ॥
तेषां विप्रतिषेधार्थं ज्योतिरित्यभिधीयते ॥ ९८ ॥
जडं बुद्ध्याद्युपादानं तमस्तस्यावभासकम् ॥
सकृद्विभातं चिन्मात्रं ज्योतिरात्मेति भण्यते ॥९९॥
अचेतनोऽपि बुद्ध्यादिश्चेतनावानिवेक्ष्यते ॥
यस्य सन्निधितस्तस्य चिज्ज्योतिष्ट्वमतिस्फुटम् ॥१००॥
आत्मच्छायं पयोऽशेषं यथा मरकतो मणिः ॥
परीक्षणाय प्रक्षिप्तः कुर्यादात्मा तथैव हि ॥ १०१ ॥

तिर्वचनः ॥ ९५ ॥ अन्तरिति विशेषणस्य फलमाह *हृदीति ॥ ९६ ॥ एवमपि कथं वृत्तीनामात्मत्वनिवृत्तिस्तत्राह *परागिति ॥ ९७ ॥ ज्योतिःशब्दव्यावर्त्यमाह* जाड्यमिति ॥ ९८ ॥ बुद्ध्यादेर्जडत्वात्तदुपादानस्यात्मनो जडत्वमेवोचितं न ज्योतिष्ट्वमित्याशङ्क्यात्मनो बुद्ध्याद्युपादानत्वमसिद्धमित्याह *जडमिति । कणभुगादेरात्मत्वेनाभिमतं बुद्ध्याद्युपादानं यज्जडं वस्तु तदज्ञानमेव न तस्य ज्योतिष्ट्वमुच्यत इति भावः । कस्य तर्ह्यात्मनो ज्योतिष्ट्वं तत्राह *तस्येति ॥ सकृद्विभातं स्वप्रकाशम् । उक्तज्योतिष एवात्मत्वे विद्वत्प्रसिद्धिं प्रमाणयति* भण्यत इति ॥ ९९ ॥ इतश्चात्मा चैतन्यज्योतिरित्याह* अचेतन इति ॥ १०० ॥ जडस्य चित्सन्निधानाच्चेतनवद्भानं संभवतीत्यत्र दृष्टान्तमाह *आत्मेति ॥ १०१ ॥ ननु देहादेः साक्षाच्चित्सम्बन्धाभावात्कथं चेतनवद्भानं

ज्योतिरात्मचितिच्छायं प्रथमं कुरुते तमः ॥
तमोयोगेन धीस्तद्धीयोगादिन्द्रियं तथा ॥ १०२ ॥
अक्षयोगात्तथा देह एवमेते चिदात्मवत् ॥
भासन्ते तेष्वतः पुंसां प्रत्यगात्मत्वविभ्रमः ॥ १०३ ॥
तमेव भान्तमात्मानमनुभात्यखिलं जगत् ॥
इति श्रुत्यन्तरे स्पष्टमुक्तं ज्योतिष्ट्वमात्मनः ॥ १०४ ॥
आत्मन्येवं प्रबुद्धेऽस्मिञ्ज्योतिषि ध्वान्तनाशतः ॥
सर्वस्यैवात्मयाथात्म्यादात्मा पुरुष उच्यते ॥ १०५ ॥
आत्माऽज्ञानसमुच्छित्तौ तज्जस्य नहि वस्तुनः ॥
प्रत्यग्रूपात्पृथग्रूपं सम्भाव्यं केन चित्कचित् ॥ १०६ ॥
पूर्णत्वात्पुरुषः सोऽयं ज्योतिरात्मेह भाष्यते ॥
पूर्णस्य लोकसंचारो बुद्ध्युपाधिस्वकारणात् ॥ १०७ ॥
यः पूर्णः स समानः सन्बुद्ध्या लोकावुभावपि ॥

तत्राह *ज्योतिरित्यादिना ॥१०२॥ चेतनवज्ज्ञानादेवा ज्ञानादिष्वात्मत्वभ्रमो वादिनां जायते इत्याह *तेष्विति ॥ १०३ ॥ आत्मनो ज्योतिष्ट्वे श्रुतिमप्याह *तमिति ॥ १०४ ॥ ज्योतिःशब्दं व्याख्याय पुरुषशब्दार्थमाह *आत्मनीति । एवम् उक्तश्रुतिन्यायाभ्यामिति यावत् । आत्मयाथात्म्याद्धेतोः, पूर्णत्वादिति शेषः ॥१०५॥ ज्ञानादज्ञानध्वंसेऽपि जगतोऽध्वस्तेर्न पूर्णत्वेन पुरुषत्वं । तत्राह *आत्मेति । सर्पाद्युपादाननाशे सर्पादिनाशदृष्टेरिति भावः ॥ १०६ ॥ पुरुषपदार्थं निगमयति* पूर्णत्वादिति ॥ आत्मनः पूर्णत्वे कथं संसार इत्याद्युत्तरवाक्यमादत्ते *पूर्णस्येति ॥ अविद्याकल्पितबुद्ध्याद्युपाधिकः संसार इत्यर्थः ॥१०७॥ तात्पर्यमुक्त्वाऽक्षराणि योजयति* य इति ॥ समानशब्दस्यापेक्षितं पूरयति *बु-

सम्प्राप्तप्रतिपत्त्यावनुसञ्चरति क्रमात् ॥ १०८ ॥
किं पुनः स्यात्समानत्वमात्मबुद्ध्योस्तदुच्यते ॥
विवेकानुपलम्भेन तादात्म्यं रज्जुसर्पवत् ॥ १०९ ॥
सम एव धिया लोकौ सञ्चरत्येष न स्वतः ॥
अतः संसारमिथ्यात्वं ध्यायतीवेति वर्ण्यते ॥ ११० ॥
ध्यायन्त्यां ध्यायतीवात्मा चलन्त्यां चलतीव च ॥
बुद्धिस्थे ध्यानचलने कल्प्येते बुद्धिसाक्षिणि ॥ १११ ॥
आलोके व्यञ्जके यद्वदभिव्यङ्ग्यघटाकृतिः ॥
आरोप्यते तथा बौद्धः संसारो बुद्धिसाक्षिणि ॥११२॥
स समान इति प्रोक्तं बुद्ध्यैक्यं वास्तवं ततः ॥
ध्यायत्येव चलत्येवेत्याहुः केचिदिदं त्वसत् ॥ ११३ ॥
बुद्ध्यभेदस्य नैव स्याद्धीस्थध्यानादिसाक्षिता ॥
निःसाक्षिकं तु ध्यानादिर्नरशृङ्गसमं भवेत् ॥ ११४ ॥
नौस्थो नावो गतिं क्वापि वीक्षते न तटस्थवत् ॥
तथैवं बुद्ध्यभिन्नस्य न स्याद्धीवृत्तिसाक्षिता ॥ ११५ ॥

ध्व्येति ॥ उभौ लोकावित्युक्तं व्यनक्ति *संप्राप्तेति ॥ १०८ ॥ आत्मधियोरतिविलक्षणत्वात्कथं सामान्यमित्याक्षिप्य समाधत्ते *किमिति । सधीः स्वप्नो भूत्वेति माध्यंदिनश्रुतौ बुद्ध्यात्मनोस्तादात्म्यं स्पष्टमुक्तमिति भावः ॥ १०९ ॥ उक्तमर्थं हेतु कुर्वन्नुत्तरवाक्यमवतारयति* सम इति ॥ ११० ॥ पदानि विभजते *ध्यायंत्यामिति ॥ लेलायतीत्यस्य व्याख्या चलतीति ॥ १११ ॥ उक्तमर्थं दृष्टांतेन स्पष्टयति* आलोक इति ॥ ११२ ॥ अस्य वाक्यस्य भर्तृप्रपञ्चोक्तमर्थमनूद्य दूषयति *स समान इत्यादिना ॥ ११३ ॥ ॥ ११४ ॥ बुद्धितादात्म्यापन्नस्यापि बुद्धिवृत्तिसाक्षित्वमाशङ्क्य दृष्टांतेन प्रत्याचष्टे* नौस्थ इति ॥ ११५ ॥ किञ्च यथा नौस्थस्ती-

नौगतिं च तरुस्थैर्यमविविच्य विमुह्यति ॥
स्थिता नौस्तरवो यांतीत्येवमत्रापि योऽयताम् ॥११६॥
धीविकारस्ततः कल्प्यो बुद्धिसाक्षिण्यशङ्किते ॥
साक्षिसाक्ष्यत्वमिथ्याधीस्तत्त्वज्ञानान्निवर्त्तते ॥११७॥
ध्यानादीनामवस्तुत्वे स हि स्वप्न इति श्रुतिः ॥
हेतुमाह स आत्माऽयं स्वप्नो भवति धीवशात् ॥११८॥
बुद्धेर्जागरणं यद्वज्जागर्मीत्यभिमन्यते ॥
बुद्धिस्वप्ने तथा स्वप्नरूपत्वमभिमन्यते ॥ ११९ ॥
जाग्रद्भोगमिमं लोकं स्वप्नो भूत्वा निवर्त्तते ॥
वासनाराशिसान्निध्यं स्वाप्नं भोगं तथाऽऽप्नुयात् १२०॥
अविद्याकामकर्माख्यमृत्यो रूपाण्यतीत्य सः ॥
जाग्रद्देहेंद्रियादीनि तिष्ठति ज्योतिरात्मना ॥ १२१ ॥

रज्जेषु तरुषु गतिं पश्यन्न नावि गतिं पश्यति एवं बुद्धिस्थस्यात्मनो न बुद्धिगतसंसारोपलब्धिः, अपि तु घटादिष्वेव तदुपलब्धिः स्यादित्याह *नौगतिमिति ॥ ११६ ॥ तस्माद्ध्यानादिर्बुद्धिधर्मो बुद्धिसाक्षिणि कल्पित एवेत्युपसंहरति *धीविकारइति ॥ अशंकिते निर्विकार इति यावत्। तस्य कल्पितत्वे फलितमाह *साक्षीति ॥११७॥ स हीत्याद्यवतार्य व्याचष्टे* ध्यानेति ॥ हि यस्मादात्मा बुद्ध्यैक्याध्यासेन स्वप्नो भवति तस्मान्न तस्य वस्तुतो ध्यानादिरित्यर्थः ॥ ११८ ॥ कथमात्मनः स्वप्नत्वमित्याशङ्क्य दृष्टांतेनाह *बुद्धेरिति ॥ आत्मा स्वाविद्यया यां यामवस्थामभिमन्यते तत्तन्नामा भवतीति भावः ॥ ११९ ॥ इमं लोकमित्यादि व्याचष्टे* जाग्रादिति ॥ जाग्रद्भोगमतिक्रान्तस्य सुषुप्तवद्भोगाभावमाशङ्क्याह *वासनेति ॥१२०॥ मृत्यो रूपाणीत्येतद्व्याचष्टे* अविद्येति । अविद्यादिकं मृत्युस्तस्य रूपाणि देहादीन्यतिक्रामतीत्यनुषङ्गः ॥ १२१ ॥ प्रकृत-

तस्मात्स्वाभाविको नैव क्रियाध्यानादिलक्षणः ॥
लोकद्वयानुसंचारः किन्त्वौपाधिक इष्यताम् ॥ १२२ ॥
योऽयमित्यादिना बुद्धेर्व्यतिरिक्ततया श्रुतम् ॥
आत्मानं नानुमन्यन्ते बौद्धा बुद्ध्यात्मवादिनः ॥ १२३ ॥
धीरेव ग्राहकाकारा ग्राह्याकारा च भासते ॥
नातो धीव्यतिरेकेण कश्चित्साक्ष्युपलभ्यते ॥ १२४ ॥
घटतज्ज्ञानवद् बुद्धिसाक्षिणौ भास्यभासकौ ॥
भिन्नाविति न मन्तव्यं दृष्टान्तस्याप्रसिद्धितः ॥ १२५ ॥
अभिन्न एव बुद्ध्याऽऽत्मा विपर्यासितबुद्धिभिः ॥
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ १२६ ॥
विज्ञानवादिनो मा भूद् दृष्टान्तो बाह्यवादिनः ॥
अस्तीति चेत्तन्मतेऽपि न घटोऽन्येन गृह्यते ॥ १२७ ॥
क्षणभङ्गी घटोऽन्येन नैव संयोक्तुमर्हति ॥
अवभासात्मकः कुम्भस्तेन बाह्यार्थवादिनः ॥ १२८ ॥
एवं तर्हि विभेदः को बाह्यविज्ञानवादिनोः ॥

वाक्यार्थमुपसंहरति *तस्मादिति ॥ १२२ ॥ विज्ञानवादिनिराकरणेनाप्युक्तमर्थं दृढीकर्त्तुं तन्निराकरणाय प्रसङ्गं सम्पादयति* योऽयमिति ॥ १२३ ॥ तेषामाशयमाह *धीरिति ॥ १२४ ॥ यद् दृश्यं तत्स्वातिरिक्तद्रष्टृकं यथा घटः दृश्या चेयं धीरित्यनुमानमाशङ्क्य प्रत्याह* घटेति ॥ १२५ ॥ वस्तुतो ग्राह्यग्राहकभेदो नास्तीत्यत्र सम्मतिमाह *अभिन्न इति ॥ १२६ ॥ विज्ञानमात्रवादिमते ग्राह्यादिभेदाभावेऽपि सौत्रान्तिकमते भेदमाशङ्क्य तन्मतेऽपि भेदाभावस्तुल्य एवेत्याह *विज्ञानेति ॥ १२७ ॥ घटादेः स्वातिरिक्ताग्राह्यत्वमुपपादयति* क्षणेति ॥ १२८ ॥ *ज्ञानज्ञेयेति ॥ विज्ञानवादिमते ज्ञानमेव ग्राह्यग्राहकरूपेण भासते, बाह्यार्थवादिमते तु

ज्ञानज्ञेयपृथक्त्वेन तदैक्येन च तद्विदा ॥ १२९ ॥
बाह्यार्थोऽस्त्वथवा मा भूत्साक्षी तु न धियः पृथक् ॥
सर्वशून्यत्ववादे तु सुतरां नास्ति साक्ष्यसौ ॥१३०॥
अत्रोच्यते न कुम्भादेरवभासात्मतोचिता ॥
दीपस्येवावभासस्य पृथक्त्वं व्यञ्जकत्वतः ॥ १३१ ॥
न प्रदीपात्मकः कुम्भो नावभासात्मकस्तथा ॥
कुम्भावभासकं बुद्धिविज्ञानं दीपवत्पृथक् ॥ १३२ ॥
व्यंग्यव्यञ्जकता कुम्भदीपयोर्भासिता धिया ॥
यथा धीदीपसम्बन्धः साक्षिणाऽवेक्ष्यतां तथा॥१३३॥
ननु प्रकाशतमसोः क्रमात्कुम्भोऽनुगच्छति ॥

ग्राहकज्ञानाभेदेन नीलपीतादेर्ग्राह्यस्य सिद्धिस्तस्मिन्नेव ज्ञानेऽध्यासादिति भावः ॥१२९॥ साक्षिणि निराकरणमुपसंहरति *बाह्येति ॥ मुख्यवैनाशिकमते साक्षिणः प्रसर एव नास्तीत्याह *स-र्वेति ॥१३०॥ तत्र बाह्यार्थवादिमतं तावन्निराकरोति *अत्रेति ॥ भासकं भास्यभिन्नं व्यञ्जकत्वाद् दीपवदित्यनुमानविरोधान्न कुम्भादेरवभासात्मककल्पनमुचितमित्यर्थः ॥१३१॥ उक्तमेवार्थं स्पष्टयति *नेति ॥ यथा कुम्भो न दीपात्मकः एवं नावभासात्मकोऽपि, अतः कुम्भभासकदीपवत्तद्भासकं ज्ञानं कुम्भाद्भिन्नमेवेत्यर्थः ॥१३२॥ कुम्भधियोर्भेदेऽपि कथं त्वदभिमतसाक्षिसिद्धिस्तत्राह *व्यंग्येति ॥ कुम्भदीपयोर्भास्यभासकसम्बन्धो यथा बुद्धिवृत्त्या विना न सिध्यति एवं बुद्धिवृत्तिदीपसम्बन्धोऽप्यतिरिक्तसाक्षिणमन्तरा न सिध्यतीत्यर्थः ॥ १३३ ॥ धीदीपयोर्दीपकुम्भयोश्च भेदमंगीकृत्य धीसाक्षिणोर्भेदमाक्षिपति*नन्वित्यादिना ॥ भास्यभासकभेदस्तयोरन्यतरसत्त्वव्याप्तः, यथा दीपाभावेऽपि तमसि कुम्भावस्थानं, यथा वा दीपज्ञानोत्पत्तेः पूर्वमज्ञातत्वेन दीपस्थितिस्तद्वत् धीसाक्षिणोः

दीपोऽननुगतस्तेन भेदः कुम्भप्रदीपयोः ॥ १३४ ॥
ज्ञातताऽज्ञातते तद्वद्कुम्भे दीपो ऽनुगच्छति ॥
ज्ञातत्वमेव धीस्तेन भेदो धीदीपयोरपि ॥ १३५ ॥
धीसाक्षिणोर्विभेदे तु नोपायः क्वचिदीक्ष्यते ॥
न साक्ष्यस्ति विना बुद्ध्या न बुद्धिः साक्षिणा विना १३६
मैवं संशयमिथ्यात्वजन्मनाशादिभेदिनी ॥
बुद्धिः, साक्षी तु न तथा भेदो ऽतो बुद्धिसाक्षिणोः॥१३७॥
घटस्य व्यञ्जको दीपो दीपस्य व्यञ्जकं मनः ॥
मनसो व्यञ्जकः साक्षीत्यनवस्था प्रसज्ज्यते ॥ १३८ ॥
मैवं न कोऽप्यतिशयः साक्षिण्यन्यकृतस्ततः ॥
न व्यञ्जकान्तरापेक्षा नानवस्था ततो भवेत् ॥ १३९ ॥
न साक्षिणोऽक्रियत्वेन करणं बुद्धिभासने ॥

अन्यतराभावेऽप्यन्यतरसत्त्वादृष्टेर्व्यापकानुपलम्भात्तद्व्याप्तभेदो ऽपि न सम्भवतीत्यर्थः ॥ १३४ ॥ १३५ ॥ १३६ ॥ सुप्तौ बुद्धिवृत्तिं विनाऽपि अज्ञानसाधकसाक्षिणोऽवस्थानादत्र व्यापकानुपलब्धिरसिद्धेति परिहरति *मैवमिति ॥ धीसाक्षिणोर्भेदे हेत्वन्तरमाह* संशयेति ॥ १३७ ॥ बुद्धेरतिरिक्तसाक्षिगम्यत्वनियमेन तद्भासकत्वेन साक्ष्यन्तरस्य वक्तव्यत्वादतिप्रसङ्गं शंकते *घटस्येति ॥ १३८ ॥ साक्षिणः स्वप्रकाशत्वेन भासकान्तरानपेक्षणान्नानवस्थेति परिहरति* मैवमिति ॥ किञ्च ज्ञातताद्यतिशयजनकस्यैव व्यञ्जकत्वादतिरिक्तसाक्षिकल्पनायामपि न तस्य व्यञ्जकत्वमिति न साक्षिणः स्वव्यञ्जकसाक्ष्यन्तरापेक्षेत्याह* न कोऽपीति ॥ १३९ ॥ साक्षिणोऽन्यानपेक्षस्य बुद्ध्यादिभासकत्वमयुक्तं, विषयभासकबुद्ध्यादेः करणादिसापेक्षत्वदृष्टेरित्याशङ्क्य, बुद्ध्यादेर्विकारित्वेन तदपेक्षायामपि कूटस्थ-

अपेक्षितं, ततः साक्षी सुगतैर्मा निवार्यताम् ॥१४०॥
क्षणिकत्वं च विज्ञानशून्यवादौ च बालकैः ॥
वादिभिश्चावहास्यन्ते नातोऽत्र प्रयतामहे ॥ १४१ ॥
अनुभूत्या विरुद्ध्यन्ते क्षणिकत्वादयो यथा ॥
न तथाऽनुभवात्मैष विरुद्धः केनचित् क्वचित् ॥१४२॥
यो विज्ञानमयोऽक्षेषु हृद्यन्तः पूर्णचिद्घनः ॥
स संसरति धीयोगाद्भ्रान्त्येत्यभ्युपगम्यताम् ॥ १४३ ॥

श्रुतिः–स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः सꣳसृज्यते स उत्क्रामन् म्रियमाणः पाप्मनो विजहाति ॥ ८ ॥

वार्त्ति०–जाग्रद्देहादिकं मृत्यो रूपं स्वप्ने निवर्त्तताम् ॥
न जन्मान्तर इत्येवमाशङ्क्योक्तं स वा इति ॥ १४४ ॥

नित्यचैतन्यस्य न करणाद्यपेक्षेत्याह *नेति ॥ नित्यसाक्षिणमुपसंहरति *तत इति ॥ १४० ॥ ननु पराभिमतं क्षणिकत्वं, विज्ञानवादं शून्यवादं चानिराकृत्य कथं स्वमतोपसंहारः क्रियते तत्राह *क्षणिकत्वमिति ॥१४१॥ ज्ञानस्यानित्यत्वानुभवात् त्वन्मते वा कथं नित्यानुभवसिद्धिस्तत्राह *अनुभूत्येति । *न तथेति । ज्ञानमुत्पन्नमित्यादिधियो वृत्तिविषयत्वादिति भावः ॥१४२॥ प्रकृतवाक्यार्थस्य निरवद्यतामाह *य इति ॥ १४३ ॥ स वा अयं पुरुष इत्याद्यवतारयति* जाग्रदिति ॥ स्वप्नावस्थायां मृत्युरूपशब्दितजाग्रद्देहाद्यतिक्रमोक्तावपि जन्मान्तरे तदतिक्रमस्यानुक्तत्वादात्मनो देहाद्यतिरिक्तत्वं स्फुटतरं न सिद्ध्यति, अतः परलोकसंचारोक्त्याऽपि तदतिरेकस्तस्योच्यतेऽनन्तरवाक्येनेत्यर्थः ॥ १४४ ॥ वाक्यार्थमाह *युज्यते इति ॥ जन्मान्तरे पाप्मशब्दितपूर्वशरीराद्य-

युज्यते जायमानः सन्दुःखैरात्मैष ऐहिकैः ॥
मृतो वियुज्यते, भावि जन्म स्वप्नसमं ततः ॥ १४५ ॥
जन्मात्र नासतः सत्त्वं किन्तु देहेन संयुतिः ॥
प्रादुर्भावो जनेरर्थः सत एव स युज्यते ॥ १४६ ॥
मृतिः प्राणवियोगः स्यान्न तु नाशः सतो मतः ॥
मृङ् प्राणत्याग इत्युक्तं स्वयं नष्टः कथं त्यजेत् ॥ १४७॥
इमं लोकं परं चायं जाग्रत्स्वप्नप्रवाहवत् ॥
सदा भजति तेनास्य सिद्धा देहादिभिन्नता ॥ १४८ ॥

श्रुतिः-तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च सन्ध्यं तृतीयँ स्वप्नस्थानं तस्मिन्सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थानं च ॥

वार्त्ति०-लोकायतः परं लोकं नेच्छत्यन्ये तु मन्वते ॥
त्रीँल्लोकान्स्वप्नसंयुक्तान् ततस्तस्येति वक्त्यसौ ॥ १४९॥

ननुवृत्तौ फलितमाह *भावीति ॥ तथाच स्वप्ने जाग्रद्देहव्यतिरेकवज्जन्मान्तरेऽपि पूर्वदेहव्यतिरेकः सिध्यतीत्यर्थः ॥ १४५ ॥ जायमानः शरीरमभिसम्पद्यमान इत्यत्र पौनरुक्त्यमाशङ्क्याह* जन्मेति । देहयोगमात्रस्य जन्मत्वे जायमानइत्यस्यामुख्यार्थत्वं स्यात्, नेत्याह *प्रादुर्भाव इति ॥ 'जनिः प्रादुर्भावे' इति स्मृतेरिति भावः ॥ १४६ ॥ स उत्क्रामन् म्रियमाण इत्यत्रापि व्याख्यानव्याख्येयरूपत्वान्न पुनरुक्तिरित्याह* मृतिरिति ॥ म्रियमाण इत्यत्र मृतिपदस्यात्मनाशवाचकत्वे व्याकरणविरोधमाह *मृङिति ॥ १४७ ॥ उक्तं वाक्यार्थं संक्षिपन्फलितमाह* इममिति ॥ १४८ ॥ तस्य वेत्यादिवाक्यं परमतनिराकरणपरत्वेनावतारयति* लोकायत इति ॥ १४९ ॥ कथमनेन वाक्येन मतद्वयनिरा-

अयोगं परलोकस्य वारत्येवकारतः ॥
सन्ध्यत्वेन तृतीयत्वं स्वप्नलोकस्य वार्यते ॥ १५० ॥
भोगभावात्तृतीयत्वमुच्यते चेत्तथोच्यताम् ॥
वस्तुतो न तृतीयत्वं धर्माधर्मप्रसङ्गतः ॥ १५१ ॥
देशयोरुभयोः सन्धिर्नहि देशान्तरं यथा ॥
लोकयोरुभयोः सन्धिस्तथा लोकान्तरं नहि ॥१५२॥
इमं लोकमिव स्वप्ने परलोकं स पश्यति ॥
अतः प्रत्यक्षतोऽस्तित्वं परलोकस्य गम्यताम् ॥१५३॥
अतीतजन्मवृत्तान्तं बाल्ये प्रायेण पश्यति ॥

कुतिस्तत्राह *अयोगमिति ॥ द्वे एव स्थाने इत्यत्र एवकारो व्यत्यासेन योज्य इति भावः ॥ इहलोकपरलोकयोः सन्धौ भवं सन्ध्यमिति स्वप्नस्थानस्य संधित्वोक्त्या तृतीयलोकत्वं वारितमित्यर्थः ॥ १५० ॥ किञ्च स्वप्नस्थानस्य लोकत्वमौपचारिकं स्वाभाविकं वा? तत्राद्यमङ्गीकृत्य द्वितीयं प्रत्याह*भोगेति॥ *धर्मेति। स्वप्नकृतधर्मादेरस्मिन् लोके जाग्रदनुष्ठितधर्मादिवत्स्वर्गादिहेतुत्वप्रसङ्ग इत्यर्थः ॥ १५१ ॥ स्वप्नस्थानस्य सन्ध्यत्वोक्त्या तृतीयलोकत्वं वारितमित्युक्तं व्यनक्ति *देशयोरिति ॥ १५२ ॥ तस्मिन्सन्ध्य इत्यादेरर्थमाह* इममिति ॥ अनेन वाक्येनापि लोकायतमतं निरस्तमित्याह *अत इति ॥ १५३ ॥ कथं स्वप्नप्रत्यक्षं परलोकं गोचरयतीत्याशङ्क्याह *अतीतेति ॥ बाल्यावस्थायामैहिकामुत्रादिविषयस्वप्नस्यासम्भवाज्जन्मान्तरव्यापारमेव प्रायेण पश्यति। पुनस्त्वैहिकवासनाप्राबल्यात् प्रायेण ऐहिकव्यापार एव स्वप्ने स्फुरति। धर्मोत्कर्षवशादन्तिमे वयसि कश्चिद्भाविजन्म पश्यति। इत्थं चास्मिन् लोकेऽसम्भावितार्थस्य स्वप्ने दर्शनं परलो-

ऐहिकं यौवनेऽन्ते तु तपस्वी भावि वीक्षते ॥ १५४ ॥

श्रुतिः–अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान् पाप्मन आनन्दांश्च पश्यति ॥

वा०–आक्रम्य यादृग्देहादि भाविजन्मनि वीक्षते ॥
स्वप्नेऽपि तादृगाक्रम्य सुखदुःखानि पश्यति ॥१५५॥

श्रुतिः–स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय ॥

वा०–बहुजन्मसु सञ्चाराद्देहादिव्यतिरिक्तताम् ॥
निरूप्याथ स्वप्रभत्वं स यत्रेति निरूप्यते ॥१५६॥
स यदा वासनामस्य जाग्रल्लोकस्य सर्वशः ॥
आदाय शेते, विज्ञेया तस्य स्वप्रभता तदा ॥१५७॥
स यत्र प्रस्वापित्यत्र स्वयञ्ज्योतिः पुमानिति ॥
योऽयमस्येत्यादिना तु स्वापशब्दार्थ उच्यते ॥१५८॥

कसत्त्वे मानमिति भावः ॥ १५४ ॥ अथ यथाक्रमोऽयमित्या-देरर्थमाह* आक्रम्येति ॥ १५५ ॥

इयमत्र श्रुतियोजना–स्वप्नस्थाने तिष्ठन्नुभौ लोकौ पश्यती-त्युक्तम् । तत्र किमाश्रित्य पश्यतीति चोद्यार्थोऽथशब्दः । तस्योत्तरं–यथाक्रमइत्यादि । आक्रमत्यनेनेत्याक्रमो विद्याकर्मादि, यथाक्रमः सन् यादृग्विद्याकर्मादियुक्तः सन् परलोकस्थाने भोक्ता भवति तं तादृशमाक्रमं कर्मादिकमाक्रम्य आश्रित्य । पाप्मपदेन तज्जन्यं दुःखं लक्ष्यते । उभयान् पाप्मनः आनन्दांश्च कर्मफलानि पश्यतीति ॥

पूर्ववाक्यतात्पर्यं संक्षिपन्स यत्र प्रस्वपितीत्याद्यवतारयति *बह्विति ॥१५६॥ वाक्यार्थमाह *स इति ॥१५७॥ तात्पर्यमुक्त्वा-ऽक्षराणि योजयति* स यत्रेति ॥ यत्र–यस्मिन्काले प्रस्वपिति । अत्र-स्वापावस्थायां स्वयञ्ज्योतिरयं पुरुष इति सम्बन्धः ॥ १५८ ॥

न सुषुप्तिरिह स्वापः किन्तु स्वप्नो विवक्षितः ॥
स जाग्रद्वासनाजन्यप्रपञ्चप्रतिभात्मकः ॥ १५९ ॥
जाग्रल्लोकस्तु सर्वावानशेषमवतीत्यतः ॥
अवितृत्वं च सप्तान्नब्राह्मणात्प्राक् प्रपञ्चितम् ॥१६०॥
यद्वाऽध्यात्मादिभेदोऽयं सर्वोऽत्रास्तीति सर्ववान् ॥
तस्य सर्वावतोऽशेषवासना स्वप्नसृष्टिकृत् ॥ १६१ ॥
आदाय वासनां स्थूले देहे हित्वाऽभिमन्तृताम् ॥
सूक्ष्मेऽभिमानं निर्माय पश्यन्नेषोऽवतिष्ठते ॥ १६२ ॥
हननं च विनिर्माणं जीवकर्मवशादिति ॥
विवक्षुः स्वयमित्याह दैवं कर्मानुसार्यतः ॥ १६३ ॥
श्रुतिः–स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयञ्ज्योतिर्भवति ॥ ९ ॥

स्वापशब्दार्थमाह *नेति ॥ वक्ष्यमाणोपयोगित्वेन स्वप्नस्वरूपमाह* स इति ॥ १५९ ॥ सर्वावत इत्यनेन सर्वमवतीति व्युत्पत्त्या सङ्घातविशिष्टः सर्वावानित्युच्यते, स एव लोक्यत इति लोकश्चेत्याह *जाग्रदिति ॥ कथं तस्य सर्वावितृत्वमित्याशंक्यादृष्टद्वारा सर्वः सर्वस्य हेतुरिति सप्तान्नब्राह्मणोक्तं स्मारयति* अवितृत्वमिति ॥ १६० ॥ सर्वावत इत्यस्यार्थान्तरमाह* यद्वेति ॥ अत्रेति कर्त्रात्मनिर्देशः ॥१६१॥ मात्रामुपादायेत्यस्यार्थमाह* आदायेति । आत्मनः स्वप्नसृष्टिहेतुः या वासना तामादाय दृष्टवस्तुवासनावासितः सन्निति यावत् । स्वयं विहत्येत्यस्यार्थमाह* स्थूल इति ॥ स्वयं निर्मायेत्यस्यार्थमाह* सूक्ष्म इति ॥ प्रस्वपिति इत्यस्यार्थमाह *पश्यन्निति ॥ १६२ विहत्य निर्मायेत्युभयत्र स्वयमिति विशेषणमयुक्तं, सर्वस्यापि दैवाधीनत्वात्तत्राह* हननमिति ॥ १६३ ॥ स्वेन भासा स्वेन ज्योतिषेत्यत्र पुनरुक्तिमाशङ्क्य

वा०-स्वेन भासेतिशब्दाभ्यां स्वकीया वासनोच्यते॥
स्वरूपभूता चित्स्वेन ज्योतिषेति विवक्षिता ॥ १६४ ॥
इत्थम्भावे तृतीया स्याद्वासनाज्योतिषोस्ततः ॥
भास्यभासकरूपेण स्थितिः स्वप्न इतीर्यते ॥ १६५ ॥
अत्रान्यज्योतिषोऽभावात्स्वयञ्ज्योतिः पुमान्भवेत् ॥
न ज्योतिष्ट्वं वासनाया भास्यत्वेन परिक्षयात् ॥१६६॥
आत्मबुद्धिमनश्चक्षुरालोकविषयैर्युते ॥
न जागरे स्वयञ्ज्योतिर्विवेक्तुं शक्यते नृभिः ॥१६७॥
न सुषुप्तेऽपि तच्छक्यं भास्याभिव्यक्त्यभावतः ॥
श्रुतिः-न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान्मुदः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्तान्पुष्करिणीः स्रवन्तीः सृजते स हि कर्त्ता ॥ १० ॥
वा०-स्वप्ने तु भास्यमस्त्येकं ततो ज्योतिर्विविच्यते१६८॥

व्याचष्टे *स्वेनेत्यादिना । कूटस्थप्रत्यग्ज्योतिरात्मना स्वकीयवासनाराशिसाक्षित्वेन तिष्ठतीत्यर्थः ॥१६४॥१६५॥ अत्रायमित्यादेरर्थमाह* अत्रेति ॥ अन्यज्योतिषोऽभावादित्युक्तं व्यनक्ति *नेति । स्वप्ने चित्तद्वासनाव्यतिरिक्तस्य भासकत्वप्रसक्तेर्मनसस्तद्वासनानां च भास्यत्वेनोपक्षयात्तत्साधकात्मैव स्वयञ्ज्योतिरित्यर्थः ॥१६६॥ अवस्थान्तरं विहाय स्वप्नावस्थायामेवात्मनः स्वयञ्ज्योतिष्ट्वकथने को हेतुस्तत्राह *आत्मेत्यादिना ॥ भास्यमस्तीति वासनामयं द्वैतमित्यर्थः ॥ १६७॥१६८॥ न तत्रेत्याद्यवतारयति *स्वप्न इति । स्वप्नावस्थायामप्यात्मनो ज्योतिष्ट्वं दुर्विवेचं, तत्रापि प्रमात्रादि

स्वप्नजागरवद् दृष्टा मातृमानादयस्ततः ॥
दुर्विवेचत्वमाशङ्क्य न तत्रेति निषिध्यते ॥ १६९ ॥
रथाश्वादीनि वस्तूनि जाग्रत्कर्मक्षये सति ॥
लीयन्ते वासनास्तेषां तिष्ठन्ति स्वप्नसिद्धये ॥ १७० ॥
सूक्ष्मकर्मोद्भवे ताभिर्वासनाभिरयं पुमान् ॥
निर्मिमीते रथाश्वादीनेतैः स्वप्ने रिरंसया ॥ १७१ ॥
रथाद्यभावमुक्त्वादावथ तत्सृष्टिकीर्तनात् ॥
असतः सत्त्वभावेन तन्मिथ्यात्वं स्फुटीकृतम् ॥ १७२ ॥
लोकसिद्धमुपादानं निमित्तं वा न विद्यते ॥
स्वप्ने, तेन रथादीनां मिथ्यात्वं युज्यतेतराम् ॥ १७३ ॥
असङ्गस्यापि सम्भाव्यमविद्याकामकर्मभिः ॥
स्रष्टृत्वमित्यभिप्रेत्य स हि कर्तेत्यथोचत ॥ १७४ ॥

सर्वप्रपञ्चस्यानुभूयमानत्वादिति शङ्कायां तन्निराकरणायोत्तरा श्रुतिः प्रवृत्तेत्यर्थः ॥ १६९ ॥

श्रुत्यर्थस्तु—तत्र स्वप्ने। रथे युज्यन्त इति रथयोगा अश्वादयः। अथ अथापि, आनन्दाः सुखसामान्यानि, मुदो हर्षाः पुत्रादिनिमित्ताः, प्रमुदास्त एव प्रकर्षेणोपेताः, वेशन्ताः पल्वलाः, पुष्करिण्यः तटाकाः, स्रवन्त्यो नद्यः, स्वप्ने प्रतीयमानस्य वासनामयत्वेन व्यावहारिकप्रपञ्चस्याभावादात्मज्योतिः सुविवेचमिति भावः ॥१७०॥

वाक्यार्थमाह *रथेतिद्वाभ्याम् ॥१७०॥१७१॥ ननु स्वप्नप्रपञ्चोऽपि न मृषा, तत्राह* रथाद्यभावमिति ॥ १७२ ॥ न्यायतोऽपि तस्य मिथ्यात्वमाह *लोकेति ॥ १७३ ॥ असङ्गस्यात्मनः स हि कर्तेत्यत्र सृष्टिकर्तृत्वोक्तिरयुक्ता तत्राह *असङ्गस्येति ॥ १७४ ॥ तदेते श्लोका इत्यादेस्तात्पर्यमाह* ब्राह्मणेति ।

श्रुतिः-तदेते श्लोका भवन्ति ।
स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति ॥
शुक्रमादाय पुनरेति स्थानꣳ हिरण्मयः पुरुष एक-
हꣳसः ॥ ११ ॥

वार्त्ति०-ब्राह्मणोक्तार्थदार्ढ्यार्थं श्रुतिर्मन्त्रानुदाहरत्॥
स्वयञ्ज्योतिष्ट्वदेहादिभिन्नत्वे तेष्वपि स्फुटे ॥ १७५ ॥
स्वप्नवृत्त्या निहत्यैनं जाग्रद्देहमलुप्तचित् ॥
आदाय वासनां तज्जान्भावान्पश्यति सुप्तिमान्॥१७६॥
पुनर्जागरितस्थानमेति ज्योतिर्मयः पुमान् ॥
हन्ति याति कर्मणैक इत्येको हंस उच्यते ॥ १७७ ॥

तद् तत्रोक्तेऽर्थे इमे श्लोका मंत्रा भवंतीति श्रुत्यर्थः ।

मंत्रोदाहरणफलमाह* स्वयमिति । यदात्मनः स्वयञ्ज्योतिष्ट्वं देहादिभिन्नत्वं चोक्तं तदुभयं मंत्र स्फुटीभवतीत्यर्थः ॥ १७५ ॥ मंत्रपदानि व्याचष्टे *स्वप्नवृत्त्येति ॥

शारीरमित्यत्र स्वार्थे वृद्धिः । तदभिप्रहत्य निहत्य निश्चेष्टामापाद्येति यावत् । सुप्तान्स्वप्नदशायामुद्भूतान्वासनामयप्रपञ्चानभिचाकशीति पश्यतीत्यर्थः ॥

शुक्रमादायेत्यस्याभिचाकशीत्यनेनान्वयमाह *आदाय वासनामिति ॥ १७६ ॥

शुक्रं ज्योतिष्मदर्थप्रकाशहेतुत्वाद्रागादींद्रियवासनाः शुक्रशब्देनोच्यन्त इति भावः ॥

पुनरेति स्थानमित्यादेरर्थमाह *पुनरिति । हिरण्मयपदव्याख्या ज्योतिर्मय इति ॥ एकहꣳस इत्यस्यार्थमाह *हन्तीति ॥ हंतिरत्र गत्यर्थः । 'हन हिंसागत्योः'इतिस्मृतेः । एक एवा व-

श्रुतिः–प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृत-श्चरित्वा ॥ स ईयते ऽमृतो यत्रकामꣳ हिरण्मयः पुरुष एकहꣳसः ॥ १२ ॥

वार्त्ति०–प्राणेन मरणाद्रक्षन्देहं देहाभिमानतः ॥
बहिर्भूतः स्वप्ननाड्यां यथेष्टं विहरत्ययम् ॥ १७८ ॥

श्रुतिः–स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि ॥
उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ॥ १३ ॥

वार्त्ति०–उच्चावचं देवतिर्यग्भावं प्राप्य वधूसुखम् ॥
स भक्ष्यं पश्यतीवैष यद्वा व्याघ्रादिजं भयम् ॥१७९॥

स्यात्रयं क्रमेण यातीत्येकहंस इत्युच्यत इत्यर्थः ॥ १७७ ॥
प्राणेनेत्येतस्यार्थमाह* प्राणेनेति ॥ १७८ ॥

पञ्चवृत्तिप्राणेनावरमनेकाशुचिसंघातत्वादतिनिकृष्टं कुलायं देहं मरणात्पालयन् बहिः कुलायाद्देहाद्बहिश्चरित्वा । यद्यपि देहस्थ एव स्वप्नं पश्यति तथापि तदभिमानाद्बहिर्भूतस्तदानीमिति बहिश्चरित्वेत्युक्तम् । अमृतः स्वयममरणधर्मा स ईयते सञ्चरति । यत्रकामं यथाकामं स्वप्ननाड्यां विहरतीत्यर्थः ॥ १२ ॥

स्वप्नान्त इत्यादेरर्थमाह *उच्चावचमिति ॥ १७९ ॥

स्वप्नान्ते स्वप्नस्थाने उच्चं देवादिभावम् अवरं तिर्यगादिभावम् ईयमानः प्राप्नुवन्देवो द्योतनवान् बहूनि रूपाणि वासनात्मकानि कुरुते । उतापि स्त्रीभिः सह मोदमान इव जक्षदिव हसन्निव वयस्यैः, बिभेत्येभ्य इति भयानि व्याघ्रादयस्तान्पश्यन्निव विहरतीति पूर्वेण सम्बन्धः ॥ १३ ॥

श्रुतिः—आराममस्य पश्यन्ति न तं पश्यति कश्चनेति तन्नायतं बोधयेदित्याहुः ॥

वा०—आराममेव मायोत्थं स्वप्ननिर्माणलक्षणम् ॥
पश्यन्ति जन्तवस्तस्य न तं पश्यति कश्चन ॥ १८० ॥
प्रत्यक्षगोचरं देवं लोकं चातिप्रमादिनम् ॥
दृष्ट्वा श्रुतिः शिरस्ताडमनुक्रोशति दुःखिता ॥ १८१ ॥
स्वप्ने परीक्षिते द्रष्टा देहाद्भिन्नः स्वयम्प्रभः ॥
सुविवेचस्तथाऽप्येवं परीक्षन्ते न पामराः ॥ १८२ ॥
चिकित्सकप्रसिद्ध्याऽपि सुप्तो देहाद्भिभिद्यते ॥
द्रुतं न बोधयेत्सुप्तमिति प्राहुश्चिकित्सकाः ॥ १८३ ॥
त्वरयाऽऽगतिरक्षाणां नाडीषु व्यत्ययाद्यदि ॥
अचिकित्स्यस्तदा रोग इति बाधं वदन्ति ते ॥ १८४ ॥
सुप्तावुपेक्षते देहं पुनर्व्याप्नोति जागरे ॥

आराममित्यादेरर्थमाह *आराममिति ॥ वासनामयं ग्रामनगरस्त्रियाद्याक्रीडनमेव पश्यतीत्यर्थः ॥ १८० ॥ न तमित्यादेस्तात्पर्यमाह *प्रत्यक्षेति । अतिप्रमादित्वम् अनात्ममात्रप्रवणत्वम् ॥ १८१ ॥ कथं तस्य प्रत्यक्षगोचरत्वमविद्यावृतत्वादित्याशङ्क्यानुक्रोशं विवृणोति*स्वप्न इति ॥ १८२ ॥ तन्नायतमित्यादेस्तात्पर्यमाह *चिकित्सकेति ॥ आयतपदव्याख्या—द्रुतमिति ॥ १८३ ॥ गाढसुप्तस्य द्रुतबोधने को दोष इत्याशङ्क्य दुर्भिषज्यमित्यादि व्याचष्टे* त्वरयेति ॥ यमिन्द्रियद्वारा देशं यस्माद्द्वारदेशादपसृतः तमिन्द्रियदेशमेव आत्मा पुनर्न प्रतिपद्यते । त्वरया बोधने नाडीव्यत्यासेनेन्द्रियं प्रविष्टं चेत्तत्र बाधिर्यादिरोगप्राप्तौ दुर्भिषज्यं दुश्चिकित्स्योऽयं रोगो भवतीत्यर्थः ॥ १८४ ॥ प्रकृतवा-

इति वैद्योक्तितो भाति सिद्धाऽतो देहतो भिदा॥१८५॥
श्रुतिः–दुर्भिषज्य९ हास्मै भवति यमेष न प्रतिपद्यते-ऽथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं पुरुषः स्वयञ्ज्योतिर्भवति सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षाय ब्रूहीति ॥ १४ ॥

वा०–देहान्यत्वस्वप्रभत्वे ह्यसोढ्वा स्वप्नमप्यमुम् ॥
अपह्नुवानाश्चार्वाकास्तस्याहुर्जागरात्मताम् ॥१८६॥
तदसत्स्वप्नपार्थक्यं प्रसिद्धं लोकशास्त्रयोः ॥
अत्रायं पुरुषस्तेन स्वप्रभः स्वतनोः पृथक् ॥ १८७ ॥
उक्तमर्थद्वयं मुक्तेरङ्गमेवास्य दक्षिणाम् ॥

क्यतात्पर्यं संक्षिपन्फलितमाह *सुप्ताविति ॥ १८५ ॥ अथो-खल्वित्याद्यवतारयति *देहेति ॥ ॥ १८६ ॥

अपि खल्वन्य आहुर्जागरितदेश एवास्यात्मन एष स्वप्नः न स्थानांतरमतो जाग्रद्दशायामिव तत्राप्यात्मनो देहान्यत्वं स्वप्रभत्वं च दुर्विवेचमित्यर्थः ॥ स्वप्नस्यापि जागरितदेशत्वे हेतुं चाचक्षते । यानि ह्येव जाग्रत्पश्यति हि यस्माद्यानि गजादीनि जाग्रज्जागरितदेशे पश्यति तान्येव सुप्तोऽपि पश्यति । स्वप्नस्यान्यत्वे जागरितादपूर्वमेव पश्येदतो जाग्रदेव स्वप्न इति भावः

तन्मतं दूषयति* तदसदिति। श्रुतेर्बहिरेव परिहृत्यात्रेत्यादि व्याचष्टे *अत्रेति ॥ तेनेति लोकशास्त्रप्रसिद्धिविरोधेन चार्वाकमतस्य तुच्छत्वादित्यर्थः॥ १८७ ॥ सोऽहमित्यादेरर्थमाह *उक्तमिति । देहान्यत्वस्वप्रभत्वयोर्वाक्यार्थज्ञानांगभूतयोः उपदि-

गोसहस्रं गृहाणातः ऊर्ध्वं ब्रूहि विमुक्तये ॥ १८८ ॥

श्रुतिः—स वा एष एतस्मिन्सम्प्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्या द्रवति स्वप्नायैव स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१५॥

स वा एष एतस्मिन्स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापञ्च पुनः प्रतिन्यायं प्रतियोन्या द्रवति बुद्धान्तायैव स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१६॥

स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्या द्रवति स्वप्नान्तायैव ॥ १७ ॥

वार्त्ति०—मृत्योरूपाणि देहादीन्यत्येतीति पुरोदितम् ॥
न मुक्तिस्तावता कामकर्ममृत्योरनत्ययात् ॥ १८९ ॥
मोदत्रासौ कर्मकार्यौ दृष्टौ स्वप्नेऽपि चात्मनः ॥
इत्याशङ्क्य स वा एष इति कर्म विविच्यते ॥ १९० ॥

श्रुत्वात्तदर्थं दक्षिणां दत्त्वा वाक्यार्थनिश्चयाय पुनः पृच्छतीत्यर्थः ॥ १८८ ॥ वृत्तमनुध्यानन्तरवाक्यमवतारयति *मृत्योरिति ॥ १८९ ॥ स्वप्ने कामकार्माख्यमृत्योरत्ययाभावे हेतुमाह *मोदेति ॥ कामकर्मादेरात्मधर्मत्वेऽग्न्यौष्ण्यवन्नित्ययोगेनानिर्मोक्षप्रसङ्गात्तस्यात्मस्वभावत्वं नेति दर्शयितुं स वा इत्यादिवाक्येनात्मनः सकाशात्कर्मादिकं विविच्यत इत्यर्थः ॥ १९० ॥ तत्र सम्प्रसादश-

कालुष्यं जागरे जीवे स्वप्ने स्वल्पा प्रसन्नता ॥
सम्यक्प्रसीदत्यत्रेति सम्प्रसादः सुषुप्तकम् ॥ १९१ ॥
अद्वैतत्वात्सम्प्रसादे रमणाद्युच्यते कथम् ॥
अरत्वेति पदच्छेदे स यत्रेत्यसङ्गतम् ॥ १९२ ॥
बहुधोक्तस्मधोक्षमानन्दभुगिति श्रुतेः ॥
भोगो रत्यादिरथ वा सुप्त्यनैक्यादिहोत्तरम् ॥१९३॥
जाग्रत्स्वप्नसुषुप्तीनामेकैकस्मिन् त्रिधा सति ॥
जाग्रत्सुप्तिः स्वप्नसुप्तिः सुप्तिसुप्तिश्च लभ्यते ॥१९४॥
प्रमितिर्जागरे जाग्रत्भ्रमः स्वप्नोऽथ मूढता ॥
पानादिजन्या सुप्तिः स्यादेवं जागरणं त्रिधा ॥१९५॥

स्वदस्य सुषुप्तिवाचकत्वं निर्वचनेनाह *कालुष्यमिति ॥ १९१ ॥ सुप्तौ पुत्रादिद्वितीयवस्त्वभावाद्रत्वा चरित्वेति रमणाद्युक्तिरयुक्तेति शङ्कते *अद्वैतत्वादिति ॥ तदेकदेश्युक्तं परिहारं वाक्यशेषविरोधेन दूषयति *अरत्वेति ॥ १९२ ॥ तर्ह्युक्तशङ्कायाः कः परिहार इत्याशङ्क्य तत्र त्रिविधपरिहारोऽस्तीत्याह *बहुधेति ॥ अत्र सुप्तस्यापि स्वरूपानन्दानुभवलक्षणभोगश्रुतेः रमणाद्युपपत्तिरित्येकं परिहारमाह* आनन्दभुगिति ॥ अस्मिन्पक्षे चरित्वेत्यादिनामनाञ्जस्यमाशङ्क्य परिहारान्तरमाह* अथवेति ॥ १९३ ॥ सुप्त्यवस्थाया एकत्वात्कथं तदनेकत्वं तत्राह *जाग्रदिति । जाग्रदादीनां मध्ये एकैकस्मिन्नपि जागरादित्रैविध्ये कल्पिते सति सुप्त्यनैक्यं सम्भवतीत्यर्थः ॥ तदेवोदाहरति *जाग्रत्सुप्तिरिति ॥१९४॥ एकैकस्मिन्त्रैविध्यकल्पनाप्रकारमाह *प्रमितिरिति चतुर्भिः । *स्पष्टस्मृतिरिति ॥ स्वप्नोपलब्धेषु गजादिषु उत्थानानंतरं यत्स्पष्टं स्मर्यते तद्विषयोपलब्धिः । स्वप्नजाग्रद्यदस्पष्टं स्मर्यते तद्धि स्वप्नः,

स्पष्टस्मृतिरथास्पष्टस्मृतिरस्मृतिरित्यमी ॥
स्वप्नभेदाः स्वप्नमध्ये जाग्रत्स्वप्नसुषुप्तयः ॥ १९६ ॥
आहारादिविभेदेन सात्त्विकी राजसी तथा ॥
तामसीति त्रिधा सुप्तिः सा परा मृश्यते त्रिधा॥१९७॥
सुखमवाप्समथाद्य दुःखमस्वाप्समद्य तु ॥
गाढमूढोऽहमस्वाप्समित्युक्तिः सार्वलौकिकी ॥ १९८॥
एवं सुप्ते बहुविधे रत्यादि क्वापि सम्भवेत् ॥
यद्वा सुप्तेः पुरा स्वप्ने रमणादिनि योजयेत् ॥१९९॥
स्वप्ने रत्वा चरित्वाऽथ विश्रान्तः सम्प्रसादके ॥
पुनरायात्यसौ नाडीं स्वप्नार्थमिति योजना ॥ २०० ॥
दृष्ट्वैवेत्येवशब्देन न कृत्वेति विवक्षितम् ॥
न कर्म कुरुते स्वप्ने कारकाणामसम्भवात् ॥२०१॥
अगम्यागमनं स्वप्ने न प्रायश्चित्तमर्हति ॥
स्कन्नस्य रेतसः सत्त्वात्प्रायश्चित्तं तदुद्भवम् ॥ २०२ ॥

यन्न स्मर्यते तद्धि स्वप्नसुप्तिरित्यर्थः ॥१९५॥१९६॥१९७॥१९८॥ प्रत्येकं त्रैविध्यसिद्धौ फलितमाह *एवमिति । क्वापीति जाग्रत्सुप्तौ स्वप्नसुप्तौ वेत्यर्थः ॥ समाध्यन्तरमाह *यद्वेति ॥ स्वप्ने एव चेद्रत्यादिकं विवक्षितं तर्हि संप्रसादपदस्य कुत्रान्वय इत्याशङ्क्याध्याहारेण वाक्यं योजयति *स्वप्न इति ॥ स एष प्रकृतः स्वयंज्योतिरात्मा स्वप्ने रत्यादिकमनुभूयानन्तरं सुप्तिं प्राप्य तत्र विश्रान्तः सन् पुनः स्वप्नार्थमागच्छतीत्यर्थः ॥२००॥ एवकारस्य प्रयोजनमाह *दृष्ट्वेति ॥ *न कर्मेति ॥ तत्र प्रतीयमानाऽपि क्रिया मृषेति भावः ॥२०१॥ तत्रोपपत्तिमाह *अगम्येति ॥ कथं तर्हि स्वप्ने रेतस्खलनादिनिमित्तं प्रायश्चित्तं श्रूयते तत्राह *स्कन्नस्येति ॥ स्वप्नकालीनरेतो जागरेऽपि प्रतिपन्नं निमित्तीकृत्य प्रायश्चित्तमि-

मोदत्रासौ दर्शनार्हौ पुण्यपापगिरोदितौ ॥
स्वप्ने कर्मफलं भुङ्क्ते स्वचिदाभासवर्त्मना ॥ २०३ ॥
रमणं चरणं मोदस्त्रास इत्यादिरूपतः ॥
विजृम्भते वासनैव साक्षी पश्यति केवलः ॥२०४॥
जागरात्स्वप्नमाप्नोति स्वप्नात्सुप्तिमिति क्रमात् ॥
वैपरीत्यं प्रतिन्यायः प्रतिमार्ग इतीर्यते ॥ २०५ ॥
प्रतियोनि यथास्थानं स्वप्ननाड्यादि भण्यते ॥
प्रतिमार्गमवाप्याथ स्वप्नावस्थानमाव्रजेत् ॥ २०६ ॥
स्वप्नायैव न मोक्षाय सुषुप्तेः पुनरागमः ॥
तथापि वस्तुस्वाभाव्यान्न दृष्टेनानुगम्यते ॥ २०७ ॥
सम्प्रसादे ततः पूर्वं स्वप्ने वा यत्स ऐक्षत ॥
तेनानन्वागतः किन्तु स्वयमेव समागतः ॥ २०८ ॥
अनन्वागमने हेतुरसङ्गत्वं हिशब्दतः ॥

त्यर्थः ॥२०२॥ पुण्यपापयोरध्यक्षायोग्यत्वाद् दृष्टत्वमनुपपन्नं तत्राह *मोदेति । उदितौ लक्षणयेति शेषः ॥ असङ्गस्यात्मनो मोदादिलक्षणभोगोऽनुपपन्नोऽत आह* स्वप्न इति ॥ असङ्गस्यापि बुद्धिस्थचिदाभासद्वाराऽऽरोपितं भोक्तृत्वमविरुद्धमिति भावः ॥ २०३ ॥ वस्तुतस्तदभावं दर्शयति *रमणमिति॥२०४॥ पुनः प्रतिन्यायमित्यस्यार्थमाह* जागरादिति ॥ अत्र प्रतिशब्दो वैपरीत्यवचनः । निशब्दो निश्चयवचनः । आयशब्दो मार्गपरः । तथा च जाग्रत्स्वप्नसुषुप्तिक्रमेण प्राप्तस्य तद्वैपरीत्येन स्वप्नं जागरितं वा प्राप्तुं निश्चयेन पुनरागमनमार्गः पुनः प्रतिन्यायमित्यनेनोच्यते इत्यर्थः॥२०५॥ प्रतियोनीत्यस्यार्थमाह* प्रतियोनीति ॥ पदार्थमुक्त्वा वाक्यार्थमाह *प्रतिमार्गमिति॥२०६॥ स्वप्नायैवेत्यत्रैवकारव्यावर्त्यमाह* नेति ॥ स यदीत्यादेस्तात्पर्यमाह *तथेति ॥ २०७ ॥ अक्षराणि व्या-

सूच्यते बाधकस्तर्कः प्रसिद्धिर्याऽत्र लौकिकी ॥२०९॥
यदि स्थानान्तरं प्राप्तमन्वियात्स्वप्नजा क्रिया ॥
शास्त्रारम्भस्तदा व्यर्थः स्वप्ने को नापराध्यति ॥२१०॥
लोकप्रसिद्धिर्विस्पष्टा जाग्रत्यननुवर्तने ॥
स्वप्नलब्धगजादीनामनन्वागतता ततः ॥ २११ ॥
यद्वाऽनन्वागतत्वेन विवेकः कर्मणः कृतः ॥
असङ्गत्वेन कामस्य कामो न ह्यात्मनो गुणः ॥२१२॥
आत्मनश्चेदयं कामो गुणश्चैतन्यवत्तदा ॥
दृश्यत्वं तस्य नैव स्यात्तस्माद् दृश्यधियो गुणः॥२१३॥
पुष्पगन्धः पुटस्थोऽपि पुष्पस्यैव यथा तथा ॥
आत्मनिष्ठतया वादिवर्णितोऽपि धियो गुणः ॥२१४॥
कर्मकामविवेकोऽयमुक्तो युक्त्याऽभ्युपेत्य तम् ॥

चष्ट *संप्रसाद इत्यादिना ॥ २०८ ॥ २०९ ॥ हिशब्दसूचितं बाधकतर्कं विवृणोति *यदीति ॥ शास्त्रवैयर्थ्ये हेतुः *स्वप्न इति। स्वप्नदशायां पापस्य दुष्परिहरत्वात्तेनापि संश्लेषे बुद्धिशुद्धिरेव नोत्पद्यतेति शास्त्राधिकारी न सिध्यतीति भावः ॥२१०॥ प्रसिद्धिर्याऽत्र लौकिकीत्युक्तं विशदयति *लोकेति ॥२११॥ अनन्वागतवाक्यस्यासङ्गवाक्यस्य च स्वाभिमतार्थमुक्त्वा भर्तृप्रपञ्चोक्तमर्थमप्यादेयत्वेन दर्शयति *यद्वेति ॥ अनन्वागतवाक्यस्य कर्मविवेकार्थत्वेऽप्यसङ्गवाक्यस्य कामाविवेकार्थत्वमयुक्तं, कामस्यात्मधर्मत्वादिति नेत्याह *काम इति ॥ २१२ ॥ तस्यात्मस्वभावत्वे बाधकं वदन् बुद्धिधर्मत्वमाह* आत्मन इति ॥ २१३ ॥ एवं कामादेरनात्मधर्मत्वे सिद्धे आत्मनिष्ठतया भानादेव तस्यात्मधर्मत्वमिति वैशेषिकाद्युक्तमयुक्तमिति सदृष्टान्तमाह *पुष्पेति ॥ २१४ ॥ उ-

दत्त्वा तु दक्षिणां भूयः पप्रच्छ श्रुत्यपेक्षया ॥ २१५ ॥
स ईयते यत्र कामं यथाकामं प्रवर्त्तते ॥
इति श्रुतिद्वयं स्वप्ने विस्पष्टं काममब्रवीत् ॥ २१६ ॥
सति कामे कर्मसत्त्वमनिवार्यं ततो ब्रूयात् ॥
विमोक्षायैव मे ब्रूहि मा शङ्कामवशेषय ॥ २१७ ॥
स्वप्नकामस्य वस्तुत्वं श्रुतिभ्यां चेद्विवक्षितम् ॥
प्रबोधेऽप्यनुवर्त्तेत तच्च नास्ति ततो मृषा ॥ २१८ ॥
उतेव स्यान्महाराज उतेव स्त्रीभिरुच्यते ॥
श्रुतिवाक्ये इयत्युक्त्या स्वप्नमिथ्यात्वमाहतुः ॥ २१९ ॥
जाग्रत्प्रत्यक्षमाश्रित्य जागरे मृत्युसत्यताम् ॥

क्तमर्थमुपसंहरन्सोऽहमित्यादेरर्थमाह *कर्मेति । *श्रुत्यपेक्षयेति ॥ आत्मनः कामकर्मव्यतिरिक्तत्वे श्रुतिविरोधशङ्काऽपरिहार्येति तदिच्छया पुनः पृच्छतीत्यर्थः ॥ २१५ ॥ उक्तमेवार्थं स्पष्टयति *स इति द्वाभ्याम् ॥ चतुर्थोक्तं स्वे शरीरे यथाकामं परिवर्तत इति वाक्यमेवार्थतः पठति *प्रवर्त्तत इति ॥ ब्रूयात्कामात्कर्मणश्चेत्यर्थः ॥ २१६ ॥ ॥ २१७ ॥ प्रश्नतात्पर्यमुक्त्वा स वा इत्याद्युत्तरखण्डोक्तप्रतिवचनतात्पर्यमाह* स्वप्नकामस्येति ॥ कामस्य सत्यत्वे तद्दृष्टान्तेन काम्यमानस्त्र्यादेरपि सत्यत्वप्रसङ्गः । तथा च जागरणे तस्यानुवृत्तिः स्यात्, न चानुवर्त्तते, तस्मात्स्वप्ने काम्यमानस्त्र्यादिवत्तत्कामोऽपि मिथ्येति न तस्य सत्यत्वमुक्तश्रुतिभ्यां विवक्षितमित्यर्थः ॥ २१८ ॥ स्वप्नस्य मिथ्यात्वे हेत्वन्तरमाह *उतेति । कामस्य मिथ्यात्वे सिद्धे न तस्यात्मतत्त्वभावनेत्यात्मनस्तद्विभक्तत्वं सिद्धमिति भावः ॥ २१९ ॥ स वा एष एतस्मिन्स्वप्ने रत्वेत्यादेस्तात्पर्यमुक्त्वा इत ऊर्ध्वमित्यादि पुनः प्रश्नस्य तात्पर्यमाह* जाग्रदिति ॥

आशङ्क्य पुनरप्राक्षीद् दृष्ट्वैवेति तदुत्तरम् ॥ २२० ॥
मूढप्रत्यक्षतः कर्त्ता विद्वत्प्रत्यक्षतोऽक्रियः ॥
विवेकिनामनुभवादात्मज्योतिर्विवेचितम् ॥ २२१ ॥
जाग्रद्बन्धस्य वस्तुत्वे आत्मा स्वप्नायनो भवेत् ॥
आयाति च ततोऽसङ्गः सिद्धोऽवस्थाद्वये पुमान्॥२२२॥
असकृत्स्वप्नबुद्धान्तसंचारेऽपि न सङ्गवान् ॥
इत्यर्थेऽस्मिन्महामत्स्यो दृष्टान्तत्वेन वर्ण्यते ॥ २२३ ॥

श्रुतिः-तद्यथा महामत्स्य उभे कूलेऽनुसञ्चरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसञ्चरति स्वप्नान्तं च बुद्धान्तञ्च ॥ १.८ ॥

वा०—महामत्स्यः प्रवाहस्य पारवश्यं न गच्छति ॥

जागरणेऽहं कर्त्तेत्यबाधितानुभवसिद्धस्य कर्तृत्वादेः कथमसत्वमिति शङ्कया पुनः पप्रच्छेत्यर्थः ॥ प्रत्युक्तितात्पर्यमाह *दृष्ट्वेति ॥ स वा एष एतस्मिन्बुद्धान्त इत्याद्युत्तरखण्डिकायां दृष्ट्वेत्येवकारेण बुद्धांतशब्दितजागरणेऽप्यात्मनः पुण्यपापसाक्षित्वमेव न वस्तुतः कर्तृत्वमिति श्रुत्यैवोत्तरं दत्तमित्यर्थः ॥ २२० ॥ ननु श्रुतिर्वा कथमनुभवविरुद्धमाहेत्यत आह *मूढेति ॥ कर्तृत्वानुभवस्य मोहमूलत्वेन भ्रमत्वं दर्शयितुं विद्वत्प्रत्यक्षसिद्धं वस्तुतः कर्तृत्वादिरहितं साक्षिरूपं श्रुत्या विवेचितमित्यर्थः ॥२२१॥ न्यायतोऽपि तस्याकर्तृत्वं साधयति *जाग्रादिति । अहं मनुष्य इत्यादिस्थूलशरीरतादात्म्याभिमानलक्षणबन्धस्य कर्तृत्वादेश्च सत्यत्वे तस्य निवृत्त्ययोगात्स्वप्नाद्यवस्थाद्वयं न स्याद् दृश्यते चावस्थाद्वयम् अतो न बन्धस्य सत्यतेत्यर्थः ॥ जाग्रद्बन्धस्याप्यवस्तुत्वे फलितमाह* तत इति ॥२२२॥ तद्यथेत्याद्यवतार्य व्याचष्टे *असकृदित्यादिना ॥२२३॥

नापि कूलद्वये सङ्गस्तेवमात्मनि योज्यताम् ॥ २२४ ॥
न कर्मवश आत्माऽयं कर्माध्यक्षत्वशास्त्रतः ॥
अतो न तत्फलेनापि सज्यते स्वप्नजाग्रतोः ॥ २२५ ॥
इत्थं स्वप्नप्रसङ्गेन देहादिव्यतिरिक्तता ॥
स्वप्रभत्वमसङ्गत्वं चेत्येतेऽर्थाः प्रपञ्चिताः ॥ २२६ ॥
केचिदत्र महामत्स्यदृष्टान्तेन निवर्त्तिता ॥
लोकायतस्य शङ्केति प्राहुः, शङ्का तु वर्ण्यते ॥२२७॥
चैतन्यं भौतिकं भूतव्यतिरेकानिरूपणात् ॥
कामकर्मविवेकोऽतः कस्येत्याशङ्क्य वर्ण्यते ॥ २२८ ॥
क्रमेण सञ्चरन्कूले मत्स्यस्ताभ्यां पृथग्यथा ॥
स्वप्नबुद्धान्तभूम्योश्च तथाऽऽत्मा सञ्चरन्क्रमात्॥२२९॥
चिदात्मा भौतिकः स्याच्चेद् भूतानामविशेषतः ॥

२२४॥ आत्मनि योज्यतामित्युक्तं योजनाप्रकारमेवाह* नेति ॥२२५॥ स वा अयम् इत्यारभ्य मत्स्यवाक्यपर्यंतसंदर्भेण वर्णितमर्थं बुद्धिसौकर्याय संगृह्णाति *इत्थमिति॥२२६॥ मत्स्यवाक्यस्य भर्तृप्रपञ्चोक्तमर्थमाह *केचिदित्यादिना। चैतन्यस्य भूतचतुष्टयात्मकदेहधर्मत्वेन भौतिकत्वाद्देहातिरिक्तचिदात्मनि मानाभावात्तस्यासङ्गत्वादिनिरूपणमसङ्गतमिति चार्वाकवराकशङ्का मत्स्यवाक्येन निवर्त्यत इत्यर्थः ॥२२७॥२२८॥ वाक्यार्थमाह* क्रमेणेति ॥ यथा कूलाभ्यां भिन्नो मत्स्यस्तथात्माऽवस्थाद्वयात्पृथग्भूतः,तथा चेन्द्रियैरर्थोपलब्धिलक्षणजागरणात् तद्वासनाजन्यज्ञानलक्षणात्स्वप्नाच्च भेदे आत्मनो भौतिकज्ञानभिन्नत्वं सिध्यतीत्यर्थः ॥ २२९ ॥ आत्मज्योतिषो भौतिकत्वे बाधकमाह* चिदात्मेति ॥ भौतिकज्योतिरारम्भकभूतमात्राणामवस्थाद्वयेऽप्यविशेषाज्जाग्रति स्वप्ने

युगपत्प्राप्नुयाज्जाग्रत्स्वप्नयोर्दर्शनं द्वयोः ॥ २३० ॥
अभौतिकत्वेऽप्यात्माऽयं व्यापित्वाद्युगपत्कुतः ॥
द्वयं न पश्येदिति चेद्देवतास्तान्नियामकाः ॥ २३१ ॥
अक्षाधिष्ठातृदेवानां क्रमेण स्वप्नजाग्रतोः ॥
प्रयत्नस्तद्वशादात्मा क्रमेण द्वयमीक्षते ॥ २३२ ॥
अथोच्यते न सन्त्येव स्वप्नेऽक्षाण्युपसंहृतेः ॥
कुतस्तद्देवतायत्नो व्यवहारस्तु वासना ॥ २३३ ॥
एवं तर्हि क्रमे हेतुः कर्मैव स्वप्नजाग्रतोः ॥
ज्ञानस्य तच्च दृष्टत्वान्न ह्युपालम्भमर्हति ॥ २३४ ॥
व्याख्यैषाऽप्यविरुद्धत्वात्मत्स्यवाक्यस्य युज्यते ॥

व्यवस्थाद्वयज्ञानं प्राप्नुयादित्यर्थः ॥२३०॥ स्वप्नजागरयो-र्ज्ञानायौगपद्याद्देहातिरिक्तो द्रष्टेत्युक्तम्, इदानीं देहात्मवादे दर्शितमसङ्गस्यातिरिक्तात्मवादेऽपि साम्यं शङ्कते *अभौतिकत्वमिति ॥ आत्मनो जाग्रत्स्वप्नदेहद्वयव्यापित्वेन युगपज्ज्ञातृत्वसम्भवादिति भावः ॥ अत्र कैश्चिदुक्तं परिहारमाह* देवता इति ॥ २३१ ॥ तन्मतमुपपादयति *अक्षेति ॥ २३२ ॥ आदित्यादिदेवताना-मवस्थाद्वये ज्ञानक्रमनियामकत्वमिति पक्षं दूषयति *अथेति ॥ स्वप्ने देवताधिष्ठितानीन्द्रियाण्येव न सन्ति, तेषामुपरमात्, अतः कथं तद्विषयदेवतायत्नो ज्ञानव्यवस्थाहेतुः स्यादित्यर्थः ॥ देवतायत्ना-भावे कथं स्वप्नव्यवहार इत्याशङ्क्य जाग्रद्वासनावशादित्याह *व्य-वहार इति ॥२३३॥ अत्र भर्तृप्रपञ्चोक्तं परिहारमाह *एवमिति ॥ ननु कर्मापि किमिति जाग्रत्स्वप्नदेहयोर्युगपज्ज्ञानं न जनयति तत्राह *तच्चेति ॥ दृष्टानुरोधित्वात्कल्पनाया इति भावः ॥२३४॥ मत्स्य-वाक्यस्य परोक्तमर्थमङ्गीकृत्य श्येनवाक्यस्य तदुक्तसम्बन्धमनु-

श्येनवाक्यस्य सम्बन्धं वक्ति भर्तृप्रपञ्चकः ॥ २३५ ॥
पुण्यपापात्मकं कर्म बुद्धिस्थं तस्य वासना ॥
आत्माश्रिता, तद्विवेको ग्रन्थग्रन्थेन वर्णितः ॥२३६॥
अविद्या सुषुप्तस्थानीयाऽऽत्मनि तिष्ठति ॥
श्येनादिग्रन्थसंदर्भस्तद्विवेकाय वर्ण्यते ॥ २३७ ॥
नैवमात्मन्यविद्या वा वासना वा न वास्तवी ॥
सम्भाव्येति पुरा प्रोक्तं मूर्तामूर्तप्रसङ्गतः ॥ २३८ ॥
सम्बन्धस्तूच्यते स्वात्मस्वभावोऽनवद्योदितः ॥
पुञ्जीकृत्योदितो न प्राक् श्येनवाक्ये तु वर्ण्यते॥२३९॥
अथवा परलोकस्य दृष्टान्तः स्वप्न ईरितः ॥
सुषुप्तिर्मोक्षदृष्टान्तस्तदर्थो ग्रन्थ उत्तरः ॥ २४० ॥
तद्वा अस्यैतदित्यत्र आप्तकामस्वभावताम् ॥
वक्तुं सुप्तावदुःखत्वं वक्ति श्येननिदर्शनात् ॥ २४१ ॥
श्रुतिः–तद्यथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा वि-

भावयति *श्येनेत्यादिना॥२३५॥२३६॥२३७॥वासनाऽविद्ययो-रात्मसम्बन्धो वास्तवः काल्पनिको वा, तत्र चरममङ्गीकृत्याद्यं दूषयति *नैवमिति ॥२३८॥ इदानीं स्वाभिमतसम्बन्धमाह *सम्बन्ध इति ॥ अथस्तनवाक्येषु तत्र तत्र नित्यशुद्धत्वादिकमात्मस्वरूपं प्रतिपादितमप्येकस्मिन्वाक्ये पिंडीकृत्य नोक्तमिति तद्वर्णनाय श्येनवाक्यमित्यर्थः ॥२३९॥ अस्यैव सम्बन्धान्तरमाह *अथवेति॥२४०॥ एवमनेकधा सम्बन्धमुक्त्वा वाक्यमवतारयति *तद्वा इति ॥ तद्वा अस्यैतदाप्तकाममित्यत्रात्मनः सुप्तावाप्तकामत्वं वक्ष्यति । तच्च निर्दुःखस्यैव सम्भवतीति श्येनवाक्यदृष्टान्तेन तत्प्रदर्श्यत इत्यर्थः ॥ २४१ ॥

परिपत्य श्रान्तः सꣳहत्य पक्षौ सल्लयायैव ध्रियत एव
मेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न
कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति ॥ १९ ॥

वा०-नीडे विश्राम्यति श्येनस्तथा सुप्तौ स्वकर्मणः।
क्षये जाग्रत्स्वप्नदुःखं त्यक्त्वा विश्राम्यति स्वयम् ॥२४
कामं कामयते नेति जाग्रद्भोगो निषिध्यते ॥
तद्बान्तरभेदानां बहुत्वात्कंचनेति गीः ॥ २४३ ॥
त्रय आवसथास्तस्य त्रयः स्वप्ना इति श्रुतेः ॥
एकैकस्यामवस्थायामवस्थात्रयमिष्यताम् ॥ २४४ ॥
बुध्यादिषु विलीनेषु लीने चित्प्रतिबिम्बके ॥
जाग्रत्स्वप्नभिदा सर्वा लीयते तत्सुषुप्तकम् ॥ २४५ ॥
आत्मस्वभावो निःशेषः पुंजीकृत्येह लक्ष्यते ॥

अस्मिन्भूताकाशे श्येनो वा सुपर्णो वा मन्दवेगो महाकायः
श्येनः, वेगवानल्पविग्रहः सुपर्ण इति तयोर्भेदः। विपरिपत्य विहृत्य
अतः श्रान्तः सन्पक्षौ संहृत्य संगमय्य, सम्यग्लीयतेऽस्मिन्निति
सल्लयो नीडस्तं प्राप्तुं ध्रीयते स्वयमेवात्मना धार्यते। एवमेवायं पु-
रुष एतस्मा अंताय स्वप्नजागरितयोरवसानमज्ञातं ब्रह्म अन्तःश-
ब्दार्थस्तस्मै धावतीति श्रुत्यक्षरार्थः ॥ १९ ॥

वाक्यार्थमाह *नीड इति ॥२४२॥ यत्र सुप्त इत्यादि व्या-
चष्टे* काममिति ॥ न कञ्चन स्वप्नमित्यत्र कंचनेति विशेषण-
वैयर्थ्यमाशङ्क्याह* तदिति ॥ २४३ ॥ तत्र सप्रमाणं वदन्स्वप्न-
भेदान्दर्शितान्स्मारयति *त्रय इति ॥ २४४ ॥ नन्वेवं सुप्तेरप्यने-
कत्वादस्मिन्वाक्ये कीदृशं सुषुप्तं? तत्राह* बुध्यादिष्विति ॥२४५॥
एवंविधसुप्तिप्रतिपादनफलमाह *आत्मेति । इह सुप्त्यवस्थायाम् ।

सुप्तौ मुक्ताविवाद्वैतस्वप्रभानन्दलक्षणः ॥ २४६ ॥
अविद्या तु स्थिताऽप्यत्र द्वैतदुःखाद्यनुद्भवात् ॥
स्वभावं न तिरोधत्ते स्वप्रभानन्दमद्वयम् ॥ २४७ ॥

श्रुतिः-ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यते ॥

वा०-द्वैतदुःखादिरूपं यत्स्वात्मनः स्वप्नजाग्रतोः ॥
तदविद्योत्थमित्येतत्ता वा अस्येति वर्ण्यते ॥ २४८ ॥
स्थूलदेहस्य नाडीषु रसपूर्णासु सञ्चरन् ॥

आत्मस्वभावमशेषं प्रदर्शयितुं श्येनवाक्यमिति पक्षमुपपाद्य मोक्षदृष्टान्तः सुप्तिरिति प्रदर्शनार्थमिदं वाक्यमित्युक्तं पक्षद्वयमुपपादयति *सुप्ताविति ॥ अत्रात्मेत्यनुषज्यते ॥ २४६ ॥ सुषुप्तेऽविद्याया अनुवृत्तेः कथं तस्य मुक्तिदृष्टान्तत्वमित्याशङ्क्याह *अविद्येति ॥ तत्राविद्यायाः सत्त्वेऽपि निर्दुःखस्वरूपमात्ररूपावस्थानमुभयत्र तुल्यमिति विवक्षितांशसाम्यात्तस्य दृष्टान्तत्वमविरुद्धमिति भावः ॥ २४७ ॥ उत्तरवाक्यतात्पर्यमाह *द्वैतेति ॥ नाडीनामतिसौक्ष्म्यकथनेन तासु रथादेरवस्थानदेशाभावेन स्वप्नमिथ्यात्वे सिद्धे तद्दृष्टान्तेन जाग्रत्यपि द्वैतमिथ्यात्वं सिध्यतीत्यर्थः ॥ २४८ ॥

अस्य स्थूलशरीरस्य हितासंज्ञका नाड्यः अतिसूक्ष्माः शुक्लादिरसैः पूर्णा इति श्रुत्यर्थः ॥ तदुक्तं-भुक्तस्यान्नस्य परिणामविशेषाद्वातबाहुल्येन नीलो भवति, पित्ताधिक्ये पिङ्गलः, श्लेष्माधिक्ये शुक्लः, पित्ताल्पत्वे हरितः, साम्ये च धातूनां लोहित इति वातादीनां

लिङ्गदेहपरिच्छिन्नो भुङ्क्ते भोग्यानि जाग्रति॥२४९
अथ वासनया स्वप्ने घ्नन्तीवैनं स्वशत्रवः ॥
जयंतीव न तं घ्नन्ति न जयंति च वस्तुतः ॥ २५० ॥
भुक्ते कर्मफले लेशो बुद्धिस्थो वासनोच्यते ॥
अविद्योत्कर्षतो भाति जयघातादिवासना ॥ २५१॥
श्रुतिः—अथ यत्र देव इव राजेवाहमेवेदꣳसर्वोऽस्मी-
ति मन्यते सोऽस्य परमो लोकः ॥ २० ॥
वा०-अज्ञाने क्षीयमाणेऽथ जाग्रद्देवादिवासना ॥

मिथः संयोगवैषम्यात्तत्साम्याच्च विचित्राश्चान्नरसा भवन्तीति ॥
अथेत्यादेरर्थं वक्तुमुक्तनाडीषु जागरणे जीवस्थितिप्रकारमा-
ह *स्थूलेति ॥ २४९ ॥ जीवस्य जाग्रत्स्थितिमुक्त्वा स्वाप्नीयस्थितिं
वदन्नथ यत्रेत्यादि व्याचष्टे *अथेति ॥ जिनन्तीत्यस्य व्याख्या
जयन्तीति । इवशब्दसूचितमर्थमाह *न तमिति ॥ २५० ॥ वास-
नयेत्युक्तं वासनास्वरूपं किमित्यपेक्षायामाह *भुक्त इति ॥ भुक्तं
यज्जाग्रत्कर्मफलं तस्य लेशो वासना, सा च स्वप्नभोगदकर्मसहिता-
विद्यया व्यक्ता सती जयादिरूपेण भातीत्यर्थः ॥ २५१ ॥
हन्तीव विच्छाययति विद्रावयतीव गर्तं जीर्णकूपादिकं
तत्र पतंतमिवात्मानमुपलक्षयतीत्यर्थः । किंबहुना यदेव जागरणे
भयं भयहेतु व्याघ्रादि पश्यति तदेवात्र स्वप्नेऽप्यविद्यया तद्भू-
तया वासनया मन्यते न पुनस्तत्त्वतोऽस्तीति भावः ॥
अथ यत्र देव इवेत्यादेरर्थमाह *अज्ञान इति ॥ अज्ञान-
शब्देन तत्कार्यदुर्वासना लक्ष्यते, तदपकर्षानन्तर्यमथशब्दार्थः ।
जागरे देवादिविषयाविद्यावासना स्पष्टा भवति, सा यत्र स्वप्ने
देवोऽस्मीत्यादिमतिं करोति उत्पादयति इति यावत् । सा

मतिं देवोऽस्मि राजाऽस्मीत्येतां स्वप्ने करोति हि॥२५२॥
विद्यायाः परमोत्कर्षे जाग्रत्साक्ष्यात्मवासना ॥
सर्वोऽस्मीति मतिं स्वप्ने करोत्यद्वैतभासिनीम् ॥२५३॥
सर्वात्मभावः परमो लोको बाधविवर्जनात् ॥
बाध्यन्ते देवराजाद्या इवशब्दस्ततः श्रुतः ॥ २५४ ॥
जयघातादिवद्देवराजादेरपि बाधनम् ॥
लोकप्रसिद्धं कुत्रापि सार्वात्म्यं तु न बाध्यते ॥२५५॥
वेदान्तमानसिद्धत्वाज्जागरे तन्न बाध्यते ॥
स्वप्नेऽपि बाध्यते नैतद्यथावस्त्ववभासनात् ॥२५६॥
इदंशब्दोदितं यावज्जाग्रत्सर्वं तदात्मनि ॥
कल्पितं श्रूयते तस्मादहमेवेदमित्यदः ॥ २५७ ॥
यः सर्पो रज्जुरेवैषा यथावस्तुनिरूपणे ॥
तथेदं जगदात्मैव जगन्नैवात्मनः पृथक् ॥ २५८ ॥
अतः सर्वोऽस्मीति मतिर्नैव स्वप्नेऽपि विभ्रमः ॥
तस्यावेदकमानेन जाता धीर्विभ्रमः कथम् ॥ २५९ ॥

च इवशब्दान्मिथ्येति हिशब्दार्थः ॥ २५२ ॥ अहमेवेदमित्या- देरर्थमाह *विद्याया इति ॥ २५३ ॥ सोऽस्य परमो लोको इत्येतद् व्याचष्टे *सर्वेति ॥ २५४ ॥ उक्तमेव व्यनक्ति *जयेति *कुत्रापीति, जागरे स्वप्ने वा॥२५५॥ तदेव विशदयति *वेदांते- ति ॥ २५६ ॥ नन्वहंशब्दस्य कथमहमेवेदमिति इदमा सामाना- धिकरण्यं, जडाजडयोरेकत्वायोगात्तत्राह *इदमिति । अदः, इदं सामानाधिकरण्यमुपपन्नमिति शेषः ॥ २५७ ॥ तदेव दृष्टान्तेन स्पष्टयति *य इति ॥ २५८ ॥ सार्वात्म्यबुद्धेरबाधितत्वमुक्तमुप- संहरति *अत इति ॥ २५९ ॥ उक्तं सार्वात्म्यमनूद्य तत्रानुभवं

परमो लोक इत्युक्त्वा सर्वभावस्य वस्तुना ॥
सुषुप्तौ तत्तु सार्वात्म्यं सर्वैरप्यनुभूयते ॥ २६० ॥
नन्वद्वैतमपि द्वैतं सुप्तसुप्त्योरिहात्मनि ॥
क्रमाद्भात्यत्र किं रूपं तस्येत्याशङ्क्य वर्ण्यते ॥ २६१ ॥
यत्सार्वात्म्यं पुरा प्रोक्तं तदेवाद्वैतमात्मनः ॥
रूपमागमतः स्वानुभूतेश्च पुरुषार्थतः ॥ २६२ ॥

श्रुतिः—तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयꣳ रूपं तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम् ॥

वा०—शास्त्रप्रसिद्धं तच्छन्दः प्राह प्रत्यक्षतां पुनः ॥
एतच्छन्दः पुमर्थत्वमतिच्छन्दादिनोच्यते ॥ २६३ ॥
शिवमद्वैतमित्यादिशास्त्रमुद्घुष्यते बहु ॥
समाधिसुप्त्योरद्वैतं स्वयमेवानुभूयते ॥ २६४ ॥
छन्दः कामः कर्म पापं भयं स्यात्कर्मणः फलम् ॥

प्रमाणयति *परम इति ॥ २६० ॥ उत्तरवाक्यं शङ्कोत्तरत्वेनावतारयति *नन्विति ॥ सार्वात्म्यवदसार्वात्म्यस्याप्यनुभवसिद्धत्वात्किमत्र तत्त्वमित्याशङ्कायामुत्तरवाक्यं प्रवृत्तमित्यर्थः ॥ २६१ ॥ वाक्यतात्पर्यमाह *यदिति । अद्वैतस्यागमसिद्धत्वात्सुप्तावनुभवसिद्धत्वात्परमपुरुषार्थत्वाच्च तदेवात्मनस्तत्त्वं, द्वैतधियः स्वप्नधीवद् भ्रमत्वेनाप्युपपत्तेरिति भावः ॥ २६२ ॥ श्रुत्यक्षराणि व्याकुर्वन्नुक्तमर्थं विशदयति *शास्त्रेति ॥ २६३ ॥ तदेतच्छब्दाभ्यां शास्त्रानुभवसिद्धमद्वैतस्वरूपमित्युक्तं, किं तच्छास्त्रं को वाऽनुभवस्तत्राह *शिवमिति ॥ २६४ ॥ अतिछन्दादिना

अनर्थरूपं त्रितयमद्वैते वीक्ष्यते नहि ॥ २६५ ॥
त्रितयानर्थनिर्मुक्तं नानर्थान्तरयोगि च ॥
इति द्वैतं श्रुतावस्यां वैशब्देन निवर्त्यते ॥ २६६ ॥
कामाद्यनर्थनिर्मुक्तमद्वैतं रूपमात्मनः ॥
तेनानर्थेन संयुक्तं द्वैतमात्मनि कल्पितम् ॥ २६७ ॥
द्वैताप्रतीतौ नानर्थः किं स्यानन्दो महानिति ॥
अत्र लौकिकदृष्टान्तः प्रोच्यते सर्वसंमतः ॥ २६८ ॥
स्त्रिया वियुक्तस्तद्वेदे पश्यन्कामेन पीड्यते ॥
आलिङ्गितस्त्वयैकत्वं प्राप्यानन्देन तृप्यति ॥ २६९ ॥
चित्तानुरागसिद्ध्यर्थं प्रिययेति विशेषणम् ॥
दुष्टायां सत्यपि स्त्रीत्वे चेतो नैवानुरज्यते ॥ २७० ॥
क्षेत्रारामादिकं बाह्यं गृहकृत्यं तथाऽऽन्तरम् ॥
आलिङ्गितः सुखाविष्टो न वेत्ति द्वयमप्यसौ ॥२७१॥

पुमर्थत्वमित्युक्तं स्पष्टयति *छन्द इति ॥ अतिछन्दा इति श्रुतौ दैर्घ्यं छान्दसम् ॥ अतिक्रान्तः छन्दः कामो यस्मात्तदतिच्छन्दः कामवर्जितमिति यावत् । अपहतपाप्मेत्यत्र पाप्मशब्देन पुण्यमपि लक्ष्यते,धर्माधर्मविवर्जितमित्यर्थः ॥ अभयमित्यत्र भयशब्देन कर्मफलं लक्ष्यते, तद्रहितं चात्मस्वरूपमिति यावत् । वीक्ष्यते नहीति हि-शब्देन विद्वत्प्रसिद्धिं सूचयति ॥ २६५ ॥ तद्वा एतदित्यत्र वैश-ब्दार्थमाह *त्रितयेति ॥ २६६ ॥ उक्तहेतुभिरद्वैतस्यात्मस्वरूपत्वे सिद्धे द्वैतधियः स्वप्नधीवत्कल्पितविषयत्वं सिध्यतीत्याह *कामे-ति ॥ २६७ ॥ श्रौतवाक्यमवतारयति *द्वैतेति ॥ २६८ ॥ संपरि-ष्वक्त इत्युक्तेः प्रयोजनमाह* स्त्रियेति ॥२६९॥ प्रिययेति विशे-षणफलमाह *चित्तेति ॥ २७० ॥ न बाह्यं किञ्चन वेद नान्तर-मित्येतद् व्याचष्टे *क्षेत्रेति॥२७१॥ कथं बाह्याद्यवेदनस्यानन्दहेतुत्वं

अवेदनेन तद्वानिषृद्ध्योश्चिन्तां परित्यजेत् ॥
अप्राप्य चित्तविक्षेपं मज्जत्यानन्दसागरे ॥ २७२ ॥
एवं सुप्तौ समाधौ वा ऽऽलिङ्गितः परमात्मना ॥
न बाह्यिर्जागरं नान्तः स्वप्नं च द्वैतमीक्षते ॥ २७३ ॥
आनुकूल्यप्रातिकूल्ये द्वैतादर्शनतो नहि ॥
ततः कामभयाभावादात्मानन्दे निमज्जति ॥ २७४ ॥
श्रुतिः—तद्वा अस्यै तदाप्तकाममात्मकाममकाम
रूपꣳशोकान्तरम् ॥ २१ ॥
वा०- तद्वा अस्येति वाक्येन कामाभावः प्रपञ्च्यते ॥
आत्मरूपं यदद्वैतमाप्तकामं तदीक्ष्यताम् ॥ २७५ ॥
सुषुप्सुश्च समाधित्सुर्बाह्यं कामयते नहि ॥
अपि स्वात्मानमेवात्मा प्राप्त एवाखिलैः सदा॥२७६॥
पूर्वोक्तश्येनदृष्टान्तात्सुषुप्सोः काम आत्मनि ॥
कामाभावे कुतो धावेत् श्येनवत्सहसाऽऽत्मनि॥२७७॥

तत्राह *अवेदनेनेति ॥२७२॥ दृष्टांतं व्याख्याय दार्ष्टांतिकं व्याचष्टे *एवमिति ॥२७३॥ द्वैताप्रतीतौ फलमाह* आनुकूल्येति ॥ ततोऽपि किं तत्राह *तत इति ॥२७४॥ उत्तरवाक्यमवतारयति *तद्वा इति ॥ तत्राप्तकामपदं व्याचष्टे *आत्मेति॥२७५॥अद्वैतात्मस्वरूपस्य कथमाप्तकामतेत्याशङ्क्य काम्यमानत्वान्नित्याप्तत्वाच्चेति मत्वा हेतुद्वयमुपपादयति* सुषुप्सुरिति ॥ उक्तार्थस्य सर्वसंमतत्वद्योती हिशब्दः । काम्यमानत्वमुक्त्वा नित्याप्तत्वमाह* आत्मा प्राप्त इति ॥ २७६ ॥ काम्यमानत्वहेतुरसिद्ध इत्याशङ्क्यात्मकाममित्येतद् व्याकुर्वन्नसिद्धिमुद्धरति *पूर्वोक्तेति। तथाचात्मा सुषुप्सुना काम्यमानः, आत्मनि कामस्यानुभवाद्, अन्यथा सुप्त्यर्थिनस्तत्र श्येनवद्वेगेन प्रवृत्तिर्न स्यादित्यर्थः ॥ २७७॥ उक्तमर्थं हेतु कुर्वन्न-

समाधित्सोरात्ममात्रकामना सर्वसंमता ॥
काम्यात्मप्राप्तिनोऽकामरूपमद्वैतमात्मनः ॥ २७८ ॥
काम्यभोजनतस्तृप्तस्तदा भोज्यं न वाञ्छति ॥
एवं काम्यात्मनि प्राप्ते किमन्यत्काम्यते पुनः ॥२७९॥
आत्मकाममकामं यस्तच्छोकरहितं तदा ॥
शोकान्तरं पृथक् शोकादिति निःशोकतोच्यते॥२८०॥
ननु देहाभिमानश्च धर्माधर्मौ च शोकदाः ॥
यथा जागरणे तद्वत्सुषुप्तौ च प्रसज्यते ॥ २८१ ॥
नैवं पिताऽहमित्यादिदेहस्वभ्रान्तिलोपनात् ॥
पितृत्वयुक्ते देहेऽभिमानः सुप्तस्य नास्ति हि ॥२८२॥
देहाभिमाने सत्येव शोकरागादि सम्भवेत् ॥
नान्यथा परदेहस्थदुःखस्यात्मन्यवेक्षणात् ॥ २८३ ॥
पुत्ररागोऽपि नास्त्यत्र पितृत्वस्यानवेक्षणात् ॥

काममित्यस्यार्थमाह *काम्येति ॥ २७८ ॥ तदेव दृष्टांतेन स्पष्टय- ति* काम्यभोजनेति ॥ २७९ ॥ रूपं शोकान्तरमित्येतद् व्याचष्टे *आत्मेति ॥ शोकांतरमित्यनेन कथं शोकराहित्यमुच्यते तस्य तत्राशक्तत्वादित्याशङ्क्याह* शोकेति ॥ अन्तरशब्दः पृथग्वचनः। तथाचात्मा सुप्तौ शोकात्पृथग्भूत इत्युक्ते शोकसम्बन्धाभावाच्छो- कराहित्यं सिध्यतीत्यर्थः ॥२८०॥ अत्र पितेत्याद्यवतारयितुं व्या- वर्त्यशंकामाह* नन्विति । सुप्तावपि शोकनिमित्तदेहाभिमानादेः सत्त्वेन शोकस्य सम्भावितत्वाच्छोकराहित्योक्तिरयुक्तेत्यर्थः॥२८१॥ देहतादात्म्याभिमानस्य देहोऽहमिति भ्रांतिमूलत्वात्सुषुप्तस्य च भ्र- माभावादभिमान एव नास्ति कुतः शोकादिरिति श्रुतितात्पर्यं दर्श- यन्परिहरति* नैवमिति ॥२८२॥ अभिमानाभावेऽपि शोकादिक- मस्तु इत्याशङ्क्य नेत्युदाहरणमाह *देहेति ॥२८३॥ अभिमाना-

सुप्तः पिताऽहमस्येति न कश्चिदभिमन्यते ॥ २८४ ॥
पुत्रोऽपि मत्पितेत्येवं सुषुप्तौ नाभिमन्यते ॥
श्रुतिः ॥ अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदाः ॥
वा०-स्वत्वस्वकीयताऽभावात्पिता स्यादपिता तथा२८५
देहतद्धर्मराहित्यं सुप्तौ सर्वेष्वपि स्फुटम् ॥
इत्यभिप्रेत्य मात्रादिबहूदाहृतिरीरिता ॥ २८६ ॥
पुत्रकर्मोपास्तिसाध्यास्त्रयो लोकाः पुरा श्रुताः ॥
इन्द्रादिदेवा यष्टव्या अध्येतव्या ऋगादयः ॥२८७॥
साधने यजने पाठे शोकोऽस्तीति न शङ्क्यताम् ॥
यतो लोकादयो लीनाः सुषुप्तौ परमात्मनि ॥२८८॥
देहतद्धर्मलोकादिरूपं जागरणे जगत् ॥
भोगाय कर्मणाऽऽरब्धं क्षीणे कर्मणि लीयते॥२८९॥
श्रुतिः-अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चांडालोऽचांडालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति ॥ २२ ॥
वा०—स्तेनभ्रूणघ्नचाण्डालपुल्कसाः पापिनो यतिः ॥

भावादेव रागाद्यनर्थोऽपि तदा नास्तीत्याह* पुत्रेति ॥ अभिमानाभावमेवाह *सुप्त इति ॥ २८४ ॥ उक्तमर्थं संक्षिपन्नक्षराणि व्याचष्टे* स्वत्वेति ॥ २८५ ॥ अत्रानेकोदाहरणस्य तात्पर्यमाह* देहेति ॥ २८६ ॥ लोका अलोका इत्यादिवाक्यत्रयं व्याचष्टे *पुत्रेतिद्वाभ्याम् ॥ २८७ ॥ २८८ ॥ सुप्तौ तेषां लये हेतुमाह*देहतद्धर्मेति ॥ २८९ ॥ अत्र स्तेनोऽस्तेनो

॥ श्रमणस्तापसश्च पुण्यात्मा सुप्तिः सर्वेष्वसौ समा ॥२९०॥
तदा देहाभिमानस्तु क्षीणस्तत्कर्मसंक्षयात् ॥
पुण्येन पाप्मनाऽनन्वागतं रूपं परात्मनः ॥ २९१ ॥
॥ हृदयाख्यं मनस्तस्य पुण्यपापे ततोऽखिलाः ॥
शोका मनोगताः, शोकान्सर्वानात्माऽतिवर्तते॥२९२॥
शोका बुध्यात्मतादात्म्यभ्रमादात्मनि कल्पिताः ॥
बुद्धेर्लये तु तन्निष्ठशोकानां युज्यते लयः ॥ २९३ ॥
॥ सर्वेषामनुभूत्याऽपि प्रसिद्धः शोकसंक्षयः ॥
तां प्रसिद्धिं हिशब्देन विशदीकुरुते श्रुतिः ॥ २९४ ॥
ननु शोकादिवत्सुप्तौ चैतन्यमपि लुप्यते ॥
सुप्तो न पश्यतीत्येवमाहुः सर्वेऽपि लौकिकाः ॥२९५॥
॥ आत्मन्यदृष्टवशतो ज्ञानमिच्छादिवद्भवेत् ॥

भवतीत्यादेरर्थमाह* स्तेनेति ॥ चाण्डालः पौल्कस इति स्वार्थे वृद्धिः ॥ २९० ॥ श्रमणो यतिस्तापसो वनस्थः । कथं सर्वेषु सुप्तेः साम्यं तत्राह* तदेति ॥ सुप्तिदशायां चाण्डाला- द्यभिमानाभावात्तत्प्रयुक्तदुःखं नास्तीति दुःखाद्यभावसाम्यात्स- र्वेषां सुप्तिः समेत्यर्थः ॥ अनन्वागतं पुण्येनेत्यादेरर्थमाह *पुण्येने- ति ॥ अनन्वागतमसम्बद्धम् ॥२९१॥ असम्बन्धे हेतुस्तीर्णो हीत्यादि। तद्व्याचष्टे *हृदयेति द्वाभ्याम् ॥ सुप्तौ मनसि लीने तत्सम्बन्धि- पुण्यापुण्यतत्फलान्यपि लीनत्वात्तद्धर्म्यात्मनोऽभिमानाभा- वात्तदानीमात्मनः कर्मतत्फलासम्बन्धित्वं युक्तमित्यर्थः ॥ २९२ ॥ २९३ ॥ तीर्णो हीत्यत्र हिशब्दसूचितमर्थमाह* सर्वेषामिति ॥ २९४ ॥ यद्वै तदित्यादेः पातनिकामाह *नन्विति ॥ २९५ ॥ सुप्तौ चैतन्यं ना- स्तीत्यत्र लोकप्रसिद्धिमुक्त्वा प्रतिपत्तिमप्याह* आत्मनीति ॥

इत्याहुस्तार्किकाः सुप्तौ न ज्ञानं कर्मसङ्क्षयात् ॥ २९६ ॥
श्रुतिः—यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति ॥
वा०-यद्वै तन्नेत्यादिवाक्यैरस्योत्तरमुदीर्यते ॥
न चिल्लोपः किन्तु बुद्धेर्लोप इत्येतदुत्तरम् ॥ २९७ ॥
तच्छब्दः सुप्तिमाचष्टे वैशब्दोऽवधृतौ भवेत् ॥
तत्र सुप्तौ पुमान्नैव पश्यतीति जना जगुः ॥ २९८ ॥
अदर्शनं सर्वथेति यदाहुरविवेकिनः ॥
तद्विवेच्यं तथा चात्मा पश्यन्नेव न पश्यति ॥ २९९ ॥
श्रुतिः—न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशि-
त्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् २
वा०-पश्यन्नेव कथं सुप्त इति चेदभिधीयते ॥
द्रष्टुर्न लुप्यते दृष्टिर्यस्मात्पश्यन्नतः स्थितः ॥ ३०० ॥
को द्रष्टा का च सा दृष्टिर्या न लुप्तेति तच्छृणु ॥

ज्ञानस्याहङ्कारायत्तत्वे फलितमाह *सुप्तौ नेति ॥ २९६ ॥ २९७ ॥ एवं पातनिकामुक्त्वा वाक्यं तत्र पातयन् वाक्यतात्पर्यमाह* तच्छब्द इति ॥ यद्वै तदित्यत्र तच्छब्देन सुप्तिकाल उच्यते, वैशब्दोऽवधारणार्थ इत्यर्थः ॥ लोकसिद्धार्थानुवादको यच्छब्द इति मत्वाऽपेक्षितं पूरयन्वाक्यं योजयति *तत्रेति ॥ २९८ ॥ उक्तमेवार्थं व्यक्तीकुर्वन्पश्यन्नित्यादिश्रुत्युक्तिं व्याचष्टे *अदर्शनमिति ॥ २९९ ॥ नहीत्यादिवाक्यमाकांक्षापूर्वकमादत्ते* पश्यन्निति ॥ द्रष्टुर्बुद्ध्युपाधिकचैतन्यस्य भासिका या दृष्टिः शुद्धाचिदात्मकसाक्षी स यस्मात्सुप्तावपि पश्यन्नेव स्थितस्तस्मात्साक्ष्यात्मकदृष्टिर्न लुप्यत इत्यर्थः ॥ ३०० ॥ उक्तमर्थमाकाङ्क्षापूर्वकं विशदयितुमुपक्रमते *क इति ॥ तत्र द्रष्टृपदं व्याचष्टे* दर्शनस्येति ॥

दर्शनस्य क्रिया कर्त्ता द्रष्टा स्याद्बुद्ध्युपाधिकः॥३०१॥
चक्षुर्द्वारा धियो वृत्तिर्निर्गता रूपभासिनी ॥
दर्शनस्य क्रिया, तस्याः कर्ताऽऽत्मा बुद्धिसंयुतः ॥३०२॥
प्रज्ञया चक्षुरारुह्य चक्षुषा रूपमीक्षते ॥
इत्येषा प्रक्रिया स्पष्टं श्रुता कौषीतकीश्रुतौ ॥३०३॥
पश्यामीत्यभिमानो यश्चक्षुरारोहणं हि तत् ॥
अभिमानश्च नायं मे किन्त्वसौ बुद्ध्युपाधिके ॥३०४॥
तस्य द्रष्टुर्भासिका या चिदेषा दृष्टिरुच्यते ॥
तदेतत्साक्षिचैतन्यमित्याहुर्वेदवादिनः ॥ ३०५ ॥
साक्षी चेता केवलश्चेत्यादिवाक्यमधीयते ॥
किञ्चानुव्यवसायोऽयमित्याहुस्तार्किका अपि ॥३०६॥
व्यवसायो बुद्धिवृत्तिर्दृश्यमात्रावभासिका ॥
द्रष्टृदर्शनदृश्यानि भान्त्यनुव्यवसायतः ॥ ३०७ ॥
जिघ्राणीममहं गन्धमिति यो वेत्ति तद्वयम् ॥

अत्र दर्शनशब्दः कर्मल्युत्पत्त्या रूपादिवचनः, करणल्युत्पत्त्या नेत्रवचनो वा, तत्सम्बन्धिनी या क्रिया अन्तःकरणवृत्तिस्तस्याः कर्ता द्रष्टृशब्देनोच्यते, स चांतःकरणावच्छिन्नएवेत्यर्थः ॥३०१॥ उक्तमेव व्यनक्ति *चक्षुरिति ॥ ३०२ ॥ बुद्ध्युपाधिक एव द्रष्टेत्यत्र मानमाह* प्रज्ञेति ॥ ३०३ ॥ उदाहृतश्रुतेरर्थमाह *पश्यामीति ॥ चक्षुषा पश्यामीत्यभिमान एवोक्तश्रुतेरर्थोऽस्तु, तथापि कथमवच्छिन्नस्यैव द्रष्टृत्वं तत्राह* अभिमान इति ॥३०४॥ एवं द्रष्टृपदं व्याख्याय दृष्टिपदं व्याचष्टे *तस्येति॥३०५॥ दृष्टिशब्दितचितः साक्षित्वे मानमाह* साक्षीति॥ द्रष्टृभासकचैतन्यसद्भावे वादिसंमतिमप्याह* किञ्चेत्यादिना ॥ ३०६ ॥ ३०७ ॥ गन्धेष-

स आप्नोति अगस्त्यस्य छन्दोगाः साक्षिणं जगुः ॥ ३०८ ॥
ननु साक्षिण्यसङ्गेऽयं दृष्टिशब्दो न युज्यते ॥
दृशिधातोः क्रियार्थत्वाद्भावः प्रत्ययस्य च ॥ ३०९ ॥
बाढं चाक्षुषधीवृत्तिं दृष्टिशब्दः क्रियां ब्रुवन् ॥
भास्यभासकसम्बन्धाल्लक्षयेद् दृष्टिसाक्षिणम् ॥ ३१० ॥
अक्रियाकर्तुरप्यस्ति भासकत्वं चिदात्मनः ॥
अदीपकर्ताऽप्यादित्यो जगद्दीपयते यथा ॥ ३११ ॥
दीपकत्वोपचारोऽस्मिन्भास्यसन्निधिमात्रतः ॥
इति भासकत्वं च चिदात्मन्युपचर्यताम् ॥ ३१२ ॥

श्रुतिः—यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥ २४ ॥

यद्वै तन्न रसयते रसयन्वै तन्न रसयते न हि रस-

मपि द्रष्टृदर्शनदृश्यभासकचैतन्यमात्रं सिद्धं ननु तस्य साक्षित्वं, तस्य परैरनभ्युपगमादित्याशङ्क्याह *जिघ्रतीति ॥ ३०८ ॥ क्रिया-वाचिदृष्टिशब्दस्य तद्विलक्षणसाक्षिवाचकत्वमयुक्तम् । उक्तश्रुतिर-र्थेन एवमन्यपरेति मत्वा शङ्कते *नन्विति । असङ्गे हेतूपराग-रहिते निर्विकार इति यावत् ॥ तद्भावः क्रियारूपत्वं दृष्टिरित्यत्र दृशिधातोरिव क्तिन्प्रत्ययस्य च क्रियामात्रवाचित्वादित्यर्थः ॥ ३०९ ॥ दृष्टिशब्दस्य क्रियार्थत्वमङ्गीकृत्य परिहरति *बाढमिति ॥ ३१० ॥ साक्षिणो भासनक्रियाकर्तृत्वाभावे भासकत्वमप्यनुपपन्नमित्याशङ्क्य दृष्टान्तेन समाधत्ते* अक्रियेत्यादिना ॥ ३११ ॥ ३१२ ॥ उक्तन्यायमन्यत्राप्यतिदिशति *यद्वै इति ॥ यथा चक्षुर्जन्य-वृत्तिसाधकेन दृष्टिशब्देन तद्भासकसाक्षी लक्ष्यते, तद्वद्घ्राणे-

यितू रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत् ॥ २५ ॥

यद्वै तन्न वदति वदन्वै तन्न वदति नहि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥ २६ ॥

यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति नहि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥ २७ ॥

यद्वै तन्न मनुते मन्वानो वै तन्न मनुते नहि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥ २८ ॥

यद्वै तन्न स्पृशति स्पृशन्वै तन्न स्पृशति नहि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥ २९ ॥

यद्वै तन्न विजानाति विजानन्वै तन्न विजानाति नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥ ३० ॥

वा०—लक्ष्यश्चाक्षुषधीवृत्तिद्वाराऽऽत्मा दृष्टिशब्दतः ॥
तथैवमन्यधीवृत्तिद्वारा घ्रात्यादिशब्दतः ॥ ३१३ ॥
दृष्टिघ्रात्यादिभिः शब्दैर्लक्षितश्च चिदात्मकः ॥

रित्वादौ घ्राणादिजन्यधीवृत्तिवाचकेन घ्रात्यादिशब्देनापि तद्भासकसाक्षी लक्ष्यत इत्यर्थः ॥३१३॥ दृष्टिपदं व्याख्याय विपरिलोपो न विद्यत इत्येतद्व्याचष्टे *नहीति । तस्य लोपे बाधकमाह

न लुप्यतेऽन्यथा स्वापो न सिध्येत्स्मृत्यसम्भवात् ॥ ३१४
असन्दिहानाः सर्वेऽपि स्मरन्त्यस्वाप्समित्यसौ ॥
स्मृतिर्न संभवेत्सुप्तौ चिदात्मानुभवं विना ॥ ३१५
न बुद्धिवृत्त्यनुभवः सुप्तौ बुद्धेर्विलोपनात् ॥
तदलोपे कुतः सुप्तिरैक्यं स्यात्स्वप्नजाग्रतोः ॥ ३१६ ॥
दृष्टिवाचकशब्देन दृष्टिसाक्ष्युपलक्षणात् ॥
विशब्देनात्र चैतन्यलोपशङ्का निवर्तिता ॥ ३१७ ॥
नो चेत्सुप्तिं प्रकाश्योर्ध्वं लुप्येतेत्यपि शङ्कितं ॥
चिदलोपं साधयितुमविनाशित्वहेतुगीः ॥ ३१८ ॥
अविनाशी चिदात्माऽयं नाशहेतोरसम्भवात् ॥
तन्नाशकमदृष्टं स्यान्नात्मनोऽकर्मजत्वतः ॥ ३१९ ॥
दाहच्छेदादिहेतूनां दृष्टानामप्यसम्भवः ॥

---

*अन्यथेति ॥ ३१४ ॥ उक्तमेव प्रकटयति *असन्दिहाना इति ॥ ३१५ ॥ आगंतुकज्ञानेन सुप्तिसिद्धिमाशङ्क्य निराह* नेति । मा भूत्तर्हि सुप्तिसिद्धिस्तत्राह *ऐक्यमिति ॥ तथा चर्मानद्धविरोधोऽनुसन्धानविरोधोऽपीति भावः ॥ ३१६ ॥ विपरिलोप इत्यत्राद्योपसर्गेण विवक्षितार्थमाह* दृष्टीति ॥ ३१७ ॥ सुप्तिस्मृत्यन्यथानुपपत्त्या तस्यानित्यत्वनिराकरणात्कथं तल्लोपशंके त्याशङ्क्याह* नो चेदिति । नहीत्यादिवाक्यं सपरिकरं व्याख्या याविनाशित्वादिति व्याचष्टे* चिदिति ॥ ३१८ ॥ दृष्टेर्लुप्यतेऽविनाशित्वादित्यत्र साध्याविशेषमाशङ्क्य साध्यहेतू विभजते *अविनाशीति ॥ हेत्वसिद्धिमाशङ्क्याऽदृष्टं दृष्टं वाऽऽत्मनाशकं तत्राद्यं प्रत्याह* तन्नाशकमिति ॥ ३१९ ॥ अन्त्यं प्रत्याह *दाहेति । आत्मनो नाशादिकं नेत्यत्र भगवद्वाक्यमपि प्रमा

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ॥३२०॥
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ॥
अनाशिनोऽप्रमेयस्येत्येवं कृष्णेन भाषितम् ॥ ३२१ ॥
नन्वनाशी चिदात्माऽयं पश्यन्नास्ते यदा तदा ॥
न पश्यतीति लोकाश्च तार्किकाः कथमूचिरे ॥३२२॥
अव्युत्पन्नास्त्विति प्राहुस्त्रिपुट्यास्तत्र लोपनात् ॥
चितोऽन्यस्याखण्डं तत्तु द्रष्ट्रादि त्रितयं नहि ॥ ३२३ ॥
बुद्धितद्वृत्तिविषया द्रष्टृदर्शनदृश्यकाः ॥
प्रसिद्धा जागरे तस्मात्तदव्युत्पत्तिलक्षणा स्फुटा ॥३२४॥
बुद्धिर्जडाऽपि चिच्छायावशतो द्रष्टृतां व्रजेत् ॥
पश्यतीत्येव शब्दोऽतस्तस्मिन्नेव प्रयुज्यते ॥ ३२५ ॥

णयति* अच्छेद्य इत्यादिना ॥३२०॥३२१॥ चिदात्मनः सुप्तावलुप्तत्वे तत्र चिल्लोपप्रसिद्धेः का गतिरिति शङ्कते *नन्विति ॥ ३२२ ॥ तत्र लोकप्रसिद्धिं तावदन्यथयति *अव्युत्पन्ना इति ॥ चिति लुप्तामिति शेषः । सुप्तिः सप्तम्यर्थः । सुप्तौ चैतन्यातिरिक्तत्रिपुटीशब्दितानां मातृमानमेयानामभावः सर्वानुभवसिद्ध इत्याह *चितोऽन्यदिति ॥ ३२३ ॥ इदानीं त्रिपुटीस्वरूपं स्पष्टयंस्तल्लोपादेव सुप्तौ चिल्लोपभ्रमं सम्भावयति *बुद्धीति ॥ ३२४ ॥ बुद्धेः कथं द्रष्टृत्वं तस्य चेतनधर्मत्वादत आह* बुद्धिरिति। चैतन्यतादात्म्याध्यासात् बुद्धेरपि द्रष्टृत्वे फलितमाह *पश्यतीति। तथा च सुप्तौ बुद्धिनाशान्न पश्यतीति प्रसिद्धिरुपपन्ना इति भावः ॥ ३२५ ॥ बुद्धिनाशेऽपि सुप्तौ साक्षिणः स्वरूप पश्यतीति यथाऽनुपपन्नेति शङ्कते* नन्विति

ननु मा भूत्पश्यतीति सुषुप्तौ दृष्टृगोचरः ॥
साक्षिणि द्रष्टृताऽध्यासात्पश्यतीति प्रयुज्यताम् ॥ ३२६ ॥
मैवं द्वितीयं द्रष्टव्यं साक्षिणोऽत्र न विद्यते ॥
कथं सकर्मको धातुः कर्माभावे प्रयुज्यताम् ॥ ३२७ ॥
जागरे तु चितोऽन्यद्यज्जडं त्रेधा विभज्यते ॥
तदनुव्यवसायस्य विषयं कर्मकारकम् ॥ ३२८ ॥
तत्कर्मकारकं सुप्तौ द्वितीयं नैव विद्यते ॥
अतो न पश्यतीत्येवमाहुर्लौकिकतार्किकाः ॥ ३२९ ॥
यो बुद्ध्युपाधिको द्रष्टा सुप्तत्वात्स न पश्यति ॥
चिदात्माऽपि द्वितीयस्याभावादत्र न पश्यति ॥ ३३० ॥
चिल्लोपाभावतः साक्षी पश्यन्नेवेत्युदीर्यते ॥
अकर्तर्यपि कर्तृत्वारोपणात्तदुदीरणम् ॥ ३३१ ॥
भर्तृप्रपञ्चस्त्वाहास्ति वस्तुतः कर्तृताऽऽत्मनि ॥
दाहशक्तिर्यथा वह्नेः कर्तृशक्तिस्तथा चिति ॥ ३३२ ॥
नित्या ज्ञानगुणा दृष्टिरस्त्यतोऽस्य चिदात्मनः ॥
न पश्यति तथा पश्यन्नेवेत्यपि समञ्जसम् ॥ ३३३ ॥

॥ ३२६ ॥ ननु तद् द्वितीयमस्तीत्याद्युत्तरवाक्यमादाय परिहरति *मैवमिति ॥ ननु प्रकाश्याभावेऽपि दीपः प्रकाशत इतिवत् द्रष्टव्याभावेऽपि पश्यतीति प्रयोगोऽस्तु, तत्राह* कथमिति ॥३२७॥ सुप्तो न पश्यतीत्यत्र वादिप्रसिद्धिमप्युपपादयति* जागर इत्यादिना ॥ ३२८ ॥ ३२९ ॥ उक्तमर्थं पुनः संगृह्य दर्शयति *य इति ॥ ३३० ॥ सुप्तौ विशेषज्ञानाभावे पश्यन्निति शास्त्रस्थः प्रयोगः कथमित्याशङ्क्योपचारादित्याह *चिल्लोपेति ॥ ३३१ ॥ पश्यन्नेवेति पश्यतीत्यत्र परोक्तमर्थं दूषयितुं तदुक्तिमनुवदति* भर्तृप्रपञ्च इत्यादिना ॥ ३३२ ॥ ३३३ ॥ अन्यात्मनः स्वभावतः कर्तृशक्तियुक्त-

न पश्यतीति तस्योक्तिर्द्वितीयाभावतो भवेत् ॥
ज्वलन्नपि यथा वन्हिर्दाह्याभावान्न दाहकः ॥ ३३४ ॥
नैतद्युक्तं तत्त्ववादिबहुश्रुतिविरोधतः ॥
केवलो निर्गुणोऽसङ्गो नेतिनेत्यादिका श्रुतिः ॥३३५॥
अवाङ्मनसगम्यं यन्निर्गुणं ब्रह्म वर्ण्यते ॥
तदेव ह्यात्मनस्तत्त्वमन्यन्मायाविजृम्भितम् ॥ ३३६ ॥
द्रष्टुरित्यादिशब्दानामर्थः पूर्वमुदीरितः ॥
तस्मात्सुप्तौ चिदद्वैतं यत्तद्रूपं परात्मनः ॥ ३३७ ॥
एतद् द्रढयितुं प्रोक्ताः पर्याया बहवः श्रुतौ ॥
यद्वै न जिघ्रतीत्यादौ योजना दृष्टिवाक्यवत् ॥३३८॥
अन्धादेर्दृष्ट्यभावेऽपि गन्धादिज्ञानमस्ति हि ॥
मा भूत्तथेत्यभिप्रेत्य प्रोक्तं सर्वाक्षलोपनम् ॥ ३३९ ॥
मतिर्विज्ञातिरित्येते चित्तस्यैव क्रिये उभे ॥
संशयो निश्चयश्चेति तयोर्भेदोऽवगम्यते ॥ ३४० ॥

त्वान्नित्यज्ञानवत्त्वाच्च पश्यन्निति प्रयोगसम्भवेऽपि न पश्यतीति कथमुच्यते, तत्राह *नेति । तत्रैव दृष्टान्तमाह* ज्वलन्निति ॥ ३३४ ॥ नेयं कल्पना श्रुतिविरुद्धत्वाच्छोभन इति दूषयति *नेति ॥ श्रुतिविरोधमेव प्रकटयति* केवल इति ॥ श्रुतिरित्यत्रानया श्रुत्येति शेषः ॥ ३३५ ॥ ब्रह्मण एकरूपत्वेऽपि जीवस्य किमायातं तत्राह *तदिति ॥ ३३६ ॥ द्रष्टृत्वादिधर्मरहितत्वे फलितमाह *तस्मादिति ॥ ३३७ ॥ यद्वै तन्न जिघ्रतीत्याद्यनेकपर्यायकथनतात्पर्यमाह *एतदिति ॥ ३३८ ॥ अनेकपर्यायोक्तेस्तात्पर्यान्तरमाह *अन्धादेरिति ॥३३९॥ अत्र मन्तुर्मतेर्विज्ञातुर्विज्ञातेरिति पर्यायद्वयकथनस्य पौनरुक्त्यमाशङ्क्य परिहरति *मतिरिति ॥३४०॥ तयोरेवार्थान्तरमाह *इदमिति ॥ अत्र

इदंबुद्धिरहंबुद्धिरिति वा तद्विदेष्यताम् ॥
अनात्मविषयेदन्धीरहंधीरात्मगोचरा ॥ ३४१ ॥
धीवृत्तित्वेऽपि दृष्ट्यादिर्जन्यते बहिरिन्द्रियैः ॥
वस्तुस्मृतिरहंधीश्च न जन्ये चक्षुरादिभिः ॥ ३४२ ॥
सर्वेन्द्रियव्यवहृतेर्लोपादद्वैतता चितः ॥
सुषुप्तावनुभूतेति स्वात्मरूपं तदीर्यते ॥ ३४३ ॥

श्रुतिः—यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् ॥ ३१ ॥

वा०—ननु सर्वजनैर्द्वैतं जागरे स्पष्टमीक्ष्यते ॥
सद्वैत एव किं न स्यादात्मेत्याशङ्क्य वर्ण्यते ॥ ३४४ ॥
यत्रैव जागरे स्वस्मादन्यत्किञ्चिदिति भ्रमः ॥
तत्रैवान्यः स्वयं द्रष्टा दृश्यमन्यदपेक्ष्यते ॥ ३४५ ॥
द्वैतभ्रमस्य सिध्यर्थमिवशब्दः प्रयुज्यते ॥
स्वप्नभ्रान्तेर्वर्णनार्थमिवशब्दोक्तिदर्शनात् ॥ ३४६ ॥

मतिशब्देनानात्मविषयस्मृतिरुच्यते, विज्ञातिशब्देनाहमाकारान्तःकरणवृत्तिरिति भेदः ॥ ३४१ ॥ अनयोर्वृत्त्योर्दृष्टिघ्रात्यादिवृत्तिभ्यो वैलक्षण्यं चास्मिन्पक्षे सिध्यतीति विशेषमाह *धीवृत्तीति ॥ ३४२ ॥ प्रकृतवाक्यतात्पर्यमुपसंहरति *सर्वेति ॥ ३४३ ॥ शङ्कापूर्वकं यत्र वा अन्यदिवेत्याद्यवतारयति *नन्विति ॥ ३४४ ॥ अक्षराणि व्याचष्टे *यत्रेति ॥ ३४५ ॥ अन्यदिवेत्यत्र इवशब्दार्थमाह *द्वैतेति ॥ इवशब्दप्रयोगमात्रेण कथं द्वैतमिथ्यात्वं तत्राह *स्वप्नेति ॥ ३४६ ॥ इवार्थमभिनयति *आरुक्षु-

आरुक्षुमिव शैलाग्रमद्राक्षमिव काननम् ॥
इत्यादिवचसा स्वप्नं वर्णयन्ति हि लौकिकाः ॥३४७॥
बाध्यते जाग्रति स्वप्नः स्वप्ने जाग्रच्च बाध्यते ॥
चिदद्वैतं तु न क्वापि बाध्यते वास्तवं ततः ॥ ३४८ ॥
चितो न बाधकं द्वैतं चित्प्रसादेन भासनात् ॥
अबाध्यत्वाद्वास्तवत्वं चिदद्वैतस्य सुस्थितम् ॥ ३४९ ॥
श्रुतिः-सलिल एको द्रष्टाऽद्वैतो भवति ॥
वा०-यद्वै तदित्युपक्रम्य व्याख्यातं वस्तु विस्तरात् ॥
सलिलादिगिरा तस्य क्रियते ह्युपसंहृतिः ॥ ३५० ॥
आत्मा सलिलवच्छुद्धः कार्यकारणहानतः ॥
स्वतोऽवबोधमात्रत्वात्कुतोऽविद्यादिसङ्गतिः ॥३५१॥
अन्तरेणापि सम्बन्धं कार्यकारणवस्तुनः ॥

मिति । उत्तेव महाराज इत्यादिश्रुतिप्रसिद्धिसूचनार्थो हि-शब्दः ॥ ३४७ ॥ किञ्च बाधितत्वाच्च न द्वैतस्य सत्यतेत्याह *बाध्यते इति । सुप्तशब्दो मुक्तेरुपलक्षणम् ॥ ३४८ ॥ न केवलं बाधानुपलम्भाददद्वैतस्याबाध्यत्वं, किन्तु बाधहेत्वनिरूपणाच्चे-त्याह *चित इति । द्वैतोत्पत्तिविनाशसाक्षित्वेन कालत्रयेऽपि स्व-तश्चैतन्यस्य न द्वैतेन बाधसम्भव इत्यर्थः । बाधाभावे फलितमाह *अबाध्यत्वादिति ॥ ३४९ ॥ सलिलादिवाक्यं तात्पर्योक्तिपूर्व-कमादत्ते *यदिति ॥३५०॥ तत्र सलिलशब्दस्य विवक्षितमर्थ-माह *आत्मेति ॥ अविद्याद्वारा जगद्धेतुत्वादात्मनः कथं तत्स-म्बन्धाभावस्तत्राह *स्वत इति ॥ वास्तवसम्बन्धाभावेन शुद्ध-त्वोक्तिर्युक्तेति भावः ॥ ३५१ ॥ एकशब्दमाशङ्कोत्तरत्वेनो-

स्वतोऽनेकात्मकं तत्स्यादित्याशङ्क्यैकतोच्यते ॥३५२॥
न कपित्थादिवत्तत्त्वं स्वतोऽनेकस्वभावकम् ॥
अखण्डैकरसे तस्मिन् कुतः स्यात्स्वगता भिदा॥३५३
सजातीयनिषेधो वा ह्येकशब्देन भण्यते ॥
सलिलोक्त्या विजातीयसम्बन्धो विनिवारितः॥३५४
एकशब्दो न संख्यार्थः संख्येयासम्भवादिह ॥
अद्वितीयत्वमेवार्थो द्वितीयार्थनिषेधतः ॥ ३५५ ॥
सदेवेत्यादिना चास्य तथा सत्यविरुद्धता ॥
प्रत्यङ्मात्रावसायित्वं प्रत्यग्दृष्टेः प्रसिध्यति ॥ ३५६ ॥
अकारकस्वभावत्वमद्रष्टेत्याभिधीयते ॥
यत्र हि द्वैतमित्युक्तेर्यत्र त्वस्येति चेरणात् ॥ ३५७ ॥
स्वतः पूर्णात्मकं ज्योतिर्यद्द्रष्टेति चोच्यते ॥

स्थापयति *अन्तरेणेति ॥३५२॥ तस्यार्थमाह *नेति ॥३५३॥ एकशब्दस्यार्थान्तरमाह *सजातीयेति । एकशब्दस्यात्मभेदमात्रनिरासार्थत्वे कथमनात्मभेदनिषेधसिद्धिस्तत्राह *सलिलेति ॥ ३५४ ॥ एकपदस्य संख्यावाचिनो गुणगुणिसम्बन्धपरत्वान्न विवक्षितार्थतेत्याशङ्क्याह *एकेति । इहेत्यात्मोक्तिः । नहि तस्मिन्नेकत्वगुणः, निर्गुणत्वश्रुतेरित्यर्थः ॥ संख्यावाचित्वासम्भवे सिद्धमाह *अद्वितीयेति ॥३५५॥ एकशब्दस्य वृद्धव्यवहारे संख्यावाचित्वसिद्धेर्नाद्वितीयार्थतेत्याशङ्क्य श्रुत्यन्तराविरोधान्मैवमित्याह *सदिति । तथा सति एकपदस्याद्वितीयार्थत्वे सतीति यावत् ॥३५६॥ एको द्रष्टेत्यत्राद्रष्टेति पदच्छेदं कृत्वा तस्यार्थमाह *अकारकेति ॥ द्रष्टेतिपदच्छेदपक्षे तस्यार्थमाह *यत्रेति यत्पूर्णात्मकं ज्योतिः तदेव द्रष्टृशब्देन लक्षणयोच्यत इत्यर्थः

अविद्याकार्यराहित्यादद्वैतोऽयं भवेत्स्वतः ॥ ३५८ ॥
द्विधेतं द्वितमित्याहुस्तद्भावो द्वैतमुच्यते ॥
तन्निषेधेन चाद्वैतं प्रत्यग्वस्त्वभिधीयते ॥ ३५९ ॥
प्रत्यग्दृष्ट्यव्यवाहितेः प्रत्यक्षादात्मवस्तुनः ॥
एष इत्यात्मनिर्देशो यत्साक्षादिति च श्रुतेः ॥३६०॥
श्रुतिः—एष ब्रह्मलोकः सम्राडिति हैनमनुशशास
याज्ञवल्क्य एषास्य परमा गतिरेषास्य परमा संपत् ॥
वा०—अव्यावृत्तानन्नुगतं निःसामान्यविशेषवत् ॥
ब्रह्मेति मुख्यवृत्त्येह वस्तु श्रुत्याऽभिधीयते ॥ ३६१ ॥
तथा लोकयतेर्धातोर्दर्शनार्थत्वहेतुतः ॥
प्रकृतत्वात्तथा दृष्टेर्लोकनं लोक उच्यते ॥ ३६२ ॥

॥३५७॥ अद्वैतो भवतीत्यत्राद्वैतशब्दार्थमाह *अविद्येति॥३५८॥ ननु नञर्थत्रैविध्यादन्यतमानिर्द्धारणादृते कथमद्वैतं निर्धार्यते इत्याशङ्क्य द्वैतशब्दस्यावयवशोऽर्थं वदन्तदभावोऽद्वैतमित्याह *द्विधेति॥ अद्वैतस्य विरहात्मकाभावावसानत्वं व्यावर्त्तयति *प्रत्यगिति॥३५९॥ एष ब्रह्मलोक इत्यादिवाक्यस्थमेषशब्दं व्याचष्टे *प्रत्यग्दृष्टीति । आत्मन एषशब्दार्हत्वे प्रत्यक्षत्वं हेतुः, तत्र चाव्यवहितत्वमित्युक्त्वा तस्य प्रत्यक्षत्वे श्रुतिमप्याह *यदिति ॥ ३६० ॥ ब्रह्मशब्दार्थमाह *अव्यावृत्तेति ॥ तत्र हेतुः निःसामान्येति । कमलासनादिवाचकब्रह्मशब्दादस्य विशेषमाह *मुख्येति । इहेति ब्रह्मलोकशब्दनिर्देशः । अव्यावृत्तानन्नुगतं वस्तु ब्रह्मेति श्रुत्योच्यते इत्यर्थः ॥३६१॥ लोकशब्दस्य भोगभूमिविषयत्वं प्रकरणादिना व्यावर्त्तयन् विवक्षितमाह *तथेति ॥३६२॥ अवयवार्थमुक्त्वा ब्रह्मलोकशब्दस्य समासमाह *कर्मे-

कर्मधारय एवातः समासोऽत्रोपपद्यते ॥
नतु षष्ठीसमासोऽत्र विभागस्याप्रसिद्धितः ॥ ३६३ ॥
ब्रह्मणो लोक इत्युक्ते भाति ब्रह्मचितोर्भिदा ॥
प्रज्ञानघन इत्यादिवाक्यैस्तत्र विरुध्यते ॥ ३६४ ॥
ब्रह्मैव लोक इत्युक्ते प्रज्ञानघनता स्फुटा ॥
एतच्छब्दब्रह्मलोकशब्दावैकात्म्यभासकौ ॥ ३६५ ॥
न प्रत्यग्व्यतिरेकेण ब्रह्मत्वमुपपद्यते ॥
ब्रह्मणो व्यतिरेकेण प्रत्यक्त्वं न चितस्तथा ॥ ३६६ ॥
अनयोरैक्यसंमोहात्परोक्षत्वयकल्पने ॥
संसारोऽयमतो मोहसमुच्छित्तौ विमुक्तता ॥ ३६७ ॥
अतोऽशेषमहानर्थहेतोर्मोहस्य हानये ॥
एष इत्यादिवाक्योक्तिः सम्यग्दर्शनजन्मना ॥ ३६८ ॥
इतिशब्दो यथोक्तार्थपरामर्शं करोति हि ॥
ऐतिह्यार्थस्तथाहेति संम्राडित्यभिमन्त्रणम् ॥ ३६९ ॥

ति ॥ ३६३ ॥ षष्ठीसमासासम्भवमेव प्रपञ्चयति *ब्रह्मण इति ॥ तत्र तथा सतीत्यर्थः ॥ ३६४ ॥ कर्मधारये गुणमाह *ब्रह्मेति । समासं व्यवस्थाप्य एष ब्रह्मलोक इतिपदयोस्तत्त्वमसीत्यादिवदखण्डार्थतामाह *एतदिति ॥ ३६५ ॥ तयोरैक्यात्मभासकत्वे युक्तिमाह *नेति ॥ ३६६ ॥ ब्रह्मात्मनोरैक्यमस्ति चेत्कथं संसारप्रतीतिः, तत्प्रतीतौ वा कथं ब्रह्मणो नित्यमुक्तता तत्राह *अनयोरिति ॥ ३६७ ॥ वाक्यतात्पर्यमुपसंहरति *अत इति ॥ मोहध्वस्तौ मुक्तिरतःशब्दार्थः ॥ ३६८ ॥ संम्राडित्यादेरवयवार्थमाह *इतिशब्द इति । तस्योक्तार्थपरामर्शसामर्थ्यद्योती हिशब्दः । अभिमन्त्रणं सम्बोधनम् ॥ ३६९ ॥ एन-

इत्युक्तेन प्रकारेण मुमुक्षुं जनकं मुनिः ॥
अन्वशात्सकलानर्थहेत्वविद्यापनुत्तये ॥ ३७० ॥
व्युत्थायाख्यायिकातो नः श्रुतिरेवेदमब्रवीत् ॥
अस्माकमादरस्तेन स्यादद्वैते दृगात्मनि ॥ ३७१ ॥
पुनराख्यानरूपेण मुनिर्भूत्वा दृगात्मनः ॥
परमानन्दरूपत्वं प्रतिपादयति श्रुतिः ॥ ३७२ ॥
विज्ञानपुरुषस्यास्य योक्ता ब्रह्मात्मता पुरा ॥
नैष्ठिकी गतिरेषाऽत्र गत्यन्तरसमाप्तितः ॥ ३७३ ॥
इतोऽन्यगतयः सर्वाः क्षयिसाधनसंश्रयात् ॥
क्षयिण्योऽतो हि परमा गतिरेषैव नापरा ॥ ३७४ ॥
अविद्यामात्रहेतुत्वात्कामकर्मादिसाधनाः ॥
गतयोऽपरमाः सर्वा मायास्वप्नगती यथा ॥ ३७५ ॥

मित्यादेरितिशब्दार्थानुवादपूर्वकमर्थमाह *इत्युक्तेनेति ॥३७०॥ आख्यायिकायामिदं वाक्यमसङ्गतमित्याशङ्क्य एष इत्यादि न मुनेर्वाक्यं किन्तु श्रुतेरेवेत्याह *व्युत्थायेति । व्युत्थानफलमाह *अस्माकमिति ॥ केवलश्रुत्युक्तेऽर्थे ऽधिकविश्वासो भवतीति ॥ ३७१ ॥ एषेत्याद्युत्तरसन्दर्भतात्पर्यमाह *पुनरिति ॥ ३७२॥ एषाऽस्य परमा गतिरित्यस्यार्थमाह *विज्ञानेति ॥ बुद्ध्युपाधिकस्य पूर्ववाक्ये ब्रह्मतोक्ता, एषैवास्य नैष्ठिकी गतिः, गत्यन्तराणामत्रैव समाप्तेरित्यर्थः ॥ ३७३ ॥ परमत्वं साधयति *इत इति ॥ गतिसाम्यादस्यापि क्षयिष्णुत्वमाशङ्क्य ज्ञानस्य विषयतोऽक्षयत्वात्तदधीनफलमक्षयमिति विवक्षन्नाह *अतो हीति ॥ हि यतः ॥ ३७४ ॥ गत्यन्तराणामपरमत्वं दृष्टान्तेनाह *अविद्येति ॥ मुक्तिरेव परमा गतिर्न कर्मफलमिति समुदायार्थः ॥ ३७५ ॥ एषाऽस्य परमा सम्पदित्यस्यार्थमाह

संपच्च परमैषैव मोहोत्थाश्चान्यसंपदः ॥
उत्कर्षातिशयः संपद्विभूतिश्चेति भण्यते ॥ ३७६ ॥
श्रुतिः—एषोऽस्य परमो लोक एषोऽस्य परम आनन्द
एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति॥३२
वा०—एषोऽस्य परमो लोको लोकास्त्वन्ये क्षयिष्णवः
क्षयिष्णुसाधनोपेता न ह्येषोऽसाधनाश्रयात् ॥३७७॥
ब्रह्मैव सन्स्वतो यस्माद्ब्रह्माप्येत्यवबोधतः ॥
तदविद्याविरोधेन मुक्तिर्नातोऽन्यसाधनात् ॥ ३७८॥
लोकशब्दस्य मुख्यार्थ आत्मैवेह यतस्ततः ॥
कर्मादिहेतुसाध्येषु गौणी लोकार्थता भवेत् ॥ ३७९ ॥
न कर्मणा कनीयस्ता वृद्धिर्वा नान्तरात्मनः ॥
इति बाहुमिवोद्धृत्य वेदान्तैर्घोषणा कृता ॥३८० ॥

---

*सम्पच्चेति ॥ अवधारणे हेतुमाह *मोहेति ॥ का पुनः सम्पन्नाम परमगतेरर्थान्तरं, तथाच पूर्वेण गतार्थता तत्राह *उत्कर्षेति ॥ उत्कृष्टोऽवष्टम्भः परमा गतिरतो न पौनरुक्त्यमिति चार्थः ॥ ३७६ ॥ एषोऽस्य परो लोक इत्यस्यार्थमाह *एष इति ॥ ३७७ ॥ मोक्षस्यासाधनाश्रयत्वमसिद्धं कर्मज्ञानापेक्षत्वादित्याशङ्क्याह *ब्रह्मेति ॥ प्रतिबन्धध्वस्तौ ज्ञानस्योपयोगेऽपि न कर्म साक्षान्मोक्षे उपकरोतीति भावः ॥ ३७८ ॥ मोक्षस्य ब्रह्मलोकशब्दितस्य लोकत्वसाम्यात्फलत्वं स्वर्गादिवदित्याशङ्क्याह *लोकेति ॥ रूढिव्युत्पत्तिभ्यामात्मन एव लोकशब्दार्थत्वात्स्वर्गादिषु तच्छब्दो गौणः, अन्यायश्चानेकार्थत्वमिति न्यायादिति भावः ॥ ३७९ ॥ ननु लोकस्य कर्मसाध्यत्वे प्रसिद्धेरात्मैव लोकश्चेत् कर्मसाध्यः स भविष्यति, नेत्याह *नेति ।

आनन्दः परमो ह्येषः सुखोत्कर्षसमाश्रितः ॥
सर्वानन्दातिशायित्वात्तथा चैतत्प्रवक्ष्यते ॥ ३८१ ॥
विषयस्पर्शजानन्दाः साधनानुविधानतः ॥
आद्यन्तवत्त्वस्वाभाव्याद् दुःखयोनय एव ते ॥३८२॥
कूटस्थात्मस्वभावत्वात्सर्वसाधननिस्पृहः ॥
सर्वानन्दातिवर्तित्वादानन्दः परमो मतः ॥ ३८३ ॥
आनन्दः परमोऽस्यैष इत्युक्तार्थप्रसिद्धये ॥
एतस्यैवेति वचसामथार्थो हेतुरुच्यते ॥ ३८४ ॥
एतस्यैव यथोक्तस्य सर्वानन्दातिवर्त्तिनः ॥
उपजीवन्ति भूतानि ब्रह्मानन्दस्य विप्लुषः ॥३८५॥
एष एवंविधो यस्मादानन्दः परमः स्मृतः ॥
आनन्दानतिशेतेऽन्यान् सर्वानस्यैव कृत्स्नतः॥३८६॥

॥३८०॥ एषोऽस्य परम आनन्द इत्यस्यार्थमाह *आनन्द इति॥ आत्मानन्दस्य परमत्वे हेतुः *सुखेति। तत्रापि हेतुः सर्वेति। तदेव कथं तदाह *तथा चेति॥ स यो मनुष्याणामित्यादिप्रकरणे आत्मनः सर्वानन्दातिशायित्वं वक्ष्यत इत्यर्थः॥३८१॥ विषयानन्दानामपि हिरण्यगर्भादीनां परमत्वात्कथं परम इत्यात्मानन्द एव विशेष्यते तत्राह *विषयेति ॥ ३८२ ॥ तर्हि तद्वदात्मसुखस्यापि सुखत्वाविशेषान्न परमत्वं तत्राह *कूटस्थेति ॥ ३८३ ॥ आत्मसुखमेवोत्कृष्टमितरन्निकृष्टमित्यत्राबाधितहेतूक्त्यर्थमुत्तरवाक्यमित्याह *आनंद इति ॥ ३८४ ॥ वाक्यं योजयति *एतस्येति। यथोक्तस्येत्यस्य व्याख्या—सर्वानन्देति ॥ ३८५ ॥ हेत्वर्थमनूद्य साध्यार्थं निगमयति *एष इति ॥ परमत्वं व्याकरोति *आनन्दानिति ॥ तत्र हेतुः *अस्येति ॥ ३८६ ॥ आनन्दस्य

कृत्स्नोऽपि चैष आनन्दस्तदविद्यैकहेतुतः ॥
बुद्ध्याद्युपाध्यवच्छेदान्मात्रेति व्यपदिश्यते ॥ ३८७ ॥
श्रुतिः—स यो मनुष्याणाꣳ राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनन्दः ॥
वा०-तन्मात्रावर्त्मनैवैनं बुबोधयिषते मुनिः ॥
लवणाब्धिर्यथा नद्यां बुध्यते लवणोदकात् ॥३८८॥
यावद्यावत्समीपस्था लवणाब्धेर्महानदी ॥
भासते लवणाधिक्यं तावत्तावन्नदीजले ॥ ३८९ ॥
एवं च दूरग्रामस्थः स्वादयन् लवणं जले ॥
नदीतीरे क्रमाद्गच्छेल्लवणाब्धिं स पश्यति ॥ ३९० ॥
तथैव मानुषानन्दमारभ्योत्तरवृद्धितः ॥
बुध्वा हैरण्यगर्भान्तं परानन्दं प्रबुध्यते ॥ ३९१ ॥
मनुष्यमध्ये यः कोऽपि संसिद्धोऽवयवैर्दृढः ॥
कृत्स्नसाधनसंपत्त्या समृद्धोऽपि भवेदसौ ॥ ३९२ ॥

कृत्स्नत्वे कथं मात्रेति व्यपदेशस्तत्राह *कृत्स्नोऽपीति ॥ पूर्णस्यानन्दस्य अविद्योत्थबुध्यादिसम्बन्धान्मात्रेति व्यपदेशार्हतेत्यर्थः ॥ ३८७ ॥ स यो मनुष्याणामित्यादेस्तात्पर्यमाह *तन्मात्रेति ॥ ३८८ ॥ नद्यां लवणोदकदर्शनाल्लवणाब्धिर्बुध्यत इत्युक्तं व्यनक्ति *यावदित्यादिना ॥३८९॥३९०॥ एवं दृष्टान्तमुपपाद्य दार्ष्टान्तिकमाह *तथेति ॥ ३९१ ॥ तात्पर्यमुक्त्वाऽक्षराणि व्याचष्टे *मनुष्येति ॥ समृद्धशब्दस्य राद्धशब्देनापुनरुक्तमर्थमाह *कृत्स्नेति ॥ ३९२ ॥ पदद्वयार्थं पिण्डीकृत्य निगमयति *बाह्यैरिति ॥ सर्वेषामधिपतिरित्येतद्व्याचष्टे

बाह्यैराध्यात्मिकैरेवं साधनैरन्वितः पुमान् ॥
सर्वेषामधिपो भूत्वा काप्यन्यैर्न विहन्यते ॥ ३९३ ॥
मानुष्यकेण भोगेन संपन्नानां नृणामिह ॥
संपन्नोऽतिशयेनातः संपन्नतम उच्यते ॥ ३९४ ॥
सर्वैर्मानुष्यकैर्भोगैः संपन्नो न तु दैविकैः ॥
आनन्द एष परमो मनुष्याणामिहोच्यते ॥ ३९५ ॥

श्रुतिः—अथ ये शतं मनुष्याणामानन्दाः स एकः पितॄणां जितलोकानामानन्दोऽथ ये शतं पितॄणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसंपद्यन्ते । अथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥

---

*सर्वेषामिति ॥ ३९३ ॥ सर्वैरित्यादेरर्थमाह *मानुष्यकेणेति ॥ ३९४ ॥ मानुष्यकैरिति विशेषणतात्पर्यमाह *सर्वैरिति ॥ स मनुष्याणामित्यादेरर्थमाह *आनन्देति ॥ पूर्वोक्तसकलविशेषणविशिष्टोऽनतिशयमनुष्यभोगभोगी युधिष्ठिरादिर्मनुष्याणां परम आनन्दः, वस्तुतः आनन्दानन्दिभेदाभावादिति भावः ॥ ३९५ ॥ अथ ये शतं मनुष्याणामानन्दा इत्यादेरर्थमाह *शतकृत्व इति । तत्तदानन्दप्रदर्शनानन्तर्यं तत्र तत्राथ-

वा०-शतकृत्वो मनुष्याणामानन्दो गणितस्तु यः
पितॄणामेक आनन्दः सोऽयं तुल्यप्रमाणतः ॥ ३९६ ॥
तारतम्यादुपायानां शुद्धिस्तरतमा धियः ॥
शुद्धेस्तरतमत्वेन सुखं तरतमं भवेत् ॥ ३९७ ॥
यावद्यावन्मलोऽप्येति बुद्धेर्धर्मादिसंचयात् ॥
तावत्तावद्धियः स्वाच्छयात्तावत्तावत्सुखोन्नतिः ३९८
यावद्यावद्धनीभूतो मलः पापादिसङ्गतेः ॥
तावत्तावद्धियोऽस्वाच्छयाद् दुःखोद्भूतिस्तथा तथा ३९९
पितृलोको जितो यैः स्यात्पितृयज्ञादिकर्मभिः ॥
जितलोकास्त उच्यन्ते पितरो दिव्यभोगिनः ॥४००॥
य एष दक्षिणः पन्थाः पितृलोकः स उच्यते ॥
मनुष्यानन्दतः सोऽयं गणितः स्याच्छताधिकः ॥४०१॥
उत्तरेष्वपि वाक्येषु यथोक्तमुपपादयेत् ॥

शब्दार्थः । प्रमाणं परिमाणम् । मनुष्यानन्दः शतगुणीकृतपरिमाणः पितॄणामेकानन्दो भवतीत्यर्थः ॥ ३९६ ॥ सर्वं सुखमात्मेष्यते चेत्कथं तारतम्यवत्स्यादात्मनोऽनतिशयत्वात्तत्राह *तारतम्यादिति ॥ व्यञ्जकबुद्धिशुद्धिवैषम्यात्तस्मिन्वैषम्यधीरित्यर्थः ॥३९७॥ केषामुपायानां तारतम्याच्छुद्धि तारतम्यं तत्राह *यावदिति ॥ शुद्धितारतम्यादानन्दे तारतम्यधीरित्येतन्निगमयति *तावदिति॥३९८॥ उपायतारतम्याधीनशुद्धितारतम्यकृतं सुखतारम्यमित्येतद्व्यतिरेकमुखेनाह *यावदिति ॥ ३९९ ॥ स एकः पितॄणामित्येतद्व्याख्याय जितलोकानामित्यस्यार्थमाह *पितृलोक इति ॥ ४०० ॥ कोऽयं पितृलोकस्तत्राह *य इति ॥ ४०१ ॥ अथ ये शतमित्यादिवाक्येषूक्तन्यायमतिदिशति *उत्तरेष्विति ॥ सर्वपर्यायेषु

शताधिकोऽयमानन्दः पूर्वस्मादुत्तरक्रमात् ॥ ४०२ ॥
पितरोऽग्निष्वात्तमुख्या गन्धर्वा देवगायकाः ॥
ज्योतिष्टोमादिना स्वर्गं प्राप्ताः स्युः कर्मदेवताः॥४०३॥
सृष्टेराजननादादौ देवत्वं ये प्रपेदिरे ॥
आजानदेवास्तेऽत्र स्युः पूर्वेभ्यः सूक्ष्ममूर्त्तयः ॥४०४॥
नानाद्वन्द्वोपघातार्थं हेतूनां बहुलत्वतः ॥
पूर्वानंदेभ्य एतेषामानंदोऽभ्यधिको मतः ॥ ४०५ ॥
सूक्ष्मभूतारब्धतया सूक्ष्मत्वं न त्विहाल्पता ॥
शीतोष्णादि न देहेऽस्ति सूक्ष्मे स्थूलशरीरवत्॥४०६॥
श्रोत्रियो वेदशास्त्रज्ञो निष्पापो ब्रह्मवित्त्वतः ॥
भोग्यदोषान्विविच्यास्ते नातः कामेन हन्यते ॥४०७॥
आजानदेवानन्देन समं स्याच्छ्रोत्रिये सुखम् ॥

सिद्धमर्थं संकलयति *शतेति ॥ ४०२ ॥ तत्र पर्यायचतुष्टयप्रतिपादितान्पितृगन्धर्वकर्मदेवाजानदेवान् विभजते *पितर इत्यादिना ॥ ४०३ ॥ तेषां सुखतारतम्ये हेतुमाह *पूर्वेभ्य इति ॥ पूर्वपूर्वेभ्य इत्यर्थः ॥४०४॥ तेषामुत्तरोत्तरानन्दाधिक्ये हेत्वन्तरमाह *नानेति ॥ ४०५ ॥ सूक्ष्ममूर्त्तय इत्युक्तं विवृणोति *सूक्ष्मेति । सूक्ष्मभूतारब्धत्वं च गार्गिब्राह्मणोक्तमत्रानुसन्धेयम् । सूक्ष्मत्वेऽपि कथं दुःखाभावः शरीरत्वाविशेषात्तत्राह *शीतेति ॥ ४०६ ॥ यश्च श्रोत्रिय इत्यादि व्याचष्टे *श्रोत्रिय इति ॥ अवृजिनपदव्याख्या निष्पाप इति । तत्र हेतुः *ब्रह्मेति ॥ अनादिभवपरंपरार्जितसर्वपापानां ब्रह्मसाक्षात्कारं विना निःशेषं निवृत्त्ययोगादिति भावः ॥ तस्याकामहतत्वमुपपादयति *भोग्येति ॥ ४०७ ॥ अपेक्षितं पूरयति *आजानेति ॥ स एकः प्रजापतिलोक आ-

प्रजापतिर्विराड् ब्रह्मा सूत्रात्मेत्यनयोर्भिदा ॥४०८॥
सर्वत्र योजनायैष श्रोत्रियः पुनरुच्यते ॥
सार्वभौमादिसूत्रान्तानन्दा ब्रह्मविदि स्थिताः॥४०९॥
सुखं तृप्तिरकामत्वमित्येकार्था इमा गिरः ॥
सर्वकामविहीनेऽतः सुखं सर्वं व्यवस्थितम् ॥ ४१० ॥
पूर्वं कामहतत्वेन सार्वभौमादयोऽखिलाः ॥
दुःखिनोऽथ पदं प्राप्य निष्कामाः सुखिनोऽभवन् ४११॥
पुंभेदात्कालभेदाद्वा तत्तत्साधनतो भवेत् ॥
कामात्तत्तत्पदप्राप्तिर्नैकस्मिन्नेकदा क्वचित् ॥ ४१२ ॥

नन्दः स एको ब्रह्मलोक आनन्द इत्यनयोरेकार्थत्वमाशङ्क्य स्थूलसूक्ष्मशरीरोपाधिभेदेन तयोर्भेदमाह *प्रजापतिरिति॥४०८॥ यश्च श्रोत्रिय इति पुनरुक्तिः किमर्थेत्याशङ्क्य सर्वपर्यायेष्वनुषंगार्थमित्याह *सर्वत्रेति ॥ पर्यायत्रयोक्तिरितरपर्यायाणामप्युपलक्षणमित्यत्र हेतुमाह *सार्वभौमेति ॥ ४०९ ॥ विषयसुखस्यापि श्रोत्रियानुभूतब्रह्मानन्देऽन्तर्भावः कथं तत्राह *सुखमिति ॥ एकार्थाः समनियता इति यावत् ॥ अस्तु प्रकृते किमायातं तत्राह *सर्वेति ॥ सर्वतो विरक्तस्यैव ब्रह्मविद्यायामधिकारात्तस्य श्रवणादिजन्यज्ञानाभिव्यक्तेऽनतिशयसुखे सर्वविषयसुखान्तर्भावः सम्भवतीति भावः ॥ ४१० ॥ कामाभावसमन्वितं सुखमुदाहरणेनाह *पूर्वमिति ॥ ४११ ॥ ननु तत्तत्पदप्राप्त्या तेषामपि कामनिवृत्तौ कथं तत्सुखस्य सातिशयत्वं तत्राह *पुंभेदादिति । तत्तत्पदकामनयाऽनुष्ठिततत्तत्साधनैस्तत्तत्पदप्राप्तावप्युत्कृष्टपदेप्सायाः सत्त्वेन तेषां सर्वकामनिवृत्त्यभावान्न तत्सुखस्य निरतिशयत्वमिति भावः ॥ ४१२ ॥ उक्तमर्थं

श्रोत्रिये कामराहित्यात्सर्वानन्दाः सह स्थिताः ॥
सोऽश्नुते सकलान्कामान्स हेति प्राह तित्तिरिः ४१३
श्रुतिः—अथैष एव परम आनन्द एष ब्रह्मलोकः स-
म्राडिति होवाच याज्ञवल्क्यः ॥
वा०—सूत्रात्परमनंतत्वाद्गणितं विनिवर्त्तते ॥
यतो वाचो निवर्त्तन्ते इति श्रुत्यन्तरं जगौ ॥ ४१४ ॥
श्रोत्रियेणानुभूतो यो ब्रह्मानन्दोऽस्य विप्रुषः ॥
सार्वभौमादिसूत्रान्ताः प्राणिनोऽनुभवन्त्यमी॥४१५॥
तस्मादप्येष परम आनन्द इति वक्त्यसौ ॥
ब्रूते च भगवान्व्यासः सर्ववेदार्थतत्त्ववित् ॥ ४१६ ॥
यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ॥
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥४१७॥
यतो यतो निवर्तेत ततस्ततो विमुच्यते ॥
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि ॥ ४१८ ॥

सप्रमाणमुपसंहरति *श्रोत्रिय इति ॥ ४१३ ॥ अथैष परम आनन्द इत्यत्र परमत्वं साधयन् वाक्यमवतारयति *सूत्रादित्यादिना । यस्मादात्मानन्दे गणनायोगः, यस्माच्च तत्र सर्वाणि विषयसुखान्यन्तर्भवन्ति तस्मात्स परम इत्यर्थः ॥४१४॥४१५॥ सर्वकामरहिते विदुषि सर्वं विषयसुखमन्तर्भवतीत्यत्राभियुक्तसम्मतिमाह *ब्रूत इति ॥ ४१६ ॥ ४१७ ॥ तदीयमेव वाक्यान्तरं पठति *यत इति ॥ ४१८ ॥ एष इत्यादिवाक्यतात्पर्यमाह *सलिलादीति । ब्रह्मलोकान्तवाक्येन—ब्रह्मलोकपदम् अन्ते मध्ये यस्यास्ति तेनेति यावत् ॥ सलिल एको द्रष्टेत्युपक्रम्य मात्रामुपजीवन्तीत्यन्तेन कार्यकारणनिर्मुक्तोऽनतिशयानन्दो यः प्रत्य-

सलिलादिगिरा योऽर्थः प्रत्यज्ञापि पुराऽखिलः ॥
ब्रह्मलोकांतवाक्येन तस्येयमुपसंहृतिः ॥ ४१९ ॥
श्रुतिः-सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीत्यत्र ह याज्ञवल्क्यो बिभयांचकार मेधावी राजा सर्वेभ्यो मां तेभ्य उदरौत्सीदिति ॥३३॥
वा०-वक्तव्यार्थे समाप्तेऽपि राजा पप्रच्छ पूर्ववत् ॥
भीतो मुनिर्भये हेतुर्मेधावीत्यादिनोक्तवान् ॥ ४२० ॥
सर्वेभ्यो निर्णयेभ्यो मामरौत्सीन्न तु मुंचति ॥
अयमेव भये हेतुर्नोत्तरानवबोधनम् ॥ ४२१ ॥
स्वप्नः सुप्तिश्च दृष्टान्तौ परलोकविमोक्षयोः ॥
तावेव मुनिना प्रोक्तौ शिष्टं दार्ष्टांतिकद्वयम् ॥४२२॥

गात्मा परिपूर्णः प्रतिज्ञातः स पुनः स यो मनुष्याणामित्यारभ्याथैष एवेत्येतदन्तेन प्रतिपादितः । तस्येदानीमेष इत्यादिवाक्येनोपसंहारः कृत इत्यर्थः ॥ ४१९ ॥ सोऽहमित्यादेरर्थमाह *वक्तव्येति ॥ वक्तव्यार्थे सम्यग्ज्ञाने यथोक्तरीत्या निर्द्धारितेऽपि निर्द्धारणात्प्रागिव राजा विद्यानिष्क्रयार्पणपूर्वकं पप्रच्छेत्यर्थः ॥ अत्र हेत्यादेरर्थमाह *भीत इति ॥ श्रुतावत्रेति प्रकृतवाक्योक्तिः। मेधावीत्याद्यवतारयति *भये हेतुरिति ॥४२०॥ वाक्यं योजयन्तात्पर्यमाह *सर्वेभ्य इति ॥ अरौत्सीदवरोधं कृतवान् ॥ अत ऊर्ध्वमिति पुनः प्रश्नेन शीघ्रमेव मदीयं ज्ञानसर्वस्वमादित्सतीति भीतवान् नतु प्रत्युत्तराज्ञानादित्यर्थः ॥ तथाच योग्येऽपि पात्रे मुक्तिफलं ज्ञानं सहसा नोपदेष्टव्यमिति भावः ॥४२१॥ ननु वक्तव्यार्थस्य सर्वस्य निर्णीतत्वाद्राज्ञः प्रश्न एवानुपपन्नस्तत्राह *स्वप्न इति । द्वयं शिष्टं, वक्तव्यमिति शेषः ॥४२२॥

स्वप्नाज्जागरणं यद्वद्देहाल्लोकांतरं तथा ॥
इत्यभिप्रेत्य मुनिना स्वप्नाद्बोधोऽभिधीयते ॥ ४२३ ॥

श्रुतिः–स वा एष एतस्मिन्स्वप्नांते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्या द्रवति बुद्धान्तायैव ॥ ३४ ॥

तद्यथाऽनः सुसमाहितमुत्सर्जद्यायादेवमेवायᳪ शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन्याति यत्रै-तदूर्ध्वोच्छ्वासी भवति ॥ ३५ ॥

वा०–शकटं बहुभिर्द्रव्यैर्योजितं गुरुभारतः ॥
कुर्वञ्छब्दान्बहून्याति चेतनेन प्रचोदितम् ॥ ४२४ ॥
शरीरस्थोऽपि लिङ्गात्मा स्वन्वारूढश्चिदात्मना ॥
शब्दान् कुर्वन्हिक्किकादीन् प्रैत्यूर्ध्वश्वासपूर्वकम् ४२५ ॥

प्रश्नोपपत्तिमुक्त्वा स वा इत्यादिप्रत्युक्तितात्पर्यमाह *स्वप्नादिति ॥ अस्माल्लोकात्परलोकाप्तिं दर्शयितुं दृष्टान्तत्वेन स्वप्नाज्जागरापत्तिः स वा इत्यादिना दर्शितेत्यर्थः ॥ ४२३ ॥ तद्यथा न इत्यादि व्याचष्टे *शकटमिति । अनइत्यस्य व्याख्या–शकटमिति । सुसमाहितमित्यस्य व्याख्याबहुभिरिति । उत्सर्जदित्यस्य व्याख्या–कुर्वदित्यादि । तत्र हेतुः *गुरुभारत इति । यायादित्यत्रार्थसिद्धमर्थमाह *चेतनेनेति ॥ ४२४ ॥ स्वप्नाज्जागरप्राप्तिवद्देहाद्देहान्तरप्राप्तौ दृष्टान्तत्वेनोक्तं तद्यथेत्यादि व्याख्याय एवमेवायमित्यादिदार्ष्टान्तिकवाक्यं व्याचष्टे *शरीरस्थ इति । चिदात्मना परेणानु चिदाभासव्याप्त्यनन्तरं तद्द्वारा आरूढः तदधिष्ठित इत्यर्थः ॥ यत्रैतदूर्ध्वोच्छ्वासीभवतीत्यत्र यस्मिन्काले ऊर्ध्वोच्छ्वासित्वमस्य भवतीत्यर्थः॥४२५॥

उपाध्यारोहमन्वात्मा रूढवत्प्रतिभासते ॥
भानोरिवोदपात्रादावारोहो नात्मनः स्वतः ॥ ४२६ ॥
मर्मस्रूत्कृष्यमाणेषु वायुनोदानरूपिणा ॥
मुमूर्षोरत्र यद्दुःखं स्मर्यतां तन्मुमुक्षुभिः ॥ ४२७ ॥

श्रुतिः-स यत्रायमणिमानं न्येति जरया वोपतपता वाणिमानं निगच्छति तद्यथाऽऽम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत एवमेवायं पुरुष एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्या द्रवति प्राणायैव ॥ ३६ ॥

वा०-रोगेण जरया वाऽयं देहः कार्श्यं यदाऽऽप्नुयात् ॥
तदाऽऽम्रादिफलं वृन्तादिवांगेभ्यः प्रमुच्यते ॥४२८॥
आश्रयाश्रयिसम्बन्धहेतुरन्नरसो भवेत् ॥
स्थूलसूक्ष्माख्यवपुषोरन्नं दामेत्युदीरणात् ॥ ४२९ ॥

किमित्याभासद्वारा तस्य बुद्धिव्याप्तिः स्वत एव किं न स्यात्तत्राह *उपाधीति ॥ यथोदपात्रादेरुपाधिविशेषस्य भानुना प्रतिबिम्बद्वारा व्याप्तिस्तथा प्राज्ञस्यात्मनश्चिदाभासद्वारैव बुद्धौ व्याप्तिर्न स्वतोऽसंगत्वादित्यर्थः ॥४२६॥ किमिति प्रत्यक्षसिद्धमर्थं श्रुतिरनुवदतीत्याशंक्य वैराग्यार्थमित्याह *मर्मस्विति ॥ ४२७ ॥ स यत्रायमित्यादेरर्थमाह *रोगेणेति ॥ ४२८ ॥

यत्र यस्मिन्कालेऽयं देहो जरयाऽणिमानमणुत्वं न्येति गच्छति उपतपतीत्युपतापः ज्वरादिरोगस्तेन वाऽणिमानं कार्श्यं निगच्छति इति श्रुत्यक्षरार्थः ॥ ३६ ॥

फलं वृन्तादिवेत्युक्तं दृष्टांतं दार्ष्टांतिकेऽप्युपपादयति *आश्रयेति । अन्नरसो देहस्थितिहेतुरित्यत्र शिशुब्राह्मणोक्तं स्मारयति *स्थूलेति ॥ ४२९ ॥ अन्नरसस्य देहद्वयसम्बन्धहेतुत्वे तन्नाशादपि

रसबन्धनशैथिल्ये जरारोगादिहेतुतः ॥
गोलकेभ्यश्चक्षुराद्या मुक्ता वृन्तात्फलं यथा ॥ ४३० ॥
अपक्वमप्याम्रफलं दण्डघातात्पतेत्तथा ॥
दृढकायोऽपि पुरुषो म्रियते शस्त्रघाततः ॥ ४३१ ॥
पक्वमौदुम्बरं बंधशैथिल्येन भवेद्यथा ॥
जरया प्राप्तशैथिल्यं म्रियते स्वयमेव हि ॥ ४३२ ॥
पतेद्वायूपघातेन यथाऽश्वत्थात्फलं तथा ॥
दैवेनाशनिपातेन म्रियते पुरुषः क्वचित् ॥ ४३३ ॥
निर्गत्य हृदयस्थानान्नाडीमार्गेण जागरम् ॥
प्राप्तोऽत्र वैपरीत्येन नाडीमार्गाद्धृदि व्रजेत् ॥४३४॥
जाग्रत्स्वप्नादिसिध्यर्थं गमनागमने पुरा ॥
इदानीं त्वन्यदेहेऽसौ प्राणं धारयितुं व्रजेत् ॥ ४३५ ॥
श्रुतिः—तद्यथा राजानमायांतमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्ते ऽयमायात्ययमागच्छतीति ॥

तद्वियोगः संभवतीत्याह *रसबंधनशैथिल्य इति ॥ ४३० ॥ तद्यथाऽम्रं वेत्याद्यनेकोदाहरणेन विवक्षितार्थमाह *अपक्वमिति त्रिभिः पिप्पलमित्यस्य व्याख्याऽश्वत्थफलमिति ॥४३१॥४३२॥४३३॥ पुनः प्रतिन्यायमित्यादेरर्थं स्मारयति *निर्गत्येति॥४३४॥प्राणायैवेत्यस्यार्थमाह *जाग्रदिति ॥ यथा जीवदवस्थायां जाग्रद्भोगप्रदकर्मोपरमे स्वप्नं सुप्तिं वा प्राप्तुं नाडीमार्गेण पुनश्च हृदयमागच्छति, एवमेतच्छरीरारंभककर्मक्षये देहांतरे प्राणान्धारयितुं तानुपसंहृत्य नाडीमार्गेण हृदयं गच्छतीत्यर्थः ॥ ४३५ ॥ तद्यथा राजानमित्यादिवाक्यव्यावर्त्यामाशंकामाह *नन्विति ॥ प्राणधारण-

वा०—ननूपादित्सिते देहे भोगाय प्राणधारणम् ॥
भोग्यसंपादने नास्ति शक्तिरस्येति चेच्छृणु ॥४३६॥
तत्कर्मोपार्जितैरन्यैर्भोग्यं संपादयेत्पुरा ॥
इत्येतद्विशदीकर्त्तुं राजदृष्टान्त उच्यते ॥ ४३७ ॥
राज्ञ आगमनात्पूर्वं भृत्या राजप्रचोदिताः ॥
कृत्वाऽन्नपानस्थानानि प्रतीक्षन्ते नृपं तदा ॥ ४३८ ॥
योजनेऽयं समायाति क्रोशाद्द्वारेऽपि चागतः ॥
इत्थं परस्परं प्राहुरुग्राद्या राजमन्त्रिणः ॥ ४३९ ॥
उग्रशब्देन कथ्यन्ते याष्टिका भटभर्त्सकाः ॥
प्रत्येनसः शिक्षकाः स्युश्चौर्यादौ तत्तदेनसि ॥ ४४० ॥
सूता रथप्रेरकाः स्युर्ग्रामण्यो ग्रामचिन्तकाः ॥
राज्ञा जीवितदानेन उग्रादय उपार्जिताः ॥ ४४१ ॥
श्रुतिः–एवꣳ हैवंविदꣳ सर्वाणि भूतानि प्रतिकल्पन्त इदं ब्रह्मायातीदमागच्छतीति ॥ ३७ ॥

मित्यत्र कथं भोग्यस्यैवाभावादिति शेषः । तत्र हेतुः *भोग्येति ॥ नास्ति शक्तिः स्थूलदेहविरहादिति भावः ॥ ४३६ ॥ उत्तरवाक्यमुत्तरत्वेनादत्ते *तदिति ॥ ४३७ ॥ दृष्टांतवाक्यं व्याचष्टे *राज्ञ इति ॥ ४३८ ॥ अयमायातीत्यादिद्विरुक्तिप्रयोजनमाह *योजन इति । योजनांतरिते देशे समायाति इदानीं क्रोशांतरिते आगच्छति इत्यादिप्राहुस्तदनुकरोति श्रुतिरिति भावः ॥ ४३९ ॥ उग्रादिशब्दान्विभजते । उग्रेत्यादिना ॥ चौर्यादितत्तत्पापे कृते तच्छिक्षकाः प्रत्येनस इत्यर्थः ॥ ४४० ॥ उग्रादीनां राजप्रतीक्षणे हेतुमाह *राज्ञेति ॥ ४४१ ॥ एवं हेत्यादिदार्ष्टांतिकवाक्यं व्याचष्टे *मुमूर्षुणेति ॥ एवंविदमित्यस्य व्याख्या *एनमिति ॥ प्रस्तुत-

वा०–मुमूर्षुणा भाविदेहबन्धवः कर्मणाऽर्जिताः ॥
एवं पुत्रादिभावाय प्रतीक्षन्तेऽखिलाः सदा ॥४४२॥
ऋतावस्मिन् समायाति ब्रह्म पुत्रादिरूपतः ॥
ऋतावनन्तरे वाऽयमायास्यत्येव सर्वथा ॥ ४४३ ॥
क्षीरं पातुमियं धेनुरियं दोलाऽस्य लालने ॥
इति संपाद्य तद्योग्यमासते राजभृत्यवत् ॥ ४४४ ॥
अनेन जीवेनेत्यादिप्रवेशस्य विवक्षया ॥
ब्रह्मैव पुत्ररूपेण समायातीत्यभिज्ञगीः ॥ ४४५ ॥
नन्विन्द्रियाणि प्रेतस्य लीयन्ते वपुषा सह ॥
इत्याहुस्तार्किका ब्रह्म निरुपाधि कथं व्रजेत् ॥४४६॥

श्रुति०–तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायन्त्येवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३८ ॥

इत्युपनिषदि तृतीयं ब्राह्मणं समाप्तम् ।

कर्मफलवेत्तारं जीवमिति यावत् ॥ ४४२ ॥ प्रतीक्षंते इत्युक्तमभिनयति *ऋताविस्यादिना ॥४४३॥४४४॥ पुत्रो मे भविष्यतीत्येवं मन्यंते जना नतु ब्रह्म पुत्रेणायातीति तत्कथमुच्यते श्रुत्या इदं ब्रह्म यातीति तत्राह *अनेनेति ॥ वस्तुतो जीवस्य ब्रह्मत्वाद्विवेकिप्रसिद्धिमादाय श्रुतिरेवमुक्तवतीत्यर्थः ॥ ४४५ ॥ उत्तरकंडिकाव्यावर्त्त्यांशंकामाह *नन्विति ॥ ४४६ ॥ शंकोत्तरत्वेन कंडिकामवतारयति *प्राणेति ॥ ४४७ ॥ अक्षराणि योजयति *राजानमिति ॥ ४४८ ॥

इति वार्त्तिकसारटीकायां तृतीयं ब्राह्मणं समाप्तम् ॥

वा०-प्राणोपाधिक एवात्मा गच्छतीति विवक्षया ॥
प्राणानामात्मसामीप्यगतिं वक्ति मृतौ श्रुतिः ॥४४७॥
राजानमायियासन्तमाभिमुख्येन सेवितुम् ॥
आयान्त्युग्रादयस्तद्वत्प्राणानामात्मसङ्गतिः ॥४४८॥
इति वार्त्तिकसारे तृतीयं ब्राह्मणं समाप्तम् ॥
वा०-तृतीयब्राह्मणे प्रोक्ता देहे स्वप्नादिसंसृतिः ।
देहांतरेषु संसारो मुक्तिश्चाथ प्रवक्ष्यते ॥ १ ॥
श्रुतिः-स यत्रायमात्माऽबल्यं न्येत्यसंमोहमिव न्ये-
त्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति ॥
वा०-स मुमूर्षुर्यदा देहे दौर्बल्यं प्राप्य मूढताम् ॥
प्राप्नोतीव तदा तं वागाद्या आयान्ति देहिनम् ॥२॥
बोधमात्रैकयथात्म्यान्नायं संमोहभाग्यतः ॥
संमूढबुद्धिसाक्षित्वात्संमूढ इव भात्यतः ॥ ३ ॥
उत्क्रांतिकाले प्राणानां गोलकादार्ढ्यहेतुका ॥
स्वगोचरेष्वसक्तिर्या संमोहो ऽसाविहात्मनः ॥ ४ ॥

वृत्तमनूद्य अबल्यब्राह्मणार्थं संगृह्णाति *तृतीयेति ॥ १ ॥ स यत्रेत्यादि व्याचष्टे * स इति ॥ २ ॥

सोऽयं प्रकृतसंसारी यत्र यदा ऽबल्यं दौर्बल्यं नि एत्य प्राप्य संमोहं मूढतां नि एति प्राप्नोतीव अथ तस्मिन्काले एनं जीवं वागादयः सर्वे प्राणा अभितः समायांतीत्यर्थः ॥ २ ॥

संमोहमिवेत्यत्रेवशब्दसूचितमर्थमाह *बोधेति ॥ ३ ॥ अत्र संमोहशब्देन विवक्षितमाह *उत्क्रांतीति ॥ ४ ॥ अथैनमेते प्राणा अभिसमायंतीति पुनरुक्तेर्वैयर्थ्यं परिहरन्स एता

राजदृष्टांततः प्रोक्तां प्राणानामात्मसंगतिम् ॥
अनूद्य तत्प्रकारोऽत्र विस्तरेणाभिधीयते ॥ ५ ॥
तेजोमात्राश्चक्षुराद्याः प्रसृता मत्स्यजालवत् ॥
जागरेऽथ मुमूर्षुस्ताः समादाय हृदि व्रजेत् ॥ ६ ॥
आनखाग्रात्कृत्स्नदेहे व्याप्तवान्बुध्युपाधिकः ॥
हृत्पद्मे तस्य संकोचो हृदये गतिरुच्यते ॥ ७ ॥
तेजोमात्रा गोलकेभ्यस्तदा संकुचिता हृदि ॥
यथा कूर्मस्य संकोचो मत्स्यजालस्य वा यथा ॥ ८ ॥
कर्मप्रयुक्तसंकोचे कर्तृत्वमुपचर्यते ॥
स्वप्नादिगतिकर्तृत्वमात्मन्युक्तं यथा तथा ॥ ९ ॥
मीयंते विषया याभिर्मात्रास्ताश्चक्षुरादयः ॥

इत्याद्यादत्ते *राजेति ॥ तत्प्रकारवर्णनार्थत्वादनुवादस्य न वैयर्थ्यमिति भावः ॥ ५ ॥ वाक्यस्थपदानि व्याचष्टे *तेज इति ॥ अन्ववक्रामतीत्यस्य व्याख्या—व्रजेदिति ॥ ६ ॥ जीवस्य हृदयप्रदेशे सर्वदा स्थितस्य मरणावस्थायां कथमागंतुकी गतिरुच्यते तत्राह *आनखाग्रादिति ॥ ७ ॥ निरवयवस्यात्मनः संकोचो वा कथमित्याशंक्योपाधिसंकोचादेव तत्संकोचोक्तिरित्याह *तेज इति ॥ तदा मरणावस्थायां जागरे प्रसृतानां चक्षुरादीनां पुनः संकोचे निदर्शनद्वयमाह *यथेत्यादिना ॥ ८ ॥ एतद्देहारंभककर्मक्षयादेव बुध्यादेः संकोचसंभवात्कथं तत्रात्मनः समभ्याददान इति कर्तृत्वोक्तिरित्याशंक्य पूर्ववदुपचारादेवेत्याह *कर्मेति ॥ ९ ॥ तेजोमात्राशब्दस्य चक्षुरादिवाचकत्वमुक्तं व्युत्पादयति * मीयंत इति ॥ मात्राशब्दस्यैव चक्षुराद्यर्थत्वे किमर्थं तर्हि तेजःशब्दइत्याशङ्क्य तेजःशब्दितसत्त्वकार्यत्वं तेषां प्रदर्शयितव्यमिति मत्वा

तेजः सत्त्वगुणस्तस्य कार्यास्ता भासकत्वतः ॥१०॥
गुणोऽप्ययं भौतिकः स्यादात्मभूतातिरेकतः ॥
वेदांते वस्त्वसद्भावात्सांख्यानां तु गुणाः पृथक् ॥११
भूतेषु निर्मलो योंऽशस्तेजस्त्वं मस्य दीपवत् ॥
अक्षाणि भौतिकान्येव भौतिकार्थप्रकाशनात् ॥ १२
अक्षाणामात्मशक्तित्वात्तेजश्चैतन्यमित्यसत् ॥
अविकारात्मनोऽक्षत्वरूपेणोत्पत्त्यसम्भवात् ॥ १३ ॥
पित्ताख्यं तेज उद्दिष्टं तदंशाश्चक्षुरादयः ॥
इत्याहुरायुर्वेदज्ञा भौतिकत्वं तथापि च ॥ १४ ॥

तत्कार्यत्वं भावाणां साधयति * तेज इति ॥ १० ॥ इंद्रियाणां सत्त्वगुणकार्यत्वे सांख्यमतापत्तिरत आह *गुण इति ॥ तस्य वस्तुतो गुणत्वं नास्तीति दर्शयितुमपीत्युक्तम ॥ आत्मतत्सृष्ट-भूतभौतिकव्यतिरेकेण निरस्य सत्त्वगुणस्यानङ्गीकारात्सांख्यैश्च तदङ्गीकृतेर्न मतसांकर्यमिति भावः ॥ ११ ॥ किं तर्हि तेजः-शब्देनात्र विवक्षितं तत्राह * भूतेष्विति ॥ सांख्याभिमतसत्त्व-गुणस्याद्वयश्रुतिविरुद्धत्वात्त्रिगुणात्मिकाविद्याकार्येषु भूतेषु सात्त्विकांशोऽत्र तेजःशब्देन विवक्षित इत्यर्थः ॥ तेजःशब्दार्थमुक्त्वें-द्रियाणां तत्कार्यत्वेऽनुमानमाह *दीपवदिति ॥ १२ ॥ केचित्तु-सविषयाणां करणानामात्मविकारत्वान्न भौतिकत्वमित्याहुः—तन्मत-मनुवदति *अक्षाणामिति ॥ तेजःशब्देन चिदात्मोच्यते, मात्रा-शब्दिताक्षाणि तच्छक्तयस्तद्विकारा इत्यर्थः ॥ नेन्द्रियाणामात्म-विकारत्वं तस्य निर्विकारत्वश्रुतिविरोधादिति *इत्यसदिति ॥ ॥ १३ ॥ तेजोमात्रा इत्यस्यार्थांतरमाह *पित्ताख्यमिति ॥ तत्र प्रमाणमाह * इतीति ॥ १४ ॥ अक्षाणां भौतिकत्वे श्रुतिमप्याह

मनोऽन्नमयमित्यादौ भौतिकत्वं स्फुटं श्रुतम् ॥
प्रत्यक्षागोचरत्वं तु सूक्ष्मत्वात्परमाणुवत् ॥ १५ ॥
ता एतास्तेजसो मात्राः समस्ता अभिमुख्यतः ॥
स्वीकुर्वन्नेव तद्द्वारा हृन्सद्मात्माऽनुसर्पति ॥ १६ ॥
एवशब्दानुशब्दाभ्यां स्वातन्त्र्यगतिवारणम् ॥
लिङ्गोपाधिं विना नास्ति सर्वगस्य स्वतो गतिः ॥१७॥
लिङ्गव्याप्तिर्द्विधा देहे सामान्याच्च विशेषतः ॥
उल्काऽग्निक्षुरदृष्टान्तादुभयं लीयते मृतौ ॥ १८ ॥
सुप्तौ तिष्ठति सामान्यं विशेषस्यैव संहृतिः ॥
सामस्त्यवाची संशब्दस्तद्वैलक्षण्यसिद्धये ॥ १९ ॥

श्रुतिः—स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्त्तते ऽथारूपज्ञो भवति ॥ १ ॥

वा०—अनुगृह्णाति यः पूर्वं चाक्षुषः पुरुषो रविः ॥
भोगार्थमधुना सोऽयं भोगाभावादुपेक्षते ॥ २० ॥
इन्द्रियस्योपसंहारादादित्यस्याप्युपेक्षया ॥

---

*मन इति ॥ नन्वक्षाणां भौतिकत्वे घटादिवदैन्द्रियत्वं स्यात्तत्राह *प्रत्यक्षेति ॥ १५ ॥ वाक्यार्थमुपसंहरति *ता इति ॥ ॥ १६ ॥ हृदयमेवान्ववक्रामतीत्यत्र निपातयोरर्थमाह * एवेति ॥ हृदयमन्वेवावक्रामति उपाधिगमनानन्तरमेवात्मा तत्र गच्छति नतु स्वतंत्रतयेत्यर्थः ॥ १७ ॥ समभ्याददान इत्यत्र समित्युपसर्गस्य सामस्त्यमर्थः इति वक्तुमव्याकृतकांडिकोक्तमर्थं स्मारयति *लिंगेति ॥ ततः किं तत्राह *उभयमिति ॥ १८ ॥ तथापि सामस्त्यशब्देन किं व्यावर्त्यते तत्राह *सुप्ताविति ॥ १९ ॥ स यत्रैष

आत्मा द्रष्टुमसामर्थ्यादरूपज्ञो भवेत्तदा ॥ २१ ॥
अस्मिन्नर्थे सर्वलोकप्रसिद्धिरभिधीयते ॥
एकीभावादयं नैव पश्यतीति जगुर्जनाः ॥ २२ ॥

श्रुतिः—एकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयत इत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुः ।

वा०—चक्षुर्बुद्धावैक्यमेति रवौ रव्यंश एकताम् ॥
इन्द्रियान्तरतद्देवेष्वयं न्यायोऽत्र योज्यताम् ॥ २३ ॥

श्रुतिः—तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नोऽवाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामंतꣳ सर्वे प्राणा अनूत्क्रामंति ॥

वा०—कृत्स्नप्राणोपसंहारसंयुक्तस्य मुमूर्षतः ॥

इत्यादेरर्थमाह *अनुगृह्णातीत्यादिना ॥ २० ॥ २१ ॥

चाक्षुषश्चक्षुषोऽनुग्राहको रविरत्र मरणकाले पराङ् पर्यावर्त्तते उपेक्षते । अथ तस्मिन्काले रूपधीसामग्र्यभावादात्मा अरूपज्ञो भवतीत्यर्थः ॥ १ ॥

एकीभवतीत्याद्यवतारयति *अस्मिन्निति ॥ पुरुषे मुमूर्षति सति देवताकरणच्युतिरेवारूपज्ञत्वहेतुरित्यस्मिन्नर्थ इत्यर्थः ॥ २२ ॥ एकीभवतीत्यस्यार्थमाह *चक्षुरिति ॥ उक्तन्यायं पर्यायान्तरेष्वतिदिशति *इन्द्रियेति ॥ २३ ॥ तस्य हेत्यादेरर्थमाह *कृत्स्नेति ॥ अथ करणोपसंहारानन्तरं हृदयस्य

नाड्यग्रं हृदयस्याथ प्रकर्षेण प्रकाशते ॥ २४ ॥
भाविदेहात्मता याऽस्य प्रत्यक्चैतन्यबिम्बता ॥
वासनैवात्मनः सैषा प्रद्योतवचसोच्यते ॥ २५ ॥
य एष कर्मजो बुद्धेः प्रकाशो जायते मृतौ ॥
स्वकर्मनिर्मितं लोकं तेनात्माऽयं प्रपश्यति ॥ २६ ॥
स्वप्नवत्प्राप्तद्भावः पश्चाद्देहाद्विनिःसरेत् ॥
गम्यलोकानुसारेण द्वारं स्याच्चक्षुरादिकम् ॥ २७ ॥
चक्षुर्द्वारं सूर्यलोके ब्रह्मलोके शिरस्तथा ॥
लोकान्तरेष्वन्यनाड्या कर्म तत्र नियामकम् ॥ १८ ॥
लिङ्गं तु सर्वतो गच्छन्न क्वचित्प्रतिहन्यते ॥
अतिसूक्ष्मस्वभावत्वात्सूक्ष्मसूची पटे यथा ॥ २९ ॥

नाड्यग्रं हृदयसम्बन्धीनाडीमुखमित्यर्थः ॥ २४ ॥ कोऽयं प्रकाशो नाम तत्राह *भावीति ॥ मरणकाले चैतन्यप्रकाश्या अयमहमस्मीति भाविदेहाकारा या वासना अस्य मुमूर्षोर्विज्ञायते, सैषा वासनैव प्रद्योतनशब्देनोच्यत इत्यर्थः ॥ २५ ॥ तादृशप्रकाशस्य फलमाह *य इति ॥ २६ ॥ तेनेत्यादेरर्थमाह *स्वप्नवदिति ॥ यथा स्वप्नेऽसत्यापि व्याघ्रोऽहमिति मन्यते, एवं मुमूर्षुः प्राप्तव्यदेहे अहमिति तादात्म्याभिमानं कुर्वन् पूर्वोक्तप्रकाशेन दर्शितमार्गः स्वशरीरान्निर्गच्छतीत्यर्थः ॥ केन द्वारेणेत्याकाङ्क्षायां चक्षुष्टो वेत्यादत्ते *गम्येति ॥ २७ ॥ उक्तविकल्पस्य व्यवस्थामाह *चक्षुरिति ॥ द्वारभेदेन गमने तत्तल्लोकप्रापकं कर्मैव हेतुरित्याह *कर्मेति ॥ २८ ॥ ननु लिङ्गोपहितस्य देहाद्देहान्तरगमनमनुपपन्नं बहुविधपदार्थप्रतिहतस्य लिङ्गस्य गत्यनुपपत्तेस्तत्राह *लिङ्गमिति ॥ २९ ॥ त-

तमुत्क्रामंतमात्मानमनु प्राणस्य निर्गमः ॥
निर्गच्छन्तं प्राणमनु प्राणास्ते चक्षुरादयः ॥ ३० ॥
नन्वात्मप्राणवागादेरन्योऽन्यव्यतिमिश्रणात् ॥
क्रमो नात्रेति चेन्नैवं क्रमस्यात्रानपेक्षणात् ॥ ३१ ॥
विवक्षितं प्रयोक्तृत्वमत्रोच्चिक्रमिषाऽऽत्मनः ॥
प्रयोजकः प्राणगतेः प्राणः सोऽन्यप्रयोजकः ॥ ३२ ॥
श्रुतिः–सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥ २ ॥
वा०–देहाज्जिगमिषुः प्राणसहितो निर्गतः पुनः ॥
सविज्ञानो भवेत्पूर्वं हृदि प्रद्योतनं यथा ॥ ३३ ॥
पुरा नाडीविशेषेण निर्गन्तुं ज्ञानमीरितम् ॥
गन्तुं लोकविशेषेऽथ पुनर्विज्ञानमीर्यते ॥ ३४ ॥
निर्गत्य नगरद्वाराविशेषाद् बुद्धिपूर्वकम् ॥

मिसादेरर्थमाह *तमिति ॥ प्राणस्य मुख्यस्येति शेषः ॥ ३० ॥ उक्तक्रममाक्षिप्य समाधत्ते *नन्वित्यादिना ॥ ३१ ॥ क्रमस्याविवक्षितत्वे किं तर्ह्यत्र विवक्षितं तत्राह *विवक्षितमिति ॥ तदेव स्पष्टयति *अत्रेति ॥ अस्मिन्लोके आत्मनो या उत्क्रान्तीच्छा सा मुख्यप्राणस्योत्क्रान्तिं प्रयोजयति, स च प्राणो अन्येषां वागादीनामुत्क्रान्तिप्रयोजक इत्यर्थः ॥ ३२ ॥ सविज्ञानो भवतीत्येतद् व्याचष्टे *देहादिति ॥ ३३ ॥ हृदि प्रद्योतनेनैव गमनस्य प्रकाशितत्वात्पुनर्विज्ञानोत्पत्तिकथनं वृथेत्याशङ्क्य तयोः फलभेदमाह *पुरेति ॥ ३४ ॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति *निर्गत्येति ॥ सविज्ञानमेवान्ववक्रामतीति श्रुतेः सविज्ञानं विज्ञानोद्भासितं गन्तव्यलोकं गच्छतीत्य-

ततो गतव्यदेशस्य विशेषश्चिन्त्यते यथा ॥ ३५ ॥
ज्ञानद्वयं कर्मजन्यं पुंसः स्वातन्त्र्यमत्र न ॥
अन्यथा मरणे सर्वो ज्ञात्वाऽऽत्मानं कृती भवेत्॥३६॥
यत एवमतः पुंभिः स्वातन्त्र्यार्थं प्रयत्नतः ॥
योगादिसाधनात्त्यागात्कर्त्तव्यः पुण्यसञ्चयः ॥ ३७ ॥
हेतुर्जाग्रद्वासनाऽस्य स्वप्नारम्भे यथा तथा ॥
जन्मान्तरारम्भहेतुः किं स्यादिति तदुच्यते ॥ ३८ ॥
विद्या सम्पादिता तेन पुरा कर्म च यत्कृतम् ॥
या वासना च तत्सर्वं जन्मभोग्यादिकारणम् ॥३९॥
सम्यक्संशयमिथ्याख्यज्ञानत्रयमुदीर्यते ॥
विद्येति ब्रह्मविद्या तु न ग्राह्या जन्मघातिनी ॥ ४० ॥

र्थः ॥ ३५ ॥ विज्ञानप्रकाशितो लोको गन्तव्यश्चेत्पुण्यलोकप्रकाशकं ज्ञानमुत्पाद्य तत्र गन्तुं शक्यत्वात्किं धर्मानुष्ठानक्लेशेनात आह *ज्ञानद्वयमिति । विपक्षे दण्डमाह *अन्यथेति ॥ ३६ ॥ उत्क्रान्तिप्रकरणाभिप्रायमाह *यत इति ॥ यस्मान्मृतिकाले कर्मणा नीयमानस्य स्वातंत्र्याभावात्किञ्चित्सम्पादयितुमशक्यं तस्मात्तत्काले स्वातन्त्र्यसिध्यर्थं स्वस्थावस्थायामप्रमत्तैः सर्वकर्माणि संन्यस्य यमनियमाद्यनुष्ठानपूर्वकं चित्तवृत्तिनिरोधलक्षणयोगाभ्यासेनात्मविचारेण चादरादनन्तपुण्योपचयः कार्य इत्यर्थः ॥ ३७ ॥ तं विद्येत्याद्यवतारयति *हेतुरिति ॥ ३८ ॥ वाक्यतात्पर्यमाह *विद्येति ॥ ३९ ॥ तत्र विद्यापदेन विवक्षितमाह *सम्यगिति ॥ ननु विद्याशब्देन ब्रह्मविद्याऽपि गृह्यतामिति नेत्याह *ब्रह्मेति ॥ अत्र विद्येति बन्धहेतुर्गृह्यते कर्मादिसाहचर्यात्, ब्रह्मधीस्तु तद्ध्वंसित्वान्नेह

मनोवाक्कायसाध्यं यच्छास्त्रता यदि वाऽन्यतः ॥
दृष्टादृष्टार्थरूपं तत्सर्वं कर्मेह गृह्यते ॥ ४१ ॥
कर्मणः क्रियमाणस्य संस्कारो यो हृदि स्थितः ॥
तत्फलस्य च भुक्तस्य पूर्वप्रज्ञेति सोच्यते ॥ ४२ ॥
षण्मासशेषप्रोद्भूता भावना याऽस्य देहिनः ॥
मरिष्यतोऽन्यदेहार्था पूर्वप्रज्ञेति तां विदुः ॥ ४३ ॥
पूर्वप्रज्ञा तदुद्भूतविद्यायाः कर्मणस्तथा ॥
ताभ्यां च भावनोद्भूतिरित्यन्योऽन्यस्य हेतुता ॥ ४४ ॥
कर्मणो भुज्यमानस्य परिशेषो हि भावना ॥
मूलं च जायमानस्य प्रधानं तेन भावना ॥ ४५ ॥

विद्याशब्दमर्हतीत्यर्थः ॥ ४० ॥ अस्मिन्वाक्ये कर्मशब्दार्थमाह *मन इति ॥ ४१ ॥ पूर्वप्रज्ञाशब्दार्थमाह *कर्मण इति ॥ अतःकरणाश्रिता कर्मतत्फलसंस्कारसंज्ञिता पूर्वप्रज्ञेत्यर्थः ॥ ४२ ॥ तस्या एवार्थान्तरमाह *षण्मासेति ॥ मरणात्प्रागेव षण्मासादारभ्यास्य भाविदेहेऽहमस्मीति या वासना तत्सूचनार्था कदाचित्कदाचिदुदेति सा पूर्वप्रज्ञेत्यर्थः ॥ ४३ ॥ पूर्वप्रज्ञाशब्दस्य विद्याकर्मशब्देन समासमकृत्वा पृथक्कथने को हेतुस्तत्राह *पूर्वेति ॥ पूर्वप्रज्ञायाः विद्याकर्मणोश्चान्योऽन्यहेतुहेतुमद्भावात्कार्यकारणकोट्योर्युक्तं द्वैराश्यमिति भावः॥४४॥तस्याः प्रधानत्वाच्च ज्ञानकर्मभ्यां पृथगुक्तिर्युक्तेति मत्वा प्राधान्यं साधयति*कर्मण इति ॥ हि यस्मात्सर्वोऽपि जन्तुर्वासनावशेषमेव कर्मफलं भुंक्ते न तु निःशेषं, यस्माच्च सा कर्मोत्पत्तावपि मूलमतस्तस्याः प्राधान्यमित्यर्थः ॥४५॥ किंच विद्यादीनां त्रयाणां कार्यपर्यालोचनयाऽपि भावनाया एव प्राधान्यमित्याह*देहमिति ॥ देहगतरूपपरिमाणा-

देहं विद्या परिच्छिंद्यादीदृशो देह इत्यथ ॥
विकर्तृ कर्म, वोढ्री तु पूर्वप्रज्ञेह पूर्वयोः ॥ ४६ ॥
समर्थां सैव ते यस्मादुद्वोढुं ज्ञानकर्मणी ॥
नरस्यातः प्रधानत्वात्ताभ्यां सा गृह्यते पृथक् ॥४७॥
ननु जीवगतौ वादिविवादो बहुधेष्यते ॥
वृक्षाद्वृक्षान्तरं पक्षी यात्येवमिति केचन ॥ ४८ ॥
आतिवाहिकदेहेन याति नावा जले यथा ॥
प्रभाया इव सङ्कोचविकासावात्मनो गतिः ॥ ४९ ॥
सर्वगस्य मनोमात्रं गच्छेद्देहान्तरं प्रति ॥

दिकं विद्याफलम्, अथ—तद्वत्, कर्म विकर्तृ विकारस्यावयवोपचयस्य हेतुः, वासना तु पूर्वयोर्विद्याकर्मणोर्वोढ्री निर्वाहिका । तथा च तदुत्पत्तिहेतुत्वाच्च तस्यास्तयोर्निर्वाहकत्वेन प्राधान्यं सिध्यतीत्यर्थः ॥ ४६ ॥ वासनाप्राधान्यमुपसंहरन्फलितमाह *समर्थेति ॥ ४७ ॥

एवं पूर्वप्रज्ञाशब्दितया भुक्तफलशेषात्मकवासनया सह विद्याकर्मणी अपूर्वात्मना मृतं नरमन्वारभेते अनुगच्छत इत्युक्तम्, इदानीं तृणजलूकावाक्यमवतारयितुं भूमिकामाह *नन्विति ॥ वादिविवादमेव प्रकटयन्नादौ दिगम्बरमतमाह *वृक्षादिति ॥ ४८ ॥ देवतावादिमतमाह *आतिवाहिकेति ॥ देवता येन देहेन विशिष्टं जीवं परलोकं नयति सोऽयमातिवाहिको देहस्तेनेति यावत् । तत्र दृष्टांतमाह *नावेति ॥

दिगम्बरैकदेशिमतमाह *प्रभाया इति ॥ ४९ ॥

वैशेषिकादिमतमाह *सर्वगस्येति ॥

वृत्त्युद्भवः सर्वगाणामक्षाणां वपुरन्तरे ॥ ५० ॥
इति पञ्च मतानि स्युः श्रुतिस्तु स्वमतं जगौ ॥
श्रुतिः-तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्यात्मानमुपसꣳहरत्येवमेवायमात्मेदꣳ शरीरं निहत्याविद्यां गमयित्वाऽन्यमाक्रममाक्रम्यात्मानमुपसꣳहरति ॥ ३ ॥
वा०-जीवस्तृणजलूकेव देहाद्देहान्तरं व्रजेत् ॥ ५१ ॥
जलूका हि तृणाग्रस्था स्वमुखेन तृणान्तरम् ॥
अवलम्ब्य वपुः शिष्टं तत्सर्वत्रोपसंहरेत् ॥ ५२ ॥
लिङ्गोपाधिक आत्माऽपि क्रियाशक्त्युपसंहृतेः ॥
पातयित्वा वपुर्ज्ञानशक्तिं संहरते तथा ॥ ५३ ॥
देहस्थ एव धीवृत्त्या भावयन्वपुरन्तरम् ॥
लिङ्गोपाधिकमात्मानं प्रापयेदन्यदेहकम् ॥ ५४ ॥
ननु देहान्तरारम्भ उपादानं किमात्मनः ॥
एतद्देहारम्भकं यत्तदेवोतान्यदीर्यताम् ॥ ५५ ॥

सांख्यमतमाह*वृत्तीति ॥ ५० ॥ सर्वपक्षमुपसंहरति *इतीति । उत्तरवाक्यमादाय सिद्धांतयति*श्रुतिरिति ॥ वाक्यार्थं संक्षिपति *जीवइति ॥ ५१ ॥ दृष्टांतवाक्यं व्याचष्टे*जलूकेति ॥ अन्यमाक्रममित्यस्य व्याख्या—तृणांतरमिति ॥५२॥ दार्ष्टांतिकवाक्यं विभजते *लिङ्गेति ॥ निहत्येत्यस्य व्याख्या—पातयित्वेति । अविद्याङ्गमयित्वेत्येतद् व्याचष्टे *ज्ञानशक्तिमिति ॥ ५३ ॥ अन्यमाक्रममित्यादेरर्थमाह *देहस्थ इति ॥ ५४ ॥ पेशस्कारीवाक्यमवतारयितुं तद्व्यावर्त्यामाशङ्कामाह *नन्विति ॥ किंशब्दसूचितं विकल्पमाह *एतदिति ॥ ५५ ॥ उत्तरवाक्यमुत्तर-

श्रुतिः—तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतरꣳरूपं तनुत एवमेवायमात्मेदꣳ शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतरꣳ रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानाम् ॥ ४ ॥

वा०—सुवर्णकारः स्वर्णांशमादायान्यन्नवं नवम् ॥
तेनैव कुरुते भूय उपमृद्नाति यत्नतः ॥ ५६ ॥
पूर्वभूषणमालिन्ये भङ्गे वाऽप्यतिनूतनम् ॥
अतिरम्यं च कुरुते तथैवेहापि गम्यताम् ॥ ५७ ॥
देहारम्भकभूतानि यानि पूर्वाणि वेष्टितः ॥
तैर्लिङ्गोपाधिको यातीत्येवं सूत्रकृदब्रवीत् ॥ ५८ ॥
पञ्चीकृतास्तु भूतांशाः स्थूलदेहस्य हेतवः ॥
अल्पत्वेनापि सूक्ष्मास्तैर्लिङ्गं तिष्ठति वेष्टितम् ॥ ५९ ॥

स्वेनादत्ते *सुवर्णकार इति ॥ पेशस्कारी पेशसो मात्रामित्यनयोर्व्याख्या—सुवर्णकारः स्वर्णांशमिति ॥ ५६ ॥ क्रियमाणदेहस्य नवत्वेऽपि कथं नवतरत्वं कल्याणतरत्वं चेत्याशङ्क्य दृष्टान्तेनोपपादयति *पूर्वेति ॥ यथाशब्दपर्यायो वा शब्दः ॥ ५७ ॥ मालिन्ये नष्टेऽपि स्वर्णांशस्य सत्त्वान्नवतरभूषणकरणमुपपद्यते । प्रकृते त्वेतद्देहारम्भकभूतांशानां नाशात्कथमेतेषां देहान्तरारम्भकत्वमित्याशङ्क्य हेत्वसिद्धिमाह *देहेति । उक्तार्थे तदन्तरप्रतिपत्ताविति सूत्रं प्रमाणयति *एवमिति ॥ ५८ ॥ नन्वपञ्चीकृतानि लिङ्गं परिवेष्ट्य गच्छन्ति पञ्चीकृतानि वा ? नाद्यः तेषां स्थूलदेहानारम्भकत्वात्, नान्त्यः मृतावुपलब्धिप्रसङ्गात्तत्राह *पञ्चीकृता इति ॥ तुरवधारणे ॥ ५९ ॥ एतद्देहस्यापि लिङ्ग-

निर्मितस्तैरयं देहः पोषितः पितृवीर्यतः ॥
मृतौ कंचुकवत्त्याज्यो बाह्यांशो वीर्यनिर्मितः ॥ ६० ॥
सारस्त्वान्तरभूतांशो लिङ्गेन सह गच्छति ॥
निष्पाद्यन्ते भाविदेहास्तेनांशेन पुनः पुनः ॥ ६१ ॥
स्वर्णे विशोधिते तस्य मालिन्यमपनीयते ॥
भूषणं निर्मलांशेन क्रियते हि नवं नवम् ॥ ६२ ॥
पित्र्यगान्धर्ववैराजमृत्र्याद्या मानुषादयः ॥
उत्तमाधमदेहाः स्युस्तत्तत्कर्मानुसारतः ॥ ६३ ॥
अधिष्ठानारोप्यभागौ तेषु देहेषु यौ स्थितौ ॥
तावुभौ विशदीकर्तुं स वा इत्यादिका श्रुतिः ॥ ६४ ॥
श्रुतिः–स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः ॥
वा०–स इत्यनेन संसारी प्रकृतत्वादिहोच्यते ॥
वैशब्दोऽवधृतौ भेदवारकोऽस्य चिता सह ॥ ६५ ॥
स्वप्रकाशोऽपरोक्षोऽर्थः कथ्यते ऽत्रायमित्यतः ॥

वेष्टितसूक्ष्मभूतारब्धत्वे कथमस्योपचयः कथं वा मरणानन्तरमत्राविकलमनुभूयमानत्वं तत्राह *निर्मित इत्यादिना ॥६०॥६१॥ उक्तेऽर्थे पूर्वदृष्टान्तं स्मारयति *स्वर्ण इति ॥ ६२ ॥ पित्र्यं वेत्यादि व्याचष्टे *पित्र्येति । पित्र्यादिशरीरग्रहणस्यैच्छिकत्वं वारयति *तत्तदिति ॥ ६३ ॥ स वा अयमित्याद्यादत्ते *अधिष्ठानेति ॥ ६४ ॥ तत्र तावदधिष्ठानस्वरूपं विशदीकुर्वन्नक्षराणि व्याचष्टे *स इति ॥ अवधारणार्थेन वैशब्देन संसारिणो जडत्वं व्यावर्त्यत इत्याह *वैशब्द इति ॥ ६५ ॥ स वा अयमित्यत्रायंशब्दार्थमाह *स्वेति । आत्मशब्दार्थमाह

देहादयः स्वस्वरूपा येनात्मावात्मशब्दभाक् ॥ ६६ ॥
अधिष्ठानस्रजा सर्पदण्डाद्याः स्युः स्वरूपिणः ॥
स्रगभावे तु सर्पाद्या निःस्वरूपाः खपुष्पवत् ॥६७॥
यः संसारी पुरा प्रोक्तः स एवायं स्वतः स्फुरन् ॥
साक्षिचैतन्यरूपत्वादधिष्ठानमनात्मनः ॥ ६८ ॥
अव्यावृत्ताननुगतं वस्तु ब्रह्मगिरोच्यते ॥
ब्रह्मात्मनोस्तु तादात्म्यं सामानाधिकरण्यतः ॥ ६९ ॥
प्रत्यक्त्वं ब्रह्मणस्तत्त्वं ब्रह्मत्वं चात्मनस्तथा ॥
पारोक्ष्यद्वैतहानेन ह्यात्मा ब्रह्मेति बोध्यते ॥ ७० ॥
इति प्रोक्तं वस्तुतत्त्वं तत्रारोपः प्रपञ्च्यते ॥
उक्ततत्त्वापरिज्ञानाद् बुद्ध्युपाधिः प्रजायते ॥ ७१ ॥
तेनोपहित आत्माऽयं विज्ञाताऽस्मीति भावनात् ॥
विज्ञानमयतामेति स्रक्सर्पमयतामिव ॥ ७२ ॥
विज्ञानं ज्ञातृतोपाधिर्मनः संकल्पसाधनम् ॥

---

*देहेति ॥ देहद्वयकल्पनाधिष्ठानं तत्सत्ताप्रदवस्त्वात्मशब्दितमित्यर्थः ॥ ६६ ॥ कल्पितस्याधिष्ठानस्वरूपेणैव स्वरूपत्वमन्वयव्यतिरेकाभ्यां साधयति *अधिष्ठानेति ॥ ६७ ॥ स वा अयमात्मेति पदचतुष्टयार्थं निगमयति *य इति ॥ ६८ ॥ ब्रह्मशब्दार्थमाह *अव्यावृत्तेति ॥ ६९ ॥ कथं तयोस्तादात्म्यं पारोक्ष्यसद्वयत्वाभ्यां विरोधात्तत्राह *प्रत्यक्त्वमिति । विरुद्धभागत्यागादैक्यं सोऽयमित्यत्र प्रसिद्धमिति हिशब्दार्थः ॥ ७० ॥ वृत्तमनूद्यानन्तरवाक्यमादत्ते *इतीति ॥ तत्रात्मनो विज्ञानमयत्वमुपपादयति *उक्तेत्यादिना ॥७१॥७२॥ विज्ञानमयो मनोमय इत्यनयोः पौनरुक्त्यमाशङ्क्य विज्ञानमनसोरर्थभेदमाह *विज्ञान-

क्रियोपाधिर्भवेत्प्राणस्तेऽन्तर्बहिरवस्थिताः ॥ ७३ ॥
ज्ञातृत्वभ्रान्तिरादौ स्यात्ततः संकल्पविभ्रमः ॥
संकल्पितेऽर्थे कर्तृत्वमित्यन्तर्बाह्यताभ्रमः ॥ ७४ ॥
भवेत्प्राणमयादन्तर्मनोमय इति श्रुतिः ॥
तस्मादप्यान्तरस्तद्वद्विज्ञानमय ईरितः ॥ ७५ ॥
क्रमाद्बुद्धिमनःप्राणैर्ज्ञातृत्वादिसमुत्थितेः ॥
विकारार्थे मयट् प्रोक्तः प्राचुर्यार्थेऽथवा भवेत् ॥७६॥
विज्ञानाद्यनुसारेण ।चिदात्मा ज्ञातृतादिमान् ॥
प्राचुर्यमेतन्न त्वात्मा विकारः कस्यचित्क्वचित् ॥७७॥
चक्षुर्मयः श्रोत्रमयो द्रष्टा श्रोत्रेति विभ्रमात् ॥

मिति ॥ प्राणमय इत्यत्र प्राणशब्दार्थमाह *क्रियेति । विज्ञानमय इति प्रथमं ज्ञातृत्वाध्यासोक्तौ नियामकमाह *अन्त इति ॥ ७३ ॥ तेषामन्तर्बहिर्भावेऽनुभवं प्रमाणयति *ज्ञातृत्वेति ॥ अज्ञाते संकल्पायोगाद् बुद्धिपूर्वकक्रियायाः संकल्पपूर्वकत्वाच्चेति भावः॥७४ तत्र तैत्तिरीयकश्रुतिमपि प्रमाणयति *भवेदिति ॥ ७५ । विज्ञानमय इत्यादौ मयट्शब्दस्य हेतूक्तिपूर्वकं विकारार्थत्वमाह क्रमादिति । ज्ञातृत्वाध्यासस्य बुध्यादिविकारत्वात्तद्विशिष्ट आत्मापि तद्विकार इत्युपचर्यत इत्यर्थः ॥ मयटः प्राचुर्यार्थत्वेऽपि न दोष इत्याह *प्राचुर्येति ॥ ७६ ॥ तदुपपादयति *विज्ञानेति ॥ ज्ञातृत्वाद्यध्यासस्य बुध्यादिप्राधान्यादात्मनस्तत्प्राचुर्यमित्यर्थः ॥ मयटो मुख्यविकारार्थत्वमाशङ्क्य निर्विकारत्वश्रुतिविरोधान्नैवमित्याह *नत्विति ॥ ७७ ॥ आत्मनश्चक्षुःश्रोत्रमयत्वमुपपादयति *चक्षुरिति ॥ चक्षुरादिशब्दोऽनुक्तेन्द्रि

एतावता लिङ्गदेहतादात्म्यारोप ईरितः ॥ ७८ ॥

श्रुतिः–पृथिवीमय आपोमयो वायुमय आकाशमय-स्तेजोमयोऽतेजोमयः ॥

वा०–स्थूलदेहारोपयुक्तः पृथिव्यादिमयोक्तितः ॥
काठिन्याद्या भूतधर्मा दृश्यन्ते स्थूलदेहके ॥ ७९ ॥
अहं मनुष्य इत्येवं स्थूलदेहे भ्रमः स्फुटः ॥
वर्णाश्रमवयोऽवस्थाध्यासश्चास्मिन्नातिस्फुटः ॥ ८० ॥
अतेज इतिशब्देन मूलाज्ञानं विवक्षितम् ॥
अहमज्ञ इति स्पष्टमज्ञानाध्यास ईक्ष्यते ॥ ८१ ॥

श्रुतिः–काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्म-मयो ऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय इति यथा कारी यथाचारी तथा भवति साधुकारी साधुर्भ-वति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन ॥

वा–कामं क्रोधं तथा ऽधर्मं तद्विरुद्धं च मोहतः ॥
सम्भावयन्प्रतीच्यात्मा तन्मयत्वं निगच्छति ॥८२॥

योपलक्षणमित्याह *एतावतेति ॥ ७८ ॥ पृथिवीमय इत्यादेस्ता-त्पर्यमाह *स्थूलदेहेति ॥ आत्मनः पञ्चभूतमयत्वमाह *काठिन्ये-ति ॥७९॥ अहं विप्रोऽहं यतिरहं युवेत्यादिदेहाकारेण परिणतभू-तधर्माणां वर्णाश्रमादीनां आत्मन्यध्यासाच्च तस्य पृथिव्यादिमय-त्वोपपत्तिरित्याह *वर्णेति ॥ ८० ॥ तेजोमय इत्यन्तं व्याख्याय अतेजोमय इत्यत्र अतेजःशब्दार्थमाह *अतेज इति ॥ आत्मन-स्तन्मयत्वं तदध्यासाभिनयेन दर्शयति *अहमिति ॥ ८१ ॥ काममय इत्यादि व्याचष्टे *काममिति ॥ अहं सकामो निष्कामः

इत्येवमादयोऽनेके क्लेशाः स्युर्भावनामयाः ॥
ते सर्वमयशब्देन संक्षेपात्समुदीरिताः ॥ ८३ ॥
तद्यादित्यादिना सर्वशब्दस्यार्थ उदीर्यते ॥
प्रत्यक्षवस्तुन्यध्यासे सतीदंमयता भवेत् ॥ ८४ ॥
परोक्षवस्तुन्यध्यासाददोमय इतीर्यते ॥
आरोपोक्तिसमाप्त्यर्थमितिशब्दः प्रयुज्यते ॥ ८५ ॥
इदंमयत्वं विस्पष्टमैहिकत्वादुपेक्ष्यते ॥
अदोमयत्वं व्याचष्टे यथाकारीतिवाक्यतः ॥ ८६ ॥
यथा करोतीह लोके चरत्यपि यथा तथा ॥
परलोके भवत्येष कर्माचारप्रचोदितः ॥ ८७ ॥
करणं नित्यकर्म स्यात्काम्यं तु चरणं भवेत् ॥
करणं कर्मशक्तिर्वा चरणं प्रत्ययात्मकम् ॥ ८८ ॥
पुण्यकारी भवेत्साधुः पितृदेवादिजन्मभाक् ॥

सक्रोधोऽक्रोधः पुण्यवानपुण्योऽस्मीत्यध्यासादात्मा तत्तन्मय इत्यर्थः ॥ ८२ ॥ सर्वमय इत्यस्य तात्पर्यमाह *इतीति ॥ ८३ ॥ सर्वशब्दस्य व्याख्या तद्यदेतादिति पदत्रयमित्याह *तद्यादिति ॥ प्रत्यक्षादिप्रमाणागम्यं वस्तु सर्वशब्दार्थमिति भावः ॥ इदंमयोऽदोमय इत्यनयोरर्थमाह *प्रत्यक्षेति ॥ अहं सुखीत्यादि प्रत्यक्षाध्यासः, धार्मिकोऽहमित्यादि परोक्षाध्यास इत्यर्थः ॥ ८४ ॥ इतीत्यस्यार्थमाह *आरोपेति ॥८५॥ यथेत्याद्यवतारयति *इदमिति ॥ ८६ ॥ अक्षराणि योजयति *यथेति ॥ ८७ ॥ कर्माचारयोर्भेदं व्यनक्ति *करणमिति । सर्वकरणव्यापारशक्तिः करणं, करोतेस्तदर्थत्वात् । सर्वप्रकारज्ञानयोग्यता चरणम्, चरतेर्गत्यर्थत्वात् इत्यर्थान्तरमाह *करणमिति ॥ ८८ ॥ साधुकारीत्यादि

पापकारी स्थावरः स्यात्कामक्रोधादिचोदितः ॥ ८९ ॥
ताच्छील्यप्रत्ययात्कर्माभ्यास एव फलप्रदः ॥
इति चेन्न सकृत्कर्म कृत्वाऽपि फलमाप्नुयात् ॥ ९० ॥
पुण्य इत्यादिवाक्येन तदेतदभिधीयते ॥
कर्मशास्त्रस्य तात्पर्यमित्थं सम्यक् प्रपञ्चितम् ॥९१ ॥
सकृत्कृतौ फलप्राप्तिर्यदाऽभ्यासस्तदा वृथा ॥
इति चेत्फलभूयस्त्वसिद्ध्येऽभ्यास इष्यताम् ॥ ९२ ॥
वासना कर्म विद्या च त्रयं जन्मप्रयोजकम् ॥
उक्तं, तत्र प्रधानत्वं कर्मणः श्रूयते पुनः ॥ ९३ ॥
उत्तमाधमदेहाख्यवैषम्यं कर्मणा भवेत् ॥
देहे विद्यावासनाभ्यां भवेद्भोगस्य कौशलम् ॥ ९४ ॥
कर्मसाध्वेव कर्त्तव्यमिच्छताऽभ्युदयं चिरम् ॥

व्याचष्टे *पुण्येति ॥८९॥ पुण्यः पुण्येनेत्यादिव्यावर्त्यां शङ्कामाह *ताच्छील्येति। यथाकारीत्यादौ ताच्छील्यप्रत्ययोपादानादभ्यस्तकर्मण एव फलहेतुत्वं न सकृत्कृतस्येत्यर्थः ॥ उत्तरवाक्याभिप्रेतं परिहारमाह *नेति॥९०॥उक्तमर्थं श्रुत्यारूढं करोति *पुण्य इति॥ यथाकारीत्यादिवाक्यार्थं निगमयति *कर्मेति ॥९१॥ सकृत्कृतस्य कर्मणः फलहेतुत्वमुक्तमाक्षिप्य समाधत्ते *सकृदिति ॥ ९२ ॥ तं विद्याकर्मणी समन्वारभेते इत्यत्रैव कर्मणो जन्महेतुत्वोक्तेः पुनः कथनं व्यर्थं तत्राह *वासनेति ॥ यद्यपि वासनादित्रयं जन्महेतुरुक्तं तथापि तत्र कर्मणः प्राधान्यं वक्तुं पुनः कथनमित्यर्थः ॥९३॥ तत्प्राधान्यमुपपादयति *उत्तमेति । किं तर्हि इतरयोः फलं तत्राह *देह इति ॥ ९४ ॥ कर्मणः प्राधान्योक्तेस्तात्पर्यमाह

पापं तु सर्वदा हेयं दुःखेभ्यस्त्रस्यता भृशम् ॥ ९५ ॥
पूर्वकाण्डपरा इत्थं कर्मप्राधान्यमूचिरे ॥
अथ वेदान्तशास्त्रज्ञाः प्राहुः कामप्रधानताम् ॥ ९६ ॥

श्रुतिः—अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते तदभिसम्पद्यते ॥ ४ ॥

वा०—पुमानादौ काममय एव भूत्वाऽथ कर्मकृत् ॥
यतोऽयं कर्मणो हेतुः कमोऽतोऽस्य प्रधानता ॥ ९७ ॥
अकामस्य क्रिया काचिद् दृश्यते नेह कस्यचित् ॥
यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ॥ ९८ ॥
इत्येतद्विशदीकर्तुं स यथेत्युत्तरा श्रुतिः ॥
कामः क्रतुः कर्म जन्मेत्येषामेष क्रमो भवेत् ॥ ९९ ॥
पुंसो या विषयापेक्षा स काम इति भण्यते ॥
स एव वर्धमानः सन् क्रतुत्वं प्रतिपद्यते ॥ १०० ॥
रुचेरातिशयः काम्ये विषये क्रतुरीर्यते ॥
पाक्षिकं कर्म कामे स्यात्करोत्येव क्रतौ सति ॥१०१॥
पुण्यपापात्मकं कर्म ह्यपूर्वादृष्टशब्दितम् ॥

---

*कर्मेति ॥ ९५ ॥ वृत्तमनूद्याथो खल्वित्याद्यादत्ते *पूर्वेति ॥९६॥ काममय एवेत्यादि व्याकुर्वन्काममप्राधान्यमाह *पुमानिति ॥९७॥ कामस्य प्रधानत्वे मनुवचनमाह *अकामस्येति ॥ ९८ ॥ स यथेत्यादत्ते* इतीति । वक्ष्यमाणप्रकारेण एतत्कामप्राधान्यं वाक्यतात्पर्यमाह *काम इति ॥९९॥ कामक्रतुकर्मजन्मानि क्रमेण भवंतीत्युक्तं तत्र कामक्रत्वोरभेदमाशङ्क्याह *पुंस इति ॥१००॥ वर्धमान इत्युक्तं व्यनक्ति *रुचेरिति । फलतोऽपि तयोर्भेदमाह

उत्तमाधमजन्मास्य फलं प्रोक्तं पुराऽपि च ॥ १०२ ॥
लोकेऽपि यादृशः कामस्तादृङ्क्रिश्चयवांस्तथा ॥
कर्म कृत्वा फलं गच्छेत्तच्छुभाशुभयोः समम् ॥१०३॥

श्रुतिः—तदेष श्लोको भवति

तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषिक्तमस्य ।
प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् ॥

तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इति नु-कमयमानः ॥

वा०—कामप्राधान्यदार्ढ्यार्थं मन्त्रस्योदाहृतिः श्रुता ॥
लिंग्यते गम्यते सर्वं मनसाऽतोऽस्य लिङ्गता ॥१०४॥
तन्मनो नितरां सक्तमुत्तमे वाऽधमे फले ॥
सक्तः सन्कर्मणा सार्धं तदेव फलमाप्नुयात् ॥१०५॥
इह जन्मनि यत्किञ्चिच्छुभं कुर्यादुताशुभम् ॥
तदीयफलसंपूर्त्तिः स्वर्गे वाऽन्यत्र वाऽऽप्नुयात्॥१०६॥

---

*पाक्षिकमिति ॥ १०१ ॥ कर्मशब्दार्थमाह *पुण्येति ॥ १०२ ॥ पदार्थमुक्त्वा स यथेत्यारभ्य तदभिसंपद्यते इत्यंतं वाक्यं योजयति*लोक इति॥१०३॥तदेष इत्यादेस्तात्पर्यमाह*कामेति ॥

तत् तत्र उक्तेऽर्थे एष वक्ष्यमाणश्लोको भवतीति श्रुत्यर्थः ॥

लिङ्गशब्दव्युत्पादनपूर्वकं मन्त्रस्य पूर्वार्धं व्याचष्टे *लिंग्यत इत्यादिना ॥ १०४ ॥ १०५ ॥

अस्यात्मनः सर्वधीसाधनं मनः यत्र फले निषिक्तं नितरां सक्तमुद्भूताभिलाषं तत्र तदुपहिते आत्मापि सक्तः सन् यत्कर्म करोति तेन कर्मणा सह परलोकं प्राप्य तदेव फलमाप्नोतीत्यर्थः ॥ उत्तरभागं व्याचष्टे *इहेति ॥ १०६ ॥

अथागच्छति तल्लोकाल्लोकेऽस्मिन् कर्मसिद्धये ॥
इत्थं कामाद् बंभ्रमीति संसारे गमनागमैः ॥ १०७ ॥
खेदानुकम्पयोरेष नुशब्दोऽत्र प्रयुज्यते ॥
कष्टेयं कामितैतस्य कामी माभूत्कदाऽप्ययम् ॥१०८॥
नन्वकष्टः शुभे कामः काम एवाशुभे तु न ॥
इति चेन्न यतः कामो दृश्यते राजसे सुखे ॥ १०९ ॥
विषयेन्द्रियसंयोगाद्यत्तदग्रे ऽमृतोपमम् ॥
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ११० ॥
तत्सुखं कामयन्ते हि प्रायेण बहवो जनाः ॥
अन्यथा जारचोरादेः प्रवृत्तिः क्वापि नो भवेत् ॥१११॥
अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ॥
अनिच्छन्नपि वार्ष्णेयेत्यपृच्छत्सम्यगर्जुनः ॥ ११२ ॥

अयं संसारी इह यत्किञ्च कर्म करोति परलोके तस्य कर्मणोऽन्तं प्राप्य तत्कर्मफलं भुक्त्वेति यावत् ॥ अथ फलभोगानंतरं तस्माल्लोकादस्मै लोकाय देहाय पुनरेति । अयं हि लोकः कर्मप्रधानस्तेनोच्यते। कर्मण इति, पुनः कर्मकरणायेत्यर्थः।

इतिनुशब्दार्थमाह*इत्थमिति। बंभ्रमीति ॥ अतिशयेन भ्रमतीत्यर्थः ॥१०७॥ खेदानुकंपे अभिनयति*कष्टेति ॥१०८॥ कामस्य कथं कष्टत्वं शुभविषयस्य तस्यादेयत्वादशुभविषये कामस्यैवानुदयादिति शङ्कते *नन्विति । अशुभविषयेऽपि कामदृष्टेस्तस्य कष्टत्वोक्तिर्युक्तेति मत्वा परिहरति*नेति ॥१०९॥ राजससुखस्याशुभत्वं वक्तुं तल्लक्षणं गीतावाक्येन दर्शयति*विषयेति ॥११०॥ एवंविधे सुखे कामनैव नोदेतीत्याशंक्यानुभवविरोधान्मैवमित्याह*तदिति ॥१११॥ अशुभविषयेऽपि कामोऽस्तीत्यत्र गीतामपिप्रमाणयति*अथेति ॥ ११२ ॥ ११३ ॥ नन्वेवमपि कामविशेषस्य कष्टता

काम एष क्रोध एष रजोगुणसमुद्भवः ॥
इति प्रवर्त्तकौ कामक्रोधौ कृष्णस्तदोक्तवान् ॥ ११३ ॥
तर्ह्यस्तु सात्त्विकानन्दे काम इत्यपि मोच्यताम् ॥
सुखस्य सात्त्विकस्यापि साधने क्लेशसंत्त्वतः ॥११४॥
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ॥
तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥११५॥
प्रभूतानन्दयुक्तानां स्वर्गादीनां प्रसाधने ॥
ज्योतिष्टोमादिके दुःखं सर्वैरप्यनुभूयते ॥ ११६ ॥
सर्वथाऽनर्थकृत्कामः संसारे किं बहूक्तितः ॥
इत्यभिप्रेत्य कामेऽस्मिन्नत्यन्तं खिद्यते श्रुतिः ॥११७॥
यः पुरा स्वप्नदृष्टान्तात्परलोको विवक्षितः ॥
इतिन्वित्युपसंहारं तदुक्तेः कृतवान्मुनिः ॥ ११८ ॥
मुक्तिः सुषुप्तिदृष्टान्तान्मुनिना या विवक्षिता ॥

वाच्या न काममात्रस्य इत्याशंक्य परिहरति *तर्हीति ॥ *मोच्यतामिति । न च वक्तव्यमित्यर्थः ॥११४॥ सात्त्विकसुखस्यापि साधनक्लेशसद्भावं दर्शयितुं गीतोक्तं लक्षणमाह *यदिति । अग्रे विषमिवेत्युक्त्या साधनक्लेशः स्पष्टीकृत इति भावः ॥ ११५ ॥ अपिच सर्वानुभवसिद्धत्वात्साधनक्लेशस्य नात्र प्रमाणं मृग्यमित्याह *प्रभूतेति ॥ ११६ ॥ तुशब्दार्थमुपसंहरति*सर्वथेति॥ ११७ ॥ एवं तुशब्दार्थमुक्त्वा इति नु कामयमान इति वाक्यं परलोकास्तित्वोपसंहारपरत्वेन योजयति*य इति ॥ ११८ ॥ अथेत्याद्यवतारयति*मुक्तिरिति ॥ अतिच्छंदादिवाक्येन सुप्तस्थानं प्राप्तस्य यत्कामादिहीनं रूपं मुक्तिस्वरूपविवक्षया दृष्टांतत्वेन वर्णितं

मुनिराारभते वक्तुं तामथेत्यादिवाक्यतः ॥ ११९ ॥

श्रुतिः–अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति ॥ ६ ॥

वा०–पूर्वोक्तकामिवैषम्यमथशब्देन सूच्यते ॥
कामी संसरतीत्युक्तं कामाभावे विमुच्यते ॥ १२० ॥
अतोऽकामयमानः स्यात्कामहेतुनिराकृतेः ॥
कामहेतुश्च संकल्पो व्यासेनैवमुदीरणात् ॥ १२१ ॥
संकल्पहेतुः कामो वै यज्ञाः संकल्पसम्भवाः ॥
काम! जानामि ते मूलं संकल्पात्किल जायसे ॥१२२
असम्यक्त्वेऽपि भोगेषु सम्यक्त्वस्य प्रकल्पनम् ॥
संकल्पस्तेन भोग्या मे भूयासुरिति वाञ्छति ॥१२३
यन्मध्ये यच्च पर्यन्ते यदापाते मनोरमम् ॥
सर्वमेवापवित्रं तद्विनाशामेध्यदूषितम् ॥ १२४ ॥

तस्य दार्ष्टान्तिकं मोक्षं वक्तुमुत्तरा श्रुतिः प्रवृत्तेत्यर्थः ॥ ११९ ॥ अथाकामयमान इत्यत्राथशब्दसूचितार्थमाह *पूर्वोति ॥ वैषम्यमेव स्फुटयति*कामीति ॥ १२० ॥ उक्तमर्थं हेतूकुर्वन्नकामयमान इत्यत्रापेक्षितं पूरयति*अत इति । विषयसौंदर्यलभ्यस्य कामस्य दुस्त्यजत्वात्कथं तत्त्यागो विधीयते तत्राह*कामहेत्विति ॥ कामस्य स्वतो दुस्त्यजत्वेऽपि हेतुनिराकरणद्वारा त्यक्तुं शक्यता इति भावः ॥ १२१ ॥ व्यासोक्तमेव पठति*संकल्पेति ॥१२२॥ अत्र संकल्पशब्देन विवक्षितं वदन् तस्य कामहेतुत्वमुपपादयति *असम्यक्त्वेति ॥१२३॥ ननु भोग्यानामसम्यक्त्वमेव कुतस्तत्राह *यदीति॥१२४॥ भोग्यस्यासम्यक्त्वे कथं सर्वेषां तत्र सम्यक्त्वा-

August 1920.

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 272.

बृहदारण्यकवार्तिकसारः ।

श्रीमद्विद्यारण्यस्वामिविरचितः ।

महेश्वरतीर्थकृतया लघुसङ्ग्रहाख्यया टीकया समलङ्कृतः ।
श्रीमच्छुद्धानन्दमुनिवरशिष्य श्रीउत्तमश्लोकयतिविरचित
वेदान्तसूत्र लघुवार्तिकसहित,
पर्वतीयश्रीमन्नित्यानन्दपण्डितप्रदर्शितरीत्या वझे इत्युपनामकेन
भाऊशास्त्रिणा संशोधितः ।

BRIHADARANYAKAVARTIKASARA

BY VIDYARANYA SWAMI,

WITH A COMMENTARY CALLED LAGHUSANGRAHA BY

MAHESHWAR TIRTH.

and Vedanta Sutra Lagbu Vartika
by Sri Uttama Sloka Yati,
A pupil of Sri Mat Suddhanand Muni.

EDITED BY

BHAU SHASTRI VAJHE.

FASCICULUS X-१०.

PUBLISHED & SOLD BY THE SECRETARY'
CHOWKHAMBÂ SANSKRIT SERIES OFFICE, BENARES.
AGENTS: PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY:
OTTO HARRASSOWITZ, LEIPZIG:
PROBSTHAIN & CO., BOOKSELLERS, LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1919
Price Rupee one.

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—२७२

अतोऽसमीचि सम्यक्त्वभ्रान्तिः स्यादप्रबोधतः ॥
यावन्न सम्यग्ज्ञानेन प्रत्यगात्माऽवबुध्यते ॥ १२५ ॥
प्रतीचि बुद्धे सम्यक्त्वं भोग्येषु विनिवर्त्तते ॥
अथाकामयमानोऽयं भवतीति विवक्षितम् ॥ १२६ ॥
परमानन्दरूपत्वादस्ति सम्यक्त्वमात्मनि ॥
अबोधात्सुखमप्राप्तमिति मत्वा विमुह्यति ॥ १२७ ॥
प्रतिकूलस्य भोग्यस्य यथा स्याद् दुःखहेतुता ॥
तथाऽनुकूलं हेतुः स्यात्सुखस्येत्यस्य विभ्रमः ॥१२८॥
मा भूद्दुःखं ममेत्येवं यथा कामयतेऽनिशम् ॥
सुखं मे स्यादिति तथा नरः कामयतेऽन्धधीः ॥१२९॥
परमानन्दरूपत्वमात्मनश्चेद् विबुध्यते ॥

नुभवस्तत्राह*अत इति । यस्मात्सर्वं भोग्यजातं नश्वरत्वादमंगलं तस्मात्तत्र समीचीनत्वभ्रांतिरात्माज्ञानाद्भवेन्न तावता तस्य सम्यक्त्वमिति भावः ॥ १२५ ॥ एवं कामस्य मूलमभिधाय मूलनिवृत्त्या तन्निवृत्तिमाह*प्रतीचीति । अथेत्यादिवाक्यस्यावृत्त्याऽर्थांतरपरत्वमाह*अथेति ॥ सम्यग्ज्ञानेनाज्ञाननिवृत्तिद्वारा भोग्यसम्यक्त्वभ्रमनाशानंतरमयं पुमानकामयमानो भवतीत्यर्थः ॥ १२६ ॥ आत्मविषयसम्यग्ज्ञानाद्भोग्येषु सम्यक्त्वभ्रमो निवर्त्तते इत्युक्तं तत्रात्मधियः कथं सम्यक्त्वमित्याशंक्य स्वगोचरस्य सम्यक्त्वात्तद्धियोऽपि सम्यक्त्वमिति मत्वाऽऽत्मनः सम्यक्त्वं साधयति *परमेति ॥ आत्मनः सुखरूपत्वे तस्य नित्यसिद्धत्वात्सुखं मे स्यादिति कामना न स्यात्तत्राह *अबोधादिति ॥ १२७ ॥ मोहमेव प्रपंचयति*प्रतिकूलस्येत्यादिना ॥१२८॥१२९॥आत्मनः सुखरूपत्वे फलितमाह*परमेति ॥ प्रकृतवाक्यार्थमुपसंहरति*त-

कुतः कामयते भोग्यं ततो बोधादकामता ॥ १३० ॥
बोधलभ्यमकामत्वमथाकामेत्यसूत्रयत् ।
योऽकाम इत्यादिनैतत् सूत्रं विव्रियते स्फुटम् ॥१३१॥
योऽकामस्तस्य न प्राणा उत्क्रामन्तीति योजना ॥
संसृतिः कामिनो यद्वदकामो मुच्यते तथा ॥ १३२ ॥
दृष्टानुश्रविका बाह्याः कामा यस्य न सन्त्यसौ ॥
अकामस्तादृशत्वं तु निष्कामत्वेन सिध्यति ॥१३३॥
विभ्रमापादिताः कामाः प्रत्यक्तत्त्वाविवेकिनः ॥
यस्माद्विनिर्गताः सोऽयं निष्काम इति भण्यते ॥१३४॥
आप्तकामत्वतः सिध्येद्बुद्धेः कामाविनिर्गमः ॥

तइति ॥ १३० ॥ अनेन वाक्येन योऽकामइत्याद्युत्तरवाक्यानां पौनरुक्त्यमाशंक्य परिहरति*बोधेति ॥ १३१ ॥ तत्र योऽकाम इत्यस्य साकांक्षतया व्यवहितेन संबंधमाह*य इति । अकामस्यानुत्क्रांतौ को हेतुस्तत्राह*संसृतिरिति ॥ कामाभावे कर्माद्यभावेन मुक्त्यवश्यंभावान्मुक्तस्य च वक्ष्यमाणविधया उत्क्रांत्ययोगादिति भावः ॥ १३२ ॥ अकामशब्दार्थमाह*दृष्टेति ॥ तत्र निष्कामत्वं हेतूकरोति*तादृशत्वमिति ॥ १३३ ॥ निष्कामशब्देन विवक्षितमाह *विभ्रमेति ॥ निर्गताः कामा यस्मादिति व्युत्पत्त्या बुद्धितादात्म्याध्यासादात्मनि प्रतीयमानसर्वकामानां वासनया सह नाशो निष्कामशब्देन विवक्षित इति भावः ॥१३४॥ निष्कामत्वेऽप्याप्तकामत्वं हेतूकरोति*आप्तकामत्वत इति ॥ अत्र कामशब्दः कर्मव्युत्पत्त्याऽऽत्मवचनः । आप्तः कामः आत्मा येन, तस्य भावस्तत्त्वं तस्मादित्यर्थः ॥ आत्मप्राप्तेः कामनिवृत्तिहेतु-

अप्राप्तौ काम्यमानस्य कामः क्वापि न निःसरेत् १३५
मिष्टान्नभोजनं मुक्त्वा बुभुक्षा न निवर्त्तते ॥
अतः काम्यप्राप्तिरेव निष्कामत्वस्य कारणम् ॥१३६॥
ननु दोषस्य दृष्ट्याऽपि भवेत्कामविनिर्गमः ॥
श्वभिरास्वादितं भोज्यं पश्यन्भोक्तुं न वाञ्छति १३७
मैवं, फले साधने च पुंसः कामो द्विधा भवेत् ॥
तत्र साधनदोषेण फलकामो न नश्यति ॥ १३८ ॥
अन्यथा भोज्यदोषेण क्षुन्निवृत्तिः प्रसज्यते ॥
न ह्येवमस्त्यन्यभोज्यं सम्पाद्यापि बुभुक्षते ॥ १३९ ॥
फलं सर्वत्र चानन्दो नत्वसौ क्वापि दुष्यति ॥
तस्मादानन्दकामोऽयमानन्दाप्त्यैव नश्यति ॥१४०॥
एवं सत्याप्तकामत्वं निष्कामत्वस्य साधनम् ॥
काम्याप्तौ त्वात्मकामत्वमेव हेतुर्न चेतरत् ॥ १४१ ॥
सत्यामप्यात्मवाञ्छायां यागभार्यादिना विना ॥

त्वं व्यतिरेकेणाह॥अप्राप्ताविति॥ १३५ ॥ उक्तं निगमयति॥अत इति ॥ ३६ ॥ काम्यप्राप्तिरेवेत्यवधारणमनुपपन्नमिति शंकते॥नन्विति ॥ तत्रानुभवं प्रमाणयति॥श्वभिरिति ॥ १३७ ॥ कामनाभेदं दर्शयन् तत्र फलकामनानिवृत्तेरात्मप्राप्त्यैकसाध्यत्वान्नावधारणानुपपत्तिरिति परिहरति॥मैवमिति ॥१३८॥ प्रसंजनमिष्टमेवेत्याशंक्यानुभवविरोधान्मैवमित्याह॥नहीति॥१३९। ॥फलमिति॥ फलस्य स्वतो निर्दुष्टत्वादिति भावः ॥ १४० ॥ आत्मप्राप्तिं विना तत्कामनाऽनिवृत्तौ फलितमाह॥एवमिति ॥ सर्वकामाप्ताव्प्यात्मकामत्वं हेतूकरोति॥काम्येति ॥ १४१ ॥ नन्वात्मकामनैव काम्याप्तौ हेतुरित्यवधारणमनुपपन्नम्, यागादेरपि काम्यस्वर्गाद्या-

स्वर्गपुत्रादिकामाप्तिर्नेति चेच्छ्रूयतामिदम् ॥१४२॥
किमेकं साधनं सर्वकामानां प्रापकं भवेत् ॥
उतैकस्यैव नाद्योऽत्र युज्यते तददर्शनात् ॥ १४३ ॥
द्वितीये सर्वकामाप्तेरात्मवाञ्छैव कारणम् ॥
सर्वाणि साधनान्येको न संपादयितुं क्षमः ॥ १४४ ॥
यदुक्तमात्मवाञ्छाऽपि न पुत्राद्याप्तिसाधनम् ॥
इत्यत्र कोऽयमात्मा स्यात्सोपाधिर्वाऽनुपाधिकः १४५
सोपाधिकात्माऽऽभासः स्यान्नतु मुख्यः श्रुतीरितः ॥
निरुपाधिः परानन्द आत्मेति श्रुतिसंमतः ॥ १४६ ॥
आनन्दाः सर्वभूतानां तस्मिन्नन्तर्भवन्ति हि ॥
पुत्रादिजन्या आनन्दा अपि तस्मिन्नवास्थिताः ॥१४७॥
तथाविधात्मकामो य आप्तकामो भवेदयम् ॥

प्तिहेतुत्वाद्, यागाद्यभावे आत्मेच्छामात्रेण स्वर्गाद्याप्त्यदृष्टेश्चेति शंकते*स्वर्गेति ॥ १४२ ॥ अत्रात्मेच्छायाः सर्वकाम्यप्राप्तिहेतुत्वं विवक्षितम्, आत्मप्राप्तिश्च न साधनांतरसाध्येत्यभिप्रेत्य साधनांतरं विकल्पयति*किमिति । आद्यमनुभवविरोधेन प्रत्याह*नेति ॥ १४३ ॥ द्वितीयेऽस्मदिष्टसिद्धिरित्याह*द्वितीयइति ॥ नन्वेवमप्यवधारणानुपपत्तिरात्मेच्छां विनाऽपि सर्वकाम्यस्य तत्तत्साधनसाध्यत्वसंभवात्तत्राह*सर्वाणीति ॥१४४॥ पूर्वपक्षोक्तदूषणं परिहर्त्तुमनुवदति*यदिति॥ आत्मेच्छायाः सर्वानंदप्राप्तिहेतुत्वं वक्तुं विमर्शपूर्वकमात्मस्वरूपं निर्धारयति*अत्र कोऽयमित्यादिना ॥१४५॥१४६॥ तथापि प्रकृते किमायातं तत्राह*आनन्दा इति । एतस्यैवानंदस्येत्यादिश्रुतिप्रसिद्धिद्योतको हिशब्दः ॥ १४७ ॥ निरतिशयानंदात्मकात्मेच्छायास्तत्प्राप्तिहेतुत्वं तत्प्राप्तेश्च कामनिवृत्तिहेतुत्वमुक्त-

आत्मनः प्राप्तरूपत्वात्कोऽन्यः कामोऽस्य शिष्यते १४८॥
प्राप्तत्वादेव कामोऽपि नात्मनीति मतं यदि ॥
नैवमप्राप्तवत्सोऽयमनभिज्ञेन काम्यते ॥ १४९ ॥
कण्ठचामीकरं प्राप्तमप्यज्ञातं तु काम्यते ॥
प्राप्तोऽप्यात्माऽनभिज्ञेन काम्यतां हीयतेऽत्र किम् १५०
यद्यत्यंतमविज्ञातो न काम्यस्तर्हि शास्त्रतः ॥
सामान्यतोऽवबुद्धः सन्काम्यतामनुभूतये ॥ १५१ ॥
स कामः क्रतुमुत्पाद्य कारयेच्छ्रवणादिकम् ॥
फलं त्वनुभवस्तत्र कामात्स्वर्गो यथा तथा ॥१५२॥
य ईदृगात्मकामोऽयं प्राप्तकामो भवेत्ततः ॥
निष्कामत्वादकामः सन्संसारात्प्रविमुच्यते ॥१५३॥
संसारानर्थबीजस्य प्रध्वंसादात्मबोधतः ॥
कामकाम्याद्यसद्भावात्पूर्ण आत्माऽवतिष्ठते ॥ १५४॥

मुपसंहरति*तथेति ॥१४८॥ आत्मनो नित्यप्राप्तत्वे कथं तत्कामना ? अप्राप्तविषयविषयत्वात्कामस्येति शंकते*प्राप्तत्वादिति ॥ प्राप्तेऽपि कामो न विरुध्यत इति समाधत्ते *नैवमिति ॥१४९॥ तदेव दृष्टांतेनाह*कंठेति ॥ आत्मनोऽज्ञातत्वे सुतरां तत्र कामना नेति शंकते*यदीति । अत्यंताज्ञानिनस्तदसंभवेऽप्यापातज्ञानिनः सा संभवतीति परिहरति*तर्हीति ॥ १५१ ॥ उत्पन्नस्यापि कामस्य कथमनुभवहेतुत्वम्, अनुभवस्य प्रमाणजन्यत्वादित्याशंक्य परंपरया तस्य हेतुत्वमाह *स इति ॥१५२॥ योऽकाम इत्यादिवाक्यार्थं हेतुहेतुमद्भावेनोक्तमुपसंहरति *य इति ॥ १५३ ॥ कोऽयं संसारमोक्षस्तत्राह *संसारेति ॥ ज्ञानादज्ञानतज्जध्वंसेऽपूर्णताहेत्वभावात्पूर्णरूपेणावस्थानं मुक्तिरित्यर्थः ॥ १५४ ॥ योऽकाम इत्या-

योऽकामस्तस्य न प्राणा इति मोक्षं वदन्मुनिः ॥
जिघृक्षत्यायसं तप्तं शास्त्राचार्यात्मनिश्चयात् ॥१५५॥
उत्पन्नतत्त्वज्ञानस्य प्राणा अज्ञानबाधनात् ॥
नोत्क्रामंति न तिष्ठंति नच नश्यंत्यहेतवः ॥ १५६ ॥
रज्जुसर्पो यथा लोके रज्जुतत्त्वावबोधने ॥
न गच्छति न चाप्यास्ते नच नश्यत्यमी तथा ॥१५७॥
इत्यभिप्रेत्य वाक्यं तु केचिदेतदधीयते ॥
अत्रैव समवेत्यादि तद्वाक्यार्थ उदीर्यते ॥ १५८ ॥
अविद्यातज्जनिर्मुक्तं वस्त्वत्रैवेति भाष्यते ॥
सामित्यैकात्म्यमात्रेण प्राणानां स्थितिरुच्यते ॥१५९॥
अवनीयन्त इत्युक्त्या नाशादिभ्योऽन्यतो गतिः ॥
प्रत्यङ्मात्रैकनिष्ठत्वान्न भावाभावयोः स्थितिः ॥१६०॥

दिनाऽकामस्य पुंसः प्राणोत्क्रमणं निषिध्य निश्चयेन मोक्षं वदतो मुनेराशयमाह *य इति ॥ उक्तेऽर्थे सन्दिहानान्प्रति विश्वासार्थं तप्तपरशुं गृहीतुमिच्छतीति भावः ॥ १५५ ॥ ननु विदुषः प्राणोत्क्रान्त्यभावे देहेऽप्यवस्थानादृष्टेस्तत्रैव तेषां ध्वंसो वाच्यः । तथाऽप्यात्मातिरिक्ताभावाभ्युपगमेऽद्वैतहानिरत आह*उत्पन्नेति । अहेतवः—अज्ञाननाशादेव स्थितिगतिनाशहेतुशून्या इत्यर्थः॥१५६। उक्तमर्थं दृष्टान्तेन स्पष्टयति *रज्ज्विति ॥१५७॥ इममेवार्थम् अत्रैव समवनीयन्ते इति माध्यंदिनश्रुत्युपारूढं करोति *इतीति । केचित्—माध्यन्दिनशाखिनः ॥१५८॥ प्रतिज्ञातार्थं विभजते *अविद्येति ॥ १५९ ॥ उपसर्गार्थमुक्त्वा क्रियापदार्थमाह *अवनीयन्त इति ॥ भावाभावव्यतिरेकेण प्राणानामात्ममात्रतया स्थितिरवनयनमित्येतदुपपादयति *प्रत्यगिति ॥ १६० ॥

बंधस्य कल्पितत्वेन तन्मुक्तिरपि कल्पिता ॥
इत्यभिप्रायमाचष्टे ब्रह्मैवेत्यादिवाक्यतः ॥ १६१ ॥
ब्रह्मैव सन्वस्तुतोऽयमब्रह्म स्यादविद्यया ॥
अविद्यायां निवृत्तायां ब्रह्माप्नोतीव विद्यया ॥१६२॥
नान्यदज्ञानतोऽस्तित्वं द्वितीयस्यात्मनो यथा ॥
निवृत्तिस्तद्वदेवास्य नावगत्यात्मनोऽपरा ॥ १६३ ॥
निरस्ताशेषसंभेदं दृष्टिमात्रं निरंजनम् ॥
यो जानाति स आत्मज्ञस्ततोऽन्ये मूढचेतसः ॥१६४॥
न तस्य जीवतः कश्चिद्विशेषोऽस्ति मृतस्य वा ॥
यतः सर्वविशेषाणामविद्यैवात्र कारणम् ॥ १६५ ॥
विद्यामात्रकृता ब्रह्मप्राप्तिर्मुक्तिःश्रुतीरिता ॥

माध्यंदिनश्रुतिं व्याख्याय ब्रह्मैव सन्नित्याद्यवतार्य व्याचष्टे *ध्वं-सस्येत्यादिना ॥१६१॥१६२॥ अविद्यानिवृत्तेरात्मनोऽन्यत्वमाशङ्क्यासकृदुक्तं स्मारयति *नेति। यथाऽऽत्मातिरेकेण द्वितीयवस्तुनः सद्भावोऽज्ञानान्न भिद्यते एवं तन्निवृत्तिरपि आत्मनो न भिद्यते इत्यर्थः ॥ १६३ ॥ ब्रह्मैव सन्नित्यादिवाक्यादात्मन एव ब्रह्मत्वांगीकृतौ तस्याहंधीगम्यत्वात्सर्वेऽपि ब्रह्मविद एवेति शास्त्रवैयर्थ्यमाशङ्क्याह *निरस्तेति ॥ एवंविधब्रह्मधीः शास्त्रैकलभ्येति न तद्वैयर्थ्यम । अहंधियः आरोपिताहंकारादिविशिष्टब्रह्मविषयत्वेऽपि शुद्धब्रह्मविषयत्वाभावादिति भावः ॥ १६४॥जीवतो न मुक्तिः किन्तु मरणानन्तरमेवेति केचित् तान्प्रत्याह *नेति ॥ सा चाविद्या जीवत एव विदुषोऽपनीता ऽतो मृतस्य मोक्षवादिनो भ्रान्ता इति शेषः ॥ १६५ ॥

इतोऽन्यथा तु ये मोक्षं वदंत्येते निरागमाः ॥ १६६ ॥
विमुक्तिः कर्मकार्या चेदनित्यत्वं प्रसज्यते ॥
अग्न्यौष्ण्यवत्स्वभावश्चेत्तत्र कर्म निरर्थकम्॥ १६७ ॥
अभिव्यक्तिर्विमुक्तिश्चेदभिव्यंग्यं किमत्र ते ॥
अद्वैतश्रुतिबाधः स्याद् द्वैतं चेदभ्युपेयते ॥ १६८ ॥
निगडध्वंसवच्चापि पुंसो मोक्ष इहात्मनि ॥
बंधस्य वास्तवस्येह विद्यया ध्वस्त्यसंभवात् ॥ १६९ ॥
येतु व्याचक्षते मोक्षं नित्यानंदानुभूतये ॥

जीवदवस्थायामितरत्र च विदुषो विशेषाभावे कथं ब्रह्माप्येतीत्युच्यते इत्याशङ्क्याविद्यातज्जन्यबधानाभावाभिप्रायेणाप्येतिशब्द औपचारिक इत्युक्तमेव स्मारयति *विद्येति । परस्मादन्यो जीवो ज्ञानकर्मभ्यां ब्रह्माप्येतीति मुख्य एव किं न स्यादित्याशङ्क्य ब्रह्मैव सन् इत्युपक्रमविरोधान्मैवमित्याह *इत इति ॥ १६६ किञ्च त्वदभिमता मुक्तिः किमात्मभिन्ना उत तत्स्वरूपा तत्राद्यं निराह *विमुक्तिरिति ॥ चरमं प्रत्याह *अग्नीति ॥ १६७ ॥ स्वाभाविकमेवात्मनो ब्रह्मत्वं दीपेनेव घटः कर्मणा व्यज्यत इत्याशङ्क्य अभिव्यक्तिरात्माभिन्ना न वा, तत्राद्यमद्वैतश्रुतिविरोधेन दूषयति *अभिव्यक्तिरिति ॥ द्वितीये कर्मवैयर्थ्यमिति भावः ॥ १६८ ॥ अन्येतु न ब्रह्मभावो मोक्षः, येनोक्तदोषः स्यात्किन्तु बन्धध्वंसः, स च ज्ञानकर्मसाध्यः इत्याहुः तान्प्रत्याह *निगडेति । बन्धस्य वास्तवत्वे सत्यस्य ज्ञानान्निवृत्त्यदृष्टेर्विद्यावैयर्थ्यम् । तस्यावास्तवत्वे रज्जुसर्पवत् ज्ञानादेव तन्निवृत्तिसम्भवात्कर्मवैयर्थ्यमिति न समुच्चयसिद्धिरिति भावः ॥ १६९ ॥ वैषयिकसुखज्ञानातिरिक्तयोः ज्ञानसुखयोः परस्परं विषयविष-

ज्ञानाभिव्यक्तिरित्येवं तदप्यत्र न युज्यते ॥ १७० ॥
चिदात्मनो य आनन्दः स्वरूपं चेत्तदा स्वतः ॥
व्यक्त एव पुनस्तस्याभिव्यक्तिः कीदृशी भवेत् ॥ १७१ ॥
अस्वरूपत्वपक्षे तु जन्यानंदो विनश्यति ॥
तस्मादात्माऽऽनन्द एव सर्वदा भासते स्वयम् ॥ १७२ ॥
नन्विदानीं यथा तद्वन्मुक्तौ चेदविशेषतः ॥
नातियत्नो भवेन्नृणां शास्त्रवैयर्थ्यमेवच ॥ १७३ ॥
नैवमात्मन्यविद्याया हानिः कार्या यतस्ततः ॥
तदर्थं यत्नसाफल्यं शास्त्रारंभोऽपि चार्थवान् ॥ १७४ ॥
मुक्तामुक्तस्वरूपोऽयं न विशेषोऽस्ति वस्तुनि ॥

यीभुतयोरभिव्यक्तिर्मुक्तिः समुच्चयजन्येति केचित्, तन्मतमनूद्य निराह *ये त्विति ॥ १७० ॥ कथमयोगमित्याशङ्क्य किं ज्ञानानन्दयोरात्मस्वरूपत्वम् उत तद्भिन्नत्वम्। तत्राद्यं निरस्यति *चिदिति ॥ १७१ ॥ चरमेऽपि अभिव्यक्तं सुखं नित्यमनित्यं वा ? तत्रान्त्यं प्रत्याह *अस्वरूपेति ॥ आद्ये आत्मातिरिक्तनित्यवस्त्वभ्युपगमेऽद्वैतश्रुतिबाधप्रसङ्गादस्मन्मतमेव परिशिष्यत इत्याह *तस्मादिति ॥ १७२ ॥ आत्मस्वरूपमेव मुक्तिरित्युक्तममृष्यमाणः शङ्कते *नन्विति। लौकिकं यत्नमतीत्य शास्त्रीयः शमादिः अतियत्नः। शास्त्रं मोक्षविषयम् ॥ १७३ ॥ शास्त्रीयमोक्षस्य निर्विशेषत्वेऽपि स्वाविद्यातज्जध्वंसित्वेन शास्त्रादिकमर्थवदिति परिहरति *नैवमिति ॥ यथाहुः "अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य" इति ॥ १७४ ॥ अथामुक्तस्यात्मनो मुक्तावशेषार्थं शास्त्रयत्नौ किं न स्यातां तत्राह *मुक्तेति। ततो वस्तुतो विशेषाभावे

तदविद्यैव निःशेषविशेषाणां प्रसूतिकृत् ॥ १७५ ॥
अशेषानर्थहेतुं तामविद्यां शास्त्रजा मतिः ॥
सर्वथा हन्ति तेन स्यात्साफल्यं यत्नशास्त्रयोः ॥ १७६ ॥
अविद्याध्वस्तिमापेक्ष्य सम्यग्धीजन्ममात्रतः ॥
आत्मा ब्रह्मैव सन्साक्षाद्ब्रह्माप्येतीति सुस्थितम्॥१७७॥
इति वेदांतसिद्धांतसर्वस्वं ब्राह्मणोदितम् ॥
अस्यैवार्थस्य दार्ढ्यार्थं मंत्रोदाहरणं भवेत् ॥१७८॥

श्रुतिः—तदेष श्लोको भवति ॥
यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः ॥
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥

वा०—कामिनः सर्वसंसारः पुरा मंत्रेण वर्णितः ॥
अकामस्य विमोक्षोऽत्र तथा मंत्रेण वर्ण्यते ॥ १७९ ॥
पुंसो हृदि श्रिताः कामा मुच्यंते निखिला यदा ॥
तदानीममृतो भूत्वा ब्रह्मात्रैव समश्नुते ॥ १८० ॥
सुषुप्तौ कामनाशेऽपि शिष्यते कामवासना ॥
तद्वन्मा भूदिति प्राह मुक्तौ सर्वविशेषणम् ॥ १८१॥
कामास्तु मनसो धर्मा नात्मनीति विवक्षया ॥

हेतुमाह *तदविद्येति ॥ १७५ ॥ शास्त्रयत्नयोरर्थवत्त्वं निगमयति *अशेषेति ॥ १७६ ॥ एवं सति ब्रह्मैव सन्नित्यादिवाक्यं निरवद्यमित्याह *अविद्येति ॥ १७७ ॥ ब्राह्मणार्थमनूद्य तदपीत्याद्युत्तरवाक्यमादत्ते *इतीति ॥ १७८ ॥ यदा सर्वे इत्यादिमन्त्रतात्पर्यमाह *कामिन इति ॥ यथेति शेषः ॥ १७९ ॥ मन्त्राक्षराणि व्याचष्टे *पुंस इति ॥ १८० ॥ यदा सर्वे इत्यत्र सर्वशब्दार्थमाह *सुषुप्ताविति ॥१८१॥ हृदि श्रिता इति विशेषणतात्पर्यमाह

हृदि श्रिता इति प्राह स्वात्मन्येते प्रकल्पिताः ॥१८२॥
अविद्यायाः समुच्छित्तौ तद्धेतूनामशेषतः ॥
कामानामपि नाशः स्याद्ग्रहातिग्रहरूपिणाम् ॥१८३॥
काम एव हि संसारहेतुत्वेन पुरा श्रुतः ॥
अतः कामस्य नाशोऽमावमृतो भवति ध्रुवम् ॥१८४॥
अस्मिन्नेव वपुष्येष बोधाद्ब्रह्मत्वमश्नुते ॥
ब्रह्मणो मरणाभावादमृतत्वं व्यवस्थितम् ॥ १८५ ॥
भर्तृप्रपञ्चस्त्वाहात्र मन्त्रव्याख्यानमन्यथा ॥
हृन्निष्ठा आत्मनिष्ठाश्चेत्येवं कामा द्विधा मताः ॥१८६॥
हृदि श्रिताः प्रमुच्यंते नतु प्रज्ञात्मनि श्रिताः

---

*कामा इति ॥ १८२ ॥ कामानां हृदयाश्रयत्वेऽपि कथं विद्याया तन्निवृत्तिस्तस्या अविद्यामात्रानिवर्त्तकत्वात्तत्राह *अविद्याया इति ॥ १८३ ॥ अविद्याध्वस्तौ तत्कार्यान्तःकरणध्वस्तेः तदाश्रितकामानां सविषयाणां ध्वंसेऽपि कार्यान्तरं स्थास्यति, तत्कुतो मुक्तिः, तत्राह *काम इति ॥ पुरा, काममय एवायं पुरुष इत्यादाविति शेषः ॥ कामहेतुकत्वाद्धर्मादेर्विद्यया ध्वस्तौ कर्मापि नश्यति । तथा च प्रतिबन्धभावात्कामनाशानन्तरमेव मुक्तिर्भवतीत्यर्थः ॥ १८४ ॥ अमृतो भवत्यत्र ब्रह्म समश्नुत इत्यनयोः पौनरुक्त्यं परिहरति *अस्मिन्निति ॥ १८५ ॥ निःशेषकामध्वस्तौ विदुषो मुक्तिरित्येवमर्थपरतया मन्त्रः स्वमते व्याख्यातः, इदानीमेकदेशिव्याख्यानं दूषयितुमनुभाषते *भर्तृप्रपञ्च इति ॥ १८६ ॥ आत्मनिष्ठास्तदभिन्नाः कामाः सन्तीत्यत्र श्रुतिमाह *सत्येत्यादिना ॥

सत्यकामः सत्यसंकल्प इत्यन्यत्र संश्रवात् ॥ १८७॥
आत्मकामपदेनापि सोऽयमर्थः पुरा श्रुतः ॥
आत्मैव कामा यस्येति विग्रहादात्मनिष्ठता ॥१८८॥
सर्वकामः सर्वगंध इति श्रुत्यंतरं भवेत् ॥
तस्मादनश्वरैः कामैरात्मरूपैः समन्वितम् ॥ १८९ ॥
हृन्निष्ठकामा इत्याद्या प्रसिद्धास्तद्विमोचने ॥
अमृतो रागहीनः सन्भवेद्विद्याधिकारभाक् ॥ १९० ॥
तथा कर्मसमूहेन छित्वा संसारमात्मनः ॥
संसारबीजराहित्यादत्र ब्रह्म समश्नुते ॥ १९१ ॥
पुरा हृन्निष्ठकामेभ्यः प्रोद्भूता वासनाऽऽत्मनि ॥
महारजनमुख्यैः सा दृष्टांतैः प्रतिपादिता ॥ १९२ ॥
सा बीजं जन्मनस्तस्या उच्छेदो ज्ञानकर्मभिः ॥
मन्त्रव्याख्यानमेत्तत्तु न्यायागमबहिष्कृतम् ॥ १९३ ॥
अस्थूलं नेतिनेतीति यत्तत्त्वमसकृच्छ्रुतम् ॥
कुतस्तस्य सकामत्वं श्रुत्या तस्माद्बहिष्कृतम् ॥ १९४॥

॥ १८७ ॥ १८८ ॥ १८९ ॥ एवमात्मनि नित्यकामं प्रसाध्य मन्त्रस्य पूर्वार्द्धतात्पर्यमाह *हृन्निष्ठेति ॥ तृतीयपादं व्याचष्टे *तादिति ॥ अमृतपदव्याख्या–रागहीन इति ॥ १९० ॥ चतुर्थपादाभिप्रायमाह*तथेति ॥ १९१ ॥ किं तत्संसारबीजं तत्राह *पुरेति ॥ मूर्त्तामूर्त्तब्राह्मणे बुद्धिस्थाः कामा आत्मनि पुष्पपुटन्यायेन वासनामुत्पादयन्ति, ताश्च वासना यथा महारजनमित्यादिश्रुतिभिः प्रतिपाद्यंत इत्युक्तम् । ता यदा विद्याकर्मभ्यामुच्छिद्यन्ते तदा परिशुद्ध आत्मा ब्रह्म भवतीत्यर्थः ॥१९२॥ तदेतद् दूषयति *मन्त्रेत्यादिना ॥१९३॥१९४॥ श्रुतिविरोधमुपपाद्य न्यायविरोधम-

काणादजैमिनीयैर्ये त्विच्छाद्या आत्मनो गुणाः ॥
उक्ता ब्रह्मात्मनो नैते किंतु लिङ्गात्मनो हि ते ॥१९५॥
अचिदात्मनि ते प्राहुर्लिङ्गस्याप्यचिदात्मताम् ॥
हृदि स्थिता इति प्राह श्रुतिश्चैतद्विवक्षया ॥ १९६ ॥
यदुक्तं सत्यकामत्वं तत्सोपाधिक आत्मनि ॥
उपास्यत्वेन कथनान्न मुख्यब्रह्मताऽस्य हि ॥ १९७ ॥
व्यावहारिकसत्यत्वमेवोपास्त्यै विवक्षितम् ॥
सर्वकामत्वमप्येवमतो निष्कामताऽऽत्मनः १९८ ॥
नन्वात्मा यदि निष्कामः किमर्थं हृद्विशेषणम् ॥
प्रतिज्ञातार्थसिध्यर्थं हेतूक्तिरिति बुध्यताम् ॥ १९९ ॥

व्याह *काणादेति ॥ १९५ ॥ कणभुगाद्यैर्ब्रह्मात्मधर्मत्वानङ्गीकृतावपि कामादेर्लिङ्गधर्मत्वानङ्गीकारात्कथं तदुक्तन्यायविरोधस्तत्राह *अचिदिति ॥ अनुभवे प्रकाशकमानजडधर्माः कामादय इति तैरभ्युपगमाल्लिङ्गस्य च तादृक्त्वादर्थाल्लिङ्गधर्मत्वं तैरप्युक्तमिति भावः । न्यायागमविरोधादेव चिदात्मनि कामा नेति मन्त्रस्यापि तात्पर्यं वक्तुमुचितमित्याह *हृदीति ॥ १९६ ॥ यदुक्तं कामानामात्मधर्मत्वं श्रुतिसिद्धमिति तन्निरस्यति * यदिति ॥ १९७ ॥ असत्यत्वे तस्योपास्यत्वं वा कथं तत्राह*व्यावहारिकेति ॥ १९८ ॥ कामानामात्माश्रयत्वे श्रुत्यभावेऽपि तदर्थापत्त्या तत्सिद्धिं शङ्कते *नन्विति ॥ यथाऽयं सव्येन पश्यतीत्युक्ते दक्षिणेन न पश्यतीत्यर्थाद्गम्यते, तथा हृदि श्रिताः कामा निवर्त्तन्त इति विशेषणादात्माश्रिता नित्यास्ते सन्तीति श्रुतार्थापत्तिगम्यं तदित्यर्थः ॥ विशेषणमन्यथाऽपि घटत इति दूषयति *प्रतिज्ञातेति ॥१९९॥ प्रतिज्ञाहेतू विशदयति*मुच्यंत इति ॥

मुच्यंत आत्मनः कामा हृन्निष्ठास्ते यतस्ततः ॥
अविद्ययाऽऽरोपिताश्चेद्बाध्यंते विद्यया हि ते ॥२००॥
निवार्यन्ते न चेत्कामा यथोक्ताः प्रत्यगात्मनः ॥
सोऽयं काममगत्वेन संसारित्वान्न मुच्यते ॥ २०१ ॥
आत्मनिष्ठास्तु ये कामा न ते संसारहेतवः ॥
इति चेन्निष्फलाः कामाः कल्प्यंते कुत आत्मनि॥२०२॥
कामादीनामनर्थानां प्रतीचि शतशः श्रुतौ ॥
निषेधकानि वाक्यानि संति निष्कामता ततः ॥२०३॥
कामकाम्यादिभेदेषु आगमापायिवस्तुषु ॥
यः साक्षी नागमापायी स आत्मा श्रुतिसंमतः ॥२०४॥

ब्रह्मज्ञानादात्मनि सर्वकामा निवर्त्तन्ते इति प्रतिज्ञायामविद्योत्थहृन्निष्ठा यस्मादमी अतोऽविद्ययाऽऽत्मन्यारोपितास्तन्निवृत्तौ निवर्त्तंते इति प्रतिज्ञातार्थं साधयितुं हृदीति विशेषणमर्थवदित्यर्थः । आविद्यस्य विद्याबाध्यत्वप्रसिद्धिद्योतको हिशब्दः ॥ २०० ॥ किञ्चात्मनिष्ठाः कामाः संसारहेतवो न वा । आद्ये तदनिवारणे दोषमाह *निवार्यन्ते इति ॥ कामसत्त्वे कर्मावश्यंभावान्न मुक्तिसम्भव इति भावः ॥ २०१ ॥ द्वितीयमनूद्य प्रत्याह *आत्मेति ॥ २०२ ॥ न केवलं वैफल्यादात्मनि कामासम्बन्धः किन्तु मानविरोधाच्चेत्याह *कामादीनामिति ॥ अस्थूलादिवाक्यैश्चिन्मात्रव्यतिरिक्तसर्वधर्मनिषेधादात्मनि कामासम्बन्धे फलितमाह *निष्कामेति ॥ २०३ ॥ अहमिच्छामीत्याद्यनुभवस्य तर्हि का गतिरित्याशङ्क्य सोपाधिकस्य कामादिसम्बन्धित्वेऽपि निरुपाधिकस्य न तत्सम्बन्ध इत्यभिप्रेत्य तत्स्वरूपमाह *कामेति ॥ २०४ ॥ यदुक्तं हृन्निष्ठेभ्यः कामेभ्यः पुष्पपुटिकान्यायेन समु-

कामा आत्मनि माभूवन्ब्रह्मनिष्ठास्तु स्थिता इति ॥
यदुक्तं तदसद्यस्माद्वास्य आत्मा न केनचित् ॥२०५॥
वास्येऽर्थे वासनाः सर्वाः सजातीये च तास्ततः ॥
निःसंगे भिन्नजातीये कुतः स्युः प्रत्यगात्मनि ॥२०६॥
आत्माश्रयत्वं कामानां न युक्त्या नापि शास्त्रतः ॥
भर्तृप्रपञ्चव्याख्यानमपव्याख्येत्युपेक्ष्यताम् ॥ २०७ ॥
ननु ब्रह्माश्नुतेऽत्रेति जीवतो मुक्तिरीरिता ॥
जीवंश्चेत्को विशेषोऽस्य बंधमुक्तावितीर्यताम् ॥२०८॥
श्रुतिः–तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेद ँशरीर ँशेते ॥
वा०–अभिमानः पूर्वमासीद्देहादावधुना तथा ॥
नास्तीत्यत्रापि विस्पष्टः सर्पदृष्टांत उच्यते ॥ २०९ ॥
अहिनिर्ल्वयनी सर्पनिर्मोको जीववर्जितः ॥

दुभूताः कामवासनाः संसारबीजभूता आत्मनि तिष्ठंतीति तदनूद्य निराचष्टे *कामा इति ॥ २०५ ॥ अत्रास्यत्वेऽप्यात्मनो वासनाश्रयत्वमाशङ्क्य विरोधान्मैवमित्याह *वास्येऽर्थे इति ॥ वासनाश्रययोग्य इत्यर्थः ॥ अस्तु तर्ह्यात्मनो वास्यत्वं तत्राह *सजातीयेति । कामाद्याश्रयेण हृदयेनात्मनोऽपि यत्किञ्चित्साजात्यं स्यादिति नेत्याह *निःसङ्ग इति ॥ २०६ ॥ परमतनिराकरणमुपसंहरति *आत्मेति ॥ २०७ ॥ तद्यथेत्याद्यवतारयितुं वृत्तानुवादपूर्वकमाकाङ्क्षामुद्भावयति *नन्विति ॥ २०८ ॥ तदुत्तरत्वेनोत्तरवाक्यमादत्ते *अभिमान इति ॥ २०९ ॥ तत्र दृष्टान्तभागं व्याचष्टे *अहिनिर्ल्वयनीति । अस्य व्याख्या

वल्मीके पतितस्तिष्ठत्तं सर्पो नाभिमन्यते ॥ २१० ॥
एवं स्थूलं च सूक्ष्मं च शरीरं साक्षितः पृथक् ॥
भांतं तादात्म्यविभ्रांतिरहितं व्यवतिष्ठते ॥ २११ ॥
श्रुतिः—अथायमशरीरोऽमृतः प्राणो ब्रह्मैवतेज एव सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः

वा०—यस्माद्वपुः पृथग्भूतं तस्मात्साक्ष्यशरीरकः ॥
संबंधे सशरीरत्वं स च बोधेन बाधितः ॥ २१२ ॥
स्रगज्ञानमनादाय न हि योगः स्रजो यथा ॥
प्रतीचो देहसंबंधो नात्माज्ञानमृते तथा ॥ २१३ ॥
प्रत्यग्ज्ञानशिखिध्वस्ते मिथ्याज्ञाने सहेतुके ॥
नेतिनेति स्वरूपत्वादशरीरो भवत्ययम् ॥ २१४ ॥
स्वतोऽदिग्देशकालादेः प्रत्यक्चिन्मात्रवस्तुनः ॥

सर्पनिर्मोक इति । सर्पत्वगित्यर्थः ॥ २१० ॥ एवमेवेत्या-दिदार्ष्टान्तिकभागं व्याचष्टे *एवमिति ॥ २११ ॥ अथायमशरीर इत्यत्राथशब्दस्य हेत्वर्थतां वदन्वाक्यं योजयति *यस्मादिति ॥ ननु शरीरे वर्तमानस्य कथमशरीरत्वं तत्राह *सम्बन्ध इति ॥ यथा गृहे वर्त्तमानस्यापि तत्र ममत्वाभिमानहीनस्य न गृहीत्वव्य-पदेशः, एवमज्ञदृष्ट्या देहनिष्ठस्यापि तत्संबंधहेतोरज्ञानस्यापनी-तत्वादशरीरत्वव्यपदेशो युक्त इति भावः ॥ २१२ ॥ अज्ञानं न देहसम्बन्धहेतुः स्वाभाविकत्वादात्मनः तत्संगतेरित्याशङ्क्यात्मनो-ऽसङ्गत्वश्रुतेर्मैवमिति मत्वाऽऽह *स्रगिति ॥ २१३ ॥ देहसम्ब-स्याविद्यत्वे फलितमाह *प्रत्यगिति ॥ २१४ ॥ तस्याविद्य-त्वमुपपादयति *स्वत इति ॥ *अदिग्देशकालादेरिति । दिग्देश-कालादिसम्बन्धशून्यस्येत्यर्थः ॥ अन्यथाऽसङ्गत्वश्रुतिव्याकोपः

देशादिमच्छरीरेण न संबंधस्तमो विना ॥ २१५ ॥
कल्पितेनाभिसंबंधो न त्वकल्पितवस्तुनः ॥
अज्ञानकाले ऽप्यस्तीह किमुताज्ञाननिह्नुतौ ॥ २१६ ॥
स्थूलदेहं परित्यज्य लिंगदेहयुतो यदि ॥
मृतस्तदा स्यान्न त्वेवममृतो ऽसावतो भवेत् ॥ २१७ ॥
प्रकृष्टचेष्टाहेतुत्वात्साक्ष्युक्तः प्राणशब्दितः ॥
को ह्येवान्यादिति प्रोक्तं चेष्टाहेतुत्वमात्मनः ॥ २१८ ॥
साक्षिणो ब्रह्मरूपत्वं ब्रह्मैवेत्यभिधीयते ॥
संसर्गशंकानुत्यर्थमेवकारः प्रयुज्यते ॥ २१९ ॥
संयोगः समवायो वा नैव ब्रह्मात्मनोरिह ॥
अखंडैकरसत्वं तु भवतीति विवक्षितम् ॥ २२० ॥
तदेव विशदीकर्तुं तेज एवेत्युदीर्यते ॥
चैतन्यं तेज इत्युक्तं तच्चैकमुभयोरपि ॥ २२१ ॥

स्यादिति भावः ॥२१५॥ विदुषो देहयोगो नेत्युक्तं कैमुतिकन्यायेन साधयति *कल्पितेनेति ॥ २१६ ॥ एवं विदुषोऽशरीरत्वं प्रसाध्यामृतपदं व्याचष्टे *स्थूलेति ॥ तथाचाशरीरामृतपदाभ्यां विदुषः स्थूलसूक्ष्मदेहद्वयसम्बन्धः क्रमेण निषिध्यत इति भावः ॥२१७॥ प्राणशब्दार्थमाह *प्रकृष्टेति ॥ हेत्वासिद्धिमाशङ्क्याह *क इति ॥ २१८ ॥ ब्रह्मैवेतिपदयोरर्थमाह *साक्षिण इति ॥२१९॥ एवकारार्थमेव विवृणोति *संयोग इति ॥२२०॥ एवकारेणैव ब्रह्मणोऽखण्डैकरसत्वं विवक्षितं चेदेतावतैवालं किं तेज एवेति वाक्यशेषेण तत्राह *तदिति ॥ तत्र तेजःशब्दार्थमाह *चैतन्यमिति ॥ २२१ ॥ उभयोर्जीवपरयोस्तेज एवे-

अविद्यादिनिवृत्तिश्च चैतन्यव्यतिरेकतः ॥
नास्तीत्येवमभिप्राय एवकारेण सूच्यते ॥ २२२ ॥
कृतं चिकीर्षितं सर्वं बुद्धं यच्च बुभुत्सितम् ॥
आप्तं बोधात्तथाऽऽप्तव्यं वर्जनीयं च वर्जितम् ॥२२३॥
कामप्रश्नः समाप्तोऽतो निराकांक्षो ऽभवन्नृपः ॥
सोऽहं सहस्रमित्याह स्वाभिप्रायं प्रबोधयन् ॥२२४॥
पुमर्थस्य समाप्तत्वाद्विमोक्षायेति नोक्तवान् ॥
शुश्रूषाया असंपूर्त्तेः सर्वस्वं च न दत्तवान् ॥ २२५॥
तत्त्वविद्यारसाकृष्टः श्रोतुं वांच्छति संग्रहात् ॥
साधनान्यपि विद्यायाः श्रोतुमिच्छति भूपतिः ॥२२६॥

त्यवधारणप्रयोजनमाह *अविद्येति ॥ २२२ ॥ संसारिणः सकाशाज्जीवन्मुक्तस्य महद्वैलक्षण्यमुपपाद्याथेत्यादिश्रुतितात्पर्यमुपसंहरति *कृतमिति ॥ २२३ ॥ सोऽहमित्यादेस्तात्पर्यमाह *कामेति ॥ कामप्रश्नो मोक्षार्थो मुनिना राज्ञे वरो दत्तः, तत्समाप्तिपरामर्शोऽतःशब्दार्थः । स्वाभिप्रायम्—स्वस्य कृतकृत्यताम् ॥ २२४ ॥ तत्र लिङ्गमाह *पुमर्थस्येति ॥ अकृतकृत्यत्वे पूर्ववद्विमोक्षाय ब्रूहीति पृच्छेदित्यर्थः ॥ कृतकृत्यश्चेत्तर्हि सर्वस्वदानं कार्यं न सहस्रदानम् । तद्धि गुरोरतिप्रीतिकरेति तत्राह *शुश्रूषाया इति ॥ २२५ ॥ श्रुतात्मतत्त्वस्य श्रोतव्यान्तराभावात्कथमन्यत्र श्रवणेच्छाऽवशेषः तत्राह *तत्त्वेति ॥ ज्ञातस्यैव तत्त्वस्य पुनः श्रवणे प्रीतिर्भवतीति तदर्थं श्लोकैः संगृह्य श्रोतुमिच्छतीत्यर्थः ॥ सर्वस्वानिवेदने निमित्तान्तरमाह *साधनानीति ॥ संन्यासादीनि इति शेषः ॥ २२६ ॥ ननु मुक्तस्य तदपेक्षा

मुक्तस्य च मुमुक्षोश्च सर्वत्यागो ह्यपेक्षितः ॥
फलत्वसाधनत्वाभ्यां तस्य द्वैरूप्यसंभवात् ॥२२७॥
प्रागात्मज्ञानसंभूतेः संन्यासो ज्ञानसाधनम् ॥
उत्पन्नात्मधियः पश्चात्फलरूपेण तिष्ठति ॥ २२८ ॥
श्रुतिः—तदेते श्लोका भवंति ॥
अणुः पंथा विततः पुराणो मा॑ऽस्पृष्टोऽनुवित्तो मयैव तेन धीरा अपियंति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ॥ ८ ॥
वा०—एतत्सर्वं विवक्षुः सन्मुनिः संग्रहरूपिणः ॥
श्लोकानुदाहरत्तत्र ज्ञानमार्गमिमं जगौ ॥ २२९ ॥
पंथा स्थूलादिनिःशेषविकल्पादिक्रमादणुः ॥
अनंतात्मैकमेयत्वाद्बोधोऽयं विततो भवेत् ॥ २३० ॥

अयुक्ता कृतकृत्यत्वात्। मुमुक्षुः खलु साधनमपेक्षते तत्राह *मुक्तस्येति। फले लब्धे कथं साधनापेक्षेत्याशङ्क्य विद्वत्संन्यासः साधनात्मकसंन्यासादन्य एवेति मत्वा तस्य द्विरूपतामाह *फलत्वेति ॥ २२७ ॥ द्वैरूप्यं स्पष्टयति *प्रागिति। तथा च मुक्तेनाप्यशेषक्लेशोपशमात्मकः फलरूपसंन्यासोऽपेक्षित इति भावः॥ २२८ ॥ सर्वस्वदानप्रसङ्गेऽपि राज्ञः सहस्रदाने निमित्तमुक्त्वा तामित्यादेस्तात्पर्यमाह *एतदिति ॥ संघट्टनात्पर्यमुक्त्वाऽणुरित्यादिमथमश्लोकमादत्ते *तत्रेति ॥ २२९ ॥ श्लोकाक्षराणि विभजते *पन्था इत्यादिना ॥ पन्था इत्यनेन मोक्षमार्गो ब्रह्मबोध उच्यते, तस्याणुत्वं विततत्वं च विषयकृतं पुराणत्वं हेतुकृतमित्यर्थः।

श्रुतौ मा॑ऽस्पृष्ट इत्यत्र ह्रस्वश्छांदसः माऽस्पृष्ट इत्यर्थः २३०

अनुत्पन्नागमोत्थत्वात्पुराणश्चेति कथ्यते ॥
ब्रह्मणः स्वस्वरूपत्वान्माऽस्पृष्ट इति भाषते ॥२३१॥
शास्त्राचार्योक्तितः पश्चादनुवित्तो मयैव सः ॥
ज्ञातव्याद्ब्रह्मणो नाऽन्यो ज्ञाताऽस्तीत्यवधारणम् २३२
तेनानेन पथा धीराः प्रत्यग्ध्वांतच्छिदा सदा ॥
ब्रह्मापियंति विद्वांस प्राप्तमेव नमोहृनुतेः ॥ २३३ ॥
आत्मैव ब्रह्मणोऽप्यात्मा ब्रह्मैव स्यात्स्वतस्ततः ॥
तद्याथात्म्यापरिज्ञानात्तद्विपर्ययधीरयम् ॥ २३४ ॥
निःशेषमिथ्याविज्ञानहेत्वविद्याविनाशकृत् ॥
नान्योऽस्ति ब्रह्मणो ज्ञानात्प्राप्तमेवाप्यंते ततः॥२३५॥
परमानन्द एवात्र स्वर्गशब्देन भण्यते ॥

ननु माऽस्पृष्ट इत्यप्यश्लिष्टं ब्रह्मज्ञानं हि ब्रह्म स्पृशति न प्रत्यञ्चमिति तत्राह *ब्रह्मण इति ॥ २३१ ॥ तथापि कथमनुवित्तो मयैवेत्युच्यते, नहि लब्धस्यैव वेदनमर्थवत्तत्राह *शास्त्रेति । कुतोऽवध्रियते, ब्रह्मवेदनस्य ब्रह्मणापि लब्धत्वात्, तत्राह *ज्ञातव्यादिति ॥ ब्रह्म ज्ञेयं ब्रह्म विज्ञाता तयोरभेदादवधारणमित्यर्थः ॥ २३२ ॥ तेन धीरा इत्यादेरर्थमाह *तेनेति । ब्रह्मप्राप्तेरागंतुकत्वं परिहरति *प्राप्तमिति ॥ २३३ ॥ प्राप्तस्यैवाज्ञानध्वस्त्या न प्राप्तिः ब्रह्मात्मनोर्भेददृष्टेस्तत्राह *आत्मेति ॥ तत्त्वमादिश्रुत्या तयोरैक्ये सिद्धे भेदधीर्भ्रम इत्यर्थः ॥ २३४ ॥ नन्वेवमपि तेन धीरा अपियन्तीति ज्ञानस्यैव कथं तत्प्राप्तिहेतुत्वमुक्तं तत्राह *निःशेषेति ॥ लोके ज्ञानाज्ञानयोरेव विरोधदृष्टेरिति भावः । जीवपरयोस्तमोमात्रव्यवधाने फलितमाह *प्राप्तमिति ॥ २३५ ॥ स्वर्गं लोकमित्यत्र स्वर्गशब्दार्थमाह *प-

मोक्षप्रकरणान्नित्यं क्रियार्थोऽतो न गृह्यते ॥ २३६ ॥
स्वप्रकाशतया लोकशब्देनापि स उच्यते ॥
ब्रह्मस्वभावमानंदं तद्विदो यांति तादृशम् ॥ २३७ ॥
इत उत्क्रात्मसंबोधान्मोहोच्छित्तेरनंतरम् ॥
स्वत एव यतो मुक्तो मुच्यतेऽतस्तमोहृतौ ॥२३८॥
मुक्तौ तमोऽतिरेकेण नांतरायोऽन्य इष्यते ॥
यतोऽतो ज्ञानविध्वस्तौ मुक्तः सन्नेव मुच्यते ॥२३९॥
देहपातव्यपेक्षाऽतो न स्यादूर्ध्वश्रुतेरिह ॥
ज्ञानेनाज्ञाननाशाख्ये मोक्षेऽन्यत्किमपेक्ष्यते ॥२४०॥

रमेति । स्वर्गशब्दस्य क्रियाजन्यसुखविशेषवाचित्वात्स्वरूपसुखस्यापि तदभिधेयत्वेऽनित्यत्वं स्यादत आह *मोक्षेति ॥ ननु लोकशब्दसन्निधानात्स्वर्गशब्देन यागादिफलभूतभोगभूमिरेव गृह्यतामिति नेत्याह *क्रियार्थेति । मोक्षप्रकरणपरामर्शार्थोऽतःशब्दः ॥ २३६ ॥ का तर्हि लोकशब्दस्य गतिस्तत्राह *स्वेति ॥ स इति नित्यानंदः परामृश्यते । पदद्वयस्यार्थमुपसंहरति *ब्रह्मेति । तादृशं प्रकाशात्मकम् ॥ २३७ ॥ इत इत्यादेरर्थमाह*इत इति ॥ ऊर्ध्वमित्यस्य व्याख्या मोहोच्छित्तेरनंतरमिति ॥ २३८ ॥ वस्तुतो मुक्त एव सन् ज्ञानान्मुच्यत इत्युक्तमेवोपपादयति*मुक्ताविति ॥२३९॥ ननु न ज्ञानसमानकालीना मुक्तिः, किंतु देहपातानंतरमिति ऊर्ध्वश्रुत्या निश्चीयते तत्राह*देहेति ॥ यस्माद्ब्रह्मैव सन्नित्याद्यनन्यथासिद्धश्रुत्या मुक्तस्यैव ज्ञानान्मुक्तिर्निश्चिता, तस्मादूर्ध्वश्रुतिरस्मदुक्तरीत्या मोहोच्छित्त्यानंतर्यपरेति भावः । मुक्तेर्देहपातानपेक्षत्वेऽपि ज्ञानातिरिक्तसाधनांतरापेक्षामाशंक्याह *ज्ञानेनेति ॥ न ह्युत्पन्नः आलोकस्तमोनिवृत्तावन्यदपेक्षत इति

श्लोकेनाद्येन यः पंथा प्रोक्तस्तस्मान्मतांतरम् ॥
उपन्यस्याथ सिद्धांतं प्राह श्लोकांतरेण सः ॥२४१॥
मोक्षमार्गे यथोक्तेऽस्मिन्नविद्योपप्लुताशयाः ॥
दर्शनानि विचित्राणि कल्पयंति यथारुचि ॥ २४२ ॥
श्रुतिः-तस्मिञ्छुक्लमुत नीलमाहुः पिंगलꣳ हरितं
लोहितं च ॥
वा०-शुक्लं ब्रह्मातिसंशुद्धमिति केचित्प्रचक्षते ॥
शरदि व्योमवन्नीलमित्याहुरपरे जनाः ॥ २४३ ॥
पिङ्गलं तत्परं ब्रह्म ज्वालेवेत्यपरे जगुः ॥
वैडूर्यवत्तु हरितं केचिदाहुर्विपश्चितः ॥ २४४ ॥
अपरे लोहितं प्राहुर्जपाकुसुमसन्निभम् ॥
नाडीरूपाणि वीक्ष्यात्मरूपाणीति भ्रमो ह्ययम्॥२४५॥
एकमेवैकरूपं यत्तत्त्वं ज्ञातं निरंजनम् ॥

भावः ॥२४०॥ द्वितीयश्लोकमवतारयति*श्लोकेनेति ॥ उक्तज्ञानमार्गे द्वितीयश्लोकपूर्वार्द्धेन वादिविप्रतिपत्तीरुपन्यस्यानंतरमुत्तरार्द्धेन सिद्धांतं मुनिराहेत्यर्थः ॥२४१॥ तत्र पूर्वार्द्धस्य तात्पर्यमाह *मोक्षेति ॥ विचित्रानेकदृष्टिकल्पनाहेतुमाह *अविद्येति । तत्रैव हेत्वंतरमाह *यथेति ॥२४२॥ कल्प्यमानदर्शनान्यत्र दर्शयति *शुक्लमित्यादिना ॥ २४३ ॥ २४४॥ एवमनुभूयते चेद्ब्रह्म तर्हि नानारूपवद्वं वाऽस्तु तत्राह *नाडीति॥२४५॥ उक्तप्रत्ययानां वस्त्वनुसारित्वात्प्रमात्वमाशंक्याह *एकमिति ॥ दाडिमादिवदेकस्यैवानेकरसत्वं निरसितुं विशिनष्टि *एकरूपमिति ॥ तस्यैव मेयत्वार्थमाह *ज्ञानमिति । वस्तुतस्त्वज्ञानादियोगोऽपि नास्तीत्याह *निरंजनमिति ॥ वस्त्वनुसारित्वाभावे प्रत्ययानां

जात्यन्धजाग्रदृष्ट्येव कोटिशः कल्प्यते मृषा॥२४६॥
अस्थूलं नेतिनेतीति सर्वमात्रादिनिह्नुतेः ॥
कुतोऽकारणकार्येऽस्मिन्छुक्लादेः सम्भवः परे ॥२४७॥
श्रुतिः—एष पन्था ब्रह्मणा ह्यनुवित्तस्तेनैति ब्रह्म-
वित्पुण्यकृत्तैजसश्च ॥ ९ ॥
वा०—यस्तु वेदोदितोपायक्षपिताशेषकल्मषः ॥
ब्रह्मणैवानुवित्तोऽयं तेन पन्था गुरूक्तितः ॥ २४८ ॥
विद्याधिकारी नैवान्यो ब्रह्मणस्तेन वर्णितः ॥
ब्रह्मशब्देन यद्वेत्थं भूतार्थब्रह्मणेतिगीः ॥ २४९ ॥
बोधमार्गो ब्रह्मरूपो ब्रह्मैकविषयत्वतः ॥
गुरूक्तिमनु सोऽप्यत्र लभ्यते नान्यथा क्वचित्॥२५०॥

भ्रमत्वं फलतीत्याह *जात्यंधेति ॥ २४६ ॥ वस्त्वनुसारित्वाभा-वमुपपादयति*अस्थूलेति ॥२४७॥ कल्पितमोक्षमार्गाणां त्याज्यत्वं प्रदर्श्य एष पंथा इत्यादिसिद्धान्तं प्रथमपादस्यार्थमाह *य-स्त्विति ॥ वैदिकयज्ञादिनिरस्तसमस्तपापो यः शुद्धधीस्तेन ब्रह्मणा गुरूपदेशादनु अयं मोक्षमार्गो वित्तो लब्ध इत्यर्थः॥२४८॥ब्रह्मणाऽनुवित्त इत्यत्र मुमुक्षोर्जीवस्य कथं ब्रह्मशब्दवाच्यत्वं तत्राह *विद्येति ॥ जीवब्रह्मणोरभेदविवक्षया जीवे ब्रह्मशब्दः प्रयुक्त इत्यर्थः ॥ ब्रह्मणेत्यस्यार्थान्तरमाह *यद्वेति ॥ २४९ ॥ ब्रह्मणेति-तृतीयायाः इत्थंभावार्थत्वे वाक्ययोजनाप्रकारमाह *बोधेति ॥ बोधात्मकमार्गस्यांतःकरणवृत्तेः कथं ब्रह्मरूपत्वं तत्राह *ब्रह्मैके-ति ॥ अनुवित्त इत्यस्यार्थस्तु पूर्ववदेवेत्याह *गुरूक्तिमिति २५० एष इत्यादि व्याख्याय तेनेत्यादि व्याचष्टे *ब्रह्मेति ॥

आदौ पुण्यकृद् भूत्वा पश्चात्तैजसः सन्ननंतरं ब्रह्मविद् भूत्वा

ब्रह्मविन्मुक्तिमाप्नोति तेन बोधात्मना पथा ॥
पुण्यकृत्तैजसश्चादौ भूत्वाऽथ ब्रह्मविद्भवेत् ॥ २५१ ॥
तेजःशब्देन संशुद्धा बुद्धिरेवाभिधीयते ॥
पुण्ये कृते बुद्धिशुद्धौ विद्या स्यात्स्मर्यते तथा ॥२५२
ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ॥
यथाऽऽदर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ॥ २५३ ॥
गार्भैर्होमैर्जातकर्मचौलमौञ्जीनिबन्धनैः ॥
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥ २५४ ॥
योगी वा तैजसोऽत्र स्यात्प्रत्यग्दृष्टौ समर्थतः ॥
विषयाकृष्टधीर्यस्मान्न क्षमः प्रत्यगीक्षणे ॥ २५५ ॥

तेन ब्रह्मबोधात्मकमार्गेण मुक्तिमेतीति श्रुत्यक्षरार्थः ॥

यथा ब्रह्मधीर्मुक्तिहेतुस्तथा पुण्यमपि शुद्धिद्वारा ब्रह्मधीहेतुरिति भावः ॥२५१॥ अत्र तैजसशब्देन विवक्षितमाह *तेज इति । तत्र भवस्तैजस इति शेषः । शुद्धधीः पुमानिह तैजसशब्देन विवक्षित इत्यर्थः ॥ ननु पुण्यकृतो धीशुद्धिः शुद्धधियो विद्या स्यादित्यत्र किं मानं तत्राह *स्मर्यत इति ॥२५२॥ धीशुद्धेर्विद्याहेतुत्वे स्मृतिमाह *ज्ञानमिति ॥ २५३ ॥ पुण्यस्य धीशुद्धिहेतुत्वे तामाह *गार्भैरिति ॥ २५४॥ पुण्यकृत्त्वेनैव शुद्धिस्वसिद्धेस्तैजसत्वमकिंचित्करमित्याशंक्यार्थान्तरमाह *योगी वेति ॥ समाहितधियो योगिनस्तैजसत्वे हेतुमाह *प्रत्यगिति ॥ ऐकाग्र्यबुद्धेः कथमात्मदृष्टौ सामर्थ्यं तत्राह *विषयेति ॥ प्रत्यग्याथात्म्यधीरसमाहितधियो नोदेति, कश्चिद्धीरः प्रत्यगात्मानमैक्षादिति श्रुतेः । अतो धीसमाधानं याथात्म्यज्ञानहेतुः, निदिध्यासनविधानादित्यर्थः ॥२५५॥ पुण्यकृत्पादेर्ब्रह्मवित्त्वे हेतुत्वमुक्त्वा पक्षांतरमाह *प्रसिद्धेति ॥

प्रसिद्धमहिमानौ वा पुण्यकृद्योगिनाविह ॥
ब्रह्मवित्स्तूयते ताभ्यां ब्रह्मविद्याप्रवृत्तये ॥ २५६ ॥
योगस्य कर्मणस्तत्त्वविद्यायाश्च समुच्चयः ॥
अतोऽत्रेति वदन्त्यन्ये तदयुक्तं विरोधतः ॥ २५७ ॥
अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः ॥
शान्ताः सन्न्यासिनो यान्ति तस्मै मोक्षात्मने नमः २५८
त्यज धर्ममधर्मं च उभे सत्यानृते त्यज ॥
उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज ॥२५९॥
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् ॥
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः ॥ २६० ॥
नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च ॥

स्तुतिफलमाह *ब्रह्मेति ॥ यो ब्रह्मवित्तेन गच्छति स एव पुण्यकृद्योगी चेति ब्रह्मविदः स्तुतिः ॥ सा च मुमुक्षूणां श्रवणादिप्रवृत्तावुपकरोति इत्यर्थः ॥२५६॥ केचित्तु समुच्चयानुष्ठायिनामत्र ब्रह्मप्राप्तिर्विवक्षितेत्याहुस्तन्मतमनूद्य प्रत्याह *योगस्येति । ज्ञानकर्मणोः विरोधस्य सम्बन्धग्रन्थेऽभिहितत्वादिति भावः ॥ २५७ ॥ किञ्च क्रमसमुच्चयः समसमुच्चयो वा, तत्राद्यमङ्गीकृत्य द्वितीयं दूषयति *अपुण्येत्यादिना ॥ २५८ ॥ २५९॥ ब्रह्मविदोऽपि स्तुतिनमस्कारादिदृष्टेस्तेन समुच्चयो ज्ञानस्येति तत्राह *निराशिषमिति । काम्याननुष्ठानमनारम्भः, अक्षीणत्वं निषिद्धानाचरणं, क्षीणकर्मत्वं नित्यादिराहित्यम् ॥ २६० ॥ ज्ञानकर्मासमुच्चये वाक्यान्तरमाह *नेति ॥ एकता सर्वोदासीनता, समता शत्रुमित्रादिबुद्धिव्यतिरेकेण स-

शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः ॥ २६१ ॥

अर्थस्य मूलं निकृतिः क्षमा च कामस्य रूपं च वयो वपुश्च ॥

धर्मस्य यागादि दया दमश्च मोक्षस्य सर्वोपरमः क्रियाभ्यः ॥ २६२ ॥

इत्येवं स्मृतिशास्त्राणि सर्वत्यागपुरःसरम् ॥

ज्ञानजन्माभिदधति तथा श्रुतिवचांस्यपि ॥ २६३ ॥

यत्पुण्यं बुद्धिशुद्ध्यर्थं योगो यश्चात्मबोधकृत् ॥

श्लोके द्वितीये तौ प्रोक्तौ तृतीये त्वन्यथोच्यते ॥२६४॥

यत्काम्यं कर्म योगश्च योऽणिमादिप्रदो ह्ययम् ॥

तत्संसारस्यैव हेतुर्न मुक्तावुपयुज्यते ॥ २६५ ॥

र्वत्र स्वस्मिन्निव दृष्टिः, दण्डनिधानम् अहिंसापरत्वम् ॥ २६१ ॥ चतुर्विधपुमर्थे साधनभेदोपदेशाच्च न समुच्चय इत्याह *अर्थस्येति ॥ सर्वात्मना क्रियाभ्य उपरमो न मोक्षस्य मूलं, श्रवणाद्यनुष्ठानस्य तन्मूलत्वोपगमादित्याशङ्क्यात्र क्रियाशब्देनाग्निहोत्रादिलक्षणबाह्यक्रिया विवक्षितेति ॥ २६२ ॥ यथोक्तस्मृतीनां तात्पर्यमाह *इतीति ॥ तासां प्रामाण्यार्थं श्रुतिमूलत्वमाह *तथेति । न कर्मणेत्यादीनीत्यर्थः ॥ २६३ ॥ वृत्तमनूद्यानन्तरम इत्याद्यवतारयति *यदिति । फलाभिसन्धि विनाऽनुष्ठितधर्मो धीशुद्धिहेतुः, अणिमादिप्रेप्सां विनाऽनुष्ठितोऽष्टांगयोग ऐकाग्र्यद्वाराऽऽत्मज्ञानहेतुरिति द्वितीयश्लोके वर्णिताविल्यर्थः ॥ २६४ ॥ अन्यथोक्तिमेवाह *यत्काम्यमिति ॥ २६५ ॥ एवं तात्पर्यमभिधाय श्लोकस्य पूर्वार्द्धं

श्रुतिः-अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ॥
ततो भूय इव ते तमो य उ विद्यायाꣳरताः ॥ १० ॥
वार्त्ति०-जन्मान्तरप्रदं कर्म स्यादविद्या भ्रमात्मिका ॥
एतामुपासते मूढास्तमोऽधं प्रविशंति ते ॥ २६६ ॥
देहभ्रान्तिस्तमोऽन्धत्वं देहभ्रान्तिपरंपरा ॥
काम्यकर्मरतो जन्तुस्तामाप्नोति परंपराम् ॥ २६७ ॥
ये त्वासक्ता योगाशिल्पविद्यायां ते पुरोदितात् ॥
अधिकं तम आविश्य मुच्यन्ते न कदाचन ॥ २६८ ॥
युज्यते मुक्त्यभावोऽयं तत्र बोधविवर्जनात् ॥
तेन दुःखं महच्चेति चतुर्थश्लोक ईर्यते ॥ २६९ ॥
श्रुतिः-आनन्दा नाम ते लोका अन्धेन तमसाऽऽवृताः
ताꣳस्ते प्रेत्याभिगच्छन्त्यविद्वाꣳसोऽबुधो जनाः ॥११॥
वा०-ये त्वानन्दाभिधा लोकास्तीव्रदुःखेन संयुताः ॥
तांस्ते मृत्वाऽभिगच्छन्ति ब्रह्मबोधेन वर्जिताः॥२७०॥
अविद्वांसो ह्यशास्त्रज्ञा अबुधोऽनुभवेन च ॥

व्याकरोति *जन्मेति ॥ काम्यकर्मणोऽविद्यापदवेदनीयत्वे हेतुमाह *भ्रमात्मिकेति ॥ २६६ ॥ अन्धन्तम इत्यत्र तमःशब्दार्थमाह *देहेति ॥ अन्धशब्दार्थमाह *अन्धत्वमिति ॥ निर्गलितार्थमाह *काम्येति ॥ २६७ ॥ पूर्वार्द्धं विभज्योत्तरार्द्धं विभजते *ये त्विति ॥ २६८ ॥ योगानुष्ठायिनां कथं मुक्त्यभाव इत्याशङ्क्य चतुर्थश्लोकमादत्ते *युज्यत इति ॥ मुक्त्यभावे दोषमाह *तेनेति ॥ २६९ ॥ श्लोकाक्षराणि व्याचष्टे *ये त्विति ॥ २७० ॥ अविद्वांसोऽबुध इत्यनयोः पौनरुक्त्यमाशङ्क्याह *अविद्वांस इति ॥ अबुधदित्यस्य बहुवचन-

वर्जिता दुःखबाहुल्यं जन्ममृत्युजरादिकम् ॥ २७१ ॥
ब्रह्मावबोधयुक्तानां निःशेषो दुःखसंक्षयः ॥
श्लोकेन पंचमेनात्र विस्पष्टमभिधीयते ॥ २७२ ॥
श्रुतिः-आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥
किमिच्छन्कस्य कामाय शरीरमनु संज्वरेत् ॥ १२ ॥
वार्त्ति०-पुरुषः परिपूर्णोऽयमस्मीति ह्यापरोक्ष्यतः ॥
य आत्मानं विजानाति शरीरानु ज्वरोऽस्य कः २७३
न वेत्ति चेत्स्वमात्मानं देहात्मत्वभ्रमादसौ ॥
भोक्तुस्तस्यैव भोगाय भोगमिच्छन्ननुज्वरेत् ॥२७४॥
यस्य सार्वात्म्यबोधेन बाधः स्याद्भोक्तृभोग्ययोः ॥
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ २७५ ॥
निःसङ्गस्याभिसम्बन्धो देहेनास्य न कश्चन ॥
नातो देहादिदुःखेन दुःखित्वं प्रत्यगात्मनः ॥ २७६ ॥
न दुःखक्षय एवास्य किन्तु विश्वस्य कर्तृता ॥

मबुध इति ॥ जरादिकमभिगच्छतीत्यनुषङ्गः ॥ २७१ ॥ आत्मानमित्याद्यवतारयति *ब्रह्मेति ॥ २७२ ॥ श्लोकाक्षराणि व्याकुर्वन् ज्ञानप्रकारमभिनयति *पुरुष इति ॥ २७३ ॥ आत्मधियो ज्वरनिवृत्तिहेतुत्वमुपपादयितुं तदज्ञानस्य ज्वरहेतुत्वमाह *नेति ॥ स्वस्य भोक्तृत्वभ्रमाद्भोग्यजातमिच्छन्भोग्यनाशे ज्वरन् तद्देहमनु ज्वरेत् तप्येतेत्यर्थः ॥ २७४ ॥ ज्ञानस्य तन्निवृत्तिहेतुत्वमुपपादयति *यस्येति ॥ भोक्तुर्ब्रह्मरूपत्वे भोग्यस्य तुच्छत्वे च ज्ञाने किं भोग्यं कस्य भोक्तुः कामायेच्छन् शरीरोपाधिकृतदुःखमनु दुःखी स्यादित्यर्थः ॥ २७५ ॥ देहतापेनात्मनस्तापाभावमुक्तमेव स्पष्टयति *निःसङ्गस्येति ॥ २७६ ॥

सर्वलोकात्मता चेति षष्ठे श्लोके उदीर्यते ॥ २७७ ॥

श्रुतिः—यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन्संदेह्ये गहने प्रविष्टः।

स विश्वकृत्स हि सर्वस्य कर्त्ता तस्य लोकः स उ लोक एव ॥ १३ ॥

वा०—सम्यग्दिह्यत इत्येतद्वपुः सन्देह उच्यते ॥
सम्भूयोपचितः पञ्चभूतैरेष यतस्ततः ॥ २७८ ॥
आध्यात्मिकादिभिः क्लेशैर्युक्तत्वाद्गहनो मतः ॥
तत्र प्रविष्ट आत्माऽयं गुरूक्तिमुपलभ्यते ॥ २७९ ॥
योऽनु लब्धः पुनः सोऽनुभूत्वा च प्रतिबुध्यते ॥
स विश्वकृद्भवेदीशो जीवत्वभ्रान्तिवारणात् ॥२८०॥
स हि कर्त्तेति वाक्येन कृतकृत्यत्वमुच्यते ॥
निःशेषपुरुषार्थाप्तेर्न कार्यं शिष्यते परम् ॥ २८१ ॥

यस्येत्याद्यनन्तरश्लोकमवतारयति *नेति ॥ २७७ ॥ तत्र संदेह्यशब्दार्थमाह *सम्यगिति । संदिह्यत उपचीयत इति सन्देहो देहः ह्यकारप्रयोगश्छांदसः ॥ यस्मादेष देहः पञ्चभूतैरुपचितः तस्मात्सम्यक् दिह्यत इति व्युत्पत्त्या सन्देह इति वपुरुच्यत इति योजना ॥ २७८ ॥ गहन इत्यस्यार्थमाह *आध्यात्मिकेति ॥ श्लोकस्य पूर्वार्द्धं व्याचष्टे *तत्रेत्यादिना ॥ गहनेऽस्मिन्देहे प्रविष्टः परमात्मा यस्याधिकारिणोऽनुवित्तो गुरूपदेशादनु पश्चाल्लब्धः प्रतिबुद्धः साक्षात्कृतश्च स विश्वकृदित्युत्तरार्द्धेन सम्बन्धः ॥ २७९ ॥ तस्येशत्वं साधयति *जीवत्वेति ॥ विश्वकृच्छब्देन स्वातंत्र्यं विवक्षितमित्यर्थः ॥ २८० ॥ सहि सर्वस्य कर्त्तेत्यस्यार्द्धमाह *स हि कर्त्तेति ॥२८१॥ स विश्व-

यद्वाऽन्यदृष्ट्या सर्वस्य जननात्सर्वकृद्भवेत् ॥
अज्ञानिनो ब्रह्मभूतमेनं मन्यंत ईश्वरम् ॥ २८२ ॥
लोकः सर्वोऽपि तस्यैष कार्य इत्येव तन्मतिः ॥
वस्तुदृष्ट्या तु सोऽप्येष लोको नतु ततः पृथक् ॥२८३॥
शास्त्राधिकारयुक्तेऽस्मिन्देहे विद्यात्परं पदम् ॥
अन्यथाऽनर्थ इत्येतत्सप्तमे श्लोक उच्यते ॥ २८४ ॥
श्रुतिः—इहैव संतोऽथ विद्मस्तद्वयं न चेदवेदि
र्महती विनष्टिः ॥
ये तद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवापियंति ॥१४॥
वा०—यदेह देहे निष्ठामस्तदा विद्मो वयं परम् ॥

कृदित्यादेरर्थान्तरमाह *यद्वेति । स्वदृष्ट्या वस्तुतो विश्वाभावेऽप्यज्ञजनकल्पितं विश्वकृत्वं मुक्तस्यास्तीत्यर्थः । विदुषो विश्वकृत्त्वं डित्थादिवन्न नाममात्रमिति दर्शयितुं तत्र हेतुमाह श्रुतिः *स हीति ॥ २८२ ॥ तत्रापि । हिशब्दसूचितामज्ञजनप्रसिद्धिं दर्शयति *लोक इति ॥ तन्मतिस्तेषामज्ञानिनां बुद्धिः । तस्य लोक इत्यादेरर्थमाह *तस्येति ॥ येन लोकेन मुक्तस्य सर्वजनकत्वं कल्प्यते स सर्वोऽपि लोको मुक्तदृष्ट्या ऽऽलोक एव । अत्र लोकशब्दः परमात्मपरः । वस्तुतः स्वव्यतिरिक्तं किंचिन्नास्तीत्यर्थः ॥ २८३ ॥ इहैवेत्यादेस्तात्पर्यमाह *शास्त्रेति ॥ २८४ ॥ श्लोकाक्षराणि व्याचष्टे *यदेति ॥ अथशब्दव्याख्या तदेति ॥ तदित्यस्य व्याख्या परमिति ॥

न चेदवेदिरित्यत्र वेदो वेदनं यस्य नास्ति सोऽवेदिरित्यर्थः ॥ इह चेत्परं न विद्मस्तदा वयमवेदिः । एकवचनं तु विद्म इत्युपक्रांतस्य बहुत्वस्याविवक्षितत्वसूचनाय । अहं

न चेद्विद्मस्तदाऽस्माकं विनष्टिर्महती भवेत् ॥ २८५ ॥
ये तद्विदुस्तेऽमृताः स्युरितरे दुःखमाप्नुयुः ।
दुःखमेव हि संसारः सुखं त्वल्पं च नेष्यते ॥ २८६ ॥
गर्भप्रवेशादिरूपा जुगुप्सा नात्मवेदिनः ॥
इत्येषोऽर्थोऽष्टमश्लोके विस्पष्टमभिधीयते ॥ २८७ ॥
श्रु०-यदैतमनुपश्यत्यात्मानं देवमंजसा ॥
ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥ १५ ॥
वा०-यदैतं दीप्तमात्मानमीश्वरं भूतभव्ययोः ॥
श्रुत्या साक्षात्करोत्येष न तदा विजुगुप्सते ॥ २८८ ॥
श्रुतिः-यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्त्तते ॥
तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥ १६ ॥
वा०-निःशेषविक्रियाहेतुकालातिक्रमहेतुतः ॥
देवैरुपास्य इत्येतन्नवमे श्लोक उच्यते ॥ २८९ ॥
कालो यस्माद्ब्रह्मणोऽर्वागविद्याकल्पितत्वतः ॥

यदि न वेदिस्तर्ह्यवेदिः स्यां, तथा सति विनष्टिरित्यर्थः ॥ तेनास्माकं विनष्टिरिति योजना ॥२८५॥ श्लोकस्य पूर्वार्द्धं व्याख्यायाथोत्तरार्द्धं व्याकुर्वन्विनष्टिं प्रतिपादयति *य इति ॥२८६॥ यदैतमादत्ते *गर्भेति ॥ २८७ ॥ तदक्षराणि विभजते *यदै-मिति ॥ देवमित्यस्यार्थो दीप्तमिति । अंजसेत्यस्यार्थः साक्षा-दिति ॥ २८८ ॥ यस्मादित्यादेस्तात्पर्यमाह *निःशेषेति ॥ उपास्यः परमात्मेति शेषः ॥ २८९ ॥ अक्षरार्थमाह *कालइति द्वाभ्याम् ॥ संवत्सरशब्दः कालसामान्योपलक्षणमिति मत्वा काल इत्युक्तम् । श्रुतावहोभिरिति स्वावयवैरहोरात्रैरित्यर्थः । यस्मादि-

तद्ब्रह्मोपासते देवाः स्वाभीष्टफलसिद्धये ॥ २९० ॥
ज्योतिषामपि तज्ज्योतिरादित्याद्यवभासनात् ॥
आयुर्जीवनहेतुत्वादमृतं मृतिवर्जनात् ॥ २९१ ॥
चेतनाचेतनाधार आत्माऽस्य ब्रह्मतोचिता ॥
इति स्फुटतरं श्लोके दशमे समुदीर्यते ॥ २९२ ॥
श्रु०–यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ॥
तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम् ॥१७॥
वा०–आत्मा पञ्चजनाख्यानां पंचानामाश्रयस्तथा ॥
आकाशस्य तमात्मानं वेद्मि ब्रह्म तथा श्रुतेः ॥२९३॥
गंधर्वाः पितरो देवा रक्षोभिश्च सहासुराः ॥
ज्ञेयाः पंचजनास्तैश्च चेतनं लक्ष्यतेऽखिलम् ॥ २९४ ॥
लक्ष्यते च तथाऽऽकाशशब्देन निखिलं जडम् ॥
जडाजडाधार आत्मा तस्मिन्सर्वस्य कल्पनात् ॥२९५॥
जडाजडे सात्मके हि नो चेच्छून्यत्वमापतेत् ॥

तस्य विशेषणमाह *ब्रह्मण इति ॥२९०॥२९१॥ यस्मिन्नित्याद्य-वतारयति *चेतनेति ॥ २९२ ॥ अक्षराणि योजयति *आत्मेति ॥ २९३ ॥ अत्र पंचजनशब्देन विवक्षितमाह *गंधर्वा इति ॥ पंचजनशब्दितगंधर्वादिपंचकाभिधायकैः शब्दैः सर्वं चेतनजातं लक्ष्यत इत्यर्थः ॥ २९४ ॥ आकाशपदेन विवक्षितमाह *लक्ष्यत इति ॥ पूर्वार्धस्य निर्गलितार्थमाह *जडेति ॥२९५॥ आत्मनः सर्व-कल्पनाधिष्ठानत्वं साधयति*जडाजड इति ॥ स्वतःसत्ताशून्यस्य सद्रूपात्मतादात्म्याभावेऽसत्त्वमेव स्यादित्यर्थः ॥ उत्तरार्द्धं व्याख्या-ति *एतमिति ॥ मन्य इत्यस्य व्याख्या वेद्मीति ॥ उक्तात्मानमेव

एतमाधारमात्मानममृतं ब्रह्म वेद्म्यहम् ॥ २९६ ॥
तदा विद्वान्ब्रह्म भूत्वा ब्रह्मत्वादमृतोऽभवम् ॥
मरणं ब्रह्मणः क्वापि नैव संभावितं श्रुतौ ॥ २९७ ॥
प्राणादिसंघ आत्मा स्यादेतस्य ब्रह्मता कथम् ॥
इत्याशंक्योत्तरं श्लोके ह्येकादशउदीर्यते ॥ २९८ ॥
श्रुतिः—प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः ॥ ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ १८ ॥
वाः—प्राणादिसंघो नैवात्मा किन्तु संघोपलक्षितः ॥
इत्यभिज्ञा ब्रह्मतां तु निश्चिन्वंत्यात्मनो दृढम् ॥२९९॥
आत्मन्यारोपिताः संति चक्षुःप्राणादिशक्तयः ॥
नामैकमेव संबंधाच्छक्तेराधारशक्तयोः ॥ ३०० ॥
प्राणशक्तेराश्रयत्वादात्मा प्राण उदीरितः ॥

ब्रह्मत्वेनैव वेद्मीत्यर्थः ॥ वेद्मीत्यादि मंत्रदृशो वचनम् ॥ २९६ ॥ विद्वानमृतम् इत्यवशिष्टं पदद्वयमनुषंगेण योजयति *तदेति॥२९७॥ प्राणस्येत्याद्युत्तरं श्लोकं शंकोत्तरत्वेनावतारयति *प्राणादीति ॥ २९८॥ श्लोकतात्पर्यं संगृह्णाति *प्राणादीति ॥ अभिज्ञा आत्मानात्मविवेककुशलाः ॥ २९९ ॥ तात्पर्यमुक्त्वा प्राणस्य प्राणमित्यादि पदशो व्याख्यातुं प्राणादीनामात्मनश्च प्राणादिपदाभिधेयत्वं साधयति *आत्मनीति । चक्षुरादिकार्यानुपपत्तिकल्प्यास्तज्जननशक्तयः आत्मनि संतु, ततः किं तत्राह *नामेति । शक्त्याधारस्यात्मनः शक्तस्य शक्तिकार्यप्राणस्य च प्राणशक्तिसंबंधत्वाविशेषात्प्राणनामत्वमित्यर्थः ॥ ३०० ॥ उक्तमेव

तया शक्त्योत्पादितत्वाद्वायुश्च प्राणनामकः ॥ ३०१ ॥
न्यायः सर्वत्र योज्योऽसौ चक्षुरादिषु नामसु ॥
अतस्तैर्नामभिः सर्वैरेक आत्माऽभिधीयते ॥ ३०२ ॥
प्रसिद्धचक्षुःप्राणादेर्य आत्मा मूलकारणम् ॥
प्राणादिनामकं तं ये विदुस्ते ब्रह्मवेदिनः ॥ ३०३ ॥
आदिहीनत्वतो ब्रह्म पुराणमिति गीयते ॥
अग्र्यं श्रेष्ठं भवेदेतन्नीचजीवत्ववर्जनात् ॥ ३०४ ॥
तस्यास्य दर्शनोपायः कः स्यादित्यभिचोदितः ॥
श्लोकेन द्वादशेनाह मनसैवेति निर्णयम् ॥ ३०५ ॥
श्रु०-मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किंचन ॥
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥१२॥
वा०-आत्मानात्मपदार्थेषु विज्ञानोत्पत्तिसाधनम् ॥

व्यनक्ति *प्राणेति ॥ वायुराध्यात्मिक इति शेषः ॥ ३०१ ॥ उक्तन्यायमन्यत्राप्यतिदिशति *न्याय इति ॥ चक्षुरादिशक्त्या-श्रयत्वादात्मा चक्षुरादिशब्दवाच्यः,तच्छक्तिजन्यत्वात्, रूपाद्युप-लब्धिकारणानि चक्षुरादिशब्दवाच्यानीत्यर्थः ॥ एवमात्मनः प्रा-णादिनामकत्वे फलितमाह *अत इति ॥ ३०२ ॥ एवमक्षराणि विभज्य वाक्यं योजयति *प्रसिद्धेति ॥ ब्रह्म निचिक्युः इत्यस्य व्याख्या ब्रह्मवेदिन इति ॥ निचिक्युर्निश्चयेन चिक्युर्ज्ञातवंत इत्यर्थः ॥ ३०३ ॥ ब्रह्म पुराणमित्यत्र ब्रह्मणः पुराणत्वमग्र्यत्वं चोपपादयति *आदीति ॥ ३०४ ॥ आकांक्षापूर्वकमनंतरश्लो-कमादत्ते *तस्यास्येति ॥ प्राणादिहेतुत्वेन वर्णितस्य प्रसक्तत्व-स्य दर्शनोपायः को भवेदित्यर्थः ॥ ३०५ ॥ कथमात्मज्ञाने म-नसः साधनत्वमित्याशंक्य तस्य सर्वधीसाधारणकारणत्वस्य सर्वै

मनः साधारणं दृष्टं सर्वज्ञानैकहेतुतः ॥ ३०६ ॥
प्रत्यक्चिदाकृतिस्तस्य नित्या व्योमाकृतिर्घटे ॥
यथा तथाऽन्यनैराश्यादात्मत्वात्सन्निधेः सदा ॥३०७॥
धर्माधर्माद्यपेक्षत्वादन्यत्वाद् व्यवधानतः ॥
शब्दाद्याकारता तस्य कादाचित्की न सर्वदा ॥३०८॥
सिद्धेऽप्यस्य चिदाकारे ब्रह्माकारः पुनर्गुरोः ॥
शास्त्राच्चेति श्रुतिर्ब्रूते ह्यनुद्रष्टव्यमित्यसौ ॥ ३०९ ॥
श्रोत्राद्यपेक्षा शब्दादौ नात्मनीति विवक्षया ॥
मनसैवेति वक्त्येषा बाह्येंद्रियनिवृत्तये ॥ ३१० ॥

रिष्टत्वान्न मया साधनीयं तदित्याह *आत्मेति । दृष्टमिति सर्वैरंगीकृतमित्यर्थः । तत्र हेतुः *सर्वेति ॥ सर्वत्र ज्ञानहेतूनां मध्ये मनसोऽन्यतमत्वेन हेतुत्वादिति यावत् ॥ अतो न पूर्वार्द्धेन पौनरुक्त्यम् ॥ ३०६ ॥ किंच बुद्धिवृत्तेर्यावत्सत्त्वमात्माकारतायाः स्वाभाविकत्वान्न मनस आत्मज्ञानासाधनत्वशंकेत्याह *प्रत्यगिति ॥ घटस्य यावत्सत्त्वं व्योमसंबंधवद् बुद्धेश्चिदाकारः स्वतः सिद्ध इत्यत्र हेतुत्रयमाह *अन्येति । अन्यनैराश्यं धर्मादिनिरपेक्षत्वम् ॥ ३०७ ॥ ननु मनसः किमित्यात्माकृतिः स्वतः-सिद्धेति विशेष्यतेऽनात्माकृतेरपि तथात्वादित्याशंक्य नेति वैलक्षण्यमाह *धर्मेति ॥ ३०८ ॥ बुद्धेरात्माकारतायाः स्वतःसिद्धत्वे गुरुशास्त्रवैयर्थ्यमाशंक्याह *सिद्ध इति । ब्रह्माकारः स्यादिति शेषः ॥ उक्तमर्थं प्रकृतश्रुत्युपारूढं करोति *इतीति मनसैवेत्यत्रैवकारव्यावर्त्यमाह *श्रोत्रेति । मनसः शब्दस्पर्शादिधीहेतुत्वे ऽपि बाह्येंद्रियसहितस्यैव तद्धीजनकत्वम् । आत्मधीजनने तु न तदपेक्षेत्यर्थः ॥ ३१० ॥ द्वितीय-

नेह नानेति हेतूक्तिर्द्वैतं शब्दादिकं नहि ॥
ब्रह्मात्मनि ततो बाह्यमिंद्रियं नोपयुज्यते ॥ ३११ ॥
माभूच्छब्दादिकं द्रष्टृद्रष्टव्यात्मभिदाऽस्ति हि ॥
द्रष्टव्यं ब्रह्म जीवेनेत्येतन्मतमपोद्यते ॥ ३१२ ॥
यः पश्यति ब्रह्म भिन्नमिव स्वस्मादसौ पुमान् ॥
बहुयोनिषु जातः सन्मृत्योर्मृत्युमवाप्नुयात् ॥३१३॥
भ्रांतो जीवेशयोर्भेदः कल्पितोऽसौ न वास्तवः ॥
इत्येतत्प्रतिपत्त्यर्थमिवशब्दः प्रयुज्यते ॥ ३१४ ॥
अत्यंतभेदाभावेऽपि भेदाभेदौ तयोरिति ॥
मतं वारयितुं श्लोकस्त्रयोदश इहोच्यते ॥ ३१५ ॥
श्रु०-एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् ॥
विरजः पर आकाशादज आत्मा महान्ध्रुवः ॥ २० ॥
वा०-एकेनैव प्रकारेण भास्वच्चिन्मात्ररूपिणा ॥

पादं व्याचष्टे *नेहेति । तस्य हेतुत्वमुपपादयति *द्वैतमिति ॥ तस्मादिह ब्रह्मात्मनि द्वैतं किंचन नास्ति तस्मान्नात्मग्रहणे मनसो द्वैतग्राहकबाह्येंद्रियापेक्षेत्यर्थः ॥ ३११ ॥ उत्तरार्द्धतात्पर्यमाह *मा भूदिति ॥ द्रष्टुर्जीवात्मनो द्रष्टव्यस्य परमात्मनश्च भेदो वक्तव्यः, अभेदे तदयोगादिति केचित, तन्मतमुत्तरार्द्धेन निरस्यत इत्यर्थः ॥ ३१२ ॥ तदक्षराणि व्याचष्टे * य इति ॥ ३१३ ॥ नानेवेत्यत्रेवशब्दसूचितमर्थमाह *भ्रांतइति ॥ एवं च कल्पितभेदेनापि ब्रह्मणो जीवेन द्रष्टव्यत्वोपपत्तेर्न तदर्थं वास्तवशब्दः कल्प्य इति भावः ॥ ३१४ ॥ एकधेत्याद्यवतारयति *अत्यंतेति ॥३१५॥ श्लोकस्य प्रथमपादं व्याचष्टे *एकेनेति ॥ अनुशब्दार्थः पूर्ववत् । एकधैवेत्यत्रावधारणव्यावर्त्यमाह *अत्रेति । अत्र

अनुद्रष्टव्यमत्रैषा समस्तव्यस्तता नहि ॥ ३१६ ॥
ब्रह्मात्मनोर्लक्षणैक्याद्भेदलेशोऽपि नेष्यते ॥
ध्रुवं तद्ब्रह्मणो रूपमात्माऽप्येष ध्रुवस्तथा ॥ ३१७ ॥
ध्रुवत्वं निर्विकारत्वं तच्चात्मब्रह्मणोः समम् ॥
प्रत्यग्बोधत्वमात्मत्वं ब्रह्मत्वं सर्वहेतुना ॥ ३१८ ॥
व्यवहारस्तु मोहोत्थो न तावन्मात्रहेतुकः ॥
वस्त्वेकमेव तेनैतदेकधैवावगम्यताम् ॥ ३१९ ॥
अप्रमेयं ब्रह्म तस्मान्मातृमेयभिदाऽपि न ॥
प्रमेयं स्फुरणाधारो ब्रह्म तु स्फूर्तिरेव हि ॥ ३२० ॥
ब्रह्मैतदप्रमेयं चेत्कथं द्रष्टव्यता भवेत् ॥

ब्रह्मात्मनि । एषा परपरिकल्पिता ॥ ३१६ ॥ उपपत्तितोऽपि तयोर्भेदाभावं साधयति *ब्रह्मेति ॥ लक्षणैक्यमेव कुत इत्याशंक्य ध्रुवपदार्थं वदन्लक्षणैक्यं साधयति *ध्रुवमिति ॥ नित्यमित्यर्थः ॥ ३१७ ॥ ध्रुवपदस्य कूटस्थवाचकत्वमाशंक्य तथापि तयोः सालक्षण्यसिद्धिरित्याह *ध्रुवत्वमिति । तयोरेकलक्षणत्वे अहंप्रत्ययवेद्य आत्मा जगत्कारणं ब्रह्मेति विलक्षणव्यवहारः कथमिति तत्राह *प्रत्यगिति । हेतुनेत्यत्र इतीति शेषः । *न तावदिति । परमार्थजन्यो न भवतीत्यर्थः ॥ ३१८ ॥ जीवेशयोर्विलक्षणव्यवहारस्य कल्पितत्वे फलितमाह *वस्त्विति ॥ एकधेत्यादेरर्थमुपसंहरति *तेनेति ॥ ३१९ ॥ अप्रमयमिति पदं व्याचष्टे *अप्रमेयमिति ॥ ब्रह्मणोऽप्रमेयत्वे फलितमाह *तस्मादिति ॥ तस्याप्रमेयत्वं कथमिति तत्राह *प्रमेयमिति ॥ ३२० ॥ पूर्वापरविरोधं शंकते

वृत्तिव्याप्यत्वमात्रेण द्रष्टव्यं सन्निगच्छति ॥३२१॥
व्याप्यो वृत्तिफलाभ्यां यः प्रमेयः स घटो भवेत् ।
ब्रह्मामेयं फलाभावाद् द्रष्टव्यं वृत्तिसत्त्वतः ॥ ३२२ ॥
प्रत्यगज्ञानहेतूत्थो यत्रानात्मा प्रसिध्यति ॥
ज्ञातृज्ञेयप्रभेदः स्यात्तत्र प्रत्यगनात्मनोः ॥ ३२३ ॥
ऐकात्म्ये कः प्रमाता स्यात्प्रमाणं चात्र किं भवेत् ॥
आगमोऽप्यनपेक्ष्यैव भेदमात्मावबोधकः ॥ ३२४ ॥
आपीतकरणग्रामः पुमान्यद्वत्सुषुप्तिगः ॥
शब्दान्निद्रामपास्याथ यथा वस्त्ववबुध्यते ॥ ३२५ ॥
अगृहीत्वैव संबंधमभिधानाभिधेययोः ।

---

*ब्रह्मेति । परिहरति *वृत्तीति ॥३२१॥ द्रष्टव्यत्वे मेयत्वं स्यादित्याशंक्य तथापि मेयलक्षणाभावादमेयमिति पूर्वोक्तमेव स्फुटयति *व्याप्य इति ॥ अभिव्यक्तचैतन्यविषयत्वं फलव्याप्यत्वं तदभावान्न ब्रह्म मेयमित्यर्थः ॥३२२॥ द्रष्टव्यत्वे ब्रह्मणो द्रष्टुः सकाशाद्भेदः स्यादित्याशंक्याविद्यावस्थायां भेदो विद्यावस्थायां वा, तत्राद्यमंगीकरोति *प्रत्यगिति ॥ यत्राविद्यादशायामात्माज्ञानजन्योऽनात्मा ज्ञायते ॥ तत्रात्मानात्मनोः ज्ञातृज्ञेयभावेन भेदप्रतिभासः स्यादित्यर्थः ॥ ३२३ ॥ द्वितीयं प्रत्याह *ऐकात्म्य इति ॥ किं प्रमाणमित्याक्षेपोऽनुपपन्नः, आगमस्य तद्बोधित्वाङ्गीकृतेरित्याशङ्क्य आगमस्य तद्बोधित्वेऽपि न तस्य मात्रादिभेदापेक्षेत्याह *आगम इति ॥ ३२४ ॥ आगमस्य निर्विशेषब्रह्मणा सह संगतिग्रहायोगात्संगतिग्रहहेतुजात्यादिभेदमनपेक्ष्य कथं तद्बोधकत्वमित्याशंक्याज्ञातसंगतेरपि शब्दस्य बोधकत्वे दृष्टांतमाह *आपीतेति ॥ ३२५ ॥ दृष्टान्ते वि-

हित्वा निद्रां प्रबुद्ध्यंते यथेहापि तथाऽऽत्मनि ॥३२६॥
शब्दशक्तेरचिंत्यत्वादात्मत्वाद्बोधरूपतः ॥
हित्वा निद्रामिवाविद्यामागमाद्बुध्यते पुमान् ३२७
धर्माधर्मौ रजो ज्ञेयौ रजोवत्तन्मलत्वतः ॥
तदकर्तृत्वतो ब्रह्म विरजोऽकरणत्वतः ॥ ३२८ ॥
असम्यग्ज्ञातयाथात्म्यो जनिमत्प्रकृतित्वतः ॥
आत्मैवाकाशशब्देन श्रुत्येह प्रतिपाद्यते ॥ ३२९ ॥
जनिमत्कारणादात्मा यो ऽस्थूलादिविशेषणः ॥
आकाशात्स परो ज्ञेयस्तस्यापूर्वादिरूपतः ॥ ३३० ॥
यस्मादेवमतो ऽजोऽसावकार्यकरणत्वतः ॥

वक्षितमंशमनूद्य दार्ष्टांतिकमाह *अगृहीत्वेति ॥ ३२६ ॥ दार्ष्टान्तिकं स्पष्टयति *शब्देति ॥ शबले गृहीतसंगतिकाः शब्दा लक्षणया निर्विशेषं वस्तु बोधयंतीति पूर्वोक्तमनुसंधेयम् ॥३२७॥ श्लोकस्य पूर्वार्द्धं व्याख्यायोत्तरार्द्धं व्याख्यातुं विरजःशब्दार्थमाह *धर्मेति ॥ तयो रजस्त्वे हेतुः *रजोवदिति । ब्रह्मणो विरजस्त्वं सहेतुकमाह *तदकर्तृत्वत इति । ब्रह्मणो धर्माद्यकर्तृत्वे हेतुः—अकरणत्वत इति ॥३२८॥आकाशशब्दं व्याकरोति *असम्यगिति ॥ जगत्कारणत्वेन प्रसिद्धोऽज्ञानोपहितस्वरूप आत्माऽस्मिन्मन्त्रे आकाश इति श्रुत्या प्रतिपाद्यते इत्यर्थः ॥ ३२९ ॥ परशब्दार्थमाह *जनिमदिति ॥ जगत्कारणादाकाशादव्याकृतादिति यावत् ॥ अस्थूलादिविशेषणस्यात्मनोऽन्यत्वे हेतुमाह *तस्येति ॥ ३३० ॥ अजर इत्यस्यार्थमाह *यस्मादिति ॥ उपजीव्यतयोक्तमेव हेतुं स्पष्टयति *अकार्येति ॥ अजविशेषणस्यार्थिकमर्थमाह *अज-

अजत्वादेव निःशेषविकाराणामपाक्रिया ॥ ३३१ ॥
अव्यावृत्ताननुगतेर्महानात्मेति भण्यते ।
कौटस्थ्याच्च ध्रुवो नाशविकारादिविवर्जितः ॥ ३३२ ॥
श्रुतिः-तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदिति २१.
वा०-बोधादूर्ध्वं च कर्त्तव्यमस्तीत्याशंक्य वार्यते ।
चतुर्दशेन श्लोकेन संग्रहोऽत्र समाप्यते ॥ ३३३ ॥
प्रत्यक्तया श्रुतेर्वाक्यात्तमेवोक्तविशेषणम् ।
अन्वयव्यतिरेकाभ्यां विद्यादात्मानमादितः ॥ ३३४ ॥
बुभुत्सोच्छेदिनीं प्रज्ञां सर्वाज्ञाननिरासिनीम् ।
सर्वज्ञेयसमाप्त्यर्थं कुर्याद्वाक्यार्थबोधतः ॥ ३३५ ॥
किं ब्रह्मेति बुभुत्साया निवृत्तौ तु समाप्यते ।

त्वादिति ॥ ३३१ ॥ आत्मा महानित्यनयोरर्थमाह *अव्यावृत्तेति ॥ ध्रुव इत्यस्यार्थमाह *कौटस्थ्यादिति ॥ कूटस्थत्वं साधयति *नाशेति ॥ ३३२ ॥ तमेवेत्यादिश्लोकं शङ्कानिवारकत्वेनावतारयति *बोधादिति । इतिशब्दसूचितार्थमाह *सङ्ग्रह इति ॥ ३३३ ॥ तत्राद्यपादं व्याचष्टे *प्रत्यक्तयेति ॥ उक्तविशेषणं विरजस्त्वादिविशेषणवन्तमिति यावत् । अन्वयादिना तन्मूलश्रुत्या च प्रथमं पदार्थद्वयं शोधयेदित्यर्थः ॥ ३३४ ॥ प्रज्ञां कुर्वीतेत्यस्यार्थमाह *बुभुत्सेति ॥ अज्ञाननिवर्त्तनद्वारा सर्वाकांक्षाध्वंसिनीं सर्वपुरुषार्थहेतुं प्रज्ञां तत्त्वमादिवाक्यवशादेवापादयेदित्यर्थः ॥ ३३५ ॥ उक्तमर्थमनूद्य तमेव हेतुं कुर्वन्नुत्तरार्धतात्पर्यमाह *किमिति ॥ ततः ज्ञेयसमाप्तेः ॥

ज्ञातव्योऽर्थस्ततः शब्दचिन्तां सर्वां परित्यजेत् ॥३३६॥
भर्तृप्रपंचस्त्वाहात्र शास्त्रादात्मानमादितः ।
विज्ञाय भावनां ज्ञानसंतानैः पुनराचरेत् ॥ ३३७ ॥
परं तत्त्वं प्रविश्यैवं मनस्यद्वैततां गते ॥
विज्ञानं केवलं शुद्धं स्वात्मन्येवावतिष्ठते ॥ ३३८ ॥
द्वैताभिधायकाञ्छब्दान् ध्यानकाले न चिंतयेत् ।
वाचं ते ग्लापयंत्येतामेकतत्त्वाभिधायिनीम् ॥ ३३९ ॥
नैवं किमत्र विज्ञानं भावना वाऽभिधीयते ।
नाद्योऽस्य वस्तुतंत्रत्वात्कर्तृतंत्रत्ववर्जनात् ॥ ३४० ॥
न द्वितीयो ज्ञानमात्रात्कृतकृत्यः पुमान्भवेत् ।
निःशेषपुरुषार्थाप्तेः कृत्स्नदुःखौघनिह्नुतेः ॥ ३४१ ॥
अन्ये त्वाहुर्महावाक्यात्संसृष्टं ब्रह्म बुध्यते ।

---

३३६ ॥ तमेवेत्यादिवाक्यस्य परोक्तमर्थं दूषयितुं तन्मतमनुवदति *भर्तृप्रपञ्च इति ॥ ३३७ ॥ निरन्तरभावनायाः फलमाह *परमिति । एवमद्वितीयभावनया मनस्तन्मात्रतया तत्र लीनं भवति । तस्मिंश्च लीने जीवस्य रूपं स्वस्वरूपभूते निरतिशयानन्दे परमात्मनि तन्मात्रत्वेन तिष्ठतीत्यर्थः ॥ ३३८ ॥ श्लोकस्य पूर्वार्द्धं व्याख्यायोत्तरार्द्धं व्याचष्टे *द्वैतेति ॥ तच्चिन्तने दोषमाह *वाचमिति ॥ अतो द्वैतवाचकशब्दान्निरस्याद्वैताभिधायिनीं वाचं सकृदुच्चार्य तदर्थे मनो धारयेदित्यर्थः ॥ ३३९ ॥ विकल्पासहत्वान्नेदं मतं शोभत इति दूषयति *नैवमित्यादिना ॥ ३४० ॥ ३४१ ॥ एवं भर्तृप्रपञ्चमतं निरस्यास्यैव वाक्यस्य मण्डनादिभिरुक्तमर्थं दूषयितुं तद्व्याख्यामुत्थापयति *अन्य इति ॥ वाक्यात्प्रथमतः संसृष्टं परोक्षं च ब्रह्म विज्ञाया-

विज्ञायोर्ध्वमसंसृष्टे प्रज्ञां ब्रह्मणि साधयेत् ॥ ३४२ ॥
स्वभावतोऽखिलं वाक्यं संसर्गात्मकमेव हि ।
बोधयेद्वस्तु तत्रापि पारोक्ष्येणैव नान्यथा ॥ ३४३ ॥
साक्षाद्द्रष्टुमसंसृष्टमन्यत्रापि विधीयते ।
निदिध्यासनवाक्येन साधनं ध्यानलक्षणम् ॥३४४॥
मैवं प्रथमतो वाक्यात्संसृष्टं यदि बोध्यते ।
तदा ब्रह्म तथैव स्यात्प्रमाणप्रमितत्वतः ॥ ३४५ ॥
नेतिनेतीत्यसंसृष्टं यदि ब्रह्म प्रमीयते ।
तर्हि संसृष्टवाद्येतदप्रमाणं भवेद्वचः ॥ ३४६ ॥
तादृशेनावबुद्धस्य ध्यानात्प्रज्ञा कथं भवेत् ।

संसर्गिब्रह्मसाक्षात्काराय प्रज्ञां ब्रह्मभावनां कुर्यादित्यर्थः ॥३४२॥ नन्वखण्डं ब्रह्म कथं संसर्गित्वेन शब्दो बोधयेत्तत्राह *स्वभावत इति ॥ ब्रह्माखण्डापरोक्षरूपमपि शब्दस्वाभाव्याद्विपरीततया प्रतीयते, स्वभावस्यानतिलंघनीयत्वादित्यर्थः ॥ ३४३ ॥ न केवलमिहैवाखण्डब्रह्मसाक्षात्कारमुद्दिश्य ज्ञानं विधीयते किन्तु द्रष्टव्यवाक्येऽपीत्याह *साक्षादिति ॥ ३४४ ॥ एकीयमतं दूषयति *मैवमिति ॥ तत्त्वमादिवाक्यात्संसृष्टं ब्रह्म ज्ञातं चेत्तद्बाधकमानान्तराभावान्न ब्रह्मणोऽखण्डत्वं सिध्यतीत्यर्थः ॥ ३४५ ॥ बाधकमानाभावोऽसिद्धः, निषेधवाक्यस्यैव तद्बाधकत्वादिति शङ्कते *नेति । तर्हि बाधितार्थविषयत्वात्तत्त्वमादिवाक्यमप्रमाणं स्यादित्याह *तर्हीति ॥ ३४६ ॥ अस्तु को दोषः, अभ्यासजन्यज्ञानस्य प्रमात्वेनाखण्डापरोक्षब्रह्मसिद्धेस्तत्राह *तादृशेनेति ॥ शाब्दज्ञानमप्रमानं चेन्न तदभ्यासात्सम्यग्धीरुद्भवतीत्युक्तं व्यति-

नहि मिथ्याधियोऽभ्यासात्सम्यग्ज्ञानसमुद्भवः ॥३४७॥
तथा सत्यप्रयत्नेन मुक्तिः स्यात्सर्वदेहिनाम् ।
संसारमिथ्याविज्ञानमभ्यस्यंत्येव सर्वदा ॥ ३४८ ॥
नच वाक्यस्य पारोक्ष्यबोधित्वनियमो यतः ।
दशमस्त्वमसीत्यादावापरोक्ष्येण बुध्यते ॥ ३४९ ॥
विज्ञायेत्यादिवाक्यस्य व्याख्यानं चेदपेक्षसे ॥
मानान्तराविरोधेन व्याकुर्मो बहुधा शृणु ॥ ३५० ॥
वाक्यमाहात्म्यसंभूतं यद्वद्विज्ञानमुच्यते ॥
मेयमाहात्म्यसम्भूता प्रज्ञेतीह विवक्षिता ॥ ३५१ ॥
स्वर्गादौ शब्दसामर्थ्याद् बुद्धेः स्याद्विषयाकृतिः ॥
घटादौ मेयसान्निध्याद्विषयाकारता धियः ॥ ३५२ ॥

रेकेण दूषयति *नहीति ॥ ३४७ ॥ विपक्षे दोषमाह *तथेति ॥ अतस्तत्त्वमादिवाक्यादखण्डार्थधीरेवोदेतीति न तदर्थमभ्यासविधानमिति भावः ॥ ३४८ ॥ यदुक्तं स्वभावतः शब्दस्य परोक्षार्थबोधित्वात्तत्साक्षात्काराय तदभ्यासविधानमिति तदपि प्रत्याह *नचेति ॥ ३४९ ॥ कथं तर्हि वाक्यं व्याख्येयमित्याशंक्य तस्यानेकार्थान्वक्तुं प्रतिजानीते *विज्ञायेति ॥ ३५० ॥ मानांतराविरुद्धं व्याख्यानमनुवर्त्तयन् पदद्वयार्थमाह *वाक्येति ॥ ३५१ ॥ किं तद्वाक्यमेययोर्माहात्म्यजन्यत्वं तदाह *स्वर्गादाविति । व्यवहिते विषये शब्दजन्यधियस्तदाकारत्वं शब्दमाहात्म्यप्रयुक्तं,विषयासत्त्वेऽपि शब्दात्तदाकारज्ञानोत्पत्तिदृष्टेः। तत्र ज्ञानस्य तदाकारत्वं च तद्व्यवहारजननयोग्यमात्रमेव। अव्यवहिते तु विषये ज्ञानस्य तदाकारत्वं तत्तादात्म्यापत्तिः । तत्तादात्म्यं च विषयं विना न संभवतीति विषयमाहात्म्यप्रयुक्तं तदिति भावः ॥३५२॥

दशमादौ द्वयोः सत्त्वात्स्याच्छब्देनापरोक्षधीः ॥
शब्दजत्वापरोक्षत्वे ह्येकज्ञानेऽपि तिष्ठतः ॥ ३५३ ॥
महावाक्यजबुद्धेश्च यौ स्वभावौ यथोदितौ ॥
प्रज्ञाविज्ञानशब्दाभ्यां तावुभाविह वर्णितौ ॥ ३५४ ॥
शाब्दविज्ञानमानेन प्रज्ञामैकात्म्यलक्षणाम् ॥
ब्रह्मास्मीति प्रकुर्वीत बुभुत्सोच्छेदिनीं दृढाम् ॥३५५॥
मातृमानादिभेदोत्थं वाक्यमद्वैतबोधने ॥
प्रवर्त्तते तदद्वैतं बुद्धं सद्भेदघातकम् ॥ ३५६ ॥

अस्तु ततः किमित्याशंक्य तत्त्वमादिवाक्यजन्यज्ञाने विज्ञानशब्दितशाब्दत्वं प्रज्ञाशब्दितापरोक्षत्वं चास्तीति वक्तुमेकस्य ज्ञानस्योभयाकारत्वमुदाहरति *दशमेति । दशमस्त्वमसीत्यादिवाक्यजन्यज्ञाने शाब्दत्वापरोक्षत्वयोः सत्त्वादध्यक्षज्ञानमपि शब्दजं स्यादित्यर्थः । हेत्वसिद्धिमाशंक्यानुभवविरोधान्मैवमित्याह *शब्दजत्वेति । तयोरेकधीनिष्ठत्वस्य सर्वानुभवसिद्धत्वद्योती हिशब्दः ॥ ३५३ ॥ दृष्टान्तोक्तमर्थं दार्ष्टान्तिके दर्शयन्नुक्ताकारद्वयम् अत्र वाक्ये, विज्ञानप्रज्ञाशब्दाभ्यामुक्तमित्याह *महावाक्येति ॥३५४॥ पदार्थमुक्त्वा वाक्यार्थमाह *शाब्देति । शब्दोत्थप्रयोजकधिया विचारपूर्वकमखण्डापरोक्षज्ञानम् अहं ब्रह्मेत्येवंरूपम् असम्भावनादिहीनमखिलाकांक्षानिवर्त्तकमापादयेच्छब्दात् । आपाततो ब्रह्म ज्ञात्वा तदेव ज्ञानं विचारेण अविद्यानिवृत्तिक्षमं कुर्यादित्यर्थः । ननु शाब्दज्ञानस्योत्तरक्षण एव विनष्टत्वात्कथं तस्य विचारानन्तरमविद्यानिवर्त्तकत्वमिति चेन्न । तत्सजातीयज्ञानस्यैवाविद्यानिवर्त्तकत्वेन विवक्षितत्वात् । तयोरेकत्वव्यवहारस्तु साधनविषययोरैक्यान्न व्यक्त्यभेदाभिप्रायेणेति ध्येयम् ॥ ३५५ ॥ विचारानंतर

वाक्योत्थबुद्धिवृत्त्याऽत्र ब्रह्मण्यज्ञानसंक्षयः ॥
ज्ञातेन ब्रह्मणा नश्येत् द्वैतमज्ञानजं तथा ॥ ३५७ ॥
विज्ञानाविद्ययोर्यद्वद्विरोधः सहजो भवेत् ॥
अद्वैतद्वैतयोस्तद्वद्विरोधो बाधनं ततः ॥ ३५८ ॥
एकस्मिन्नपि बोधेऽत्र यथोक्तफलभेदतः ॥
अंशभेदमपेक्ष्योक्ता विज्ञानप्रज्ञयोर्भिदा ॥ ३५९ ॥
शास्त्राचार्यमतिर्वाऽत्र विज्ञायेत्यभिधीयते ॥
प्रज्ञेत्यनेन शब्देन ह्यात्मप्रत्यय उच्यते ॥ ३६० ॥
शास्त्राचार्यव्यपेक्षत्वात्परतन्त्रैव तन्मतिः ॥

वा कथं वाक्यज्ञानादैकात्म्यसिद्धिः, मातुर्विषयविषयिणीं प्रमामु-त्पादयतो वाक्यस्य मात्रादिभेदसापेक्षत्वादिति शंकित्वा परिहरति *मात्रिति। भेदोत्थं भेदापेक्षमिति यावत्। यद्यपि वाक्यं भेदापेक्ष-मेव तत्त्वबोधमुत्पादयति, तथापि वाक्यज्ञानाभिव्यक्तचैतन्यस्य सर्वभेदनिवर्त्तकत्वादात्म्यैक्यसिद्धिरित्यर्थः ॥ ३५६ ॥ उक्तमे-वार्थं दृष्टांतेन स्पष्टयति *वाक्येत्यादिना। अज्ञानसंक्षयो यथेति शे-षः ॥३५७॥३५८॥ उपसंहरति *एकस्मिन्निति। यथोक्तफलभेदत इति। विचारप्रवृत्तिः शाब्दधीफलं, तमोनिवृत्तिरध्यक्षधीफलमि-त्युक्तफलभेदादित्यर्थः ॥ ३५९ ॥ वाक्यार्थान्तरमाह *शास्त्रे-ति। श्रवणमननादिज्ञानं विज्ञायेत्युच्यते, वाक्यार्थज्ञानं प्रज्ञा, तेन श्रवणादि कृत्वा वाक्यार्थज्ञानं कुर्यादिति वाक्यार्थ इत्यर्थः। श्रवणादेर्वाक्यार्थहेतुत्वावद्योती हिशब्दः ॥ ३६० ॥ शास्त्रा-चार्यमतेरात्मप्रत्ययस्य चावान्तरभेदमाह *शास्त्रेति। तदधीना श्रवणादिरूपा मतिस्तदपेक्षत्वात्परतंत्रा व्यवह्रियते, प्रत्यग्विषयाया-स्तु बुद्धेर्वाक्यार्थज्ञानाख्यायाः सत्यां तदधीनश्रवणादिसामग्र्या-

अनन्यापेक्षया ज्ञेया प्रत्यग्बुद्धौ स्वतन्त्रता ॥ ३६१ ॥
यदि वोक्तात्मयाथात्म्यबोधेनैवाद्वयात्मिकाम् ॥
ब्रह्मप्रज्ञां प्रकुर्वीत विशेषणसमाश्रयात् ॥ ३६२ ।
प्रज्ञा वा परमात्मेह प्रज्ञानमिति वाक्यतः ॥
विज्ञायेहममात्मानं प्रज्ञां कुर्वीत बोधतः ॥ ३६३ ॥
सर्वथाऽप्यात्मतत्त्वस्य ब्रह्मत्वे वाक्यबोधिते ॥
बोधका अपि ते शब्दास्त्याज्याः कार्यान्तरं किमु३६४
ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ॥
पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ॥ ३६५ ॥
शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः ॥

मन्यापेक्षाराहित्यात्स्वतन्त्रतेत्यर्थः ॥ ३६१ ॥ वाक्यस्य पुनरप्यर्थान्तरमाह *यदीति । आत्मनो ब्रह्मत्वं विज्ञायेत्युच्यते, ब्रह्मणश्च प्रत्यक्त्वं प्रज्ञेत्याख्यायते, तस्मादात्मनो ब्रह्मत्वं विज्ञाय तेनैवात्मरूपेण ब्रह्मानुसन्दधीतेत्यर्थः । कथं प्रतीचो ब्रह्मत्वं ब्रह्मणो वा प्रत्यक्त्वं गमकाभावात्तत्राह *विशेषणेति । तमेव धीर इत्यत्रावधारणसामर्थ्यात्प्रत्यक्त्वं ब्रह्मणो गम्यते । अज आत्मा महानित्यत्र महानितिविशेषणात्प्रतीचोऽपि ब्रह्मत्वसिद्धिरित्यर्थः ॥ ३६२ ॥ व्याख्यान्तरमाह*प्रज्ञा वेति । पदार्थमुक्त्वा वाक्यार्थं योजयति *विज्ञायेति । इह देहादौ स्थितं त्वमर्थं ततो निष्कृष्य ज्ञात्वा पुनस्तं ब्रह्मरूपमनुसन्दध्यादित्यर्थः ॥ ३६३ ॥ एवं पूर्वार्द्धस्य बहुधाऽर्थमुक्त्वा नानुध्यायादित्यादिना सूचितां विदुषः कृतकृत्यतामाह*सर्वथेति ॥ ३६४ ॥ बोधकशब्दानामपि त्याज्यत्वे स्मृतिमुदाहरति*ग्रन्थमिति द्वाभ्याम् ॥ ३६५ ॥

परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ॥ ३६६ ॥
मनोवाचोर्ग्लानिरेव शब्दोच्चारणचिन्तयोः ॥
हिशब्दस्तत्प्रसिध्यर्थो मौनादिः स्मर्यते ततः ॥३६७॥
मौनं योगासनं योगस्तितिक्षैकान्तशीलता ॥
निःस्पृहत्वं समत्वं च सप्तैतान्येकदण्डिनः ॥ ३६८ ॥
ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ॥
नैवास्ति किञ्चित्कर्त्तव्यमस्ति चेन्न स तत्त्ववित् ३६९
यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ॥
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ ३७० ॥
इतिशब्दः समाप्त्यर्थः श्लोकास्तेन समापिताः ॥
तत्त्वोपदेशः संपूर्णो विस्तरात्संग्रहेण च ॥ ३७१ ॥
मन्त्रब्राह्मणसङ्घेन यत्तत्त्वं प्राङ्निरूपितम् ॥
तद्विद्यासाधनं सर्वं मुनिरेष विवक्षति ॥ ३७२ ॥
तत्रादौ वेद्यतत्त्वस्यानुवादेन पुनः स्फुटम् ॥

॥ ३६६ ॥ वाचो विग्लापनमित्यत्र कथं ध्यानस्य वाग्लानिहेतुत्वमुच्यत इत्याशङ्क्यानुध्यानं शब्दोच्चारणस्याप्युपलक्षणमित्याह *मन इति । विग्लापनं हीत्यत्र हिशब्दसूचितमर्थमाह *हिशब्द इति । शब्दोच्चारणादि विदुषा न कार्यमित्यत्र स्मृतिमनुकूलयति *मौनादिरिति ॥३६७॥ तामेव स्मृतिं पठति *मौनमिति ॥३६८॥ न विदुषः कर्त्तव्यमस्तीत्यत्रापि मानान्तरं संवादयति *ज्ञानेत्यादिना ॥३६९॥ ॥३७०॥ विग्लापनं हि तदित्यत्रेतिशब्दार्थमाह *इतीति । परमप्रकृतमुपसंहरति *तत्त्वेति ॥३७१॥ उत्तरकाण्डकातात्पर्यमाह *मन्त्रेति ॥ ३७२ ॥ समुदायतात्पर्यमु-

निरूप्यते स्वरूपं तस्य वा इत्यादिवाक्यतः ॥ ३७३ ॥
श्रुतिः—स वा एष महानज आत्मा ॥
वा०—किं ज्योतिरित्येवमादौ ब्राह्मणे बहुधेरितः ॥
आत्मोच्यते स इत्युक्त्या मन्त्रस्य व्यवधानतः ॥३७४॥
अणुरित्यादिभिर्मन्त्रैरासन्नैः प्रतिपादितः ॥
आत्मोक्त एष इत्युक्त्या वैशब्दोऽभेदवाचकः ॥३७५॥
मंत्रब्राह्मणभेदेन वस्तुभेदो न शंक्यताम् ॥
स एवैषोऽवगंतव्यो यस्मादात्मोच्यते द्वयोः ॥३७६॥
यद्वा शास्त्रानुभूतिभ्यां सिद्धयोर्ब्रह्मजीवयोः ॥
तदेतच्छब्दनिर्देशो वैशब्देन तदेकता ॥ ३७७ ॥
बुध्युपाधिपरिच्छेदो महच्छब्देन वार्यते ॥
देहोपाधिकृतं जन्म वार्यते ह्यजशब्दतः ॥ ३७८ ॥

क्त्वा स वा इत्याद्यवतारयति *तत्रेति ॥ ३७३ ॥ अक्षराणि व्याचष्टे *किमिति । किंज्योतिरेवायं पुरुष इत्यारभ्य अणुः पन्था इत्यादिमन्त्रात्पूर्वतनग्रन्थेन उक्तस्यात्मनः तच्छब्दपरामर्शार्हत्वे युक्तिमाह *मन्त्रस्येति । तच्छब्दस्य व्यवहितपरामर्शत्वनियमादिति भावः ॥३७४॥ स वा एष इत्यत्र स इत्यस्यार्थमुक्त्वाऽवशिष्टपदयोरर्थमाह *अणुरिति । मन्त्रप्रतिपाद्यस्यात्मन एतच्छब्दपरामर्शार्हत्वे हेतुः *आसन्नैरिति ॥ ३७५ ॥ मन्त्रब्राह्मणयोरद्वितीयब्रह्मण एव प्रतिपादितत्वेन भेदप्रसक्तेरभावात्कथं वैशब्दस्याभेदवाचकत्वं तत्राह *मन्त्रेति । पदार्थमुक्त्वा वाक्यं योजयति*स इति ॥ ३७६ ॥ स वा एष इत्यस्यैवार्थान्तरमाह *यद्वेति ॥३७७॥ महानज इतिपदयोरर्थमाह *बुद्धीति ॥३७८॥ योऽयमित्यादेरर्थमाह *वैशब्देति । चतुर्थाध्याये गार्ग्यस्याजात-

श्रुति०-योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी

वा०-वैशब्दसूचितं जीवब्रह्मैक्यं प्रतिपादितम् ॥
अजातशत्रुणा योऽर्थः स्मर्यते योऽयमित्यतः ॥३७९॥
ब्रह्मत्वादेव जीवस्य भ्रान्तजीवत्ववारणात् ॥
वशित्वाद्याः ब्रह्मधर्माः शिष्यन्तेऽतोऽयमीश्वरः३८०
जीवत्ववद्वशित्वाद्या यद्यपि भ्रान्तिकल्पिताः ॥
तथाऽप्येते समीचीनाः स्वप्ने मूत्रात्ययो यथा ॥३८१॥
अत एव हि जिज्ञासुं प्ररोचयितुमीरितैः ॥
वशित्वाद्यैः प्रेर्यतेऽसौ यज्ञादौ ज्ञानसाधने ॥ ३८२ ॥
ननु कल्पितधर्माणां स्यान्नो वा ज्ञानबाध्यता ॥
आद्ये त्वीश्वरधर्माणां नाशः स्याज्जीवधर्मवत् ॥३८३॥
द्वितीये जीवधर्माणामप्यनाशोऽन्यधर्मवत् ॥

शत्रुणा प्रोक्तं ब्रह्मात्मैक्यं तेनैव वाक्येन स्मर्यते इत्यर्थः ॥३७९॥ सर्वस्य वशीत्यादेरर्थमाह *ब्रह्मत्वादिति । जीवस्य वशित्वादि-धर्मविशेषे फलितमाह *अत इति । वशित्वादिधर्मवत्त्वादेव मुक्तो जीव ईश्वर इत्यर्थः ॥ ३८० ॥ वशित्वादेरपि कल्पित-त्वेन तद्वत्ताया अपुमर्थत्वात्कथं तेन मुक्तः स्तूयते इति शंकित्वा परिहरति *जीवत्ववदिति । *मूत्रात्यय इति ॥ स्वप्ने अशुद्धे पादप्रक्षे-पवत्तल्लंघनस्याप्यसत्त्वेऽपि लंघनं यथा प्रीतिहेतुरेवं वशित्वादयः कल्पिता अपि तथेत्यर्थः ॥३८१॥ वशित्वादेः पुमर्थत्वे फलित-माह*अत एवेति ॥३८२॥ ब्रह्मधीसाधनयज्ञादौ प्रवृत्त्यर्थं मुक्तो जीवो सर्वस्य वशीत्यादिना स्तूयते इत्युक्तमयुक्तं, विकल्पासहत्वा-दिति शङ्कते *नन्विति । आद्यं प्रत्याह*आद्य इति ॥ ३८३ ॥

अतो जन्मादिसत्तायां वशित्वाद्यस्तिता कुतः ३८४
नैवं यतो महान्भेदो विद्यते नाशबाधयोः ॥
रज्जुसर्पो ज्ञानबाध्यो न नाशो भग्नकुंभवत् ॥३८५॥
ततः कालत्रयासत्त्वबोधो बाध इतीर्यते ॥
स्वत एव कदाचिच्चेदसत्ता नाश एव हि ॥ ३८६ ॥
जीवधर्माश्चेशधर्माः सन्तीत्येवं न मे मतम् ॥
असतामेव तेषां तु भानं मायिकमिष्यते ॥ ३८७ ॥
कादाचित्की सतोऽसत्तेत्येष नाशो न तेष्वतः ॥
कालत्रयासत्त्वबोधरूपो बाधस्तु सम्भवेत् ॥ ३८८ ॥
बाधिता अपि भासंते सामग्र्याः सम्भवे सति ॥

कल्पितधर्मा न ज्ञानेन बाध्यन्त इति द्वितीयकल्पे दोषमाह* द्वितीय इति । जीवधर्मानिवृत्तौ दोषमाह* अत इति । परवशतया जन्मादिप्रापकजीवत्वादौ सति कुतो वशित्वादिप्राप्तिरित्यर्थः ॥ ३८४ ॥ ज्ञानबाधितस्यापि वशित्वादेरनुवृत्तिरविरुद्धेति परिहरति*नैवमिति । अविरोधं प्रकटयितुं नाशबाधयोर्भेदमाह *यत इति ॥ ३८५ ॥ यस्मान्न नष्टे बाधितत्वधीर्बाधितेऽपि न नष्टत्वबुद्धिस्तस्मादेव तयोर्लक्षणभेदोऽभ्युपगम्यते वादिभिरित्याह *तत इति । तयोर्लक्षणभेदस्य सर्वसम्मतत्वद्योती हिशब्दः ॥ ३८६ ॥ एवं नाशबाधयोर्भेदं प्रदर्श्य ईशधर्माणां नाशो नेति वक्तुं सिद्धान्ते सर्वस्यापि द्वैतस्य सद्विलक्षण्यमाह *जीवेति । कथं तर्हि असद्विषयज्ञानस्य सत्त्वमित्याशङ्क्य तद्धीरपि सद्विलक्षणैवेत्याह *असतामिति ॥ ३८७ ॥ सर्वप्रपञ्चस्यासत्त्वे फलितमाह *कादाचित्कीति ॥ ३८८ ॥ कथं तर्हि बाधितस्य प्रतीतिस्तत्राह *बाधिता इति । बाधितानुवृत्तौ का वा

आरब्धशेषः सामग्री तन्निवृत्तौ न भासनम् ॥३८९॥
निवृत्तत्वाज्जीवधर्मा भासन्ते नैव कस्यचित् ॥
अनिवृत्ता ईशधर्मा अकर्मापादितत्वतः ॥ ३९० ॥
भांति ते त्वीश्वरस्यापि बुद्धानां च स्वबुद्धितः ॥
ईश्वरस्य ततो धर्माः संतु नत्विह विस्मयः ॥ ३९१ ॥
कर्माधीना जीवधर्मा बहुधा क्लेशयन्ति हि ॥
ईशधर्मास्तु नो किञ्चित्क्लेशयन्ति कदाचन ३९२ ॥
तिष्ठत्स्वपीशधर्मेषु धर्माणां मायिकत्वतः ॥
ईशो निर्धर्मको बोध्यो विमुक्त्यर्थं बुभुत्सुभिः ॥३९३॥
तस्मादत्र वशित्वादीन्न श्रुतिर्बोधयत्यमून् ॥

सामग्रीत्याशङ्क्य किं जीवधर्माणां भाने हेतुं पृच्छसि उत ईशधर्माणां? तत्राद्यमाह *आरब्धेति । जीवधर्मा बोधेन बाधिता अपि प्रारब्धकर्मप्रतिबद्धा न निवर्त्तन्ते। नहि कर्तृत्वाद्यप्रतीतौ जीवस्य भोगः सम्भवतीत्यस्ते यावत्स्वरं भासन्ते, कर्मक्षये सति तत्प्रापितजीवधर्माणां निवृत्तत्वादेव न कस्यापि ते भान्तीत्यर्थः ॥ ३८९ ॥ ईशधर्मेषु तद्वैलक्षण्यमाह *अनिवृत्ता इति ॥ ३९० ॥ मुक्तस्येश्वराभेदेन वशित्वादिधर्मसद्भावमुक्तमुपसंहरति *ईश्वरस्येति ॥ ३९१ ॥ नन्वनादित्वाविशेषाज्जीवधर्माणामेव कर्माधीनस्थितिकत्वं नेशधर्माणामित्यत्र किं नियामकं तत्राह *कर्मेति । तेषां बहुदुःखहेतुत्वस्य सर्वानुभवसिद्धत्वद्योती हिशब्दः ॥ ३९२ ॥ कथं तर्हि नेतिनेतीत्यादिना निर्विशेषं ब्रह्म बोद्धव्यमित्युक्तं तत्राह *तिष्ठतिस्वति ॥ ३९३ ॥ वशित्वादेरपि श्रुतिप्रतिपाद्यत्वात्कथं मायिकत्वम् इत्याशङ्क्याह *तस्मादिति । यस्मादिदंपर्वेण प्रवृत्तैरस्थूलादिवाक्यैर्निर्विशेषं ब्रह्म बो-

किन्तु शाखाग्रवद्वस्तुलक्षकत्वेन वक्त्यसौ ॥ ३९४ ॥
उपासनेषु ते धर्मा बोध्यत्वेन विवक्षिताः ॥
यथोपासनमेत्येष फलमित्यभिधानतः ॥ ३९५ ॥
वशी सर्वस्येतिवाक्ये स्वातन्त्र्यं चान्यतन्त्रता ॥
उच्यते लोकदृष्टान्तो द्विविधो दृश्यते यतः ॥३९६ ॥
सर्वमेतज्जगत्स्वात्मवशो तस्यात्र वर्त्तते ॥
मन्त्रवादिवशो यद्वत्सकलं भूतभौतिकम् ॥ ३९७ ॥
अयं वा सकलैर्जीवैर्हृदि स्वस्य वशीकृतः ॥
अपत्यैर्जननी यद्वत् स्वेषु स्निग्धा वशीकृता ॥३९८॥
श्रुतिः-सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष सर्वेश्वर एष

ध्यत्वेनोपदिष्टं, तस्मादत्र श्रुतिर्न वशित्वादीन् ज्ञेयत्वेन बोधयति किन्तु शाखाग्रचन्द्र इतिवत्तटस्थतया निर्विशेषं ब्रह्म लक्षयतीत्यर्थः ॥ ३९४ ॥ ब्रह्मधर्माणां ज्ञेयत्वाभावे कथं छान्दोग्ये अनुविद्य एतांश्च सत्यान्कामानिति तद्धर्माणामपि ज्ञेयत्वोक्तिस्तत्राह *उपासनेष्विति । अनुविद्येत्यत्र सत्यकामादयो ध्येयत्वेनोपदिष्टा न ज्ञेयत्वेन, अन्यथा निर्विशेषश्रुतिविरोधादिति भावः । तद्ध्यानं वा किमर्थं तत्राह *यथेति । सत्यकामत्वादीनामनुपासने तदर्थिनां तत्प्राप्तिरेव न स्यादिति तदर्थं तद्ध्यानोपदेश इत्यर्थः ॥ ३९५ ॥ एवं तात्पर्यमुक्त्वा वशीतिपदस्यार्थमाह *वशीति । स्वतन्त्रत्वं परतंत्रत्वं वा सर्वस्य वशीत्यनेनोच्यते इत्यत्र हेतुमाह* लोकेति ॥३९६॥ लोकदृष्टान्तमेव स्पष्टयति *सर्वमित्यादिना ॥३९७॥३९८॥ सर्वस्येशान इत्यस्यार्थमाह *सर्वमि-

भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय ॥

वा०-सर्वमीष्टे जगत्सोऽयं स्वगृहं हि गृही यथा ॥
अधिष्ठाय जगत्सर्वं पाति चैष यथा रविः ॥ ३९९ ॥
कर्मणा सुकृतेनैष नाधिकः स्यात्कथंचन ॥
सुकृतीह यथा लोके भूयान्स्याद्यशआदिना॥ ४०० ॥
कर्मणा पातकेनायं कनीयान्न भवेत्क्वचित् ॥
लघुर्भवति पापेन यथा पापरतो जनः ॥ ४०१ ॥
न कर्मपरतंत्रोऽयं कर्माध्यक्षत्वसंश्रयात् ॥
तस्मादीशत्वाधिपत्ये इत्युक्तार्थोपसंहृतिः ॥ ४०२ ॥
साधारणं च प्रत्येकमिति स्यात्पालनं द्विधा ॥
साधारणं रविः पाति जननी तु विशेषतः ॥ ४०३ ॥
द्वेधाऽपीशः पालकः स्यात्सेतुवद्धारकोऽप्यसौ ॥
मृद्दार्वादिमयः सेतुर्दृश्यते जलधारकः ॥ ४०४ ॥

ति । सर्वस्याधिपतिरित्यस्यार्थमाह *अधिष्ठायेति ॥ ३९९ ॥ स न साधुना भूयानित्यादेरर्थमाह *कर्मणा सुकृतेनेत्यादिना॥४००॥ ४०१॥ तस्य तत्प्रयुक्तभूयस्त्वे कनीयस्त्वाभावे हेतुमाह *न कर्मेति । एष सर्वेश्वर एष भूताधिपतिरित्यनयोः पुनरुक्तिं परिहरति *तस्मादिति । कर्माध्यक्षत्वादेवास्य सर्वेशत्वं सार्वाधिपत्यं चेत्युक्तस्यैवोपसंहारार्थं पदद्वयमित्यर्थः ॥ ४०२ ॥ अधिपतिरित्यनेन पालकत्वोक्तेरेष भूतपाल इत्यस्य पौनरुक्त्यमित्याशंक्याह *साधारणमित्यादिना । उभयथापि पालकत्वकथनार्थं भूतपालशब्द इति न पुनरुक्तिरित्यर्थः ॥ ४०३ ॥ एष सेतुरित्यादेरर्थमाह *सेतुवदिति ॥ ४०४ ॥ एषां लोकानामसम्भेदायेत्य-

एषां भूरादिलोकानामसांकर्यार्थमीश्वरः ॥
सर्वं संभिन्नमर्यादं निर्गच्छति यथायथम् ॥ ४०५ ॥
यद्ययं न भवेल्लोके मर्यादानां विधारकः ॥
महाभूतान्यमून्यत्र को नामान्यो निवारयेत् ॥ ४०६ ॥
आशीविषादिकांस्तद्वत्तामसानतिकोपिनः ॥
निवारयति को नाम सर्वदा प्राणिहिंसने ॥ ४०७ ॥
अम्भोनिधीनगाधोदान्कल्लोलशतमालिनः ॥
निवारयेच्च को नाम जगदाप्लवने सति ॥ ४०८ ॥
इत्यादिकं समग्रस्य लोकस्यास्य विधारणम् ॥
क्रियते येन स ज्ञेयः सेतुरात्मा महेश्वरः ॥ ४०९ ॥
श्रुतिः–तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसाऽनाशकेन ॥
वा०–इत्थं वेद्यस्य तत्त्वस्य रूपं स्पष्टं निरूपितम् ॥
अथोच्यते ज्ञानहेतुर्वेदानुवचनादिकम् ॥ ४१० ॥
बहिरंगं कर्मजातं संन्यासस्यांतरंगता ॥
प्रत्यासन्नतराः शांतिदांत्याद्या इत्यसौ क्रमः ॥४११॥
अधीतवेदस्य जपो यज्ञो दर्शादिकस्तथा ॥

स्यार्थमाह *एषामिति । असांकर्यमेव प्रपञ्चयति *सर्वमित्यादिना ॥४०५॥४०६॥४०७॥४०८॥ एष सेतुरित्यादिना वाक्यार्थमुपसंहरति *इत्यादिकमिति ॥४०९॥ वृत्तमनूद्य तमित्यादत्ते *इत्थमिति ॥४१०॥ प्रथमं यज्ञादिसाधननिरूपणे हेतुमाह *बहिरिति ॥४११॥ वेदानुवचनादिशब्दानामर्थमाह *अधीतेति । जपो वेदानुवचनं नामेति शेषः । धनादीनां परस्वत्वापादनमिति

दानं धान्यधनादीनां तपः कृच्छ्रादिरूपकम् ॥ ४१२ ॥
अनाशकं निजाहारसंत्यागो मरणावधिः ॥
एतैर्वेदितुमिच्छन्ति ब्राह्मणाः शास्त्रकोविदाः ॥४१३॥
इच्छेतिरुचिरत्र स्यात्सा चोक्तैः कर्मभिर्भवेत् ॥
पापेन प्रतिबद्धाऽसौ पुण्यैस्तां जनयेद्रुचिम् ॥४१४॥
निश्शेषदुःखनाशस्य स्वानंदप्रापणस्य च ॥
हेतुर्वेदनमित्येवं जानन्सोऽपि न रोचते ॥ ४१५ ॥
अरुच्या पापमूहित्वा तच्च पुण्यैर्विनाशयेत् ॥
उत्पन्नायां रुचौ पुण्यं यज्ञदानादि संत्यजेत् ॥ ४१६ ॥
पुरा यज्ञाद्यनुष्ठानात्प्रतिबंधस्य सत्वतः ॥

शेषः ॥ ४१२ ॥ अनाशकेनेति छेदं कृत्वा तस्यार्थमाह *अनाशकमिति । संकल्पपूर्वकमनशनेन मृतस्य जन्मान्तरे विविदिषोत्पद्यत इति भावः । विविदिषन्ति ब्राह्मणा इत्यनयोरर्थमाह *एतैरिति ॥ ४१३ ॥ नन्विच्छायाः विषयसौन्दर्यलभ्यायाः कथं कर्मसाध्यत्वं तत्राह *इच्छेति । इच्छामात्रस्य विषयसौन्दर्यजन्यत्वेऽपि रुचिशब्दितप्रवृत्तिपर्यन्तेच्छा पुण्यसाध्येत्यर्थः । रुचिरपि विषयसौन्दर्यादेव किमिति नोत्पद्यते तत्राह *पापेनेति । यथा पित्तोपहतरसनस्य सत्यामपीच्छायां क्षीरपाने न रुचिरेवं मलिनान्तःकरणस्य सत्यामपि वेदनेच्छायां न तत्र रुचिर्भवति अतो यज्ञादिभिः पापनिवृत्तिद्वारा ज्ञाने रुचिं जनयेदित्यर्थः ॥ ४१४ ॥ उक्तमेव स्फुटयति* निःशेषेत्यादिना ॥ ४१५ ॥ यज्ञादिकरणस्यावधिमाह* उत्पन्नायामिति ॥ ४१६ ॥ यज्ञादौ त्यक्तेऽपि ज्ञानमुत्पद्यते चेदादावेव त्याज्यं किं तदनुष्ठानक्लेशेन । न च रुच्युत्पत्त्यर्थं तदितिशंक्यं, रुचिं विनापि वाक्यश्रव-

अद्वैतबुद्धिर्नोदेति जगत्सत्यत्वविभ्रमात् ॥ ४१७ ॥
महापापवतां नृणां ज्ञानयज्ञो न रोचते ॥
प्रत्युत ज्ञानयज्ञस्तु प्रद्वेष्यो भासते स्वतः ॥ ४१८ ॥
भोगसारत्वविभ्रांत्या ज्ञाने भोगोघघातिनि ॥
प्रद्वेषोऽशुद्धचित्तस्य महापापवतो भवेत् ॥ ४१९ ॥
शुद्धचित्तस्य यज्ञाद्यैर्विवेकः शुद्धिसंभवः ॥
वैराग्यं ब्रह्मलोकादौ व्यनक्त्यथ सुनिर्मलम् ॥ ४२० ॥
ब्रह्मादिस्तंबपर्यन्ते संसारेऽस्मिन्नसारताम् ॥
बुध्वा भोगान्निवृत्तः सन्प्रत्यक्प्रवणतां व्रजेत् ॥४२१॥
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ।
कुर्वन्दोषविहीनं तं निजात्मानं बुभुत्सते ॥ ४२२ ॥
महापापस्य नाशः स्यात्कर्मभिस्त्वसकृत्कृतैः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४२३ ॥
प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः ।
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ॥ ४२४ ॥
सामर्थ्यमीदृक् चेदस्ति कर्मणां तर्हि किं तव ।

णमात्रेण ज्ञानोत्पत्तिसम्भवात्तत्राह* पुरेति । स्वाध्यायकाले श्रुतमपि वाक्यमशुद्धबुद्धेर्जरद्गवादिवाक्यवद्बाधितार्थत्वेन प्रतिभातीत्यर्थः ॥४१७॥ उक्तेऽर्थे स्मृतिमुदाहरति* महापापेति ॥४१८॥ ॥४१९॥एवमशुद्धबुद्धेः श्रवणादौ प्रवृत्त्यभावमुपपाद्य यज्ञादिभिः शुद्धचित्तस्य जिज्ञासाक्रममाह* शुद्धेत्यादिना॥४२० ॥ ४२१ ॥ ॥ ४२२ ॥ नन्वनुष्ठितयज्ञादेरपि पुंसो नास्मिन् जन्मनि शुद्धिर्दृश्यते तत्राह *महापापस्येति ॥ ४२३ ॥ यज्ञादेर्विविदिषाहेतुत्वमुक्तमुपसंहरति* प्रत्यगिति ॥४२४॥ आक्षेपपूर्वकमेतमेवेत्यादि-

ज्ञानेनेति न वक्तव्यं मुनित्वार्थमपेक्षणात् ॥ ४२५ ॥
श्रुतिः–एतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति ॥

वा०–बुभुत्सतेऽयमात्मानं सर्वैर्यज्ञादिकर्मभिः ।
एतमेव विदित्वाऽसौ मुनिर्भवति नान्यथा ॥४२६॥
सदा मननशीलो यो जीवन्मुक्तो मुनिः स हि ॥
स्थितप्रज्ञादिभिः शब्दैर्मोक्षशास्त्रेषु वर्ण्यते ॥ ४२७ ॥
ज्ञानाभावे मुनिः कः स्यात्सत्स्वप्यन्येषु कर्मसु ॥
गृहिणोऽतो विमुक्त्यर्थं स्मर्यते ज्ञाननिष्ठता ॥ ४२८ ॥
न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ॥
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते ॥४२९॥
पारिव्राज्यस्य वैयर्थ्यमेवं तर्हीति मोच्यताम् ॥
आत्मानं लोकमिच्छन्तः प्रव्रजंति यतः स्वतः ॥ ४३० ॥
लोक्यते दृश्यते योऽर्थः स लोक इति वर्णनात् ॥

वाक्यमवतारयति* सामर्थ्यमिति ॥ ४२५ ॥ वृत्तमनूद्याक्षराणि व्याचष्टे* बुभुत्सत इति ॥ ४२६ ॥ मुनिशब्दार्थमाह* सदेति । स हि, स एवेत्यर्थः ॥ ४२७ ॥ मुनित्वमपि कर्मफलमेवास्तु कर्मणां विचित्रशक्तित्वादिति नेत्याह* ज्ञानेति । मुनित्वं ज्ञानैकसाध्यमित्यत्र हेतुमाह* गृहिण इति । कर्मिणामपि गृहीणां मुक्तये पृथग्ज्ञाननिष्ठाविधानान्मुनिशब्दितजीवन्मुक्तिर्न कर्मसाध्येत्यर्थः ॥ ४२८ ॥ गृहीणां ज्ञाननिष्ठाविधायकस्मृतिमुदाहरति* न्यायेति ॥ ४२९ ॥ गृहस्थस्यापि चेल्लभ्यते मुक्तिर्हन्त तर्हि किं स्त्रीपुत्रादित्यागलक्षणेन दुष्करेण संन्यासेनेत्याशंक्य तदुत्तरत्वेनोत्तरवाक्यमादत्ते* पारिव्राज्यस्येति ॥ ४३० ॥ लो-

आत्मदर्शनहेतुः स्यात्पारिव्राज्यं विशेषतः ॥ ४३१ ॥
अरुचिप्रतिबन्धस्य कर्मभिः प्रक्षये सति ॥
गृहस्थो वा परिव्राड् वा शास्त्रेणात्मानमीक्षते ॥४३२॥
जनकोषस्तगार्ग्यादेर्न स्याद्वेदनमन्यथा ॥
सुलभं तु परिव्राजो बहुविघ्नविवर्जनात् ॥ ४३३ ॥
सोढ्वाऽपि कर्मविक्षेपं ज्ञाननिष्ठो भवेद्यदि ॥
विमुच्यते गृहस्थोऽपि प्रव्रजंत्यन्यथा पुनः ॥ ४३४ ॥
अतो विदित्वेतिवाक्यं सामान्यविषयं भवेत् ॥
प्रव्रजन्तीति वाक्यं तु विशेषेण प्रवर्त्तते ॥ ४३५ ॥
सकृद्बोधो वेदनं स्यान्मुनित्वं ज्ञानशीलता ॥

कमिच्छन्त इत्युक्त्या संन्यासस्य लोकहेतुत्वं श्रूयते न ज्ञानहेतुत्वं तत्राह* लोकयत इति ॥ ४३१ ॥ उक्तमर्थं संगृह्याह* अरुचीति ॥ ४३२ ॥ संन्यासस्य ज्ञानहेतुत्वश्रवणादेव गृहीणां ज्ञानमेव नास्तीत्याशंक्य जनकादीनां तत्त्ववित्त्वप्रतिपादकश्रुतिविरोधान्मैवमित्याह *जनकेति। कथं तर्हि संन्यासस्याविशेषतो ज्ञानहेतुत्वमुक्तमित्याशंक्य दण्डधारणाद्याश्रमरूपसंन्यासस्य दृष्टद्वारैव हेतुत्वमित्याह* सुलभमिति ॥ ४३३ ॥ विक्षेपाभावं दृष्टफलमनिच्छतां तु न संन्यासापेक्षेत्याह* सोढ्वेति । अन्यथा विक्षेपासहने ॥ ४३४ ॥ एतमेवेत्यादिवाक्यद्वयार्थं निगमयति* अत इति ॥ ४३५ ॥ विदित्वा मुनिर्भवतीत्यत्र वेदनमुनित्वयोरेकार्थत्वान्न तयोः साध्यसाधनभाव इत्याशंक्य ताभ्यां विवक्षितमाह* सकृदिति । फलभेदादपि तयोर्भेदमाह* अज्ञानेति । अत्राज्ञानशब्देन जगत्सत्यत्वविभ्रमापादकाज्ञानांशो विवक्षितः, नत्वखण्डानन्दावरकाज्ञानम् । अन्यथा गृहस्थस्यापि ज्ञाननिष्ठाविधान-

अज्ञानहानिर्बोधात्स्याज्जीवन्मुक्तिर्मुनित्वतः ॥ ४३६ ॥

श्रुतिः-एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणा ॥

वार्ति०-जीवन्मुक्तिरभीष्टा चेद्विद्वत्संन्यासमाचरेत् ॥
एतद्ध स्मेतिवाक्येन तदेतदभिधीयते ॥ ४३७ ॥
अपत्यैः किं करिष्यामः सर्वदा दुःखहेतुभिः ॥
परमानन्द आत्माऽयमस्माभिर्वीक्ष्यतेऽनिशम् ॥४३८॥
इति मत्वा तत्त्वविदो व्युत्थायाथैषणात्रयात् ॥
भिक्षया देहनिर्वाहं कुर्वन्तः सुखमासते ॥ ४३९ ॥
परिव्राड्भिर्बुद्ध आत्मा कीदृगित्याभिशङ्किते ॥
स एष नेतिनेतीति श्रुतिराहोत्सुका सती ॥ ४४० ॥
ननु भिक्षादिना देहपोषणादौ समे सति ॥
आत्मतत्त्वविदः कोऽतिशयो मूढादितीर्यताम् ॥४४१॥

विरोधादिति ध्येयम् ॥४३६॥ उत्तरवाक्यस्य पातनिकामाह* जीवदिति । तदेतदिति । तत्पारिव्राज्यम् एतज्जीवन्मुक्तिसाधनमित्येतद्धस्मेत्याद्यर्थवादेनोच्यत इत्यर्थः ॥४३७॥ एतेन श्रुतिगततदेतत्पदे व्याख्याते अवशिष्टपदानि व्याचष्टे*अपत्यैरिति द्वाभ्याम् । पुत्रैषणादिशब्दानामर्थः कहोलब्राह्मणोक्तोऽनुसन्धेयः ॥४३८॥ ॥ ४३९ ॥ स एष इत्यादिवाक्यमाकांक्षापूर्वकमवतारयति *परिव्राड्भिरिति ॥४४०॥ एतमु हेत्याद्युत्तरश्रुतिव्यावर्त्यां शङ्कामाह* नन्विति ॥ ४४१ ॥ श्रुतिवाक्यमादाय परिहरति* सर्वे-

सर्वेषामपि मूढानां चिंते स्तः पुण्यपापयोः ॥
निमित्तमेते आत्मज्ञे चिंते द्वे प्राप्नुतो नहि ॥ ४४२ ॥
अतो मोहाद्धनं लब्धुमाकांक्षं दुष्प्रतिग्रहम् ॥
अतः कामात्स्वर्गमाप्तुमकार्षं दानमुत्तमम् ॥ ४४३ ॥
इति चिन्ते पुण्यपापविषये पुरुषं सदा ॥
प्राप्नुतः, प्राप्य तच्चिन्ते तापं जनयतः खलु ॥४४४॥
करणात्तापयेत्पापं कर्तारि स्वफलेन च ॥
सुकृतं करणात्तद्वत्स्वफलस्य क्षयादिना ॥ ४४५ ॥
यदा न प्राप्नुतश्चिन्ते उभे तत्त्वविदं तदा ॥
न तापयत इत्येवं किमु वक्तव्यमस्ति हि ॥ ४४६ ॥

षामिति ॥ ४४२ ॥ अतः पापमित्यादि व्याकुर्वन्मूढानां पुण्यपापयोर्निमित्तं द्वे चिन्ते भवत इत्युक्तमुपपादयति* अतो मोहादिति ॥ ४४३ ॥ न केवलं मूढस्य चिंतामात्रं तत्प्रयुक्तदुःखं च भवतीत्याह* प्राप्येति ॥ ४४४ ॥ कृतस्य कर्मणस्तापहेतुत्वमाह* करणादिति । पापं हि करणादनन्तरमेव कर्तारमनुतापेन तापयत्यनन्तरं नरकादिदानेन । पुण्यं तु करणसमये शारीरक्लेशादिना पश्चात्स्वर्गफलप्रयुक्तगर्वादिना फलनाशेन च तापयतीत्यर्थः ॥ ४४५ ॥ एवं मूढस्य सफलां चिंतामुपपाद्य विदुषश्चिंताभावमुक्तमुपसंहरन्वक्ष्यमाणश्रुत्यभिमेतं तापाभावं कैमुतिकन्यायेन दर्शयति* यदेति ॥ ४४६ ॥ उभे उ हेत्यादि व्याचष्टे* उभे उ हेति ।

इयमत्र श्रुत्यक्षरयोजना । एष विद्वानेते उभे पुण्यपापे तरत्येव अतिक्रामत्येव, उ ह किल आत्मानं कर्तृत्वेन नाभिमन्यत इति यावत् । यस्मादेवं तस्मादतः पापमकरवम् अतः कल्याणमकरवम्

श्रुतिः–उभे ह्येते एषणे एव भवतः । स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यतेऽसङ्गो नहि सज्यतेऽसितो न व्यथते न रिष्यत्येतमु हैवैते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभे उ हैवैष एते तरति नैनं कृताकृते तपतः ॥२१॥

उभे उ हेतिहेतूक्तिस्तच्चिन्ताया असम्भवे ॥
पुण्येन भूयान्पापेन कनीयान्वा भवेन्न यः ॥ ४४७ ॥
सोऽहमात्मेति विज्ञाते कर्मणोऽवसरः कुतः ॥
कृते देहादिभिस्ते द्वे अकृते वा द्विधाऽपि च ॥ ४४८ ॥
एवं तत्त्वविदं ते द्वे नैव तापयतः क्वचित् ॥
स्वयं न कुरुते तस्मात्तत्प्राप्तिश्च न विद्यते ॥ ४४९ ॥
नाप्राप्तयोस्तापकत्वं विद्यते परकीययोः ॥

इत्येते चिते एवं विद्वांसं न तरतः न स्पृशत एवेति ॥ २२ ॥

एतदेवोपपादयति* पुण्येनेति । पुण्यादिभिरुत्कर्षादिरहितं ब्रह्मत्वेनात्मानमनुभवतो देहादिकं च परदेहवत्पृथक्त्वेन पश्यतः कर्मण एवाभावात्कुतस्तन्निमित्तचिन्तेति भावः ॥४४७॥ नैनमित्यादि व्याचष्टे* कृत इति । एवं विद्वांसं कृते वाऽकृते वा ते द्वे पुण्यपापे मूढमिव न तापयत इत्यर्थः ॥ ४४८ ॥ कर्मणोऽवसरः कुत इति विदुषः कर्माभावमुक्तं प्रपञ्चयति* स्वयमिति । यस्मादिति शेषः ॥४४९॥ विदुषः कर्तृत्वाभिमानराहित्येन कर्माश्लेषे फलितमाह* नेति । अज्ञस्य तद्वैलक्षण्यमुक्तं स्मारयन्नकृतयोरपि पुण्यपापयोस्तापहेतुत्वं श्रुतिसूचितं प्रतिज्ञापूर्व-

मूढस्य तूभयोः कर्त्तुस्तापः पूर्वमुदाहृतः ॥ ४५० ॥
अकर्त्तुरपि यत्ताप इहोदाह्रियते स्फुटम् ॥
गर्वेण महता पापमकर्त्तारं प्रतापयेत् ॥ ४५१ ॥
पुण्यं च फलराहित्यादकर्तुस्तापदं भवेत् ॥
देहादिरक्षासाम्येऽपि कर्मतापस्य वर्जनम् ॥ ४५२ ॥
मूढाद्विशेषोऽभिज्ञस्य तावता कृतकृत्यता ।
ब्राह्मणे विस्तृतो योऽर्थो मन्त्रे संक्षिप्यते स हि ॥४५३॥
एष इत्यादिको मन्त्रस्तदर्थस्तूपवर्ण्यते ।

श्रुति-तदेतदृचाऽभ्युक्तम् । एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान् । तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति तस्मादेवंविच्छान्तो दान्त उपरतः ॥

वा०-अद्वैतपरमानन्दमहिमाऽऽत्मविदोऽस्ति यः॥४५४॥

कमुपपादयति* मूढस्येत्यादिना ॥ ४५० ॥ ४५१ ॥ भिक्षादिना देहपोषणसाम्यान्न मूढबुद्धयोर्विशेष इति चोद्यं परिहृत्य एतमित्यादिवाक्यतात्पर्यं निगमयति* देहेति ॥ ४५२ ॥ पुनरुक्तिं परिहरन्नेष इत्याद्यवतार्य तदक्षराणि व्याख्यातुं प्रतिजानीते* ब्राह्मण इति ॥४५३॥ मन्त्रस्य पूर्वार्द्धं व्याचष्टे* अद्वैतेति । ब्राह्मणपदव्याख्या आत्मविद इति । न वर्द्धत इत्यादौ हेतुः कर्मजयोरिति । कर्मसाध्ययोरित्यर्थः । तस्यैव स्यात्पदविदित्यस्यार्थमाह *आत्मन इति । यस्मादात्मविद एव महिमा ऽस्ति तस्मादात्मनो यत्पदं तत्त्वं तद्विद्भवेत्, तज्ज्ञानसाधनमनुतिष्ठेदित्यर्थः । मंत्रशेषं व्याचष्टे* एनमिति । पापशब्दः पुण्यस्याप्युप-

एष नित्यः कर्मजयोर्हानिवृद्ध्योरभावतः ॥
आत्मनो यत्पदं तत्त्वं तदभिज्ञः पुमान्भवेत् ॥
एवं विदित्वा पापेन कर्मणा नैव लिप्यते ॥ ४५५ ॥
बहिरङ्गं पुरा प्रोक्तं वेदानुवचनादिकम् ॥
तत्संन्यासोऽतरंगत्वात्तत ऊर्ध्वमुदीरितः ॥ ४५६ ॥
अन्तरङ्गतरा ये ते शान्तिदान्त्यादयोऽखिलाः ॥
वक्तव्या इत्यभिप्रेत्य श्रुतिस्तत्र प्रवर्त्तते ॥ ४५७ ॥
शान्तिः क्रोधपरित्यागो दान्तिर्बाह्याक्षनिग्रहः ।
शान्तो मुनिर्बलीवर्दो दान्त इत्युक्तिदर्शनात् ॥४५८॥
शमादिगुणसिध्यर्थं मोक्षशास्त्रेष्वनेकधा ।
विवेको वर्णितस्तच्च सदा शास्त्रं विचिन्तयेत् ॥४५९॥
अपकारिणि कोपश्चेत्कोपे कोपः कथं न ते ।

लक्षणम् ॥४५४॥४५५॥ तस्मादित्यादिवाक्यं वृत्तानुवादपूर्वकमव-तारयति* बहिरङ्गमित्यादिना । तदिति गतम् । तस्माद्वेदानुवच-नादेरिति यावत् । तस्मादेवंविदितिश्रुतौ ज्ञानिनः कर्मलेपाभावः पञ्चम्यर्थः । एवंवित् यथोक्तफलं विद्वानित्यर्थः ॥४५६॥४५७॥ शान्तो दान्त इत्यत्र शान्तिदान्तिपदयोरर्थमाह* शान्तिरि-ति । तत्र वृद्धप्रयोगं प्रमाणयति* शान्त इति ॥ ४५८ ॥ उक्तशान्त्यादिसिद्धेरुपायमाह* शमादीति ॥

न शब्दशास्त्राभिरतस्य मोक्षो न चापि लोकग्रहणे रतस्य ॥
न भोजनाच्छादनगार्वितस्य न चापि रम्यावसथप्रियस्य ॥
आरण्यनित्यस्य जितेन्द्रियस्य सर्वेन्द्रियप्रीतिविवर्जितस्य ।
अध्यात्मचिन्तागतमानसस्य ध्रुवा ह्यनावृत्तिरपेक्षकस्य ॥
इत्यादिशास्त्राद्विवेकं संपादयेदित्यर्थः ॥४५९॥ तत्र तावत्क्रोध-

धर्मार्थकाममोक्षाणां प्रसह्य परिपन्थिनि ॥ ४६० ॥
न पाणिपादचपलो न नेत्रचपलो यतिः ।
नच वाक्चपलश्चैवमिति शिष्टस्य लक्षणम् ॥ ४६१ ॥
पुमर्थः कर्मणा नेति धीरेषोपरतिर्भवेत् ।
न कर्मणा न प्रजयेत्यादिशास्त्रमधीयते ॥ ४६२ ॥
श्रुतिः–तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति ॥
वा०–अवश्यभोज्यं प्रारब्धं प्राप्तद्वंद्वसहिष्णुता ॥
तितिक्षा, नहि तद्द्वंद्ववर्जनोपाय ईक्ष्यते ॥ ४६३ ॥
मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ॥
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥४६४॥
समाहितत्वमैकाग्र्यं मनसः श्रवणादिषु ।
दृश्यते त्वग्र्यया बुध्येत्यस्यैतत्काठके वचः ॥४६५॥
श्रद्धावित्तत्वमप्येकं प्रोक्तं माध्यन्दिनैरिह ।

निवृत्तेरुपायं विवेकमाह* अपकारिणीति ॥४६०॥ शान्तेरुपायमुक्त्वा दान्तिसिद्धये उपायमाह* नेति ॥४६१॥ उपरतिशब्दार्थमाह *पुमर्थ इति । आत्यन्तिक इति । शेषः। तत्र मानमाह* नेतीति॥४६२॥ तितिक्षाशब्दार्थमाह* अवश्येति । तस्य प्रतीकारनिवर्त्यत्वभ्रमं वारयति* नहीति । तदुक्तम्––

अवश्यंभाविभावानां प्रतीकारो भवेद्यदि ॥
तदा दुःखैन लिप्येयुर्नलरामयुधिष्ठिरा इति ॥ ४६३ ॥

द्वंद्वस्य सोढव्यत्वे गीतावाक्यं प्रमाणयति* मात्रेति ॥ ४६४ ॥ समाहित इत्यस्यार्थमाह* समाहितत्वमिति । ऐकाग्र्यस्य ज्ञानहेतुत्वे मानमाह* दृश्यत इति ॥ ४६५ ॥ शा-

विश्वासातिशयः श्रद्धा वाक्येषु गुरुशास्त्रयोः॥४६६॥
श्रद्धाभक्तिज्ञानयोगादित्याथर्वणिकं वचः।
श्रद्धावांल्लभते ज्ञानमित्याह भगवानपि॥ ४६७॥
रुचिमान्कर्मसंन्यासी युक्तः शमदमादिभिः।
मुख्याधिकारी भूत्वाऽसावात्मन्यात्मानमीक्षते॥४६८॥
देहेन्द्रियादिसाक्षित्वात्स्वानुभूत्येकमानतः।
तस्मिन्नेव परात्मानं शास्त्रसिद्धं प्रपश्यति॥४६९॥
आधाराधेयभावोऽयमेकस्मिन्नौपचारिकः।
राहोर्मूर्द्धेतिसंबन्ध उपचाराद्यथा तथा॥ ४७०॥
एवकारो भेदनुत्यै जीवात्मपरमात्मनोः।
स्वात्मानमेव ब्रह्मेति ह्यखण्डत्वेन पश्यति॥ ४७१॥
स्वात्मा यद्यपि दृष्टश्चेद् द्रष्टव्यं नावशिष्यते।

स्वान्तरोक्तं श्रद्धावित्तपदं व्याचष्टे* श्रद्धेति। श्रद्धैव वित्तं धनं यस्य स तथोक्तः, श्रद्धालुर्भवेदिति यावत्॥४६६॥ तस्याः ज्ञानहेतुत्वे मानमाह*श्रद्धेति॥४६७॥ अक्षरार्थमुक्त्वा तमेतमित्यादिवाक्यार्थं संगृह्णाति* रुचिमानिति॥४६८॥ आत्मन्येवात्मानमित्यस्यार्थमाह* देहेति। यस्तु प्रमात्राद्युत्पत्तिविनाशसाक्षित्वेन स्वमहिम्नैव स्फुरति तस्मिन्नुपनिषदेकवेद्यं परमात्मानं पश्यति। त्वंपदलक्ष्यं चैतन्यं निरतिशयात्मत्वेन पश्यतीत्यर्थः॥ ४६९॥ कथं तर्हि तयोराधाराधेयभावेन भेदनिर्देशस्तत्राह* आधारेति॥४७०॥ आत्मन्येवेत्यत्रैवकारार्थमाह* एवकार इति। भेदाभावेनात्मनीति सप्तम्या अविवक्षितत्वे वाक्ययोजनाप्रकारमाह* स्वात्मानमिति॥ ४७१॥ परमात्मनः प्रत्यगभिन्नत्वे स्वात्मतत्त्वं प-

तथाऽप्यन्यः परात्मेति भ्रान्तिनुत्यै श्रुतेर्वचः ॥ ४७२॥

श्रुति०—सर्वमात्मानं पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति विपापो विरजः ॥

वा०—परमात्मा यथा नान्यस्स्वात्मनोऽस्ति जगत्तथा ॥
इति वक्ति श्रुतिः सर्वमात्मानमितिवाक्यतः ॥४७३॥
जडाजडं जगद्यच्च द्वयं तत्स्वात्मनाऽऽत्मवत् ॥
आत्मनश्चेत्पृथक् तत्स्यान्निरात्मकमसद्भवेत् ॥४७४ ॥
जीवेशजगतां तत्त्वमखण्डैकरसं ततः ॥
इति पश्यति यस्त्वेनं पाप्मा नाप्नोति कश्चन ॥४७५॥
पुण्यं च जन्महेतुत्वादत्र पाप्मेति वर्ण्यते ॥
कर्महानिः पूर्वमुक्ता या तस्या उपसंहृतिः ॥ ४७६ ॥
उल्लंघयेन्न पाप्मैनं स तं प्रत्युत लंघयेत् ॥
पाप्मा तापयते नैनं स तं प्रत्युत तापयेत् ॥ ४७७ ॥

श्यतीत्येवालं किमेवकारेणेत्यत आह* स्वात्मेति ॥ ४७२ ॥ सर्वमात्मानं पश्यतीतिवाक्यमवतार्य व्याचष्टे *परमात्मेत्यादिना । चेतनाचेतनात्मकं यज्जगत्तस्योभयस्याप्यात्मनि कल्पितत्वेन तत्सत्तातिरिक्तसत्ताभावात्सर्वस्यात्ममात्रत्वं युक्तमित्यर्थः ॥४७३॥४७४॥ सर्वस्य द्वैतस्य पृथक्सत्ताभावे फलितं वदन्नैनं पाप्मा तरतीत्यस्यार्थमाह *जीवेत्यादिना ॥ ४७५ ॥ एतमु हेत्यादिना विदुषः पुण्यपापास्पृष्टेरुक्तत्वादस्य पौनरुक्त्यमाशंक्याह *कर्मेति ॥ ४७६ ॥ सर्वमित्यादेरर्थमाह *उल्लङ्घयेदिति । नैनं पाप्मेत्यादेरर्थमाह *पाप्मेति ॥ ४७७ ॥ पाप्मा विद्वांसं न तरतीत्यादिविशेषणं व्यर्थं, यतोऽचेतनः पाप्मा कुल्यामिव चैत्रोऽ-

कर्माधीनत्वमापाद्य मूढं पाप्माऽतिलङ्घयेत् ॥
जन्मादिदुःखदानेन मूढं पाप्माऽतितापयेत् ॥ ४७८ ॥
कर्माध्यक्षस्वरूपत्वाज्ज्ञानी कर्मातिलंघयेत् ॥
ज्ञानाग्निना दहेत्कर्म स्वात्माऽविद्यासमुत्थितम् ॥४७९॥
विपापो विरजस्कोऽयं पापाविद्याविवर्जनात् ॥
श्रुतिः—अविचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोकः सम्राडेनं प्रापितोऽसीति होवाच याज्ञवल्क्यः सोऽहं भगवते विदेहान्ददामि मां चापि सह दास्यायेति ॥२३॥
स वा एष महानज आत्माऽन्नादो वसुदानो विन्दते वसु य एवं वेद ॥ २४ ॥
वा०—यस्मादविचिकित्सोऽतो ब्राह्मण्यं मुख्यमस्य हि४८०
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥
सर्वसंशयविच्छेदे भवति ब्राह्मणो बुधः ॥ ४८१ ॥
अथ ब्राह्मण इत्येवं जीवन्मुक्ताभिधानतः ॥
स एव ब्राह्मणोऽत्र स्यान्न जात्या जातिबाधनात् ४८२
ब्रह्मत्वमेव ब्राह्मण्यमित्यभिप्रायमात्मनः ॥

ग्निरिवाश्रयं नाज्ञानमपि तरति तपति चेत्याशंक्य तरणादिशब्देन विवक्षितमाह *कर्मेति द्वाभ्याम् ॥४७८॥४७९॥ विपापो विरजो इत्यनयोर्विशेषणयोरर्थमाह *विपाप इति । अविचिकित्सो ब्राह्मण इति पदद्वयं हेतुहेतुमद्भावेन योजयति *यस्मादित्यादिना ॥४८०॥४८१॥ उक्तस्मृत्या अविचिकित्साया ज्ञानहेतुत्वेऽपि कथं ब्राह्मण्यहेतुत्वं तत्राह *अथेति ॥४८२॥ न केवलमुक्तश्रुत्या ब्राह्मणशब्दस्य ब्रह्मवित्परत्वं किन्तूत्तरवाक्यपर्यालोचनयाऽपी-

विशदीकर्तुमाहैष ब्रह्मलोक इतीदृशम् ॥ ४८३ ॥
यो वेदैष ब्रह्मलोको नतु मानुषविग्रहः ॥
ब्रह्मैव लोक इत्येवं पूर्वमेवोपपादितम् ॥ ४८४ ॥
ससाधनाया विद्यायाः संपूर्णत्वादयं नृपः ॥
स्वदेहसहितं राज्यं गुरुवेऽस्मै न्यवेदयत् ॥ ४८५ ॥
आख्यायिकां परित्यज्य श्रुतिः स्वमुखतः पुनः ॥
स वा इत्यादिना वक्ति ब्रह्मोपास्तिं फलार्थिनाम्४८६॥
पूजार्थं भक्तदत्तान्नमत्तीत्यन्नाद उच्यते ॥
वसुदाता च भक्तेभ्यः स एष परमेश्वरः ॥ ४८७ ॥
पूजास्वीकारदातृत्वगुणयुक्तं महेश्वरम् ॥
य उपास्ते पुमानेष यथेष्टं लभते धनम् ॥ ४८८ ॥

श्रुतिः- स वा एष महानज आत्माऽजरोऽमरोऽमृतो ऽभयो ब्रह्माभयं वै ब्रह्माभयꣳ हि वै ब्रह्म भवति य एवं वेद ॥ २५ ॥

इत्युपनिषदि चतुर्थं ब्राह्मणं समाप्तम् ।

त्याह *ब्रह्मत्वमिति ॥ ४८३ ॥ तात्पर्यमुक्त्वाऽक्षराणि व्याचष्टे *य इति ॥ ४८४ ॥ सोऽहमित्यादेस्तात्पर्यमाह *ससाधनाया इति ॥ ४८५ ॥ उत्तरकण्डिकामवतारयति *आख्यायिकामिति ॥ ४८६ ॥ अन्नादवसुदानशब्दयोरर्थमाह *पूजार्थमिति ॥ ४८७ ॥ विंदते वसु एवं वेदेत्यस्यार्थमाह *पूजेति । विंदते वस्वित्यस्य व्याख्या लभते धनमिति ॥ ४८८ ॥ स वा इत्यादिकण्डिकान्तरं व्याचष्टे *विद्वादिति ? । स एष आत्मा ब्रह्मेति प्रथमं सम्बन्धः । फलदातुरीश्वरात् फलस्वीक-

धा०-विद्वद्दृष्ट्या स एवात्मा जरामरणवर्जितः ॥
आनंदो भयहीनश्च ब्रह्मैवातो न चेतरः ॥ ४८९ ॥
द्वितीयाज्जायते भीतिर्ब्रह्म द्वैतविवर्जनात् ॥
अभयं, तत्प्रसिद्धिस्तु वैशब्देनात्र वर्ण्यते ॥ ४९० ॥
य एव ब्रह्म जानाति तद्ब्रह्मैव भवत्यसौ ॥
हिशब्दोऽशेषवेदान्तप्रसिद्धिं सूचयेदिह ॥ ४९१ ॥

इति वार्त्तिकसारे चतुर्थाध्याये चतुर्थब्राह्मणं समाप्तम् ।

मधुकाण्डे याज्ञवल्क्यकाण्डे विज्ञानमीरितम् ॥
तत्सर्वमुपसंहर्तुं मैत्रेयीब्राह्मणं भवेत् ॥ १ ॥
वक्तव्यश्च विशेषोऽत्र पूर्वोक्तादधिको नहि ॥
इति सूचयितुं शेषस्तत्पाठः पुनरुच्यते ॥ २ ॥
यद्यप्यतीतकाण्डे ऽस्ति मधुब्राह्मणमुत्तमम् ॥

र्तुर्भिन्नत्वात्कथमैक्यमित्याशंक्याज्ञदृष्ट्या पूर्वं तयोर्भेद उक्तो न वस्तुत इति मत्वाऽऽह *विद्वद्दृष्ट्येति । अजर इत्यादिपदान्यात्मनो ब्रह्मत्वे हेतुपरतया व्याकरोति *जरेति ॥ ४८९ ॥ अभयं वै ब्रह्मेत्येतद् व्याचष्टे *द्वितीयादिति ॥ ४९० ॥ अभयं हीत्यादिफलवाक्यं व्याचष्टे *य इति ॥ ४९१ ॥

इति वार्त्तिकसार टीकायां चतुर्थब्राह्मणं समाप्तम् ।

एवमबल्यब्राह्मणं सपरिकरं व्याख्याय मैत्रेयीब्राह्मणतात्पर्यमाह *मध्वेति ॥ १ ॥ अस्योपसंहारमात्रपरत्वं नातिरिक्तप्रतिपादकत्वमित्यत्र लिङ्गमाह *वक्तव्य इति ॥२॥ काण्डद्वयप्रतिपादितविज्ञानोपसंहारायेदं ब्राह्मणमित्युक्तमयुक्तं, मधुकांडस्य मधुब्राह्मणेनैवोपसंहृतत्वादिति शंकित्वा परिहरति *यद्यपीति ।

अयं भावः--मधुब्राह्मणस्यानेकार्थत्वं तावदुक्तं, तस्य हेत्व-

तथापि याज्ञवल्क्येन सम्बन्धायेदमुच्यते ॥ ३ ॥

इति वार्त्तिकसारे चतुर्थाध्यायस्य पञ्चमं ब्राह्मणं समाप्तम् ॥

उपसंहृत्य तां विद्यां काण्डवंशोऽथ वर्ण्यते ।
स व्याख्यातः पूर्वमेव ब्रह्माप्त्यै जप्यतामिति ॥ १ ॥
नवत्यधिकसंख्याताः श्लोका नवशतानि च ।
संति वार्त्तिकसारेऽस्मिन् षष्ठाध्यायस्य संग्रहे ॥ २ ॥

इति वार्त्तिकसारे चतुर्थाध्यायस्य षष्ठब्राह्मणं समाप्तम् ॥

श्रुतिः-अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी

सिद्धिनिराकरणपरत्वे इदं ब्राह्मणं काण्डद्वयार्थोपसंहारपरम् । तस्य मधुकांडार्थनिगमनपरत्वे इदं मुनिकाण्डार्थमात्रनिगमनपरमिति ॥ ३ ॥

इति वार्त्तिकसारटीकायां पञ्चमं ब्राह्मणं समाप्तम् ।

विद्योपसंहारानन्तरं वंशवर्णनवैयर्थ्यमाशंक्य चतुर्थोक्तमर्थं स्मारयति *स व्याख्यातः पूर्वमेवेति ॥ १ ॥

इति वार्त्तिकसारटीकायां षष्ठब्राह्मणं समाप्तम् ॥

मैत्रेयीब्राह्मणे पूर्वं यान्यक्षराणि अविभक्तानि तानि विभज्यन्ते। प्रतिज्ञातार्थप्रतिपादनानंतर्यमथशब्दार्थः । प्रतिज्ञातार्थं प्रतिपाद्यानेन ब्राह्मणेन स एवोपसंह्रियत इति भावः । हशब्दो वृत्तावद्योतकः । ब्रह्मवादिनी ब्रह्मवदनशीला । स्त्रीप्रज्ञेति । स्त्रियां या उचिता प्रज्ञा गृहप्रयोजनान्वेषणलक्षणा सा स्त्रीप्रज्ञा, सैव यस्याः प्रज्ञा सा स्त्रीप्रज्ञा। तर्हि तस्मिन्काले बभूवेत्यनुषङ्गः। अथ

बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥ १ ॥

मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति ॥ २ ॥

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् स्यां न्वहं तेनामृताऽऽहो३ नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳस्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ ३ ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे विब्रूहीति ॥ ४ ॥

स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती सती प्रियमवृधद्धन्त तर्हि भवत्येतद् व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ५ ॥

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो

एवं दर्शितरीत्या भार्याद्वितये स्थिते सतीत्यर्थः । ह किल पूर्वस्माद्गार्हस्थ्यलक्षणाद् वृत्तादन्यत् पारिव्राज्यलक्षणमुपाकरिष्यन्ननुष्ठानं चिकीर्षुः सन्मैत्रेयीं ज्येष्ठां भार्यामामंत्र्य उवाच ह प्रव्राजिष्यन्पारिव्राज्यं करिष्यन्वै अरे मैत्रेयि अस्मात्स्थानाद्गार्हस्थ्यादहमस्मि भवामि । हंतेत्यादि समानार्थं पूर्वेण ॥ १ ॥ २ ॥ स होवाच प्रियैव खलु नोऽस्मभ्यं भवती भवन्ती सती प्रियमेवावृधत्, अवृधः वर्धितवत्यसि, अतस्तुष्टोऽहं हंत इच्छसि चेदमृतत्वसाधनं ज्ञातुं हे भवति ते तुभ्यं अमृतत्वसाधनं व्याख्यास्यामि कथयिष्यामि ॥ ५ ॥

भवत्यात्मनस्तु कामाय पतिः प्रियो भवति, न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति, न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवंति, न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति, आत्मनस्तु कामाय वित्तं प्रियं भवति, नवा अरे पशूनां कामाय पशवः प्रिया भवन्त्यात्मनस्तु कामाय पशवः प्रिया भवन्ति, नवा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति, न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति, नवा अरे लोकानां कामाय लोकाः प्रिया भवंति आत्मनस्तु कामाय लोकाः प्रिया भवंति, नवा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवंति, न वा अरे वेदानां कामाय वेदाः प्रिया भवंत्यात्मनस्तु कामाय वेदाः प्रिया भवंति, नवा अरे भूतानां कामाय भूतानि प्रियाणि भवंत्यात्मनस्तु कामाय भूतानि प्रियाणि भवंति, नवा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदꣳ सर्वं विदितम् ॥ ६ ॥

ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद, क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद, लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद, देवास्तं परादुर्योऽन्यत्रात्म-

नं देवान् वेद, वेदास्तं परादुर्योऽन्यत्रात्मनो वेदान्वेद, भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद, सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥ ७ ॥

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद् ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो गृहीतः ॥ ८ ॥

स यथा शंखस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शंखस्य तु ग्रहणेन शंखध्मस्य वा शब्दो गृहीतः ॥ ९ ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ १० ॥

स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरंत्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेवैतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टꣳहुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानि ॥ ११ ॥

स यथा सर्वासामपाꣳसमुद्र एकायनमेवꣳसर्वेषाꣳ स्पर्शानां त्वगेकायनमेवꣳ सर्वेषां गन्धानां नासिके एकायनमेवꣳसर्वेषाꣳरसानां जिह्वैकायनमेवꣳसर्वेषाꣳ रूपाणां चक्षुरेकायनमेवꣳ सर्वेषाꣳ शब्दानाꣳश्रोत्र-

मेकायनमेवꣳ सर्वेषाꣳ सङ्कल्पानां मन एकायनमेवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनमेवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनमेवꣳ सर्वेषामानन्दानामुपस्थ एकायनमेवꣳ सर्वेषां विसर्गाणां पायुरेकायनमेवꣳ सर्वेषामध्वनां पादावेकायनमेवꣳ सर्वेषां वेदानां वागेकायनम् ॥ १२ ॥

स यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनंतरो ऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १३ ॥

सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहांतमापीपिपन्न वा अहमिमं विजानामीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरे ऽयमात्मा ऽनुच्छित्तिधर्मा ॥ १४ ॥

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरꣳरसयते

अत्रैव मा भगवानिति ॥ भवानत्र एतस्मिन्नेव वस्तुनि प्रज्ञानघन एव न प्रेत्य संज्ञाऽस्तीति मोहांतं मोहमध्यमापीपिपत् गमितवानसि मोहितवानसीति यावत् । अतो न वै अहमिममात्मानमुक्तलक्षणं विवेकतो जानामीति ॥ स होवाच नाहं मोहं ब्रवीमीति ॥ अविनाश्ययमात्मा । नाशशब्दोऽत्र विक्रियापरः, अविक्रिय आत्मेत्यर्थः ॥ अरे मैत्रेयि अयमात्मा प्रकृतः अनुच्छित्तिधर्मा ॥ उच्छित्तिर्विनाशो धर्मोऽस्येत्युच्छित्तिधर्मा न उच्छित्तिधर्माऽनुच्छित्तिधर्मा । विक्रिया विनाशो वा नास्य विद्यत इत्यर्थः ॥ विरोधसमाधानं तु पूर्वोक्तमनुसंधेयम् ॥ १४ ॥

तदितर इतरमभिवदति तदितर इतरꣳशृणोति तदितर इतरं मनुते तदितर इतरꣳ स्पृशति तदितर इतरं विजानाति ॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कꣳरसयेत्तत्केन कमभिवदेत्तत्केन कꣳशृणुयात् तत्केन कं मन्वीत तत्केन कꣳ स्पृशेत्तत्केन कं विजानीयाद्येनेदꣳसर्वं विजानाति तं केन विजानीयात् स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यतेऽसंगो नहि सज्यतेऽसितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादित्युक्तानुशासनाऽसि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ॥ १५ ॥

इत्युपनिषदि षष्ठाध्यायस्य पञ्चमं ब्राह्मणं समाप्तम् ॥

अथ वꣳशः पौतिमाष्यात् पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥

चतुर्णामपि प्रपाठकानां निर्विशेष आत्मनि निष्ठता, नान्योऽन्तराले कश्चिदपि विवक्षितोऽर्थोऽस्तीति दर्शयितुमंते उपसंहारः क्रियते—स एष नेति नेत्यादिना । यदेतन्नेति नेत्यात्मपरिज्ञानमेतदेवामृतत्वसाधनमित्येतमर्थमुपसंजिहीर्षन्नाह—एतावत् एतावन्मात्रं यदेतन्नेति नेतीत्यद्वैतात्मप्रदर्शनम् इदमेवारे मैत्रेयि अमृतत्वसाधनमिति विज्ञेयं त्वयेति ह एवं किलामृतत्वसाधनमात्मज्ञानं प्रियायै उक्त्वा यत्पूर्वं प्रतिज्ञातं प्रव्रजिष्यन्नस्मीति तच्चकार । विजहार प्रव्राजितवानित्यर्थः ॥ १५ ॥

आग्निवेश्यादाग्निवेश्यो गार्ग्याद्गार्ग्यो गार्ग्याद्गार्ग्यो गौतमाद्गौतमः सैतवात्सैतवः पाराशर्यायणात्पाराशर्यायणो गार्ग्यायणाद्गार्ग्यायणः उद्दालकायनादुद्दालकायनो जाबालायनाज्जाबालायनो माध्यंदिनायनान्माध्यंदिनायनः सौकरायणात्सौकरायणः काषायणात्काषायणः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥

घृतकौशिकाद् घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजंघनेरौपजंघनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो मांटेर्मांटिर्गौतमो गौतमाद्गौतमाद्गौतमो वात्स्याद्वात्स्यः शांडिल्याच्छांडिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौंडिन्याद्विदर्भी कौंडिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पंथाः सौभरो ऽयास्यादांगिरसादयास्य आंगिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभुब्रह्मणे नमः ॥ ३ ॥

इत्युपनिषदि षष्ठाध्याये षष्ठब्राह्मणं समाप्तम् ।

श्रीगणेशाय नमः ॥

श्रीमन्महर्षिबादरायणप्रणीतवेदान्तसूत्राणां

लघुवार्त्तिकम् ।

अथातो ब्रह्मजिज्ञासा ॥ १ ॥ जगद्धेतुः सदादि तत् ॥ २ ॥
वेदहेतुरपि ब्रह्म ॥ ३ ॥ तद्वेदादेव मीयते ।
न प्रतीचि ब्रह्मदृष्टिं विधत्ते तत्त्वमादिगीः ॥
नाप्युपास्तिविधेः शेषं ब्रह्मात्मैक्यं प्रमापयेत् ॥ ४ ॥
ईक्षणादिश्रुतेः सृष्टिश्रुतयो न प्रधानगाः ॥ ५ ॥
सर्वान्तरत्वादानन्दमयो ब्रह्मेति वृत्तिकृत् ॥
प्रियादियोगाज्जीवः स पुच्छं ब्रह्मैव मीयते ॥ ६ ॥
रवौ हिरण्मयस्त्वीशः सर्वपाप्मोदयादिभिः ॥ ७ ॥
आकाशशब्दं ब्रह्मैवानन्तत्वादेः श्रुतत्वतः ॥ ८ ॥
प्राणशब्दमपि ब्रह्म सर्वभूतोद्गमादिभिः ॥ ९ ॥
ज्योतिःपदं त्रिपाद्ब्रह्म तदाकर्षकयच्छ्रुतेः ॥ १० ॥
प्राणवाक्येऽसुजीवेशधीत्रयं न विधीयते ॥ ११ अधिकरणानि ६॥

इति लघुवार्त्तिके प्रथमस्य प्रथमः ॥

ब्रह्मसन्निधिना वाक्यशेषाच्चेशो मनोमयः ॥ १ ॥
ब्रह्मक्षत्रादिजगतः संहर्तेशस्समृत्युनः ॥ २ ॥
ऋतं पिबन्तौ जीवेशौ चैतन्येन सदृक्त्वतः ॥ ३ ॥
अक्षिस्थपुरुषस्त्वीशो यदेतद्धर्मा तदुक्तितः ॥ ४ ॥
अमृतत्वज्ञातृताभ्यामन्तर्यामी परः स्मृतः ॥ ५ ॥
अदृश्यत्वादिगुणकः परः सर्वज्ञतादिभिः ॥ ६ ॥
वैश्वानरोऽपि ब्रह्मात्मपुरुषादिश्रुतेः परः ॥ ७ अधिकरणानि ॥

इति लघुवार्त्तिके प्रथमस्य द्वितीयः ॥ २ ॥

द्युभ्वाद्याधार ईशः स्यादात्मत्वादेः श्रुतत्वतः ॥ १ ॥
भूमा परः सत्यसुखसर्वात्मत्वादिभिर्भवेत् ॥ २ ॥
ईशोऽक्षरन्त्वम्बरान्तशासनज्ञातृतादिभिः ॥ ३ ॥
त्रिमात्रोऽभिध्येय ईशः ममात्मेक्षणकर्मतः ॥ ४ ॥
हृदम्बुजे ध्येय ईशः सत्यकामात्मतादिभिः ॥ ५ ॥
निरुपाधिः सम्प्रसादस्त्वीश एवोत्तमत्वतः ॥ ६ ॥
सूर्यादिसर्वजगतो भासकः परमेश्वरः ॥ ७ ॥
अङ्गुष्ठपुरुषस्त्वीशो भूतभव्येशितृत्वतः ॥ ८ ॥
विद्याधिकारिणो देवा विग्रहादेः श्रुतत्वतः ॥ ९ ॥
वैदिकश्रवणे शूद्रो नाधिकृद्ब्रह्मनिन्दनात् ॥ १० ॥
प्राण ईशः सर्वजगत्कम्पकत्वादितो भवेत् ॥ ११ ॥
परं ज्योतिः परं ब्रह्मादेहत्वप्राक्रियादिभिः ॥ १२ ॥
आकाश ईशो नामादेर्नियन्तृत्वादितो भवेत् ॥ १३ ॥
विज्ञानमय आत्मेशो महानज इति श्रुतेः ॥ १४ अधिकरणानि ॥

इति लघुवार्त्तिके प्रथमस्य तृतीयः ॥

प्रक्रियापारिशेषाभ्यामव्यक्तन्तु शरीरकम् ॥ १ ॥
अजेति तेजोबन्नोपरक्ताव्याकृतमुच्यते ॥ २ ॥
प्राणादयः पञ्चजना ईशस्था आत्मशब्दतः ॥ ३ ॥
सदेव कारणं तत्रासद्वीर्गौण्यन्यवारणात् ॥ ४ ॥
एतदुक्तजगत्कर्ता परः प्रकरणादिभिः ॥ ५ ॥
याज्ञवल्क्योक्त आत्मेशः सर्वात्मत्वादिभिर्भवेत् ॥ ६ ॥
जगतः प्रकृतिश्चेशः सर्वात्मत्वेक्षणादिभिः ॥ ७ ॥
शून्याणुहेतुवद्वादस्त्वनभिव्यक्तसत्परः ॥ ८ अधिकरणानि ॥

इति लघुवार्त्तिके प्रथमस्य चतुर्थः ॥

साङ्ख्यस्मृतिर्न मानं स्याद्वैदिकस्मृतिबाधनात् ॥ १ ॥
योगस्मृतिः प्रमाऽष्टाङ्गयोगे, नैव प्रधानके ॥ २ ॥
कार्यासदृगपि ब्रह्म हेतुर्लोके तथा मितेः ॥ ३ ॥
महापटादल्पदृष्टेर्महानात्मा सृजेज्जगत् ॥ ४ ॥
ईशाभिन्नं भोक्तृभोग्यं नैकमब्धितरङ्गवत् ॥ ५ ॥
जगद्धेतोर्मृषा भेदः सन्नभेदश्रुतेर्मितेः ॥ ६ ॥
कुर्याज्जीवाहितञ्चेशस्तदभिन्नो मृषात्वदृक् ॥ ७ ॥
एकाद्वितीयो मायातः क्रमिकानेकसृड्भवेत् ॥ ८ ॥
निष्कलेशान्मृषा कार्यं न कृत्स्नान्नैकदेशतः ॥ ९ ॥
अन्यानपेक्षमायावददेही मायया भवेत् ॥ १० ॥
प्रयोजनं विनाऽपीशो वृथाचेष्टादिवत्सृजेत् ॥ ११ ॥
प्रभुसभ्यादिवत्कर्मापेक्षस्तु विषमादिकृत् ॥ १२ ॥
मृषा कार्यन्त्वगुणतो भवेल्लोके तथामितेः ॥१३ अधिकरणानि ॥

इति लघुवार्त्तिके द्वितीयस्य प्रथमः ॥

प्रधानं त्रिगुणं नेशामेरितं प्रकृतिर्भवेत् ॥ १ ॥
विशेषेशगुणाः कार्ये नान्वीयन्तेऽणुधर्मवत् ॥ २ ॥
निरंशाणौ क्रियायोगौ नेति नास्माज्जगज्जनिः ॥ ३ ॥
स्कन्धाणुक्षणिकौ हेतू न स्थिरात्मा प्रवर्त्तते ॥ ४ ॥
सहेक्षणादेर्न ज्ञाने ज्ञेयैक्यं व्यभिचारतः ॥ ५ ॥
न शून्ये स्याज्जगद्भ्रान्तिः सदधिष्ठानमन्तरा ॥ ६ ॥
नैकस्य सदसत्त्वादिः स्याद्धेतुः सन् जगन्मृषा ॥ ७ ॥
नाश्रौतेशो जगत्कर्ता सर्वमानबहिष्कृतः ॥ ८ ॥
पाञ्चरात्रान्न जीवस्य जन्म श्रुतिविरोधतः ॥९ अधिकरणानि ॥

इति लघुवार्त्तिके द्वितीयस्य द्वितीयः ॥

खमीशजं विभक्तत्वाद्भूतद्वारा तथा श्रुतेः ॥ १ ॥
वायोर्जन्मश्रुतिः स्वार्था नामृतत्वादिबोधिनी ॥ २ ॥
सतो न जन्माश्रवणान् नित्यत्वस्य श्रुतेरपि ॥ ३ ॥
तेजोजनिर्न सन्मात्राद्वाय्वापन्नात्तु तज्जनिः ॥ ४ ॥
विरोधः सूक्ष्मयोर्नेति तेजसोऽपां जनिर्भवेत् ॥ ५ ॥
भूरद्भ्यो जायते तस्यामन्नगीरधिकारतः ॥ ६ ॥
तत्तद्भूतनियन्तेशो नादेहा अभिमानिनः ॥ ७ ॥
लयक्रमो विपर्यस्तः स्वयोनौ लयदर्शनात् ॥ ८ ॥
प्राणानां भौतिकत्वोक्तेर्भूतात्पूर्वं जनिर्नहि ॥ ९ ॥
न जायते ज्ञस्तनुवत्कृतहानादिदोषतः ॥ १० ॥
मोक्ष्यभावप्रसङ्गाच्च वियद्वदपि जन्म न ॥ ११ ॥
ज्ञानात्मा च श्रुतेर्ज्ञस्य करणं वृत्तिसाधनम् ॥ १२ ॥
स विभुर्ब्रह्मणैक्योक्तेरणुतोपाधिकल्पिता ॥ १३ ॥
सोपाधिकः स कर्त्तास्याद्भोक्ता च श्रुतिशासनात् ॥ १४ ॥
स्वतो न कर्ता भोक्ता वा ब्रह्मैक्यानुपपत्तितः ॥ १५ ॥
कर्तृत्वमीशतन्त्रं स्यादेष एवेति तच्छ्रुतेः ॥ १६ ॥
नेशाभावो मृषाभेदानुवादेनेशताविधेः ॥१७ अधिकरणानि ॥

इति लघुवार्त्तिके द्वितीयस्य तृतीयः ॥

श्रुतेर्जन्मेन्द्रियाणां स्यात्सूत्रार्था स्यादृषिस्मृतिः ॥ १ ॥
एकादशैव तानि स्युः कार्यस्यैकादशत्वतः ॥ २ ॥
सर्वोत्क्रमः सर्वशब्दाद्ब्रह्मत्वस्य सदा स्थितेः ।
परिच्छिन्नान्येव तानि दूरस्थादर्शनादिभिः ॥ ३ ॥
मुख्योपि जायते प्राणो जन्यवातत्वयोः श्रुतेः ॥ ४ ॥
नेन्द्रियव्यापृतिः प्राणः स्वातन्त्र्येण जनिश्रुतेः ॥ ५ ॥

प्लुषिसाम्यश्रुतेः सूक्ष्मः समष्ट्या व्यापिताश्रुतिः ॥ ६ ॥
देवताप्यक्षनुच्छ्रुत्या मितेरीशाच्च संमतिः ॥ ७ ॥
रूढेर्बलित्वाद्योगेन प्राणो नेन्द्रियमिष्यते ॥ ८ ॥

इति लघुवार्त्तिके तृतीयस्य प्रथमः ।

स्वप्नो मृषा सुप्तहेतोरभावाद्बाधनादपि ॥ १ ॥
नाडीपुरीतदीशानां सुषुप्तौ न विकल्पनम् ॥ २ ॥
उत्तिष्ठेत्सुप्त एवेहाबोधानुस्मृतिदर्शनात् ॥ ३ ॥
भिन्ने स्यातां सुप्तिमूर्छे चिह्नभेदादिदर्शनात् ॥ ४ ॥
विशेषरूपमीशस्य मायिकं श्रुतिबाधनात् ॥ ५ ॥
निषेधसावधित्वाय मूर्तामूर्तं निषिध्यते ॥ ६ ॥
सेत्वादिभ्रंशोऽन्यदीशान्नामितं तस्यानिरूपणात् ॥ ७ ॥
द्वारीकृत्येश्वरप्रीतिं यागादेः फलहेतुता ॥८ अधिकरणानि ॥
इति लघुवार्त्तिके तृतीयस्य द्वितीयः ॥
शाखान्तरेऽप्युपास्त्यैक्यमाख्यादेरविशेषतः ॥ १ ॥
विद्यैक्यादुपसंहार्याः शाखान्तरगता गुणाः ॥ २ ॥
उद्गीथोपासनातोऽन्या स्यादुद्गातुरुपासना ॥ ३ ॥
उद्गीथावयवत्वेन विशिष्टप्रणवस्य धीः ॥ ४ ॥
एकधीयुग्गुणोन्यत्राप्येवंशब्देन गृह्यते ॥ ५ ॥
आनन्दाद्युपसंहार्यं तद्विरोधिभ्रमापनुत् ॥ ६ ॥
असुवृत्तिर्नेन्द्रियाणि कार्यभेदात्पृथक् श्रुतेः ॥ ९ ॥
नामरूपव्याकृदीशस्त्वाजीवाभेदतो भवेत् ॥१०अधिकरणानि॥

इति लघुवार्त्तिके द्वितीयस्य चतुर्थः ॥

भूतैर्वृतो व्रजेज्जीवः केवले गत्ययोगतः ॥ १ ॥
कर्मान्तरेणावरोहेद्रमणीयादिवाक्यतः ॥ २ ॥

पापश्चन्द्रमसं नर्छेत्तृतीयस्थानतोक्तितः ॥ ३ ॥
भूत्वेतिवायुसादृश्यं वदेदैक्यस्य बाधनात् ॥ ४ ॥
न दैर्घ्यं वायुसादृश्ये व्रीह्यादावेव तच्छ्रुतेः ॥ ५ ॥
कर्मोनुक्तजनिर्गौणी नाधर्मोहिंसनं विधेः ॥६ अधिकरणानि ॥
अर्थादयः परत्वेन न चिन्त्या वाक्यभेदतः ॥ ७ ॥
ऐतरेयात्मशब्देन प्रज्ञानं ब्रह्म गम्यते ॥ ८ ॥
सदेवेत्युक्त आत्मा स्यात्स आत्मेत्युपसंहृतेः ॥
आचान्त्यर्थाप्सु वासोधीः प्राणविद्याङ्गमिष्यते ॥ ९ ॥
शाण्डिल्यविद्या त्वेका स्यादारण्यकरहस्ययोः ॥ १० ॥
आदित्याक्षिस्थानभेदादहरादेर्व्यवस्थितिः ॥ ११ ॥
सम्भृत्यादिर्नान्यगामी धीविधिस्तत्र कल्पते ॥ १२ ॥
पुरुषो यज्ञ इत्युक्तात्तैत्तिरीयेऽन्यधीविधिः ॥ १३ ॥
लिङ्गादेः सन्निधिं हित्वा कर्मगे मन्त्रकर्मणी ॥ १४ ॥
हानावुपायनं हार्यं प्रकृष्टस्तुतिलाभतः ॥ १५ ॥
विधूनुत इति त्यागः प्रयोगान्तरसाम्यतः ॥
विद्यैव तत्पदग्राह्या लिङ्गात्पाठस्य बाधनम् ॥ १६ ॥
निर्गुणब्रह्मविदुषोलिङ्गध्वस्तेर्गतिर्नहि ॥ १७ ॥
शाण्डिल्यादिधिया मार्गो हार्यो लिङ्गाच्च वाक्यतः ॥ १८ ॥
प्रारब्धकर्मभोगान्ते मुक्ताः स्युस्त्वाधिकारिकाः ॥ १९ ॥
तत्तदात्मभ्रमोच्छित्त्यै निषेधोपग्रहो भवेत् ॥ २० ॥
ऋतं द्वावितिवाक्याभ्यामेका विद्या विधीयते ॥ २१ ॥
कहोलोपास्तिवाक्याभ्यामेका विद्या तु निर्गुणे ॥ २२ ॥
तद्योहमित्युक्तधियां व्यतिहारेण चिन्तनम् ॥ २३ ॥
स्थानभेदेऽपि सत्यैक्यादेका कल्प्यफला च धीः ॥ २४ ॥
धीभेदेऽपि च कामादेः स्तुत्यर्थमुपसंहृतिः ॥ २५ ॥

अन्यार्थभक्तसंयोगाद्भुज्यभावे तु नाहुतिः ॥ २६ ॥
अङ्गबद्धा तु धीर्नाङ्गफलायैव क्रियात्वतः ॥ २७ ॥
विद्यैक्येऽपि तु संवर्गे प्रयोगोऽन्योऽग्निहोत्रवत् ॥ २८ ॥
मनश्चिदादिविद्यैव श्रुतिवाक्यादिभिर्भवेत् ॥ २९ ॥
देहो नात्मा भौतिकत्वान्मृते चैतन्यहानतः ३० ॥
उद्गीथमात्रे वाक्येन दृष्टिः सन्निधिबाधनात् ॥ ३१ ॥
समस्तस्यैव धीर्वैश्वानरे सर्वफलान्यपि ॥ ३२ ॥
उपास्यैक्ये विधिर्भिन्नास्वोत्पत्तौ गुणभेदतः ॥ ३३ ॥
उपास्यसाक्षात्काराय विकल्पेनेशधीर्भवेत् ॥ ३४ ॥
प्रतीकधीष्वनियमः साक्षात्कारानपेक्षणात् ॥ ३५ ॥
अङ्गबद्धा समुच्चेया नकाम्यत्वादनित्यतः ॥ ३६ अधिकरणानि॥

इति लघुवार्त्तिके तृतीयस्य तृतीयः ॥

मुक्त्यार्था ब्रह्मविद्या स्यान्न कर्माङ्गं विरोधतः ॥ १ ॥
ब्रह्मसंस्थादिके वाक्ये सन्यासे विधिकल्पनम् ॥ २ ॥
यतिरेव ब्रह्मसंस्थस्त्वन्यत्र तदसम्भवात् ॥ ३ ॥
रसानां रस इत्यादिरुपास्यविषयार्पकः ॥ ४ ॥
वेदान्तगाख्यायिकानां न पारिप्लवसङ्ग्रहः ॥ ५ ॥
ब्रह्मविद्याफले मोक्षे नित्ये कर्म न साधनम् ॥ ६ ॥
तद्विद्यायामघध्वंसद्वारा साधनमिष्यते ॥ ७ ॥
सर्वान्नभक्षवादस्तु प्राणधीस्तुतिरिष्यते ॥ ८ ॥
वाक्यद्वयेन यज्ञादेर्नित्यत्वज्ञानहेतुते ॥ ९ ॥
विद्याधिकारी विधुरः पूर्वयज्ञाज्जपादपि ॥ १० ॥
न्यासच्युतकृताद्धीर्न श्रुत्या पातित्यबोधनात् ॥ ११ ॥
नैष्ठिकस्यावाकिरणे गर्दभोनैर्ऋतो भवेत् ॥ १२ ॥

प्रायश्चित्ते कृतेऽप्यत्राशुद्धेर्न व्यवहार्यता ॥ १३ ॥
तं हेतिवाक्यशेषेण चाख्यया‌ऽर्त्विज्यमङ्गधीः ॥ १४ ॥
तद्वाच्योत्कृष्टधीरन्यानवाप्येतिमुनौ विधिः ॥ १५ ॥
ज्ञानाङ्गतोक्तेर्धीशुद्धिर्बाल्यं न स्वेष्टचेष्टनम् ॥ १६ ॥
यज्ञादिसाध्याघध्वस्तेरनैयत्याद्धियोऽपि तत् ॥ १७ ॥
निर्विशेषात्मधीव्यङ्ग्योमोक्षस्तु न विशेषवान्॥१८ अधिकरणानि॥

लघुवार्त्तिके तृतीयस्य चतुर्थः ॥

आवृत्तिः श्रवणादेः स्यात्साक्षात्कारफलत्वतः ॥ १ ॥
गौणी न तत्त्वमित्युक्तिर्विरुद्धानां मृषात्वतः ॥ २ ॥
ब्रह्माभिन्नब्रह्मदृष्टिर्न प्रतीके केवलेशदृक् ॥ ३ ॥
न ब्रह्मणि मनोदृष्टिर्मनसि ब्रह्मदृग्भवेत् ॥ ४ ॥
विद्यया वीर्यवत्त्वोक्तेरङ्गेऽनङ्गदृगिष्यते ॥ ५ ॥
आसीनानामुपासा स्याद्बहुदोषविवर्जनात् ॥ ६ ॥
चित्तैकाग्र्यासम्भवान्न पुण्यदेशाद्यपेक्षणम् ॥ ७ ॥
आमृति स्यात्सगुणधीर्दृष्टेनान्तिमधीजनेः ॥ ८ ॥
ज्ञानादघक्षयः शास्त्रात्प्रायश्चित्ताद्यथा तथा ॥ ९ ॥
उभे तरति शब्देन पुण्यस्यापि धिया क्षयः ॥ १० ॥
धिया प्रारब्धनाशो न जीवन्मुक्तेः श्रुतेर्मितेः ॥ ११ ॥
नित्यकर्मोत्थापि धीस्तज्जातीयस्यापराधिका ॥ १२ ॥
धिया सगुणया नाश्यं कर्म नित्यं तु तत्फले ॥ १३ ॥
वीर्यवत्तरामित्युक्त्या विद्याहीनश्च वीर्यवत् ॥ १४ ॥
आरब्धपाकतो विद्वानन्यदेहोऽपि मुच्यते ॥१५ अधिकरणानि॥

इति लघुवार्त्तिके चतुर्थस्य प्रथमः ॥

सम्पद्यते मनसि वागिति वाग्वृत्तिगो लयः ॥ १ ॥

मनसोऽपि लयः प्राणे मनोवृत्तिलयो भवेत् ॥ २ ॥
तेजसि प्राण इत्यत्र जीवद्वारा तु तेजसि ॥ ३ ॥
उत्क्रान्तिः सगुणज्ञस्य कार्यलोकाप्तिवर्णनात् ॥ ४ ॥
पुनर्जन्मश्रुतेस्तेजः परस्यामिति वृत्तिगा ॥ ५ ॥
निर्विशेषविदो देहान्नोत्क्रान्तिः प्रतिषेधनात् ॥ ६ ॥
विद्वद्दृशा कलानां स्याल्लयः पुरुष एव हि ॥ ७ ॥
निरन्वयो लयस्तासामज्ञानविगमाद्भवेत् ॥ ८ ॥
सगुणज्ञस्य मूर्द्धन्यनाड्यैव सरणं श्रुतेः ॥ ९ ॥
निश्यौष्ण्यदृष्टेस्तत्प्रेतो रश्मीनेत्यविशेषतः ॥ १० ॥
उत्तरायणदेवं स गच्छेत्प्रेतोऽपि दक्षिणे ॥ ११ अधिकरणानि ॥

इति लघुवार्त्तिके चतुर्थस्य द्वितीयः ॥

अर्चिरादिर्मार्ग एको नानापर्वत्वसम्भवात् ॥ १ ॥
वायुरब्दोर्ध्वदेवोर्ध्वस्ततः सूर्यगतिश्रुतेः ॥ २ ॥
विद्युतो वरुणस्तस्मादिन्द्रस्तस्मात्प्रजापतिः ॥ ३ ॥
साम्पिण्डिते गत्ययोगान्नेतारो ह्यर्चिरादयः ॥ ४ ॥
यद्ब्रह्म येन ध्यातन्तं तद्ब्रह्मामानवो नयेत् ॥ ५ ॥
अमानवः पुमान्नैव प्रतीकालम्बनान्नयेत् ॥६ अधिकरणानि ॥

इति लघुवार्त्तिके चतुर्थस्य तृतीयः ॥

स्वेन रूपेण निष्पत्तिर्निर्विशेषस्वरूपतः ॥ १ ॥
ब्रह्मभेदेन निष्पत्तिर्योगानामिव नेष्यते ॥ २ ॥
स्वदृष्ट्या निर्विशेषोऽपि परदृष्ट्येश्वरो भवेत ॥ ३ ॥
सङ्कल्पमात्रात्पित्रादेरुत्थानं श्रुतितो मितेः ॥ ४ ॥
विद्वत्सङ्कल्पतः स्यातामदेहत्वसदेहते ॥ ५ ॥
देहित्वे समनस्कस्य तस्य सङ्कल्पनाद्भुजिः ॥ ६ ॥

नित्यसिद्धेश्वरात्सृष्टिप्रक्रमे विश्रुताज्जगत् ॥७ अधिकरणानि ॥

इति लघुवार्त्तिके चतुर्थस्य चतुर्थः ॥

इत्थमुद्धृत्य वेदान्तमीमांसादुग्धसागरात् ॥
शतश्लोकीसुधासारश्चन्द्रमौलौ समर्पितः ॥ १ ॥
इत्थं जैमिनिबादरायणकृते तन्त्रद्वये ये नयाः
पूर्वाचार्यवरैस्तु शब्दनिवहैः स्पष्टीकृता विस्तरम् ।
ते सङ्क्षिप्य यथामतीह सुगमैः शब्दैः प्रकाशीकृताः
श्रीमाद्रिश्वपतेर्विशालनयनानाथस्य तुष्ट्यै सदा ॥ २ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्द-
मुनिवरकिङ्करेणोत्तमश्लोकयतिना विरचितं
लघुवार्त्तिकं समाप्तम् ।



THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKṚIT WORKS.

Nos. 205, 206, 207, 208, 243, 244, 257, 258, 271, & 272,

बृहदारण्यकवार्त्तिकसारः ।

श्रीमद्विद्यारण्यस्वामिविरचितः ।

महेश्वरतीर्थकृतया लघुसङ्ग्रहाख्यया टीकया समलङ्कृतः ।

श्रीमच्छुद्धानन्दमुनिवरशिष्य श्रीउत्तमश्लोकयतिविरचित

वेदान्तसूत्र लघुवार्त्तिकसहित,

पर्वतीयश्रीमन्नित्यानन्दपण्डितप्रदर्शितरीत्या वझे इत्युपनामकेन

भाऊशास्त्रिणा संशोधितः ।

BRIHADARANYAKAVARTIKASARA

BY VIDYARANYA SWAMI,

WITH A COMMENTARY CALLED LAGHUSANGRAHA BY

MAHESHWAR TIRTH.

and Vedanta Sutra Laghu Vartika

by Sri Uttama Sloka Yati,

A pupil of Sri Mat Suddhanand Muni.

EDITED BY

BHAU SHASTRI VAJHE.

FASCICULUS 1 to x

PUBLISHED & SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKRIT SERIES OFFICE, BENARES.

AGENTS: PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY:

OTTO HARRASSOWITZ, LEIPZIG:

PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press, Benares.

1919

Price Rupees Ten.